| 1 | ब्राह्मणस्य | for a ब्राह्मण (contemplative person) | fr. ब्राह्मण *m. sg. gen.* |
| 4 | सर्वेषु वेदेषु [अर्थः] | [usefulness] in all the वेद [rituals] | fr. सर्व *prn. a. m. pl. loc.* (**4.16.2:**); वेद *m. pl. loc.* |

**कर्मण्येवाधिकारस्ते मा फलेषु कदाचन। मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि॥ ४७॥**

(कर्मणि एव अधिकारः ते, मा फलेषु कदाचन। मा कर्मफलहेतुः भूः, मा ते सङ्गः अस्तु अकर्मणि॥)

कर्मणि एव ते (=तव) अधिकारः (=प्रभुत्वम्), फलेषु मा कदा-चन। कर्म-फल-हेतुः मा भूः [मा मन्यस्व इत्यर्थः]। अ-कर्मणि ते (=तव) सङ्गः मा अस्तु। (**2.47**) You have control only in doing action, never in its results. Do not [think yourself to] be the cause of the results of action [that cause being but the Lord as embodied in the universal laws of कर्मन्]. Nor should you have attachment to inaction.

| | | | |
|---|---|---|---|
| 3 | कर्मणि एव | in doing action only | fr. कर्मन् *n. pl. loc.*; एव *in.* |
| 1 | ते (=तव) | you have | fr. त्वम् *prn. sg. gen.* (**4.2:**) (**7.12.1.a:**) |
| 2 | अधिकारः (=प्रभुत्वम्) | control | fr. अधिकार *m. sg. nom.* |
| 5 | फलेषु | in [its] results | fr. फल *n. pl. loc.* |
| 4 | मा कदा-चन | not ever, never | fr. मा *in.*; कदा-चन *in.* |
| 8 | कर्म-फल- | of the results of action | |
| 7 | -हेतुः | the cause | fr. कर्म-फल-हेतु *m. sg. nom.* |
| 6 | मा भूः | do not [think yourself to] be | fr. मा *in.*; √भू *P. Root Aorist 2nd sg.*(अभूः) (**7.22.4:**) |

| | | | |
|---|---|---|---|
| 12 | अ-कर्मणि | to inaction | fr. अकर्मन् *n. sg. loc.* |
| 10 | ते (=तव) | you have | fr. त्वम् *prn. sg. gen.* (**4.2:**) (**7.12.1.a:**) |
| 11 | सङ्गः | attachment | fr. सङ्ग *m. sg. nom.* |
| 9 | मा अस्तु | nor may, nor should | fr. मा *in.*; √अस् *2.P. impv. 3rd sg.* (**7.24.5:**) |

**योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय। सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते॥४८॥**

(योगस्थः कुरु कर्माणि, सङ्गं त्यक्त्वा धनञ्जय। सिद्ध्यसिद्ध्योः समः भूत्वा, समत्वं योगः उच्यते॥)

धनञ्-जय, [कर्म-फले] सङ्गं त्यक्त्वा, सिद्धि-अ-सिद्ध्योः समः भूत्वा, [एवं] योग-स्थः [सन्], कर्माणि कुरु। [कर्म-फले बुद्धेः] समत्वं योगः उच्यते। (**2.48**) O अर्जुन, being free from attachment [toward anticipated results], [i.e.,] being सम (the same) toward success or failure, established in योग [this attitude], [then] perform action. Sameness [of attitude, बुद्धि, toward results—whatever they are] is called योग.

| | | | |
|---|---|---|---|
| 1 | धनञ्-जय | (अर्जुन) O Winner of Laurels | fr. धन-म्-जय *m. sg. voc.* (**2.55:**) |
| 3 | [कर्म-फले] सङ्गं | attachment [toward the result of actions] | fr. सङ्ग *m. sg. acc.* |
| 2 | त्यक्त्वा | being free from | fr. त्यक्त्वा *in. pt. of* √त्यज् |
| 5 | सिद्धि-अ-सिद्ध्योः | towards success or failure | fr. सिद्धि-असिद्धि *f. du. loc.* (**2.11:** & **2.3:**) |
| 4 | समः भूत्वा | being सम (the same) | fr. सम *a. m. sg. nom.*; भूत्वा *in. pt. of* √भू |
| 6 | [एवं] योग-स्थः [सन्] | [being thus] established in योग | fr. योग-स्थ *a. m. sg. nom.* (**6.24.1:**) |
| 8 | कर्माणि | action(s) | fr. कर्मन् *n. pl. acc.* |
| 7 | कुरु | [then] (you) perform | fr. √कृ *8.P. impv. 2nd sg.* (**5.22.1:**) |
| 9 | [कर्म-फले बुद्धेः] समत्वं | sameness [of attitude towards results of action] | fr. समत्व *n. sg. nom.* |
| 11 | योगः | योग | fr. योग *m. sg. nom.* |
| 10 | उच्यते | is called | fr. √वच् *ps. pr. 3rd sg.* (**5.37.6:** & **2.3.a:**) |

**दूरेण ह्यवरं कर्म बुद्धियोगाद्धनञ्जय। बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः॥४९॥**

(दूरेण हि अवरं कर्म, बुद्धियोगात् धनञ्जय। बुद्धौ शरणम् अन्विच्छ, कृपणाः फलहेतवः॥)

कर्म बुद्धि-योगात् दूरेण हि अवरम्, धनञ्-जय। बुद्धौ शरणम् अन्विच्छ। कृपणाः फल-हेतवः। (**2.49**)

Action [or ritual] [by itself] is indeed far inferior to this बुद्धि-योग (the means which is this attitude), O अर्जुन. Seek refuge in this attitude. Those whose motives are [only for] the results [of action] are misers [i.e., are yet to spend their intellect in motivation for श्रेयस्].

| | | | |
|---|---|---|---|
| 1 | कर्म | action, ritual | fr. कर्मन् *n. sg. nom.* |

| | | | |
|---|---|---|---|
| 4 | बुद्धि-योगात् | to [this] बुद्धि-योग | fr. बुद्धि-योग *m. sg. abl.* (**7.11.2.a:**) |
| 2 | दूरेण हि | [is] far indeed | fr. दूरेण *in.*; हि *in.* |
| 3 | अवरम् | inferior | fr. अवर *a. n. sg. nom.* |
| 5 | धनञ्-जय | (अर्जुन) O Winner of Laurels | fr. धन-म्-जय *m. sg. voc.* (**2.55:**) |
| 8 | बुद्धौ | in [this] attitude | fr. बुद्धि *f. sg. loc.* |
| 7 | शरणम् | refuge | fr. शरण *n. sg. acc.* |
| 6 | अन्विच्छ | seek | fr. अनु + √इष् *6.P. impv.* $2^{nd}$ *sg.* (**5.17.3:**) |
| 11 | कृपणाः | [are] misers | fr. कृपण *m. pl. nom.* |
| 10 | फल- | are the results [of action] | |
| 9 | -हेतवः | those whose motives | fr. फल-हतु *a. m. pl. nom.* |

**बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते। तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम्॥५०॥**

(बुद्धियुक्तः जहाति इह, उभे सुकृतदुष्कृते। तस्मात् योगाय युज्यस्व, योगः कर्मसु कौशलम्॥)

बुद्धि-युक्तः इह उभे सु-कृत-दुष्-कृते जहाति। तस्मात् योगाय युज्यस्व। कर्मसु कौशलं (=यथा-अर्थता) योगः। (**2.50**) Endowed with [this] attitude, one sheds in this world both karmic merit and demerit. Therefore, commit to this योग. Propriety in actions [i.e., acting within धर्म, where the means are as important as the end] is [called] योग.

| | | | |
|---|---|---|---|
| 2 | बुद्धि- | with [this] attitude | |
| 1 | -युक्तः | endowed | fr. बुद्धि-युक्त *a. m. sg. nom.* |
| 4 | इह | in this [world] | fr. इह *in.* |
| 5 | उभे | both | fr. उभ *prn. a. n. du. acc.* (**4.16.b:**) |
| 6 | सु-कृत- | karmic merit | |
| 7 | -दुष्-कृते | and karmic demerit | fr. सु-कृत-दुस्-कृत *n. du. acc.* (दुष्° *before* क् प्) |
| 3 | जहाति | one abandons, one sheds | fr. √हा *3.P. pr.* $3^{rd}$ *sg.* (**5.20.3:** & **.4:**) |
| 8 | तस्मात् | therefore | fr. तस्मात् *in.* |
| 10 | योगाय | to [this] योग | fr. योग *m. sg. dat.* |
| 9 | युज्यस्व | (you) commit | fr. √युज् *ps. impv.* $2^{nd}$ *sg.* |
| 12 | कर्मसु | in actions | fr. कर्मन् *n. pl. loc.* |
| 11 | कौशलं (=यथा-अर्थता) | propriety | fr. कौशल *n. sg. nom.* |
| 13 | योगः | [is] [called] योग | fr. योग *m. sg. nom.* |

**कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः। जन्मबन्धविनिर्मुक्ताः पदं गच्छन्त्यनामयम्॥५१॥**

(कर्मजं बुद्धियुक्ताः हि, फलं त्यक्त्वा मनीषिणः। जन्मबन्धविनिर्मुक्ताः, पदं गच्छन्ति अनामयम्॥)

बुद्धि-युक्ताः हि (=यस्मात्) मनीषिणः कर्म-जं फलं त्यक्त्वा, जन्म-बन्ध-विनिर्मुक्ताः [सन्तः], अन्-आमयं पदं गच्छन्ति। (**2.51**)

—Because, after the wise, endowed with this attitude, discard [the pressure for] result born of action [appreciating धर्म as "to be done," accepting the results gracefully], freed [by knowledge] from the bondage that is birth, they reach the attainment that is free from affliction.

| | | | |
|---|---|---|---|
| 3 | बुद्धि-युक्ताः | endowed with [this] attitude | fr. बुद्धि-युक्त *a. m. pl. nom.* |
| 1 | हि (=यस्मात्) | because | fr. हि *in.* |
| 2 | मनीषिणः | the wise [people] | fr. मनीषिन् *m. pl. nom.* |
| 5 | कर्म-जं फलं | [the pressure for] the result born of action | fr. कर्म-ज *a. n. sg. acc.*; फल *n. sg. acc.* |
| 4 | त्यक्त्वा | after discarding | fr. त्यक्त्वा *in. pt. of* √त्यज् (**2.81:**) |
| 7 | जन्म-बन्ध- | from the bondage that is birth | |
| 6 | -विनिर्मुक्ताः [सन्तः] | [once] freed [by knowledge] | fr. जन्म-बन्ध-विनिर्मुक्त *a. m. pl. nom.* |
| 10 | अन्-आमयं | [that is] free from affliction | fr. अनामय *a. n. sg. acc.* |
| 9 | पदं | the attainment | fr. पद *n. sg. acc.* |
| 8 | गच्छन्ति | go to, reach | fr. √गम् *1.P. pr. 3rd pl.* (**5.15.6:**) |

**यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति। तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च॥५२॥**

(यदा ते मोहकलिलं, बुद्धिः व्यतितरिष्यति। तदा गन्तासि निर्वेदं, श्रोतव्यस्य श्रुतस्य च॥)

यदा ते बुद्धिः मोह-कलिलं व्यतितरिष्यति, तदा श्रुतस्य श्रोतव्यस्य च निर्वेदं गन्तासि। (**2.52**)

When your intellect crosses over the confusion that is delusion, then you will gain a dispassion for what has been heard and is yet to be heard [from the secular and spiritual marketeers].

| | | | |
|---|---|---|---|
| 1 | यदा | when | fr. यदा *in.* |
| 2 | ते बुद्धिः | your intellect | fr. त्वम् *prn. sg. gen.*; बुद्धि *f. sg. nom.* |
| 5 | मोह- | that is delusion | |
| 4 | -कलिलं | the confusion | fr. मोह-कलिल *m. sg. acc.* |
| 3 | व्यतितरिष्यति | crosses over | fr. वि + अति + √तॄ *P. fut. 3rd sg.* (**7.23.2:**) |
| 6 | तदा | then | fr. तदा *in.* |
| 9 | श्रुतस्य | for what has been heard | fr. श्रुत *pp. of* √श्रु *a. n. sg. gen.* |
| 10 | श्रोतव्यस्य च | and for what is yet to be heard | fr. श्रोतव्य *pot. ps. pt. of* √श्रु *a. m. sg. gen.* (**6.8:**); च *in.* |
| 8 | निर्वेदं | a dispassion | fr. निर्वेद *m. sg. acc.* (*fr.* निस् + √विद् लाभे **2.24:** & **2.29:**) |
| 7 | गन्तासि | (you) will gain | fr. √गम् *peri. fut. 2nd sg.* |

**श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला। समाधावचला बुद्धिस्तदा योगमवाप्स्यसि॥ ५३॥**
(श्रुतिविप्रतिपन्ना ते, यदा स्थास्यति निश्चला। समाधौ अचला बुद्धिः, तदा योगम् अवाप्स्यसि॥)
यदा श्रुति-विप्रतिपन्ना ते बुद्धिः निश्-चला स्थास्यति, समाधौ (=आत्मनि) अ-चला, तदा योगम् अवाप्स्यसि। (**2.53**) When your intellect—[previously] distracted by the श्रुति [i.e., the bulk of the वेद-s concerned with providing means for gaining heaven, power, wealth, and progeny]—becomes steady and centered on समाधि (your self), then you will attain योग.

| | | | |
|---|---|---|---|
| 1 | यदा | when | fr. यदा *in.* |
| 3 | श्रुति-विप्रतिपन्ना | [previously] distracted by the श्रुति/scripture | fr. श्रुति-विप्रतिपन्ना *a. f. sg. nom.* |
| 2 | ते बुद्धिः | your intellect | fr. त्वम् *prn. sg. gen.*; बुद्धि *f. sg. nom.* |
| 5 | निश्-चला | steady | fr. निस्-चला *a. f. sg. nom.* (**2.24:** & **2.27:**) |
| 4 | स्थास्यति | becomes | fr. √स्था *P. fut. 3rd sg.* (**7.23.2:**) |
| 7 | समाधौ (=आत्मनि) | on your self | fr. समाधि *f. sg. loc.* |
| 6 | अ-चला | [and] [becomes] firm, centered | fr. अचला *a. f. sg. nom.* |
| 8 | तदा | then | fr. तदा *in.* |
| 10 | योगम् | योग | fr. योग *m. sg. acc.* |
| 9 | अवाप्स्यसि | you will attain | fr. अव + √आप् *P. fut. 2nd sg.* |

**अर्जुन उवाच।**
**स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव। स्थितधीः किं प्रभाषेत किमासीत व्रजेत किम्॥ ५४॥**
(अर्जुनः उवाच। स्थितप्रज्ञस्य का भाषा, समाधिस्थस्य केशव। स्थितधीः किं प्रभाषेत, किम् आसीत व्रजेत किम्॥)
अर्जुनः उवाच। स्थित-प्रज्ञस्य समाधि-स्थस्य का भाषा, केशव। स्थित-धीः किं प्रभाषेत। किम् आसीत। किं व्रजेत। (**2.54**)
अर्जुन said: What is the description of the स्थित-प्रज्ञ (one whose wisdom is firm), who is established within समाधि (the self), O कृष्ण? What would the स्थित-धी (one whose wisdom is firm) speak? How would that one sit? How would that one walk? [Would that one fight a war?].

| | | | |
|---|---|---|---|
| 1 | अर्जुनः उवाच | अर्जुन said: | fr. अर्जुन *m. sg. nom.*; √वच् *P. perf. 3rd sg.* (**5.10.3:**) |
| 4 | स्थित- | is firm | |
| 3 | -प्रज्ञस्य | of the one whose wisdom | fr. स्थित-प्रज्ञ *a. m. sg. gen.* |
| 6 | समाधि- | within समाधि (the self) | |
| 5 | -स्थस्य | who is established | fr. समाधि-स्थ *a. m. sg. gen.* |
| 2 | का भाषा | what [is] the description? | fr. किम् *prn. f. sg. nom.* (**4.12:**); भाषा *f. sg. nom.* |
| 7 | केशव | (कृष्ण) O Destroyer of the Demon केशिन् | fr. केशव *m. sg. voc.* |

| | | | |
|---|---|---|---|
| 9 | स्थित- | is firm | |
| 8 | -धीः | the one whose wisdom | fr. स्थित-धी *a. m. sg. nom.* |
| 10 | किं प्रभाषेत | what/how would [that one] speak? | fr. किम् *prn. n. sg. acc.*; प्र + √भाष् *1.Ā. pot.* $3^{rd}$ *sg.* |
| 11 | किम् आसीत | how would [that one] sit? | fr. किम् *pcl.* (**6.20:**); √आस् *2.Ā. pot.* $3^{rd}$ *sg.* |
| <u>12</u> | किं व्रजेत | how would [that one] walk? | fr. किम् *pcl.*; √व्रज् *1.P.* (*Ā. for meter*) *pot.* $3^{rd}$ *sg.* |

**श्रीभगवानुवाच।**

**प्रजहाति यदा कामान्सर्वान्पार्थ मनोगतान्। आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते॥५५॥**

(श्रीभगवान् उवाच। प्रजहाति यदा कामान्, सर्वान् पार्थ मनोगतान्। आत्मनि एव आत्मना तुष्टः, स्थितप्रज्ञः तदा उच्यते॥)

श्री-भगवान् उवाच। पार्थ, यदा सर्वान् कामान् मनस्-गतान् प्रजहाति, आत्मनि एव आत्मना (=बुद्ध्या) तुष्टः, तदा [सः] स्थित-प्रज्ञः उच्यते। (**2.55**) The Lord said: O अर्जुन, when one abandons all desires [i.e., notional requirements in order to become happy] as they arise in the mind and is happy by oneself [i.e., by an informed intellect], in one's self alone, then that one is called a स्थित-प्रज्ञ (one whose wisdom is firm).

| | | | |
|---|---|---|---|
| 1 | श्री-भगवान् उवाच | the Lord said | fr. श्री-भगवत् *m. sg. nom.*; √वच् *P. perf.* $3^{rd}$ *sg.* (**5.10.3:**) |
| 2 | पार्थ | (अर्जुन) O Son of पृथा | fr. पार्थ *m. sg. voc.* |
| 3 | यदा | when | fr. यदा *in.* |
| 5 | सर्वान् कामान् | all desires [requirements] | fr. सर्व *prn. a. m. pl. acc.* (**4.16.2:**); काम *m. pl. acc.* |
| 6 | मनस्-गतान् | [as they] arise in the mind | fr. मनस्-गत *a. m. pl. acc.* (**2.4:** & **.24:** & **.33:**) |
| 4 | प्रजहाति | [one] abandons | fr. प्र + √हा *3.P. pr.* $3^{rd}$ *sg.* (**5.8.3:**) |
| 9 | आत्मनि एव | in one's self alone | fr. आत्मन् *m. sg. loc.*; एव *in.* |
| 8 | आत्मना | by oneself [by an informed intellect] | fr. आत्मन् *m. sg. inst.* |
| 7 | तुष्टः | [and] is happy, is satisfied | fr. तुष्ट *pp. of* √तुष् *pt. m. sg. nom.* (**2.88:**) |
| 10 | तदा [सः] | then [that one] | fr. तदा *in.* |
| 13 | स्थित- | is firm | |
| 12 | -प्रज्ञः | one whose wisdom | fr. स्थित-प्रज्ञ *a. m. sg. nom.* |
| <u>11</u> | उच्यते | is called | fr. √वच् *ps. pr.* $3^{rd}$ *sg.* (**5.37.6:** & **2.3.a:**) |

**दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः। वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते॥५६॥**

(दुःखेषु अनुद्विग्नमनाः, सुखेषु विगतस्पृहः। वीतरागभयक्रोधः, स्थितधीः मुनिः उच्यते॥)

दुःखेषु अन्-उद्विग्न-मनाः सुखेषु विगत-स्पृहः वीत-राग-भय-क्रोधः मुनिः स्थित-धीः उच्यते। (**2.56**)

The one whose mind is not afflicted in adversities, who has no longing in pleasures, and who is free from राग (attraction), fear, and anger, [that] wise person is called स्थित-धी (one whose wisdom is firm).

| | | | |
|---|---|---|---|
| 3 | दुःखेषु | in adversities | fr. दुःख *n. pl. loc.* |
| 2 | अन्-उद्विग्न- | is not afflicted | |
| 1 | -मनाः | whose mind | fr. अनुद्विग्न-मनस् *a. m. sg. nom.* |
| 6 | सुखेषु | in pleasures | fr. सुख *n. pl. loc.* |
| 4 | विगत- | who has no | |
| 5 | -स्पृहः | longing | fr. विगत-स्पृह *a. m. sg. nom.* (**3.6.i:**) |
| 7 | वीत- | free from | |
| 8 | -राग-भय-क्रोधः | attraction fear [and] anger | fr. वीत-राग-भय-क्रोध *a. m. sg. nom.* |
| 9 | मुनिः | [that] wise person | fr. मुनि *m. sg. nom.* |
| 11 | स्थित-धीः | one whose wisdom is firm | fr. स्थित-धी *a. m. sg. nom.* |
| 10 | उच्यते | is called | fr. √वच् *ps. pr. 3rd sg.* (**5.37.6:** & **2.3.a:**) |

**यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभम्। नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता॥५७॥**

(यः सर्वत्र अनभिस्नेहः, तद् तद् प्राप्य शुभाशुभम्। न अभिनन्दति न द्वेष्टि, तस्य प्रज्ञा प्रतिष्ठिता॥)

यः सर्वत्र अन्-अभिस्नेहः तद् तद् शुभ-अ-शुभं प्राप्य न अभिनन्दति न द्वेष्टि, तस्य प्रज्ञा प्रतिष्ठिता। (**2.57**)

The one who is unattached in all situations, who neither rejoices on getting anything pleasant, nor hates getting anything unpleasant—that one's wisdom is firm.

| | | | |
|---|---|---|---|
| 1 | यः | the one who | fr. यद् *prn. m. sg. nom.* (**4.11:**) |
| 3 | सर्वत्र | in all [situations] | fr. सर्वत्र *in.* (**6.19:**) |
| 2 | अन्-अभिस्नेहः | [is] unattached | fr. अनभिस्नेह *a. m. sg. nom.* |
| 7 | तद् तद् | anything | fr. तद् *prn. n. sg. acc.* (**7.6.B.2.e:**) |
| 8 | शुभ-अ-शुभं | pleasant or unpleasant | fr. शुभ-अशुभ *a. n. sg. acc.* (**2.7:**) |
| 6 | प्राप्य | [on] getting | fr. प्राप्य *in. pt. of* प्र + √आप् (**7.19.2:**) |
| 4 | न अभिनन्दति | who neither rejoices | fr. न *in.*; अभि + √नन्द् *1.P. pr. 3rd sg.* |
| 5 | न द्वेष्टि | nor hates | fr. न *in.*; √द्विष् *2.P. pr. 3rd sg.* (**2.88:**) |

| | | | |
|---|---|---|---|
| 9 | तस्य प्रज्ञा | that one's wisdom | fr. तद् *prn. m. sg. gen.*; प्रज्ञा *f. sg. nom.* |
| 10 | प्रतिष्ठिता | is firm | fr. प्रतिष्ठिता *pp. of* प्रति + √स्था *pt. f. sg. nom.* (**6.6:** & **2.101:** & **7.17.1:**) |

**यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः। इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता॥५८॥**

(यदा संहरते च अयं, कूर्मः अङ्गानि इव सर्वशः। इन्द्रियाणि इन्द्रियार्थेभ्यः, तस्य प्रज्ञा प्रतिष्ठिता॥)

यदा च अयं, कूर्मः अङ्गानि इव, इन्द्रिय-अर्थेभ्यः इन्द्रियाणि सर्वशः संहरते [संहर्तुम् अर्हति इत्यर्थः], तस्य प्रज्ञा प्रतिष्ठिता। (**2.58**)

When, like a turtle and its limbs, one is [at will able] to completely withdraw the senses from their sense pursuits [and again extend them out at will], that one's wisdom is firm.

| | | | |
|---|---|---|---|
| 1 | यदा च | [and] when | fr. यदा *in.*; च *in.* |
| 5 | अयं | one | fr. इदम् *prn. m. sg. nom.* |
| 3 | कूर्मः | a turtle | fr. कूर्म *m. sg. nom.* |
| 4 | अङ्गानि | [can withdraw] [its] limbs | fr. अङ्ग *n. pl. acc.* |
| 2 | इव | like | fr. इव *in.* |
| 9 | इन्द्रिय-अर्थेभ्यः | from [their] sense pursuits | fr. इन्द्रिय-अर्थ *m. pl. abl.* (**2.7:**) |
| 8 | इन्द्रियाणि | the senses | fr. इन्द्रिय *n. pl. acc.* |
| 7 | सर्वशः | completely | fr. सर्वशस् *in.* (**6.19:**) |
| 6 | संहरते [संहर्तुम् अर्हति इत्यर्थः] | withdraws [i.e., is able to withdraw] | fr. सम् + √हृ *1.Ā. pr. 3rd sg.* |
| 10 | तस्य प्रज्ञा | that one's wisdom | fr. तद् *prn. m. sg. gen.*; प्रज्ञा *f. sg. nom.* |
| 11 | प्रतिष्ठिता | is firm | fr. प्रतिष्ठिता *pp. of* प्रति + √स्था *a. f. sg. nom.* (**6.6:** & **2.101:**) |

**विषया विनिवर्तन्ते निराहारस्य देहिनः। रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते॥५९॥**

(विषयाः विनिवर्तन्ते, निराहारस्य देहिनः। रसवर्जं रसः अपि अस्य, परं दृष्ट्वा निवर्तते॥)

निर्-आहारस्य देहिनः विषयाः रस-वर्जं विनिवर्तन्ते। परं दृष्ट्वा अस्य रसः अपि निवर्तते। (**2.59**)

For the embodied one who does not feed [i.e., does not indulge the senses], the objects turn back [i.e., are not pursued], [but] the longing remains. Knowing the पर [i.e., ब्रह्मन्/reality], even one's longing ceases.

| | | | |
|---|---|---|---|
| 2 | निर्-आहारस्य | who does not feed [i.e., indulge the senses] | fr. निस्-आहार *a. m. sg. gen.* (**2.24:** & **.29:**) |
| 1 | देहिनः | for the embodied one | fr. देहिन् *a. m. sg. gen.* |
| 3 | विषयाः | the objects | fr. विषय *m. pl. nom.* |
| 5 | रस- | [but] the longing | |
| 6 | -वर्जं | remains | fr. रस-वर्जम् *in.* |
| 4 | विनिवर्तन्ते | turn back [i.e., are not pursued] | fr. वि + नि + √वृत् *1.Ā. pr. 3rd pl.* |

| | | | |
|---|---|---|---|
| 7 | परं दृष्ट्वा | knowing the पर [i.e. ब्रह्मन्/reality] | fr. पर *n. sg. acc.* (**4.16.3:**); दृष्ट्वा *in. pt. of* √दृश् |
| 8 | अस्य रसः अपि | even one's longing | fr. इदम् *prn. m. sg. gen.* (**4.8:**); रस *m. sg. nom.*; अपि *in.* |
| 9 | निवर्तते | ceases | fr. नि + √वृत् *1.Ā. pr. 3rd sg.* |

**यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः। इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः॥६०॥**

(यततः हि अपि कौन्तेय, पुरुषस्य विपश्चितः। इन्द्रियाणि प्रमाथीनि, हरन्ति प्रसभं मनः॥)

कौन्तेय, विपश्चितः हि (=यस्मात्) पुरुषस्य यततः अपि, प्रमाथीनि इन्द्रियाणि मनः प्रसभं हरन्ति। (**2.60**)
—Because, O अर्जुन, even though a discerning person puts forth effort, the distracting senses forcefully take away the mind.

| | | | |
|---|---|---|---|
| 2 | कौन्तेय | (अर्जुन) O Son of कुन्ती | fr. कौन्तेय *m. sg. voc.* |
| 4 | विपश्चितः | a discerning | fr. विपश्चित् *a. m. sg. gen.* |
| 1 | हि (=यस्मात्) | because | fr. हि *in.* |
| 5 | पुरुषस्य | person | fr. पुरुष *m. sg. gen.* |
| 6 | यततः | [is] putting forth effort | fr. यतत् *pr. pt. of* √यत् *1.U. pt. m. sg. gen.* (**7.14.2:**) |
| 3 | अपि | even though | fr. अपि *in.* |
| 7 | प्रमाथीनि इन्द्रियाणि | [the five] distracting senses | fr. प्रमाथिन् *a. n. pl. nom.*; इन्द्रिय *n. pl. nom.* |
| 9 | मनः | the mind | fr. मनस् *n. sg. acc.* |
| 8 | प्रसभं हरन्ति | forcefully take away | fr. प्रसभम् *in.*; √हृ *1.P. pr. 3rd pl.* |

**तानि सर्वाणि संयम्य युक्त आसीत मत्परः। वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता॥६१॥**

(तानि सर्वाणि संयम्य, युक्तः आसीत मत्परः। वशे हि यस्य इन्द्रियाणि, तस्य प्रज्ञा प्रतिष्ठिता॥)

[यतः तस्मात्] तानि सर्वाणि [इन्द्रियाणि] संयम्य युक्तः मत्-परः आसीत। यस्य हि इन्द्रियाणि [संस्कृत-बुद्धेः see भ॰गी॰३.४२-३] वशे, तस्य प्रज्ञा प्रतिष्ठिता। (**2.61**) Mastering all those [senses], the one who is disciplined should remain with Me [the Lord, reality] as the पर (highest, the limitless). For the one whose senses are indeed under authority [of an informed intellect], wisdom is firm.

| | | | |
|---|---|---|---|
| 1 | [यतः] [तस्मात्] | [because of this] [therefore] | |
| 3 | तानि सर्वाणि [इन्द्रियाणि] | all those [senses] | fr. तद् *prn. n. pl. acc.*; सर्व *prn. a. n. pl. acc.* (**4.16.2:**) |
| 2 | संयम्य | mastering | fr. संयम्य *in. pt. of* सम् + √यम् (**2.54:**) |
| 4 | युक्तः | [the one] who is disciplined | fr. युक्त *pp. of* √युज् *a. m. sg. nom.* (**2.81:**) |
| 6 | मत्- | with Me [the Lord, reality] | |
| 7 | -परः | as the highest [the limitless] | fr. मद्-पर *a. m. sg. nom.* (**2.24:**) |
| 5 | आसीत | should remain | fr. √आस् *2.Ā. pot. 3rd sg.* |

| | | | |
|---|---|---|---|
| 9 | यस्य हि | indeed whose | fr. यद् *prn. m. sg. gen.* (**4.11:**); हि *in.* |
| 10 | इन्द्रियाणि | [five] senses | fr. इन्द्रिय *n. pl. nom.* |
| 11 | [संस्कृत-बुद्धेः] वशे | [are] under authority [of an informed intellect] | fr. वश *m. sg. loc.* |
| 8 | तस्य | for the one | fr. तद् *prn. m. sg. gen.* (**4.6:**) |
| 12 | प्रज्ञा | wisdom | fr. प्रज्ञा *f. sg. nom.* |
| 13 | प्रतिष्ठिता | is firm | fr. प्रतिष्ठिता *pp. of* प्रति + √स्था *a. f. sg. nom.* (**6.6: & 2.101:**) |

**ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते। सङ्गात्सञ्जायते कामः कामात्क्रोधोऽभिजायते॥६२॥**
**क्रोधाद्भवति सम्मोहः सम्मोहात्स्मृतिविभ्रमः। स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति॥६३॥**

(ध्यायतः विषयान् पुंसः, सङ्गः तेषु उपजायते। सङ्गात् सञ्जायते कामः, कामात् क्रोधः अभिजायते॥
क्रोधात् भवति सम्मोहः, सम्मोहात् स्मृतिविभ्रमः। स्मृतिभ्रंशात् बुद्धिनाशः, बुद्धिनाशात् प्रणश्यति॥)

विषयान् ध्यायतः पुंसः तेषु सङ्गः उपजायते, सङ्गात् कामः सञ्जायते, कामात् क्रोधः अभिजायते, क्रोधात् सम्मोहः भवति, सम्मोहात् स्मृति-विभ्रमः [भवति], स्मृति-भ्रंशात् बुद्धि-नाशः [भवति], बुद्धि-नाशात् [पुमान्] प्रणश्यति। (**2.62-63**) For a person who mentally dwells on objects, attachment to them arises; from attachment [allowed to flame up by one's value structure] arises [binding] desire [i.e., requirements (in order to be happy) and anticipations (of their fruition)]; from [thwarted] anticipations arises anger; from anger is delusion [i.e., error in judgment]; from delusion is lapse of memory [i.e., what has been taught]; from lapse of memory is lapse of intellect [i.e., wisdom]; from lapse of intellect [i.e., what distinguishes the human condition] the person is destroyed [i.e., the unique human opportunity to attain श्रेयस् is completely wasted, and the person remains in संसार/the life of becoming].

| | | | |
|---|---|---|---|
| 3 | विषयान् | on objects | fr. विषय *m. pl. acc.* |
| 2 | ध्यायतः | [who is] mentally dwelling | fr. ध्यायत् *pr. pt. of* √ध्यै *1.P. pt. m. sg. gen.* |
| 1 | पुंसः | for a person | fr. पुमंस् *m. sg. gen.* (**3.26:**) |
| 5 | तेषु | towards them | fr. तद् *prn. m. pl. loc.* (**7.13.2.c:**) |
| 4 | सङ्गः | attachment | fr. सङ्ग *m. sg. nom.* |
| 6 | उपजायते | arises | fr. उप + √जन् *4.Ā. pr. 3rd sg.* (**5.16.4:**) |
| 7 | सङ्गात् | from attachment | fr. सङ्ग *m. sg. abl.* |
| 9 | कामः | desire [i.e., requirements and anticipations] | fr. काम *m. sg. nom.* |
| 8 | सञ्जायते | arises | fr. सम् + √जन् *4.Ā. pr. 3rd sg.* (**5.16.4: & 2.55:**) |
| 10 | कामात् | from [thwarted] anticipations | fr. काम *m. sg. abl.* |
| 12 | क्रोधः | anger | fr. क्रोध *m. sg. nom.* |
| 11 | अभिजायते | arises | fr. अभि + √जन् *4.Ā. pr. 3rd sg.* (**5.16.4:**) |

| | | |
|---|---|---|
| 13 क्रोधात् | from anger | fr. क्रोध *m. sg. abl.* |
| 14 सम्मोहः भवति | is delusion [i.e., error in judgment] | fr. सम्मोह *m. sg. nom.*; √भू *1.P. pr. 3rd sg.* |
| 15 सम्मोहात् | from delusion | fr. सम्मोह *m. sg. abl.* |
| 17 स्मृति- | of memory [i.e., what had been taught] | |
| 16 -विभ्रमः [भवति] | [is] lapse | fr. स्मृति-विभ्रम *m. sg. nom.* |
| 18 स्मृति-भ्रंशात् | from lapse of memory | fr. स्मृति-भ्रंश *m. sg. abl.* |
| 20 बुद्धि- | of intellect [i.e., wisdom] | |
| 19 -नाशः [भवति] | [is] lapse | fr. बुद्धि-नाश *m. sg. nom.* |
| 21 बुद्धि-नाशात् | from lapse of intellect | fr. बुद्धि-नाश *m. sg. abl.* |
| 22 [पुमान्] प्रणश्यति | [the person] is destroyed | fr. प्र + √नश् *4.P. pr. 3rd sg.* (**2.101:**) |

**रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन्। आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति॥६४॥**

(रागद्वेषवियुक्तैः तु, विषयान् इन्द्रियैः चरन्। आत्मवश्यैः विधेयात्मा, प्रसादम् अधिगच्छति॥)

राग-द्वेष-वियुक्तैः तु आत्म-वश्यैः इन्द्रियैः विषयान् चरन्, विधेय-आत्मा (=वश्य-अन्तः-करणः) प्रसादम् (=शान्तिम्) अधिगच्छति।

(**2.64**) —Whereas, moving among the objects with the senses under authority of the intellect and freed from [being overpowered by] राग-द्वेष (attraction and repulsion—*see* 3.34), the one whose mind is disciplined attains clarity.

| | | |
|---|---|---|
| 7 राग- | attraction | |
| 8 -द्वेष- | and repulsion | |
| 6 -वियुक्तैः | freed from [being overpowered by] | fr. राग-द्वेष-वियुक्त *a. n. pl. inst.* |
| 1 तु | whereas | fr. तु *in.* |
| 5 आत्म-वश्यैः | under authority of the intellect | fr. आत्म-वश्य *a. n. pl. inst.* |
| 4 इन्द्रियैः | with the senses | fr. इन्द्रिय *n. pl. inst.* |
| 3 विषयान् | among the objects | fr. विषय *m. pl. acc.* |
| 2 चरन् | moving | fr. चरत् *pr. pt. of* √चर् *1.P. pt. m. sg. nom.* |
| 10 विधेय- | is disciplined | |
| 9 -आत्मा | the one whose mind | fr. विधेय-आत्मन् *a. m. sg. nom.* (**2.7:**) |
| 12 प्रसादम् (=शान्तिम्) | clarity | fr. प्रसाद *m. sg. acc.* |
| 11 अधिगच्छति | attains | fr. अधि + √गम् *1.P. pr. 3rd sg.* (**5.15.6:**) |

**प्रसादे सर्वदुःखानां हानिरस्योपजायते। प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते॥ ६५॥**

(प्रसादे सर्वदुःखानां, हानिः अस्य उपजायते। प्रसन्नचेतसः हि आशु, बुद्धिः पर्यवतिष्ठते॥)

प्रसादे [सति] अस्य सर्व-दुःखानां हानिः उपजायते, प्रसन्न-चेतसः हि (=यस्मात्) बुद्धिः आशु पर्यवतिष्ठते। (**2.65**)

When there is clarity, there comes the destruction of all one's sorrows [in the form of guilt and hurt] because, for the one whose mind is clear, the [self-]knowledge [which destroys the sorrow] quickly becomes firm.

| | | | |
|---|---|---|---|
| 1 | प्रसादे [सति] | when [there is] clarity | fr. प्रसाद *m. sg. loc.* (**7.14.1.a:**) |
| 4 | अस्य सर्व-दुःखानां | of all one's sorrows | fr. इदम् *prn. m. sg. gen.*; सर्व-दुःख *n. pl. gen.* |
| 3 | हानिः | abandonment, destruction | fr. हानि *f. sg. nom.* |
| 2 | उपजायते | [there] arises, comes | fr. उप + √जन् *4.Ā. pr. 3rd sg.* |
| 7 | प्रसन्न- | is clear | |
| 6 | -चेतसः | for the one whose mind | fr. प्रसन्न-चेतस् *a. m. sg. gen.* |
| 5 | हि (=यस्मात्) | because | fr. हि *in.* |
| 8 | बुद्धिः | [self-]knowledge | fr. बुद्धि *f. sg. nom.* |
| 9 | आशु | quickly | fr. आशु *in.* |
| 10 | पर्यवतिष्ठते | becomes firm | fr. परि + अव + √स्था *1.Ā. pr. 3rd sg.* (**5.15.4:**) |

**नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना। न चाभावयतः शान्तिरशान्तस्य कुतः सुखम्॥ ६६॥**

(न अस्ति बुद्धिः अयुक्तस्य, न च अयुक्तस्य भावना। न च अभावयतः शान्तिः, अशान्तस्य कुतः सुखम्॥)

अ-युक्तस्य बुद्धिः न अस्ति, न च अ-युक्तस्य भावना (=धारणम्)। न च अ-भावयतः शान्तिः। अ-शान्तस्य कुतः सुखम्। (**2.66**)

For the one who is not disciplined, knowledge is not there, nor contemplation. For the noncontemplative, there is no clarity. For the nonclear, how can there be [the appreciation of the] सुख (fulfillment that is the nature of the limitless self, known as I)?

| | | | |
|---|---|---|---|
| 1 | अ-युक्तस्य | for the one who is not disciplined | fr. अयुक्त *pp. of* √युज् *a. m. sg. gen.* (**2.81:**) |
| 2 | बुद्धिः | knowledge | fr. बुद्धि *f. sg. nom.* |
| 3 | न अस्ति | is not [there] | fr. न *in.*; √अस् *2.P. pr. 3rd sg.* |
| 4 | न च | nor | fr. न *in.*; च *in.* |
| 5 | अ-युक्तस्य | [for the one who is not disciplined] | fr. अयुक्त *pp. of* √युज् *a. m. sg. gen.* (**2.81:**) |
| 6 | भावना (=धारणम्) | contemplation | fr. भावना *f. sg. nom.* |

| | | | |
|---|---|---|---|
| 8 | न च | nor, there is no | fr. न *in.*; च *in.* |
| 7 | अ-भावयतः | for the non-contemplative | fr. अभावयत् *pr. pt. of cs.* √भू *1.P. m. sg. gen.* (**5.40:**) |
| 9 | शान्तिः | clarity | fr. शान्ति *f. sg. nom.* |
| 10 | अ-शान्तस्य | for the non-clear | fr. अशान्त *pp. of* √शम् *a. m. sg. gen.* (**6.6:** *irreg.* & **2.55:**) |
| 11 | कुतः | how [can there be]? | fr. कुतस् *in.* (**6.19:**) |
| 12 | सुखम् | [the appreciation of the] fulfillment | fr. सुख *n. sg. nom.* |

**इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते। तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि॥६७॥**

(इन्द्रियाणां हि चरतां, यद् मनः अनुविधीयते। तद् अस्य हरति प्रज्ञां, वायुः नावम् इव अम्भसि॥)

यद् मनः हि (=यस्मात्) चरताम् इन्द्रियाणाम् अनुविधीयते, तद् [मनः] अस्य प्रज्ञां हरति, वायुः अम्भसि नावम् इव [हरति]। (**2.67**)

—Because, that very mind, which follows after the roaming senses, takes away one's wisdom, like the wind [takes away] a small boat on the water.

| | | | |
|---|---|---|---|
| 3 | यद् मनः | [very same] mind which | fr. यद् *prn. n. sg. nom.*; मनस् *n. sg. nom.* |
| 1 | हि (=यस्मात्) | because | fr. हि *in.* |
| 5 | चरताम् | [of] the roaming | fr. चरत् *pr. pt. of* √चर् *1.P. a. n. pl. gen.* |
| 6 | इन्द्रियाणाम् | senses | fr. इन्द्रिय *n. pl. gen.* |
| 4 | अनुविधीयते | does the following, follows after | fr. अनु + वि + √धा *ps. pr. 3rd sg.* (**5.37.1:**) |
| 2 | तद् [मनः] | that | fr. तद् *prn. n. sg. nom.* |
| 8 | अस्य प्रज्ञां | one's wisdom | fr. इदम् *prn. m. sg. gen.* (**4.8:**); प्रज्ञा *f. sg. acc.* |
| 7 | हरति | takes away | fr. √हृ *1.P. pr. 3rd sg.* |
| 10 | वायुः | the wind [takes away] | fr. वायु *m. sg. nom.* |
| 12 | अम्भसि | on the water | fr. अम्भस् *n. sg. loc.* |
| 11 | नावम् | a small boat | fr. नौ *f. sg. acc.* |
| 9 | इव | like, similar to | fr. इव *in.* |

**तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः। इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता॥६८॥**

(तस्मात् यस्य महाबाहो, निगृहीतानि सर्वशः। इन्द्रियाणि इन्द्रियार्थेभ्यः, तस्य प्रज्ञा प्रतिष्ठिता॥)

महा-बाहो, तस्मात् यस्य इन्द्रियाणि इन्द्रिय-अर्थेभ्यः सर्वशः निगृहीतानि [निगृहीतुम् अर्ह्यन्ते इत्यर्थः], तस्य प्रज्ञा प्रतिष्ठिता। (**2.68**)

Therefore, O अर्जुन, the one whose senses [under authority of the intellect] are [or rather, are capable of being] completely withdrawn from the sense pursuits—that one has wisdom that is firm.

| | | | |
|---|---|---|---|
| 2 | महा-बाहो | (अर्जुन) O Mighty Armed One | fr. महा-बाहु *m. sg. voc.* |
| 1 | तस्मात् | therefore | fr. तस्मात् *in.* |
| 3 | यस्य इन्द्रियाणि | the one whose senses [are] | fr. यद् *prn. m. sg. gen.*; इन्द्रिय *n. pl. nom.* |
| 6 | इन्द्रिय-अर्थेभ्यः | from the sense pursuits | fr. इन्द्रिय-अर्थ *m. pl. abl.* (**2.7:**) |
| 4 | सर्वशः | completely | fr. सर्वशस् *in.* |
| 5 | निगृहीतानि [निगृहीतुम् अर्ह्यन्ते इत्यर्थः] | withdrawn [i.e., are able to be withdrawn] | fr. निगृहीत *pp. of* नि + √ग्रह् *a. n. pl. nom.* (**6.6:**) |
| 7 | तस्य प्रज्ञा | that one has wisdom | fr. तद् *prn. m. sg. gen.*; प्रज्ञा *f. sg. nom.* |
| 8 | प्रतिष्ठिता | [that] is firm | fr. प्रतिष्ठिता *pp. of* प्रति + √स्था *a. f. sg. nom.* (**6.6: & 2.101:**) |

**या निशा सर्वभूतानां तस्यां जागर्ति संयमी। यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः॥६९॥**

(या निशा सर्वभूतानां, तस्यां जागर्ति संयमी। यस्यां जाग्रति भूतानि, सा निशा पश्यतः मुनेः॥)

या सर्व-भूतानां निशा [इव], तस्यां संयमी [मुनिः] जागर्ति। यस्यां भूतानि जाग्रति, सा [सद्-वस्तु] पश्यतः मुनेः निशा [इव]। (**2.69**)

What is [like] night for all beings, in that the [wise who is] disciplined is awake. In what [it is that] beings are awake to, that is [like] night for the wise one who sees clearly [i.e., the wise are awake to सत्, reality, and others are only awake to what they believe is reality, but is असत्, unreal].

| | | | |
|---|---|---|---|
| 1 | या | what [the truth, विद्या] | fr. यद् *prn. f. sg. nom.* (**4.11:**) |
| 3 | सर्व-भूतानां | for all beings | fr. सर्व-भूत *pp. of* √भू *n. pl. gen.* |
| 2 | निशा [इव] | is [like] night | fr. निशा *f. sg. nom.* |
| 4 | तस्यां | in that | fr. तद् *prn. f. sg. loc.* |
| 5 | संयमी [मुनिः] | the [wise one who is] disciplined | fr. संयमिन् *a. m. sg. nom.* |
| 6 | जागर्ति | is awake | fr. √जागृ *2.P. pr. 3rd sg.* |
| 7 | यस्यां | in what [the untruth, अविद्या] | fr. यद् *prn. f. sg. loc.* |
| 8 | भूतानि | beings | fr. भूत *pp. of* √भू *n. pl. nom.* |
| 9 | जाग्रति | are awake | fr. √जागृ *2.P. pr. 3rd pl.* (**5.19.10:**) |

| | | | |
|---|---|---|---|
| 10 | सा | that | fr. तद् *prn. f. sg. nom.* (**4.6:**) |
| 13 | [सद्-वस्तु] पश्यतः | who sees clearly [the real] | fr. पश्यत् *pr. pt. of* √दृश् *1.P. a. m. sg. gen.* (**5.15.6:**) |
| 12 | मुनेः | for the wise one | fr. मुनि *m. sg. gen.* |
| 11 | निशा [इव] | [is] [like] night | fr. निशा *f. sg. nom.* |

**आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशन्ति यद्वत्।**
**तद्वत्कामा यं प्रविशन्ति सर्वे स शान्तिमाप्नोति न कामकामी॥७०॥**

(आपूर्यमाणम् अचलप्रतिष्ठं, समुद्रम् आपः प्रविशन्ति यद्वत्। तद्वत् कामाः यं प्रविशन्ति सर्वे, सः शान्तिम् आप्नोति न कामकामी॥)

यद्वत् आपः आपूर्यमाणम् [स्वरूपतः] अ-चल-प्रतिष्ठं समुद्रं प्रविशन्ति, तद्वत् सर्वे कामाः यं प्रविशन्ति — सः शान्तिम् आप्नोति, न काम-कामी। (**2.70**) Like the full and unmoved ocean into which the waters [their source being the ocean] enter [yet whose nature is unaffected by their variations], the one whom all objects of desire enter [yet remains the same in nature]—that one gains peace. Not [so] the one who requires/anticipates these objects [like a small pond requires its streams].

| | | | |
|---|---|---|---|
| 1 | यद्वत् | like | fr. यद्वत् *in.* |
| 5 | आपः | the waters | fr. अप् *f. pl. nom.* (**3.16:**) |
| 2 | आपूर्यमाणम् | being completely filled, the full | fr. आपूर्यमाण *pr. ps. pt. of* आ + √पॄ *a. m. sg. acc.* (**5.37.4:**) |
| 3 | अ-चल-प्रतिष्ठं | [and] unmoved | fr. अचल-प्रतिष्ठ *a. m. sg. acc.* |
| 4 | समुद्रं | ocean [into which] | fr. समुद्र *m. sg. acc.* |
| 6 | प्रविशन्ति | enter | fr. प्र + √विश् *6.P. pr. 3rd pl.* |
| 7 | तद्वत् | similarly [remaining the same in nature] | fr. तद्वत् *in.* |
| 9 | सर्वे कामाः | all objects of desire | fr. सर्व *prn. a. m. pl. nom.* (**4.16.2:**); काम *m. pl. nom.* |
| 8 | यं | the one [into] whom | fr. यद् *prn. m. sg. acc.* |
| 10 | प्रविशन्ति | enter [without disturbing] | fr. प्र + √विश् *6.P. pr. 3rd pl.* |
| 11 | सः | that one | fr. तद् *prn. m. sg. nom.* |
| 13 | शान्तिम् | peace | fr. शान्ति *f. sg. acc.* |
| 12 | आप्नोति | gains | fr. √आप् *5.P. pr. 3rd sg.* |
| 14 | न | not | fr. न *in.* |
| 16 | काम- | objects [of desire] | |
| 15 | -कामी | the one who requires/anticipates | fr. काम-कामिन् *a. m. sg. nom.* |

**विहाय कामान्यः सर्वान्पुमांश्चरति निःस्पृहः। निर्ममो निरहङ्कारः स शान्तिमधिगच्छति॥७१॥**

(विहाय कामान् यः सर्वान्, पुमान् चरति निःस्पृहः। निर्ममः निरहङ्कारः, सः शान्तिम् अधिगच्छति॥)

सर्वान् कामान् विहाय, यः पुमान् निः-स्पृहः निर्-ममः निर्-अहङ्-कारः चरति, सः शान्तिम् अधिगच्छति। (**2.71**) Giving up all [binding] desires [i.e., requirements/anticipations], the person who moves about free from longing, free from [the judgment] "this is mine" and free from [the judgment] "I [am only this much]"—that [person] attains peace.

| | | | |
|---|---|---|---|
| 2 | सर्वान् कामान् | all [binding] desires | fr. सर्व *prn. a. m. pl. acc.* (**4.16.2:**); काम *m. pl. acc.* |
| 1 | विहाय | giving up | fr. विहाय *in. pt. of* वि + √हा |
| 3 | यः पुमान् | the person who | fr. यद् *prn. m. sg. nom.*; पुमंस् *m. sg. nom.* (**3.26:**) |
| 5 | निः-स्पृहः | free from longing | fr. निस्-स्पृह *a. m. sg. nom.* (**2.24:** & **.28:**) |
| 6 | निर्-ममः | free from [the judgment] "this is mine" | fr. निस्-ममस् *a. m. sg. nom.* (**2.29:**) |
| 7 | निर्-अहङ्-कारः | free from [the judgment] "I [am only this much]" | fr. निस्-अहङ्कार *a. m. sg. nom.* (**2.29:**) |
| 4 | चरति | moves about | fr. √चर् *1.P. pr. 3rd sg.* |
| 8 | सः | that [person] | fr. तद् *prn. m. sg. nom.* |
| 10 | शान्तिम् | peace | fr. शान्ति *f. sg. acc.* |
| 9 | अधिगच्छति | attains | fr. अधि + √गम् *1.P. pr. 3rd sg.* (**5.15.6:**) |

**एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति। स्थित्वास्यामन्तकालेऽपि ब्रह्मनिर्वाणमृच्छति॥७२॥**

(एषा ब्राह्मी स्थितिः पार्थ, न एनां प्राप्य विमुह्यति। स्थित्वा अस्याम् अन्तकाले अपि, ब्रह्मनिर्वाणम् ऋच्छति॥)

एषा ब्राह्मी (=ब्रह्मणि अधिष्ठिता) स्थितिः, पार्थ। प्राप्य एनां, न विमुह्यति। अन्त-काले अपि अस्यां स्थित्वा ब्रह्म-निर्वाणम् ऋच्छति। (**2.72**) This is being firm in/as ब्रह्मन् (reality, सत्), O अर्जुन. Attaining this, one is not [any longer] deluded. Being firm in this, even just at the moment of death, one attains liberation in/as ब्रह्मन्.

| | | | |
|---|---|---|---|
| 1 | एषा | this | fr. एतद् *prn. f. sg. nom.* (**4.7:**) |
| 3 | ब्राह्मी (=ब्रह्मणि अधिष्ठिता) | in/as ब्रह्मन् (reality, सत्) | fr. ब्राह्मी *a. f. sg. nom.* |
| 2 | स्थितिः | [is] being firm | fr. स्थिति *f. sg. nom.* |
| 4 | पार्थ | (अर्जुन) O Son of पृथा | fr. पार्थ *m. sg. voc.* |
| 5 | प्राप्य एनां | attaining this [reality] | fr. प्राप्य *in. pt. of* प्र + √आप्; एनद् *prn. f. sg. acc.* (**4.10:**) |
| 6 | न विमुह्यति | one is not [any longer] deluded | fr. न *in.*; वि + √मुह् *4.P. pr. 3rd sg.* |
| 11 | अन्त- | of the end [i.e., death] | |
| 10 | -काले | at the moment | fr. अन्त-काल *m. sg. loc.* |
| 9 | अपि | even [just] | fr. अपि *in.* |
| 8 | अस्यां | in this [reality] | fr. इदम् *prn. f. sg. loc.* (**4.8:**) |
| 7 | स्थित्वा | being firm | fr. स्थित्वा *in. pt. of* √स्था (**6.9:** & **6.6:**) |

| | | |
|---|---|---|
| 14 ब्रह्म- | in/as ब्रह्मन् (reality) | |
| 13 -निर्वाणम् | liberation | fr. ब्रह्म-निर्वाण *n. sg. acc.* |
| 12 ऋच्छति | one goes to, one attains | fr. √ऋ *6.P. pr. 3rd sg.* (**5.17.3:**) |

**ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे साङ्ख्ययोगो नाम द्वितीयोऽध्यायः॥२॥**

(ओं तद् सत्। इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे साङ्ख्ययोगः नाम द्वितीयः अध्यायः॥)

ओं तद् सत्। इति श्रीमद्-भगवद्-गीतासु उपनिषत्सु ब्रह्म-विद्यायां योग-शास्त्रे श्री-कृष्ण-अर्जुन-संवादे साङ्ख्य-योगः नाम द्वितीयः अध्यायः। (**2**)

ओं (ब्रह्मन्, the witness of all) is that [only] reality. Thus ends the second chapter, called "The Topic of Knowledge," of the [eighteen chapters of] *Songs of the Glorious Lord*, which is [looked upon as] उपनिषद् [and whose teaching is] in [the form of] a dialogue between श्री कृष्ण and अर्जुन, [the subject matter being] a knowledge of ब्रह्मन् and योग.

| | | |
|---|---|---|
| 1 ओं | ओम् (ब्रह्मन्, the witness of all,) | fr. ओम् *in.* |
| 2 तद् सत् | [is] that [only] reality | fr. तद् *prn. n. sg. nom.*; सत् *n. sg. nom.* |
| 3 इति | (quote-end quote), thus ends | fr. इति *in.* |
| 10 श्रीमद्- | of the venerable, the glorious | |
| 11 -भगवद्- | one having [limitless] glories, Lord | |
| 9 -गीतासु | in [i.e., of] songs | fr. श्रीमत्-भगवत्-गीता *f. pl. loc.* (**2.43:**) |
| 12 उपनिषत्सु | [which are/is looked upon as] उपनिषद्, sacred scripture | fr. उपनिषद् *f. pl. loc.* (**6.24:**) |
| 17 ब्रह्म- | of ब्रह्मन् (reality/सत्) | |
| 16 -विद्यायां | [and] a knowledge | fr. ब्रह्म-विद्या *f. sg. loc.* |
| 18 योग-शास्त्रे | [and instruction of] योग (means, discipline, etc.) | fr. योग-शास्त्र *n. sg. loc.* |
| 14 श्री-कृष्ण- | between Lord कृष्ण | |
| 15 -अर्जुन- | and अर्जुन | |
| 13 -संवादे | in [the form of] a dialogue | fr. श्री-कृष्ण-अर्जुन-संवाद *n. sg. loc.* (**2.7:**) |
| 8 साङ्ख्य- | of knowledge | |
| 7 -योगः | the topic | fr. साङ्ख्य-योग *a. m. sg. nom.* |
| 6 नाम | by the name, called | fr. नाम *in.* |
| 4 द्वितीयः | the second | fr. द्वितीय *ordinal a. m. sg. nom.* |
| 5 अध्यायः | chapter | fr. अध्याय *m. sg. nom.* |

# अथ तृतीयोऽध्यायः

**अर्जुन उवाच।**

**ज्यायसी चेत्कर्मणस्ते मता बुद्धिर्जनार्दन। तत्किं कर्मणि घोरे मां नियोजयसि केशव॥१॥**

(अर्जुनः उवाच। ज्यायसी चेद् कर्मणः ते, मता बुद्धिः जनार्दन। तद् किं कर्मणि घोरे मां, नियोजयसि केशव॥)

अर्जुनः उवाच। जन-अर्दन, कर्मणः चेद् ज्यायसी बुद्धिः ते (=तव) मता, तद् किं घोरे कर्मणि मां नियोजयसि, केशव। **(3.1)**

अर्जुन said: O कृष्ण, if it is Your contention that knowledge is better than action, then why do You compel me into [this] gruesome action, O कृष्ण?

| | | | |
|---|---|---|---|
| 1 | अर्जुनः उवाच | अर्जुन said | fr. अर्जुन *m. sg. nom.*; √वच् *P. perf. 3rd sg.* (**5.10.3:**) |
| 2 | जन-अर्दन | (कृष्ण) O One Who is Prayed to by People | fr. जन-अर्दन *m. sg. voc.* |
| 8 | कर्मणः | than action | fr. कर्मन् *n. sg. abl.* (**3.22.c:** & **2.92:**) |
| 3 | चेद् | if | fr. चेद् *in.* |
| 7 | ज्यायसी | [is] better | fr. ज्यायसी *cpv. a. f. sg. nom.* (**6.25:** & **3.9:**) |
| 6 | बुद्धिः | knowledge | fr. बुद्धि *f. sg. nom.* |
| 4 | ते (=तव) | by You, [it is] Your | fr. त्वम् *prn. sg. gen.* (**7.12:**) |
| 5 | मता | [is] considered, contention [that] | fr. मता *pp. of* √मन् *a. f. sg. nom.* (**6.6:**) |
| 9 | तद् | then | fr. तद् *in.* |
| 10 | किं | why? | fr. किम् *interrogative pcl. in.* (**6.20:**) |
| 12 | घोरे कर्मणि | into [this] gruesome action | fr. घोर *a. n. sg. loc.*; कर्मन् *n. sg. loc.* (**3.22.c:** & **2.92:**) |
| 11 | मां नियोजयसि | do You compel me | fr. अहम् *prn. sg. acc.*; नि + √युज् *P. cs. ps. pr. 2nd sg.* (**5.40:**) |
| <u>13</u> | केशव | (कृष्ण) O Destroyer of the Demon केशिन् | fr. केशव *m. sg. voc.* |

**व्यामिश्रेणेव वाक्येन बुद्धिं मोहयसीव मे। तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयाम्॥२॥**

(व्यामिश्रेण इव वाक्येन, बुद्धिं मोहयसि इव मे। तद् एकं वद निश्चित्य, येन श्रेयः अहम् आप्नुयाम्॥)

व्यामिश्रेण इव वाक्येन मे बुद्धिं मोहयसि इव। तद् एकं निश्चित्य वद, येन अहं श्रेयः आप्नुयाम्। **(3.2)**

With apparently contradictory words, You seem to confuse my mind. Please decide on just one and tell [me] that [one] by which I may gain श्रेयस् (complete freedom).

| | | | |
|---|---|---|---|
| 1 | व्यामिश्रेण इव | with apparently contradictory | fr. व्यामिश्र *a. n. sg. inst.*; इव *in.* |
| 2 | वाक्येन | word(s) | fr. वाक्य *n. sg. inst.* |
| 4 | मे बुद्धिं | my mind | fr. अहम् *prn. sg. gen.*; बुद्धि *f. sg. acc.* |
| 3 | मोहयसि इव | You seem to confuse | fr. √मुह् *P. cs. ps. pr. 2nd sg.* (**5.40:**); इव *in.* |

| | | | |
|---|---|---|---|
| 8 | तद् | that [one] | fr. तद् *prn. n. sg. acc.* |
| 6 | एकं | [just] one | fr. एक *num. a. n. sg. acc.* |
| 5 | निश्चित्य | [please] decide on | fr. निश्चित्य *in. pt. of* निस् + √चि (**2.24:** & **.27:**) |
| 7 | वद | [and] please tell | fr. √वद् *1.P. impv. 2nd sg.* |
| 9 | येन | by which | fr. यद् *prn. n. sg. inst.* |
| 10 | अहं | I | fr. अहम् *prn. sg. nom.* |
| 12 | श्रेयः | श्रेयस् (complete freedom) | fr. श्रेयस् *cpv. n. sg. acc.* (**6.25:** & **3.14:**) |
| 11 | आप्नुयाम् | may gain | fr. √आप् *5.P. pot. 1st sg.* |

**श्रीभगवानुवाच।**
**लोकेऽस्मिन्द्विविधा निष्ठा पुरा प्रोक्ता मयानघ। ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिनाम्॥ ३॥**
(श्रीभगवान् उवाच। लोके अस्मिन् द्विविधा निष्ठा, पुरा प्रोक्ता मया अनघ। ज्ञानयोगेन साङ्ख्यानां, कर्मयोगेन योगिनाम्॥ )
श्री-भगवान् उवाच। अन्-अघ, अस्मिन् लोके पुरा मया द्वि-विधा निष्ठा प्रोक्ता, ज्ञान-योगेन साङ्ख्यानां कर्म-योगेन योगिनाम्। **(3.3)**
The Lord said: O अर्जुन, long ago in this world I taught [in the उपनिषद्-s] two different lifestyles—[one] through ज्ञान-योग (the means that is knowledge) for those dedicated to knowledge [and the other] through कर्म-योग (the means that is duty) for योगिन्-s [i.e., those dedicated to duty as a means].

| | | | |
|---|---|---|---|
| 1 | श्री-भगवान् उवाच | the Lord said | fr. श्री-भगवत् *m. sg. nom.*; √वच् *P. perf. 3rd sg.* (**5.10.3:**) |
| 2 | अन्-अघ | (अर्जुन) O One Without Vice | fr. अनघ *m. sg. voc.* |
| 4 | अस्मिन् लोके | in this world | fr. इदम् *prn. m. sg. loc.*; लोक *m. sg. loc.* |
| 3 | पुरा | long ago | fr. पुरा *in.* |
| 5 | मया | by me, I | fr. अहम् *prn. sg. inst.* (**7.7:**) |
| 7 | द्वि-विधा | two different | fr. द्वि-विध *a. f. sg. nom.* |
| 8 | निष्ठा | lifestyles | fr. निष्ठा *f. sg. nom.* |
| 6 | प्रोक्ता | taught | fr. प्रोक्ता *pp. of* प्र + √वच् *pt. f. sg. nom.* (**6.6:** & **2.3.a:** & **2.80:**) |
| 10 | ज्ञान- | that is knowledge | |
| 9 | -योगेन | through the means | fr. ज्ञान-योग *m. sg. inst.* |
| 11 | साङ्ख्यानां | for those dedicated to knowledge | fr. साङ्ख्य *m. pl. gen.* |
| 13 | कर्म- | that is duty | |
| 12 | -योगेन | through the means | fr. कर्म-योग *m. sg. inst.* |
| 14 | योगिनाम् | for those dedicated to [duty as] a means | fr. योगिन् *m. pl. gen.* |

**न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते। न च सन्न्यसनादेव सिद्धिं समधिगच्छति॥ ४॥**

(न कर्मणाम् अनारम्भात्, नैष्कर्म्यं पुरुषः अश्नुते। न च सन्न्यसनात् एव, सिद्धिं समधिगच्छति॥)

पुरुषः कर्मणाम् अन्-आरम्भात् नैष्कर्म्यं न अश्नुते, सन्न्यसनात् एव च सिद्धिं न समधिगच्छति। (**3.4**)

A person does not gain actionlessness [i.e., complete freedom] by not undertaking action, nor does one gain [this] success [i.e., complete freedom] merely by renunciation [i.e., taking the vow of सन्न्यास].

| | | | |
|---|---|---|---|
| 1 | पुरुषः | a person | fr. पुरुष *m. sg. nom.* |
| 5 | कर्मणाम् | [of] action | fr. कर्मन् *n. pl. gen.* (**3.22.c:** & **2.92:**) |
| 4 | अन्-आरम्भात् | by not undertaking | fr. अनारम्भ *m. sg. abl.* (**7.11.1:**) |
| 3 | नैष्कर्म्यं | actionlessness [i.e., complete freedom] | fr. नैष्कर्म्य *n. sg. acc.* |
| 2 | न अश्नुते | does not gain | fr. न *in.*; √अश् *5.Ā. pr. 3rd sg.* |
| 8 | सन्न्यसनात् एव च | merely by renunciation [i.e., taking the vow of सन्न्यास] | fr. सन्न्यसन *n. sg. abl.*; एव *in.*; च *in.* |
| 7 | सिद्धिं | [this] success [i.e., complete freedom] | fr. सिद्धि *f. sg. acc.* |
| 6 | न समधिगच्छति | nor does one gain | fr. न *in.*; सम् + अधि + √गम् *1.P. pr. 3rd sg.* (**5.15.6:**) |

**न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत्। कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः॥ ५॥**

(न हि कश्चिद् क्षणम् अपि, जातु तिष्ठति अकर्मकृत्। कार्यते हि अवशः कर्म, सर्वः प्रकृतिजैः गुणैः॥)

न हि (=यस्मात्) कश्-चिद् क्षणम् अपि जातु अ-कर्म-कृत् तिष्ठति। सर्वः हि (=यस्मात्) अ-वशः प्रकृति-जैः गुणैः कर्म कार्यते। (**3.5**) —Because nobody ever remains, even for a second, without performing action. —Because everybody, being helpless, is made to perform action by the [modifications of the] three गुण-s (constituent principles of the universe) born of प्रकृति (nature).

| | | | |
|---|---|---|---|
| 1 | न हि कश्-चिद् | because nobody | fr. न *in.*; हि *in.*; क-चिद् *prn. cmpd. m. sg. nom.* |
| 4 | क्षणम् अपि | even for a second | fr. क्षणम् *in.*; अपि *in.* |
| 2 | जातु | ever | fr. जातु *in.* |
| 5 | अ-कर्म-कृत् | without performing action | fr. अकर्म-कृत् *a. m. sg. nom.* (**6.24.2:**) |
| 3 | तिष्ठति | remains | fr. √स्था *1.P. pr. 3rd sg.* (**5.15.4:**) |
| 6 | सर्वः हि (=यस्मात्) | because everybody | fr. सर्व *prn. a. m. sg. nom.* (**4.16.2:**); हि *in.* |
| 7 | अ-वशः | being helpless | fr. अवश *a. m. sg. nom.* |
| 10 | प्रकृति-जैः | born of प्रकृति (nature) | fr. प्रकृति-ज *a. m. pl. inst.* (**6.24.3:**) |
| 9 | गुणैः | by the [modifications of the] three गुण-s | fr. गुण *m. pl. inst.* |
| 8 | कर्म कार्यते | is made to perform action | fr. कर्मन् *n. sg. acc.* (**3.22:**); √कृ *cs. ps. pr. 3rd sg.* (**5.37.7:**) |

**कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन्। इन्द्रियार्थान्विमूढात्मा मिथ्याचारः स उच्यते॥६॥**

(कर्मेन्द्रियाणि संयम्य, यः आस्ते मनसा स्मरन्। इन्द्रियार्थान् विमूढात्मा, मिथ्याचारः सः उच्यते॥)

यः कर्म-इन्द्रियाणि संयम्य मनसा इन्द्रिय-अर्थान् स्मरन् आस्ते, सः विमूढ-आत्मा मिथ्या-आचारः उच्यते। (**3.6**)

The one who sits restraining the organs of action, [yet] contemplating the sense objects with the mind—that one is called one whose mind is deluded and whose conduct is useless. [Such is the predicament of a renunciate not prepared for a contemplative lifestyle.]

| | | | |
|---|---|---|---|
| 1 | यः | the one who | fr. यद् *prn. m. sg. nom.* |
| 4 | कर्म-इन्द्रियाणि | the organs of action | fr. कर्म-इन्द्रिय *n. pl. acc.* |
| 3 | संयम्य | restraining | fr. संयम्य *in. pt. of* सम् + √यम् (**6.9:** & **2.54:**) |
| 7 | मनसा | with the mind | fr. मनस् *n. sg. inst.* (**3.6:**) |
| 6 | इन्द्रिय-अर्थान् | the sense objects | fr. इन्द्रिय-अर्थ *m. pl. acc.* |
| 5 | स्मरन् | [yet] contemplating | fr. स्मरत् *pr. pt. of* √स्मृ *a. m. sg. nom.* (**6.4:**) (**7.7.1:**) |
| 2 | आस्ते | sits | fr. √आस् *2.Ā. pr. 3rd sg.* |
| 8 | सः | that one | fr. तद् *prn. m. sg. nom.* |
| 11 | विमूढ- | is deluded | |
| 10 | -आत्मा | [one] whose mind | fr. विमूढ-आत्मन् *a. m. sg. nom.* |
| 13 | मिथ्या- | is useless | |
| 12 | -आचारः | [and] whose conduct | fr. मिथ्या-आचार *a. m. sg. nom.* |
| 9 | उच्यते | is called | fr. √वच् *ps. pr. 3rd sg.* (**5.37.6:** & **2.3.a:**) |

**यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्जुन। कर्मेन्द्रियैः कर्मयोगमसक्तः स विशिष्यते॥७॥**

(यः तु इन्द्रियाणि मनसा, नियम्य आरभते अर्जुन। कर्मेन्द्रियैः कर्मयोगम्, असक्तः सः विशिष्यते॥)

अर्जुन, यः तु इन्द्रियाणि मनसा नियम्य अ-सक्तः कर्म-इन्द्रियैः कर्म-योगम् आरभते, सः विशिष्यते। (**3.7**)

However, O अर्जुन, the one who rules the senses with the mind, is unattached [i.e., not anticipating results], who through the organs of action undertakes action as a योग (means for preparing for knowledge)—that one is better [than the deluded of useless conduct].

| | | | |
|---|---|---|---|
| 2 | अर्जुन | O अर्जुन | fr. अर्जुन *m. sg. voc.* |
| 1 | यः तु | however the one who | fr. यद् *prn. m. sg. nom.*; तु *in.* |
| 4 | इन्द्रियाणि | the senses | fr. इन्द्रिय *n. pl. acc.* |
| 5 | मनसा | with the mind | fr. मनस् *n. sg. inst.* (**3.6:**) |
| 3 | नियम्य | rules | fr. नियम्य *in. pt. of* नि + √यम् (**6.9:**) |

| | | | |
|---|---|---|---|
| 6 | अ-सक्तः | is unattached | fr. असक्त *pp. of* √सज् *a. m. sg. nom.* (**6.6:** & **2.81:**) |
| 7 | कर्म-इन्द्रियैः | through the organs of action | fr. कर्म-इन्द्रिय *n. pl. inst.* |
| 9 | कर्म-योगम् | action as a योग | fr. कर्म-योग *m. sg. acc.* |
| 8 | आरभते | [who] undertakes | fr. आ + √रभ् *1.Ā. pr. 3rd sg.* |
| 10 | सः | that one | fr. तद् *prn.m. sg. nom.* |
| 11 | विशिष्यते | is better | fr. वि + √शिष् *ps. pr. 3rd sg.* |

**नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः। शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः॥८॥**

(नियतं कुरु कर्म त्वं, कर्म ज्यायः हि अकर्मणः। शरीरयात्रा अपि च ते, न प्रसिद्ध्येत् अकर्मणः॥)

त्वं नियतं कर्म कुरु, कर्म हि अ-कर्मणः ज्यायः, अ-कर्मणः च ते शरीर-यात्रा अपि न प्रसिद्ध्येत्। (**3.8**) You [अर्जुन, personally] should do your enjoined duty [rather than do nothing or try to take to a contemplative life of सन्यास], since duty is superior to inaction and, through inaction, even the maintenance of your body would be impossible.

| | | | |
|---|---|---|---|
| 1 | त्वं | you [Arjuna – personally] | fr. त्वम् *prn. sg. nom.* |
| 3 | नियतं कर्म | [your] enjoined duty | fr. नियत *pp. of.* नि + √यम् *n. sg. acc.* (**6.6:**); कर्मन् *n. sg. acc.* |
| 2 | कुरु | should do | fr. √कृ *8.P. impv. 2nd sg.* (**5.22.1:**) |
| 4 | कर्म हि | since duty | fr. कर्मन् *n. sg. nom.* (**3.22:**); हि *in*. |
| 6 | अ-कर्मणः | to inaction | fr. अकर्मन् *n. sg. abl.* (**7.11.2.a:**) |
| 5 | ज्यायः | [is] superior | fr. ज्यायस् *cpv. a. n. sg. nom.* (**6.25:** & **3.14:**) |
| 7 | अ-कर्मणः च | and through inaction | fr. अकर्मन् *n. sg. abl.* (**7.11.1:**); च *in.* |
| 9 | ते शरीर-यात्रा | the maintenance of your body | fr. त्वम् *prn. sg. gen.*; शरीर-यात्रा *f. sg. nom.* |
| 8 | अपि | even | fr. अपि *in.* |
| 10 | न प्रसिद्ध्येत् | would be impossible | fr. न *in.*; प्र + √सिध् *4.P. pot. 3rd sg.* |

**यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः। तदर्थं कर्म कौन्तेय मुक्तसङ्गः समाचर॥९॥**

(यज्ञार्थात् कर्मणः अन्यत्र, लोकः अयं कर्मबन्धनः। तदर्थं कर्म कौन्तेय, मुक्तसङ्गः समाचर॥)

यज्ञ-अर्थात् कर्मणः अन्यत्र अयं लोकः कर्म-बन्धनः। कौन्तेय, मुक्त-सङ्गः तद्-अर्थं कर्म समाचर। (**3.9**)
A person (लोक) is one whose actions bind, apart from duty/action [performed] as a यज्ञ (act of worship). O अर्जुन, free from attachment [to the results of action], perform action for the sake of that [यज्ञ].

| | | | |
|---|---|---|---|
| 4 | यज्ञ-अर्थात् | [performed] as a यज्ञ, for the sake of यज्ञ | fr. यज्ञ-अर्थ *m. sg. abl.* |
| 3 | कर्मणः अन्यत्र | apart from duty/action | fr. कर्मन् *n. sg. abl.* (**2.92:**); अन्यत्र *in.* (**6.19:**) |
| 1 | अयं लोकः | a person [is] | fr. इदम् *prn. m. sg. nom.*; लोक *m. sg. nom.* |
| 2 | कर्म-बन्धनः | one whose actions bind | fr. कर्म-बन्धन *a. m. sg. nom.* |

| | | | |
|---|---|---|---|
| 5 | कौन्तेय | (अर्जुन) O Son of कुन्ती | fr. कौन्तेय *m. sg. voc.* |
| 6 | मुक्त-सङ्गः | free from attachment | fr. मुक्त-सङ्ग *a. m. sg. nom.* |
| 8 | तद्-अर्थं | for the sake of that [यज्ञ] | fr. तद्-अर्थम् *in.* (**2.24:** & **.43:** & **.32:**) |
| 7 | कर्म समाचर | perform action | fr. कर्मन् *n. sg. acc.*; सम् + आ + √चर् *1.P. impv. 2nd sg.* |

**सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः। अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक्॥१०॥**

(सहयज्ञाः प्रजाः सृष्ट्वा, पुरा उवाच प्रजापतिः। अनेन प्रसविष्यध्वम्, एषः वः अस्तु इष्टकामधुक्॥)

पुरा प्रजा-पतिः सह-यज्ञाः प्रजाः सृष्ट्वा उवाच — अनेन प्रसविष्यध्वम्, एषः वः इष्ट-काम-धुक् अस्तु। (**3.10**)

In the beginning, the Lord of the universe manifested the people along with यज्ञ (worship) and said [through the वेद-s], "With this [यज्ञ] may all of you multiply. Let this [यज्ञ] be what yields all your desired results."

| | | | |
|---|---|---|---|
| 1 | पुरा | in the beginning | fr. पुरा *in.* |
| 2 | प्रजा-पतिः | the Lord of the universe | fr. प्रजा-पति *m. sg. nom.* |
| 5 | सह- | along with | |
| 6 | -यज्ञाः | यज्ञ (worship) | fr. सह-यज्ञ *a. f. pl. acc.* (**6.39:**) |
| 4 | प्रजाः | the people | fr. प्रजा *f. pl. acc.* (**6.24.3:**) |
| 3 | सृष्ट्वा | manifested | fr. सृष्ट्वा *in. pt. of* √सृज् (**2.81:** & **.88:**) |
| 7 | उवाच | [and] said | fr. √वच् *P. perf. 3rd sg.* (**5.10.3:**) |
| 8 | अनेन | with this [यज्ञ] | fr. इदम् *prn. m. sg. inst.* |
| 9 | प्रसविष्यध्वम् | may all of you multiply | fr. प्र + √सु *Ā. fut. impv. 2nd sg.* (**5.33:**) |
| 11 | एषः | this [यज्ञ] | fr. एतद् *prn. m. sg. nom.* |
| 13 | वः | your | fr. त्वम् *prn. pl. gen.* |
| 14 | इष्ट-काम- | [all] desired results | |
| 12 | -धुक् | what yields | fr. इष्ट-काम-दुक् *f. sg. nom.* (**6.24:** & **3.6.m:**) |
| 10 | अस्तु | let be | fr. √अस् *2.P. impv. 3rd sg.* (**5.10.3:**) |

**देवान्भावयतानेन ते देवा भावयन्तु वः। परस्परं भावयन्तः श्रेयः परमवाप्स्यथ॥११॥**

(देवान् भावयत अनेन, ते देवाः भावयन्तु वः। परस्परं भावयन्तः, श्रेयः परम् अवाप्स्यथ॥)

देवान् अनेन भावयत, ते देवाः वः भावयन्तु, परस्-परं भावयन्तः परं श्रेयः अवाप्स्यथ। (**3.11**)

Support the deities [i.e., the Lord viewed through all the various aspects of nature] with this [यज्ञ]. May those deities support all of you. Supporting one another, all of you will attain limitless श्रेयस् [i.e., complete freedom, or heaven—if this is your ultimate goal].

| | | | |
|---|---|---|---|
| 2 | देवान् | the deities [i.e., the forces of nature viewed as the Lord] | fr. देव *m. pl. acc.* |
| 3 | अनेन | with this [यज्ञ] | fr. इदम् *prn. m. sg. inst.* |
| 1 | भावयत | support | fr. √भू *P. cs. impv. 2nd pl.* (**5.40:**) |
| 5 | ते देवाः | [may] those deities | fr. तद् *prn. m. pl. nom.*; देव *m. pl. nom.* |
| 6 | वः | all of you | fr. त्वम् *prn. pl. acc.* |
| 4 | भावयन्तु | [may] support | fr. √भू *P. cs. impv. 3rd pl.* (**5.40:**) |
| 8 | परस्-परं | one another | fr. पर-स्-परम् *prn. a. m. sg. acc.* (**2.24:** & **.26:**) |
| 7 | भावयन्तः | supporting | fr. भावयत् *pr. pt. of cs.* √भू *pt. m. pl. nom.* (**5.40:**) |
| 10 | परं श्रेयः | limitless श्रेयस् [i.e., complete freedom] | fr. पर *prn. a. n. sg. acc.*; श्रेयस् *cpv. n. sg. acc.* (**6.25:** & **3.14:**) |
| 9 | अवाप्स्यथ | all of you will attain | fr. अव + √आप् *P. fut. 2nd pl.* |

**इष्टान्भोगान्हि वो देवा दास्यन्ते यज्ञभाविताः। तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः॥१२॥**

(इष्टान् भोगान् हि वः देवाः, दास्यन्ते यज्ञभाविताः। तैः दत्तान् अप्रदाय एभ्यः, यः भुङ्क्ते स्तेनः एव सः॥)

यज्ञ-भाविताः देवाः वः इष्टान् भोगान् हि दास्यन्ते। यः तैः दत्तान् एभ्यः अ-प्रदाय भुङ्क्ते, सः स्तेनः एव। (**3.12**)

Supported through यज्ञ, the deities will give to all of you desired objects indeed. One who consumes [the objects] given by those [deities, the forces of nature] without offering to these [deities] is but a thief.

| | | | |
|---|---|---|---|
| 1 | यज्ञ-भाविताः | supported through यज्ञ | fr. यज्ञ-भावित *a. m. pl. nom.* |
| 2 | देवाः | the deities | fr. देव *m. pl. nom.* |
| 4 | वः | to all of you | fr. त्वम् *prn. pl. dat.* |
| 5 | इष्टान् | desired | fr. इष्ट *pp. of* √इष् *a. m. pl. acc.* (**2.88:**) |
| 6 | भोगान् हि | objects indeed | fr. भोग *m. pl. acc.*; हि *in.* |
| 3 | दास्यन्ते | will give | fr. √दा *Ā. fut. 3rd pl.* |

| | | | |
|---|---|---|---|
| 8 | यः | who | fr. यद् *prn. m. sg. nom.* |
| 11 | तैः | by those [deities, the forces of nature] | fr. तद् *prn. m. pl. inst.* |
| 10 | दत्तान् | [the objects] given | fr. दत्त *pp. of* √दा *a. m. pl. acc.* (**6.6:** *irreg.*) |
| 13 | एभ्यः | to these [deities] | fr. इदम् *prn. m. pl. dat.* |
| 12 | अ-प्रदाय | without offering | fr. अप्रदाय *in. pt. of* प्र + √दा (**6.9:**) |
| 9 | भुङ्क्ते | consumes | fr. √भुज् *7.Ā. pr. 3rd sg.* (**2.81:**) |
| 7 | सः | the one | fr. तद् *prn. m. sg. nom.* |
| <u>14</u> | स्तेनः एव | [is] but a thief | fr. स्तेन *m. sg. nom.*; एव *in.* |

**यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः। भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात्॥१३॥**

(यज्ञशिष्टाशिनः सन्तः, मुच्यन्ते सर्वकिल्बिषैः। भुञ्जते ते तु अघं पापाः, ये पचन्ति आत्मकारणात्॥)

यज्ञ-शिष्ट-अशिनः सन्तः सर्व-किल्बिषैः मुच्यन्ते। ये तु आत्म-कारणात् पचन्ति, ते पापाः अघं भुञ्जते। (**3.13**)

Those who eat the food left after first offering to the Lord are freed from all transgressions; whereas those who cook only for themselves, those sinners, eat sin [i.e., karmic demerit].

| | | | |
|---|---|---|---|
| 3 | यज्ञ-शिष्ट- | left after यज्ञ [i.e., first offering to the Lord] | |
| 2 | -अशिनः | who eat the food | fr. यज्ञ-शिष्ट-अशिन् *a. m. pl. nom.* |
| 1 | सन्तः | being [those] | fr. सत् *pr. pt. of* √अस् *pt. m. pl. nom.* (**6.4:** & **5.19.4:**) |
| 5 | सर्व-किल्बिषैः | from all transgressions | fr. सर्व-किल्बिष *n. pl. inst.* (**7.9.11:**) |
| 4 | मुच्यन्ते | are freed | fr. √मुच् *ps. pr. 3rd pl.* |
| 6 | ये तु | whereas those who | fr. यद् *prn. m. pl. nom.*; तु *in.* |
| 8 | आत्म-कारणात् | [only] for themselves | fr. आत्म-कारण *n. sg. abl.* (**4.14:**) |
| 7 | पचन्ति | cook | fr. √पच् *1.P. pr. 3rd pl.* |
| 9 | ते पापाः | those sinners | fr. तद् *prn. m. pl. nom.*; पाप *m. pl. nom.* |
| 11 | अघं | sin [i.e., karmic demerit] | fr. अघ *n. sg. acc.* |
| <u>10</u> | भुञ्जते | eat | fr. √भुज् *7.Ā . pr. 3rd pl.* (**5.3:** & **5.6.b:**) |

**अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसम्भवः। यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः॥१४॥**

(अन्नात् भवन्ति भूतानि, पर्जन्यात् अन्नसम्भवः। यज्ञात् भवति पर्जन्यः, यज्ञः कर्मसमुद्भवः॥)

अन्नात् भूतानि भवन्ति। पर्जन्यात् अन्न-सम्भवः। यज्ञात् पर्जन्यः भवति। कर्म-समुद्भवः यज्ञः। (**3.14**)

[All] creatures are born from food. Food is born from rain. Rain is born from यज्ञ [i.e., the karmic result of यज्ञ]. [That] यज्ञ is born from कर्मन् (action—ritual, prayer, duty, etc.).

| | | | |
|---|---|---|---|
| 3 | अन्नात् | from food | fr. अन्न *n. sg. abl.* |
| 1 | भूतानि | [all] creatures | fr. भूत *pp. of* √भू *n. pl. nom.* |
| 2 | भवन्ति | are born | fr. √भू *1.P. pr. 3rd pl.* |
| 5 | पर्जन्यात् | from rain | fr. पर्जन्य *m. sg. abl.* |
| 4 | अन्न-सम्भवः | the birth of food [is], food is born | fr. अन्न-सम्भव *m. sg. nom.* |
| 8 | यज्ञात् | from यज्ञ [i.e., the karmic result of यज्ञ] | fr. यज्ञ *m. sg. abl.* |
| 6 | पर्जन्यः | rain | fr. पर्जन्य *m. sg. nom.* |
| 7 | भवति | is born | fr. √भू *1.P. pr. 3rd sg.* |
| 10 | कर्म-समुद्भवः | [is] born from कर्मन् (action – ritual, prayer, duty, etc.) | fr. कर्म-समुद्भव *a. m. sg. nom.* |
| 9 | यज्ञः | [that] यज्ञ | fr. यज्ञ *m. sg. nom.* |

**कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम्। तस्मात्सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम्॥१५॥**

(कर्म ब्रह्मोद्भवं विद्धि, ब्रह्म अक्षरसमुद्भवम्। तस्मात् सर्वगतं ब्रह्म, नित्यं यज्ञे प्रतिष्ठितम्॥)

कर्म ब्रह्म-उद्भवं विद्धि, ब्रह्म (=वेद-शास्त्रम्) अ-क्षर-समुद्भवं [विद्धि]। तस्मात् सर्व-गतं ब्रह्म, नित्यं यज्ञे प्रतिष्ठितम्। (**3.15**)

Know [that] कर्मन् is born from ब्रह्मन् (वेद), and the वेद comes from the imperishable [Lord]. Therefore [being given by the all-knowing Lord for all humankind], the वेद is all encompassing and is ever established in यज्ञ.

| | | | |
|---|---|---|---|
| 2 | कर्म | कर्मन् | fr. कर्मन् *n. sg. acc.* |
| 3 | ब्रह्म-उद्भवं | is born from ब्रह्मन् (वेद) | fr. ब्रह्म-उद्भव *a. n. sg. acc.* |
| 1 | विद्धि | know [that] | fr. √विद् *2.P. impv. 2nd sg.* (**5.6.a:**) |
| 4 | ब्रह्म | [and] the Veda | fr. ब्रह्मन् *n. sg. acc.* |
| 5 | अ-क्षर-समुद्भवं | comes from the imperishable [Lord] | fr. अक्षर-समुद्भव *a. n. sg. acc.* |

| | | | |
|---|---|---|---|
| 6 | तस्मात् | therefore | fr. तस्मात् *in.* |
| 8 | सर्व-गतं | [is] all-encompassing | fr. सर्व-गत *a. n. sg. nom.* |
| 7 | ब्रह्म | the Veda | fr. ब्रह्मन् *n. sg. nom.* |
| 10 | नित्यं | ever | fr. नित्यम् *in.* |
| 11 | यज्ञे | in यज्ञ | fr. यज्ञ *m. sg. loc.* |
| 9 | प्रतिष्ठितम् | [and] is established | fr. प्रतिष्ठित *pp. of* प्रति + √स्था *pt. n. sg. nom.* (**6.6:** & **2.101:**) |

**एवं प्रवर्तितं चक्रं नानुवर्तयतीह यः। अघायुरिन्द्रियारामो मोघं पार्थ स जीवति॥१६॥**

(एवं प्रवर्तितं चक्रं, न अनुवर्तयति इह यः। अघायुः इन्द्रियारामः, मोघं पार्थ सः जीवति॥)

पार्थ, यः एवं प्रवर्तितं चक्रम् इह न अनुवर्तयति, अघ-आयुः इन्द्रिय-आरामः [च], सः मोघं जीवति। (**3.16**)

O अर्जुन, the one who does not cause [oneself] to follow in this life the [cosmic] wheel thus set in motion, whose life is [thus mostly of] karmic demerit, and whose pleasure is through the senses—[then] that one lives in vain.

| | | | |
|---|---|---|---|
| 1 | पार्थ | (अर्जुन) O Son of पृथा | fr. पार्थ *m. sg. voc.* |
| 2 | यः | the one who | fr. यद् *prn. m. sg. nom.* |
| 6 | एवं प्रवर्तितं | thus set in motion | fr. एवम् *in.*; प्रवर्तित *pp. of* प्र + *cs.* √वृत् *a. n. sg. acc.* (**6.6:**) |
| 5 | चक्रम् | the [cosmic] wheel | fr. चक्र *n. sg. acc.* |
| 4 | इह | in this life | fr. इह *in.* |
| 3 | न अनुवर्तयति | does not cause [oneself] to follow | fr. न *in.*; अनु + √वृत् *P. cs. pr. 3rd sg.* (**5.40:**) |
| 8 | अघ- | [thus mostly] of karmic demerit | |
| 7 | -आयुः | whose life is | fr. अघ-आयुस् *a. m. sg. nom.* |
| 10 | इन्द्रिय- | is through the senses | |
| 9 | -आरामः [च] | [and] whose pleasure | fr. इन्द्रिय-आराम *a. m. sg. nom.* |
| 11 | सः | [then] that one | fr. तद् *prn. m. sg. nom.* |
| 13 | मोघं | in vain | fr. मोघम् *in.* |
| 12 | जीवति | lives | fr. √जीव् *1.P. pr. 3rd sg.* |

**यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः। आत्मन्येव च सन्तुष्टस्तस्य कार्यं न विद्यते॥१७॥**

(यः तु आत्मरतिः एव स्यात्, आत्मतृप्तः च मानवः। आत्मनि एव च सन्तुष्टः, तस्य कार्यं न विद्यते॥)

यः तु मानवः आत्म-रतिः एव, आत्म-तृप्तः च, आत्मनि एव च सन्तुष्टः स्यात्, तस्य कार्यं न विद्यते। **(3.17)**

—Whereas, the person who would [find] pleasure within the self alone, be satisfied with the self, and be contented in the self alone, [then] that one has nothing [yet] to be done.

| | | | |
|---|---|---|---|
| 1 | यः तु मानवः | whereas the person who | fr. यद् *prn. m. sg. nom.*; तु *in.*; मानव *m. sg. nom.* |
| 3 | आत्म-रतिः एव | [find] pleasure within oneself alone | fr. आत्म-रति *m. sg. nom.*; एव *in.* |
| 4 | आत्म-तृप्तः च | be satisfied with oneself | fr. आत्म-तृप्त *a. m. sg. nom.*; च *in.* |
| 6 | आत्मनि एव | in oneself alone | fr. आत्मन् *m. sg. loc.*; एव *in.* |
| 5 | च सन्तुष्टः | and be contented | fr. च *in.*; सन्तुष्ट *pp. of* सम् + √तुष् *a. m. sg. nom.* (**2.88:** & **.55:**) |
| 2 | स्यात् | would | fr. √अस् *2.P. pot. 3rd sg.* (**5.19.4:**) |
| 7 | तस्य | [then] that one has | fr. तद् *prn. m. sg. gen.* |
| 9 | कार्यं | [yet] to be done | fr. कार्य *pot. ps. pt. of* √कृ *a. n. sg. nom.* (**6.8:**) |
| 8 | न विद्यते | nothing | fr. न *in.*; √विद् *ps. pr. 3rd sg.* (**7.12.1.a:**) |

**नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन। न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः॥१८॥**

(न एव तस्य कृतेन अर्थः, न अकृतेन इह कश्चन। न च अस्य सर्वभूतेषु, कश्चिद् अर्थव्यपाश्रयः॥)

तस्य इह न एव कश्-चन अर्थः कृतेन, न अ-कृतेन [वा]। न च अस्य सर्व-भूतेषु कश्-चिद् अर्थ-व्यपाश्रयः। **(3.18)**

For that [person] in this world, there is, indeed, no goal by doing, nor by not doing. Nor for that one is there any dependence for [any] thing toward any being.

| | | | |
|---|---|---|---|
| 1 | तस्य | for that [person] | fr. तद् *prn. m. sg. gen.* |
| 2 | इह | in this world | fr. इह *in.* |
| 3 | न एव कश्-चन | there is indeed no | fr. न *in.*; एव *in.*; क-चन *prn. cmpd. m. sg. nom.* (**4.20:**) |
| 4 | अर्थः | goal | fr. अर्थ *m. sg. nom.* |
| 5 | कृतेन | by doing | fr. कृत *pp. of* √कृ *pt. n. sg. inst.* |
| 6 | न अ-कृतेन [वा] | nor by not doing | fr. न *in.*; अकृत *pp. of* √कृ *pt. n. sg. inst.* |
| 7 | न च अस्य | nor for that one | fr. न *in.*; च *in.*; इदम् *prn. m. sg. gen.* |
| 10 | सर्व-भूतेषु | towards any being | fr. सर्व-भूत *n. pl. loc.* |
| 8 | कश्-चिद् | [is there] any | fr. क-चिद् *prn. cmpd. m. sg. nom.* (**4.20:** & **2.27:**) |
| 9 | अर्थ-व्यपाश्रयः | dependence for [any] thing | fr. अर्थ-व्यपाश्रय *m. sg. nom.* |

**तस्मादसक्तः सततं कार्यं कर्म समाचर। असक्तो ह्याचरन्कर्म परमाप्नोति पूरुषः॥१९॥**

(तस्मात् असक्तः सततं, कार्यं कर्म समाचर। असक्तः हि आचरन् कर्म, परम् आप्नोति पूरुषः॥)

तस्मात् अ-सक्तः कार्यं कर्म सततं समाचर, अ-सक्तः हि (=यस्मात्) पूरुषः कर्म आचरन् परम् आप्नोति। (**3.19**)

Therefore, unattached, please always perform what is to be done, because the person who is unattached [in attitude, then eventually in knowledge, while] performing action attains the limitless.

| | | | |
|---|---|---|---|
| 1 | तस्मात् | therefore | fr. तस्मात् *in.* |
| 2 | अ-सक्तः | unattached | fr. असक्त *pp. of* √सज् *a. m. sg. nom.* (**6.6:** & **2.81:**) |
| 5 | कार्यं कर्म | what is to be done | fr. कार्य *pot. ps. pt. of* √कृ *a. n. sg. acc.* (**6.8:**); कर्मन् *n. sg. acc.* |
| 4 | सततं | always | fr. स-ततम् *in.* |
| 3 | समाचर | you please perform | fr. सम् + आ √चर् *1.P. impv. 2nd sg.* |
| 8 | अ-सक्तः | who is unattached | fr. असक्त *pp. of* √सज् *a. m. sg. nom.* (**6.6:** & **2.81:**) |
| 6 | हि (=यस्मात्) | because | fr. हि *in.* |
| 7 | पूरुषः | the person | fr. पुरुष *m. sg. nom.* |
| 9 | कर्म आचरन् | [while] performing action | fr. कर्मन् *n. sg. acc.*; आचरत् *pr. pt. of* आ + √चर् *pt. m. sg. nom.* |
| 11 | परम् | the limitless | fr. पर *prn. a. n. sg. acc.* (**4.16.3:**) |
| 10 | आप्नोति | attains | fr. √आप् *5.P. pr. 3rd sg.* (**5.3:**) |

**कर्मणैव हि संसिद्धिमास्थिता जनकादयः। लोकसङ्ग्रहमेवापि सम्पश्यन्कर्तुमर्हसि॥२०॥**

(कर्मणा एव हि संसिद्धिम्, आस्थिताः जनकादयः। लोकसङ्ग्रहम् एव अपि, सम्पश्यन् कर्तुम् अर्हसि॥)

कर्मणा [सह] एव हि जनक-आदयः संसिद्धिम् आस्थिताः। लोक-सङ्ग्रहम् एव सम्पश्यन् अपि कर्तुम् अर्हसि। (**3.20**)

Indeed, [along] with performing [their] duties, [King] जनक and others attained complete freedom. Even considering just the rallying of the people [to the path of धर्म], you ought to act.

| | | | |
|---|---|---|---|
| 2 | कर्मणा [सह] | [along] with [performing] [their] duties | fr. कर्मन् *n. sg. inst.* (**7.9.9:**) |
| 1 | एव हि | indeed | fr. एव *in.*; हि *in.* |
| 3 | जनक- | [King] जनक | |
| 4 | -आदयः | etcetera, and others | fr. जनक-आदि *a. m. pl. nom.* (**6.39:**) |
| 6 | संसिद्धिम् | complete freedom | fr. संसिद्धि *f. sg. acc.* (**2.54:**) |
| 5 | आस्थिताः | attained | fr. आस्थित *pp. of* आ + √स्था *pt. m. pl. nom.* (**6.6:**) |

| | | | |
|---|---|---|---|
| 10 | लोक- | of the people [to the path of धर्म] | |
| 9 | -सङ्ग्रहम् | the rallying | fr. लोक-सङ्ग्रह *m. sg. acc.* |
| 7 | एव सम्पश्यन् | even considering | fr. एव *in.*; सम्पश्यत् *pr. pt. of* सम् + √दृश् *pt. m. sg. nom.* (**5.15.6:**) |
| 8 | अपि | just | fr. अपि *in.* |
| 11 | कर्तुम् अर्हसि | you ought to act | fr. कर्तुम् *inf. of* √कृ *in.*; √अर्ह् *1.P. pr. 2nd sg.* (**7.20.1:**) |

**यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः। स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते॥ २१॥**
(यद् यद् आचरति श्रेष्ठः, तद् तद् एव इतरः जनः। सः यद् प्रमाणं कुरुते, लोकः तद् अनुवर्तते॥ )
यद् यद् श्रेष्ठः आचरति तद् तद् एव इतरः जनः [आचरति]। यद् प्रमाणं सः कुरुते, तद् लोकः अनुवर्तते। (**3.21**)
Whatever an important person follows, that alone the other people [follow]. The example which that one sets, that the people follow.

| | | | |
|---|---|---|---|
| 1 | यद् यद् | whatever | fr. यद् *prn. n. sg. nom.* (**7.6.B.2.e:**) |
| 2 | श्रेष्ठः | an important person | fr. श्रेष्ठ *spv. m. sg. nom.* (**6.25:**) |
| 3 | आचरति | follows | fr. आ + √चर् *1.P. pr. 3rd sg.* |
| 4 | तद् तद् एव | that alone | fr. तद् *prn. n. sg. nom.* (**7.6.B.2.e:**); एव *in.* |
| 5 | इतरः जनः | the other people [follow] | fr. इतर *prn. a. m. sg. nom.* (**4.16.1:**); जन *m. sg. nom.* |
| 6 | यद् प्रमाणं | which example | fr. यद् *prn. n. sg. acc.*; प्रमाण *n. sg. acc.* |
| 7 | सः | that one | fr. तद् *prn. m. sg. nom.* |
| 8 | कुरुते | sets | fr. √कृ *8.Ā. pr. 3rd sg.* (**5.22.1:**) |
| 9 | तद् | that | fr. तद् *prn. n. sg. acc.* |
| 10 | लोकः | the people | fr. लोक *m. sg. nom.* |
| 11 | अनुवर्तते | follow | fr. अनु + √वृत् *1.Ā. pr. 3rd sg.* |

**न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किञ्चन। नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि॥ २२॥**
(न मे पार्थ अस्ति कर्तव्यं, त्रिषु लोकेषु किञ्चन। न अनवाप्तम् अवाप्तव्यं, वर्ते एव च कर्मणि॥ )
पार्थ, मे त्रिषु लोकेषु न किञ्-चन कर्तव्यम् अस्ति, न [किञ्-चन] अवाप्तव्यम् अन्-अवाप्तम्, कर्मणि एव च वर्ते। (**3.22**)
O अर्जुन, for me [as an individual who has this knowledge] there is nothing in the three worlds (earth, sky, and heaven) that must be done, nothing to be attained that has not been attained, [yet] I indeed engage in action.

| | | | |
|---|---|---|---|
| 1 | पार्थ | (अर्जुन) O Son of पृथा | fr. पार्थ *m. sg. voc.* |
| 2 | मे | for me | fr. अहम् *prn. sg. gen.* |
| 5 | त्रिषु लोकेषु | in the three worlds (earth, sky, and heaven) | fr. त्रि *num. a. m. pl. loc.* (**4.25:**); लोक *m. pl. loc.* |
| 4 | न किञ्-चन | nothing | fr. न *in.*; क-चन *prn. n. sg. nom.* (**4.20:** & **2.55:**) |
| 6 | कर्तव्यम् | that must be done | fr. कर्तव्य *pot. ps. pt. of* √कृ *a. n. sg. nom.* (**6.8:**) |
| 3 | अस्ति | there is | fr. √अस् *2.P. pr.* $3^{rd}$ *sg.* |
| 7 | न [किञ्-चन] | nothing | fr. न *in.* |
| 8 | अवाप्तव्यम् | to be attained | fr. अवाप्तव्य *pot. ps. pt. of* अव + √आप् *a. n. sg. nom.* |
| 9 | अन्-अवाप्तम् | that has not been attained | fr. अनवाप्त *pp. of* अव + √आप् *a. n. sg. nom.* |
| 11 | कर्मणि | in action | fr. कर्मन् *n. sg. loc.* |
| 10 | एव च वर्ते | [yet] I indeed engage | fr. एव *in.*; च *in.*; √वृत् *1.Ā. pr.* $1^{st}$ *sg.* (**5.5:**) |

**यदि ह्यहं न वर्तेयं जातु कर्मण्यतन्द्रितः। मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः॥२३॥**

(यदि हि अहं न वर्तेयं, जातु कर्मणि अतन्द्रितः। मम वर्त्म अनुवर्तन्ते, मनुष्याः पार्थ सर्वशः॥)

पार्थ, यदि हि अहम् अ-तन्द्रितः कर्मणि जातु न वर्तेयं, मनुष्याः मम वर्त्म सर्वशः अनुवर्तन्ते। (**3.23**)

O अर्जुन, if indeed I [as कृष्ण, leader of द्वारका, thus an important person] were ever to not engage in action unwearied, [then] the people [would] follow my path in every way [including into lazy inaction].

| | | | |
|---|---|---|---|
| 1 | पार्थ | (अर्जुन) O Son of पृथा | fr. पार्थ *m. sg. voc.* |
| 2 | यदि हि | if indeed | fr. यदि *in.*; हि *in.* |
| 3 | अहम् | I [as कृष्ण, king of द्वारका] | fr. अहम् *prn. sg. nom.* |
| 6 | अ-तन्द्रितः | unwearied | fr. अ-तन्द्रित *pp. of den.* √तन्द्रय *a. m. sg. nom.* (**5.43:** & **6.6:**) |
| 5 | कर्मणि | in action | fr. कर्मन् *n. sg. loc.* |
| 4 | जातु न वर्तेयं | were ever to not engage | fr. जातु *in.*; न *in.*; √वृत् *1.P. pot.* $1^{st}$ *sg.* |
| 7 | मनुष्याः | [then] the people | fr. मनुष्य *m. pl. nom.* |
| 9 | मम वर्त्म | my path | fr. अहम् *prn. sg. gen.*; वर्त्मन् *n. sg. acc.* |
| 10 | सर्वशः | in every way | fr. सर्वशस् *in.* (**6.19:**) |
| 8 | अनुवर्तन्ते | [would] follow | fr. अनु + √वृत् *1.Ā. pr.* $3^{rd}$ *pl.* (**7.21.3:**) |

**उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहम्। सङ्करस्य च कर्ता स्यामुपहन्यामिमाः प्रजाः॥ २४॥**

(उत्सीदेयुः इमे लोकाः, न कुर्यां कर्म चेद् अहम्। सङ्करस्य च कर्ता स्याम्, उपहन्याम् इमाः प्रजाः॥)

अहं चेद् कर्म न कुर्याम् इमे लोकाः उत्सीदेयुः। सङ्करस्य कर्ता स्याम्, इमाः प्रजाः च उपहन्याम्। (**3.24**)

If I were not to perform action, these people would perish. I would become the author of [social] confusion, and I would [thus] destroy these people.

| | | | |
|---|---|---|---|
| 1 | अहं चेद् | if I | fr. अहम् *prn. sg. nom.*; चेद् *in.* |
| 2 | कर्म न कुर्याम् | were not to perform action | fr. कर्मन् *n. sg. acc.*; न *in.*; √कृ *8.P. pot.* $1^{st}$ *sg.* |
| 3 | इमे लोकाः | these people | fr. इदम् *prn. m. pl. nom.*; लोक *m. pl. nom.* |
| 4 | उत्सीदेयुः | would perish | fr. उद् + √सद् *1.P. pot.* $3^{rd}$ *pl.* (**5.15.3:** & **2.24:**) |
| 7 | सङ्करस्य | of [social] confusion | fr. सङ्कर *m. sg. gen.* |
| 6 | कर्ता | the author | fr. कर्तृ *m. sg. nom.* (**3.38:**) |
| 5 | स्याम् | I would become | fr. √अस् *2.P. pot.* $1^{st}$ *sg.* (**5.19.4:**) |
| 9 | इमाः प्रजाः | these people | fr. इदम् *prn. f. pl. acc.*; प्रज *f. pl. acc.* |
| 8 | च उपहन्याम् | and I would [thus] destroy | fr. च *in.*; उप + √हन् *2.P. pot.* $1^{st}$ *sg.* |

**सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत। कुर्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसङ्ग्रहम्॥ २५॥**

(सक्ताः कर्मणि अविद्वांसः, यथा कुर्वन्ति भारत। कुर्यात् विद्वान् तथा असक्तः, चिकीर्षुः लोकसङ्ग्रहम्॥)

भारत, कर्मणि सक्ताः अ-विद्वांसः यथा कुर्वन्ति, लोक-सङ्ग्रहं चिकीर्षुः अ-सक्तः विद्वान् तथा कुर्यात्। (**3.25**) O अर्जुन, as [dedicatedly as] the unwise, who are bound to [the results of] action, engage in action, [so] the wise—unattached [i.e., not requiring/anticipating results] and desirous for rallying the people [to धर्म]—would likewise engage in action.

| | | | |
|---|---|---|---|
| 1 | भारत | (अर्जुन) O Descendant of Emperor भरत, (Brilliant) Son of India | fr. भारत *m. sg. voc.* |
| 5 | कर्मणि | to [the results of] action | fr. कर्मन् *n. sg. loc.* |
| 4 | सक्ताः | who are bound | fr. सक्त *pp. of* √सज् *a. m. pl. nom.* (**6.6:** & **2.81:**) |
| 3 | अ-विद्वांसः | the unwise | fr. अविद्वस् *redup. perf. pt. of* √विद् *a. m. pl. nom.* (**5.28:** & **6.4:** & **3.19:**) |
| 2 | यथा | as | fr. यथा *in.* (**6.19:**) |
| 6 | कुर्वन्ति | engage in action | fr. √कृ *8.P. pr.* $3^{rd}$ *pl.* (**5.22.1:** & **2.67:**) |
| 10 | लोक-सङ्ग्रहं | for rallying the people [to धर्म] | fr. लोक-सङ्ग्रह *m. sg. acc.* (**7.8.4:**) |
| 9 | चिकीर्षुः | [and] desirous | fr. चिकीर्षुः *a. m. sg. nom.* (**5.41:**) |
| 8 | अ-सक्तः | unattached | fr. असक्त *pp. of* √सज् *a. m. sg. nom.* (**6.6:** & **2.81:**) |
| 7 | विद्वान् | [so] the wise | fr. विद्वस् *redup. perf. pt. of* √विद् *a. m. sg. nom.* (**5.28:** & **6.4:** & **3.19:**) |
| 11 | तथा कुर्यात् | would likewise engage in action | fr. तथा *in.* (**6.19:**); √कृ *8.P. pot.* $3^{rd}$ *sg.* |

**न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम्। जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरन्॥ २६॥**

(न बुद्धिभेदं जनयेत्, अज्ञानां कर्मसङ्गिनाम्। जोषयेत् सर्वकर्माणि, विद्वान् युक्तः समाचरन्॥)

अ-ज्ञानां कर्म-सङ्गिनां बुद्धि-भेदं न जनयेत्, विद्वान् युक्तः सर्व-कर्माणि समाचरन् [तान् अविदुषः] जोषयेत्। (**3.26**)

One should not sow dissension in the understanding of the unwise who are bound to [the results of] action. The wise one, who is committed [to धर्म] and [to] performing all duties, should encourage [the others].

| | | | |
|---|---|---|---|
| 4 | अ-ज्ञानां | of the unwise | fr. अ-ज्ञ *a. m. pl. gen.* (**6.24.1:**) |
| 5 | कर्म-सङ्गिनां | who are bound to [the results of] action | fr. कर्म-सङ्गिन् *a. m. pl. gen.* |
| 3 | बुद्धि- | in the understanding | |
| 2 | -भेदं | dissension | fr. बुद्धि-भेद *m. sg. acc.* |
| 1 | न जनयेत् | one should not sow | fr. न *in.*; √जन् *P. cs. pot. 3rd sg.* (**5.40:**) |
| 6 | विद्वान् | the wise one | fr. विद्वस् *redup. perf. pt. of* √विद् *a. m. sg. nom.* (**5.28:** & **6.4:** & **3.19:**) |
| 7 | युक्तः | who is committed [to धर्म] | fr. युक्त *pp. of* √युज् *a. m. sg. nom.* (**2.81:**) |
| 9 | सर्व-कर्माणि | all duties | fr. सर्व-कर्मन् *n. pl. acc.* |
| 8 | समाचरन् | [and] [himself or herself] performing | fr. समाचरत् *pr. pt. of* सम् + आ + √चर् *pt. m. sg. nom.* |
| 10 | जोषयेत् | should encourage [the others] | fr. √जुष् *P. cs. pot. 3rd sg.* (**5.40:**) |

**प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः। अहङ्कारविमूढात्मा कर्ताहमिति मन्यते॥ २७॥**

(प्रकृतेः क्रियमाणानि, गुणैः कर्माणि सर्वशः। अहङ्कारविमूढात्मा, कर्ता अहम् इति मन्यते॥)

प्रकृतेः गुणैः कर्माणि सर्वशः क्रियमाणानि। अहङ्-कार-विमूढ-आत्मा "अहं कर्ता" इति मन्यते। (**3.27**)

Actions are in all ways done by the गुण-s (constituent principles) of प्रकृति (nature). [But] one whose mind is confused—[in many and various ways] by a notion about "I"—thinks "I am the doer."

| | | | |
|---|---|---|---|
| 5 | प्रकृतेः | of प्रकृति (nature) | fr. प्रकृति *f. sg. gen.* |
| 4 | गुणैः | by the गुण-s (constituent principles) | fr. गुण *m. pl. inst.* |
| 1 | कर्माणि | actions | fr. कर्मन् *n. pl. nom.* |
| 3 | सर्वशः | in all ways | fr. सर्वशस् *in.* (**6.19:**) |
| 2 | क्रियमाणानि | are done | fr. क्रियमाण *pr. ps. pt. of* √कृ *n. pl. nom.* (**6.5:** & **5.37.3:**) |
| 7 | अहङ्-कार- | by a notion about "I" | |
| 6 | -विमूढ-आत्मा | [but] one whose mind is confused | fr. अहम्-कार-विमूढ-आत्मन् *a. m. sg. nom.* (**2.55:** & **3.22:**) |
| 9 | अहं कर्ता इति | "I am the doer" | fr. अहम् *prn. sg. nom.*; कर्तृ *m. sg. nom.*; इति *in.* |
| 8 | मन्यते | thinks | fr. √मन् *4.Ā. pr.3rd sg.* |

**तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः। गुणा गुणेषु वर्तन्त इति मत्वा न सज्जते॥२८॥**

(तत्त्वविद् तु महाबाहो, गुणकर्मविभागयोः। गुणाः गुणेषु वर्त्तन्ते, इति मत्वा न सज्जते॥)

महा-बाहो, गुण-कर्म-विभागयोः तत्त्व-विद् तु "गुणाः गुणेषु वर्त्तन्ते" इति मत्वा न सज्जते। (**3.28**)

—Whereas, O अर्जुन, the one who knows the truth of the distinction of the गुण-s [from "I"] and of [their] actions [from "I"], thinking, "the गुण-s [i.e., the body and mind] engage amongst the गुण-s [i.e., among the objects—physical and mental]"—that one is not bound.

| | | | |
|---|---|---|---|
| 2 | महा-बाहो | (अर्जुन) O Mighty Armed One | fr. महा-बाहु *m. sg. voc.* |
| 5 | गुण-कर्म- | of the गुण-s [from "I"] and of [their] actions [from "I"] | |
| 4 | -विभागयोः | of the distinction | fr. गुण-कर्म-विभाग *m. du. gen.* |
| 3 | तत्त्व-विद् | the one who knows the truth | fr. तत्त्व-विद् *m. sg. nom.* (**6.24:** & **3.6:**) |
| 1 | तु | whereas | fr. तु *in.* |
| 7 | गुणाः | the गुण-s [i.e., the body and mind] | fr. गुण *m. pl. nom.* |
| 9 | गुणेषु | amongst the गुण-s [i.e., the objects – physical and mental] | fr. गुण *m. pl. loc.* |
| 8 | वर्त्तन्ते | engage | fr. √वृत् *1.Ā. pr.3rd pl.* |
| 6 | इति मत्वा | thinking [that] | fr. इति *in.* (**6.20:**); मत्वा *in. pt. of* √मन् (**6.9:** & **.6:**) |
| 10 | न सज्जते | [that one] is not bound | fr. न *in.*; √सञ्ज् *ps. pr. 3rd sg.* (*assimilation [back?] from Prākṛta*) |

**प्रकृतेर्गुणसम्मूढाः सज्जन्ते गुणकर्मसु। तानकृत्स्नविदो मन्दान्कृत्स्नविन्न विचालयेत्॥२९॥**

(प्रकृतेः गुणसम्मूढाः, सज्जन्ते गुणकर्मसु। तान् अकृत्स्नविदः मन्दान्, कृत्स्नविद् न विचालयेत्॥)

प्रकृतेः गुण-सम्मूढाः गुण-कर्मसु सज्जन्ते। तान् अ-कृत्स्न-विदः मन्दान् कृत्स्न-विद् न विचालयेत्। (**3.29**) Those who confuse [themselves] with the गुण-s of nature are bound in the गुण-s and [their] actions. Lacking [this] discernment and of incomplete knowledge, they [are the ones that] one who has complete knowledge should not disturb.

| | | | |
|---|---|---|---|
| 2 | प्रकृतेः | of nature | fr. प्रकृति *f. sg. gen.* |
| 1 | गुण-सम्मूढाः | those who confuse [themselves] with the गुण-s | fr. गुण-समूढ *a. m. pl. nom.* |
| 4 | गुण-कर्मसु | in the गुण-s and [their] actions | fr. गुण-कर्मन् *n. pl. loc.* (**5.28:**) |
| 3 | सज्जन्ते | are bound | fr. √सञ्ज् *ps. pr. 3rd pl.* (*assimilation [back?] from Prākṛta*) |
| 7 | तान् | they [are the ones that] | fr. तद् *prn. m. pl. acc.* |
| 6 | अ-कृत्स्न-विदः | [and] of incomplete knowledge | fr. अकृत्स्न-विद् *a.m. pl. acc.* (**6.24:** & **3.6:**) |
| 5 | मन्दान् | lacking [this] discernment | fr. मन्द *a. m. pl. acc.* |
| 8 | कृत्स्न-विद् | one who has complete knowledge | fr. कृत्स्न-विद् *a.m. sg. nom.* |
| 9 | न विचालयेत् | should not disturb | fr. न *in.*; वि + √चल् *P. cs. pot. 3rd sg.* (**5.40:**) |

**मयि सर्वाणि कर्माणि सन्न्यस्याध्यात्मचेतसा। निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः॥३०॥**

(मयि सर्वाणि कर्माणि, सन्न्यस्य अध्यात्मचेतसा। निराशीः निर्ममः भूत्वा, युध्यस्व विगतज्वरः॥)

अधि-आत्म-चेतसा सर्वाणि कर्माणि मयि सन्न्यस्य निर्-आशीः निर्-ममः भूत्वा विगत-ज्वरः युध्यस्व। (**3.30**)

With a mind centered on oneself [as the Lord, as the reality], renouncing all action in Me [the Lord—as प्रकृति, nature, the cosmic order], being free from anticipations and free from [the judgment] "this is mine," and without anguish, [O अर्जुन] fight.

| | | | |
|---|---|---|---|
| 2 | अधि-आत्म- | centered on oneself [as the Lord] | |
| 1 | -चेतसा | with a mind | fr. अध्यात्म-चेतस् *n. sg. inst.* (**3.6:**) |
| 4 | सर्वाणि कर्माणि | all action | fr. सर्व *prn. a. n. pl. acc.* (**4.16.2:**); कर्मन् *n. pl. acc.* |
| 5 | मयि | in Me [the Lord—as प्रकृति/nature, the cosmic order] | fr. अहम् *prn. sg. loc.* |
| 3 | सन्न्यस्य | renouncing | fr. सन्न्यस्य *in. pt. of* सम् + नि + √अस् (**6.9:** & **2.55:**) |
| 7 | निर्-आशीः | free from anticipations | fr. निस्-आशिस् *a. m. sg. nom.* (**2.24:** & **2.29:** & **6.36:** & **3.6.1:**) |
| 8 | निर्-ममः | [and] free from [the judgment] "this is mine" | fr. निस्-मम *a. m. sg. nom.* (**2.29:** & **3.9:**) |
| 6 | भूत्वा | being | fr. भूत्वा *in. pt. of* √भू (**6.9:**) |
| 9 | विगत- | [and] without | |
| 10 | -ज्वरः | anguish | fr. विगत-ज्वर *a. m. sg. nom.* |
| <u>11</u> | युध्यस्व | [O अर्जुन,] fight | fr. √युध् *4.Ā. impv. 2nd sg.* |

**ये मे मतमिदं नित्यमनुतिष्ठन्ति मानवाः। श्रद्धावन्तोऽनसूयन्तो मुच्यन्ते तेऽपि कर्मभिः॥३१॥**

(ये मे मतम् इदं नित्यम्, अनुतिष्ठन्ति मानवाः। श्रद्धावन्तः अनसूयन्तः, मुच्यन्ते ते अपि कर्मभिः॥)

ये मानवाः श्रद्धावन्तः अन्-असूयन्तः मे इदं मतं नित्यम् अनुतिष्ठन्ति, ते अपि कर्मभिः मुच्यन्ते। (**3.31**)

Those people who have trust [in My teaching], who are not cynical and who constantly follow this, My teaching, they also [whether कर्म-योगिन्-s or सन्न्यासिन्-s] are freed from [the bond that is] कर्मन्.

| | | | |
|---|---|---|---|
| 1 | ये मानवाः | those people who | fr. यद् *prn. m. pl. nom.*; मानव *m. pl. nom.* |
| 2 | श्रद्धावन्तः | have trust [in My teaching] | fr. श्रद्धावत् *a. m. pl. nom.* (**3.13:**) |
| 3 | अन्-असूयन्तः | who are not cynical | fr. अनसूयत् *pr. pt. of den.* √असूय *a. m. pl. nom.* (**5.43:** & **3.12:**) |
| 6 | मे इदं | this My | fr. अहम् *prn. sg. gen.*; इदम् *prn. n. sg. acc.* |
| 7 | मतं | teaching | fr. मत *pp. of* √मन् *n. sg. acc.* (**6.6:**) |
| 5 | नित्यम् | constantly | fr. नित्यम् *in.* |
| 4 | अनुतिष्ठन्ति | [and] [who] follow | fr. अनु + √स्था *1.P. pr. 3rd pl.* (**5.15.4:**) |

| | | | |
|---|---|---|---|
| 8 | ते अपि | they also | fr. तद् *prn. m. pl. nom.*; अपि *in.* |
| 10 | कर्मभिः | from [the bond that is] कर्मन् | fr. कर्मन् *n. pl. inst.* (**3.22:**) |
| 9 | मुच्यन्ते | are freed | fr. √मुच् *ps. pr. 3rd pl.* |

**ये त्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम्। सर्वज्ञानविमूढांस्तान्विद्धि नष्टानचेतसः॥३२॥**

(ये तु एतद् अभ्यसूयन्तः, न अनुतिष्ठन्ति मे मतम्। सर्वज्ञानविमूढान् तान्, विद्धि नष्टान् अचेतसः॥)

ये तु अभ्यसूयन्तः, मे एतद् मतं न अनुतिष्ठन्ति, तान् सर्व-ज्ञान-विमूढान् अ-चेतसः [च] नष्टान् विद्धि। (**3.32**)

—Whereas, those who are cynical, who do not follow this, My teaching, know them—who are [thus] variously confused in all [other areas of] knowledge [because they do not know who the "I" is] and lacking discernment—as lost.

| | | | |
|---|---|---|---|
| 1 | ये तु | whereas those who | fr. यद् *prn. m. pl. nom.*; तु *in.* |
| 2 | अभ्यसूयन्तः | [are] cynical | fr. अभ्यसूयत् *pr. pt. of* अभि + *den.* √असूय *a. m. pl. nom.* (**5.43:** & **3.12:**) |
| 4 | मे एतद् मतं | this My teaching | fr. अहम् *prn. sg. gen.*; एतद् *prn. n. sg. acc.*; मत *n. sg. acc.* |
| 3 | न अनुतिष्ठन्ति | [who] do not follow | fr. न *in.*; अनु + √स्था *1.P. pr. 3rd pl.* (**5.15.4:**) |
| 6 | तान् | them | fr. तद् *prn. m. pl. acc.* |
| 8 | सर्व-ज्ञान- | in all [other areas of] knowledge | |
| 7 | -विमूढान् | who are [thus] variously confused | fr. सर्व-ज्ञान-विमूढ *a. m. pl. acc.* |
| 9 | अ-चेतसः [च] | [and] lacking discernment | fr. अचेतस् *a. m. pl. acc.* (**3.6:**) |
| 10 | नष्टान् | [as] lost | fr. नष्ट *pp. of* √नश् *a. m. pl. acc.* (**2.85:**) |
| 5 | विद्धि | know | fr. √विद् *2.P. impv. 2nd sg.* (**5.6.a:**) (**7.8.A.1:**) |

**सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि। प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति॥३३॥**

(सदृशं चेष्टते स्वस्याः, प्रकृतेः ज्ञानवान् अपि। प्रकृतिं यान्ति भूतानि, निग्रहः किं करिष्यति॥)

ज्ञानवान् अपि स्वस्याः प्रकृतेः स-दृशं चेष्टते। भूतानि प्रकृतिं यान्ति — निग्रहः किं करिष्यति। (**3.33**)

Even a wise person acts in keeping with his [or her] own nature. Creatures go [with their own] nature. What will [external behavioral] restraint accomplish?

| | | | |
|---|---|---|---|
| 1 | ज्ञानवान् अपि | even a wise person | fr. ज्ञानवत् *a. m. sg. nom.* (**3.13.a:**); अपि *in.* |
| 4 | स्वस्याः | with his [or her] own | fr. स्व *prn. a. f. sg. abl.* (**4.15:** & **4.16.3:**) |
| 5 | प्रकृतेः | nature | fr. प्रकृति *f. sg. abl.* |
| 3 | स-दृशं | in keeping | fr. सदृशम् *in.* (**4.17.2: & 7.8.8:**) |
| 2 | चेष्टते | acts | fr. √चेष्ट् *1.Ā. pr. 3rd sg.* |

| | | | |
|---|---|---|---|
| 6 | भूतानि | creatures | fr. भूत *pp. of* √भू *n. pl. nom.* |
| 7 | प्रकृतिं यान्ति | go [with their own] nature | fr. प्रकृति *f. sg. acc.*; √या *2.P. pr. 3rd pl.* (**7.8.2:**) |
| 9 | निग्रहः | restraint | fr. निग्रह *m. sg. nom.* |
| 8 | किं | what? | fr. किम् *prn. n. sg. acc.* |
| 10 | करिष्यति | will accomplish | fr. √कृ *P. fut. 3rd sg.* |

**इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ। तयोर्न वशमागच्छेत्तौ ह्यस्य परिपन्थिनौ॥३४॥**
(इन्द्रियस्य इन्द्रियस्य अर्थे, रागद्वेषौ व्यवस्थितौ। तयोः न वशम् आगच्छेत्, तौ हि अस्य परिपन्थिनौ॥)
इन्द्रियस्य इन्द्रियस्य अर्थे राग-द्वेषौ व्यवस्थितौ, तयोः वशं न आगच्छेत्, तौ हि (=यस्मात्) अस्य परिपन्थिनौ। (**3.34**)
राग and द्वेष (attraction and repulsion) are [naturally] there toward the object of each of the senses. One should not come under their control, because those [two] are one's enemies [not the object, nor the resulting, natural behavior].

| | | | |
|---|---|---|---|
| 5 | इन्द्रियस्य इन्द्रियस्य | of each of the senses | fr. इन्द्रिय *n. sg. gen.* (**7.6.B.2.e:**) |
| 4 | अर्थे | towards the object | fr. अर्थ *m. sg. loc.* |
| 1 | राग- | attraction | |
| 2 | -द्वेषौ | and repulsion | fr. राग-द्वेष *m. du. nom.* (**6.40:**) |
| 3 | व्यवस्थितौ | are [naturally] there | fr. व्यवस्थित *pp. of* वि + अव + √स्था *pt. m. du. nom.* (**6.6:**) |
| 7 | तयोः वशं | [under] their control | fr. तद् *prn. m. du. gen.*; वश *m. sg. acc.* |
| 6 | न आगच्छेत् | one should not come | fr. न *in.*; आ + √गम् *1.P. pot. 3rd sg.* (**5.15.6:**) |
| 8 | तौ हि (=यस्मात्) | because those [two] | fr. तद् *prn. m. du. nom.*; हि *in.* |
| 9 | अस्य परिपन्थिनौ | [are] one's enemies | fr. इदम् *prn. m. sg. gen.*; परिपन्थिन् *a. m. du. nom.* (**3.21:**) |

**श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्। स्वधर्मे निधनं श्रेयः परधर्मो भयावहः॥३५॥**

(श्रेयान् स्वधर्मः विगुणः, परधर्मात् स्वनुष्ठितात्। स्वधर्मे निधनं श्रेयः, परधर्मः भयावहः॥)

सु-अनुष्ठितात् पर-धर्मात् स्व-धर्मः वि-गुणः [अपि] श्रेयान्। स्व-धर्मे निधनं श्रेयः, [यस्मात्] भय-आवहः पर-धर्मः। (**3.35**)

One's own duty, [though sometimes] lacking virtue, is better than a different duty, [even though] well performed [or more enjoyable]. Death in one's own duty is better, [as] a different duty brings fear [in the forms of conflict, regret, and retribution].

| | | | |
|---|---|---|---|
| 6 | सु- | [even though] well [or more enjoyably] | |
| 7 | -अनुष्ठितात् | performed | fr. स्वनुष्ठित *pp. of* अनु + √स्था *a. m. sg. abl.* (**6.6:**) (**6.36:**) |
| 5 | पर-धर्मात् | than a different duty | fr. पर-धर्म *m. sg. abl.* |
| 1 | स्व-धर्मः | one's own duty | fr. स्व-धर्म *m. sg. nom.* |
| 2 | वि- | [though] [sometimes] lacking | |
| 3 | -गुणः [अपि] | virtue | fr. विगुण *a. m. sg. nom.* (**6.36:**) |
| 4 | श्रेयान् | [is] better | fr. श्रेयस् *cpv. a. m. sg. nom.* (**6.25:** & **3.14:**) |
| 9 | स्व-धर्मे | in one's own duty | fr. स्व-धर्म *m. sg. loc.* |
| 8 | निधनं | death | fr. निधन *n. sg. nom.* |
| 10 | श्रेयः | [is] better | fr. श्रेयस् *cpv. a. sg. nom.* (**6.25:** & **3.14:**) |
| 13 | भय- | fear | |
| 12 | -आवहः | brings | fr.भय-आवह *a. m. sg. nom.* |
| 11 | पर-धर्मः | [as] a different duty | fr. पर-धर्म *m. sg. nom.* |

**अर्जुन उवाच।**

**अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः। अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः॥३६॥**

(अर्जुनः उवाच। अथ केन प्रयुक्तः अयं, पापं चरति पूरुषः। अनिच्छन् अपि वार्ष्णेय, बलात् इव नियोजितः॥)

अर्जुनः उवाच। वार्ष्णेय, अथ केन प्रयुक्तः अयं पूरुषः अन्-इच्छन् अपि पापं चरति, बलात् इव नियोजितः। (**3.36**)

अर्जुन said: O कृष्ण, now what compels a person—even though not choosing—to commit prohibited acts, as if pushed by force?

| | | | |
|---|---|---|---|
| 1 | अर्जुनः उवाच | अर्जुन said | fr. अर्जुन *m. sg. nom.*; √वच् *P. perf. 3rd sg.* (**5.10.3:**) |
| 2 | वार्ष्णेय | (कृष्ण) O One From the वृष्णि Clan | fr. वार्ष्णेय *m. sg. voc.* |

| | | | |
|---|---|---|---|
| 3 | अथ | now | fr. अथ *in.* (**6.19:**) |
| 4 | केन प्रयुक्तः | compelled by what? | fr. किम् *prn. m. sg. inst.*; प्रयुक्त *pp. of* प्र + √युज् *pt. m. sg. nom.* (**2.81:**) |
| 5 | अयं पूरुषः | a person | fr. इदम् *prn. sg. nom.*; पुरुष *m. sg. nom.* |
| 7 | अन्-इच्छन् | not choosing | fr. अनिच्छत् *pr. pt. of* √इष् *pt. a. sg. nom.* (**5.17.3:**) |
| 6 | अपि | even though | fr. अपि *in.* |
| 9 | पापं | prohibited acts | fr. पाप *n. sg. acc.* |
| 8 | चरति | does commit | fr. √चर् *1.P. pr. 3rd sg.* |
| 11 | बलात् | by force | fr. बलात् *in.* |
| 10 | इव नियोजितः | as if pushed | fr. इव *in.*; नियोजित *pp. of* नि + *cs.* √युज् *pt. m. sg. nom.* (**6.6:**) |

**श्रीभगवानुवाच।**

**काम एष क्रोध एष रजोगुणसमुद्भवः। महाशनो महापाप्मा विद्ध्येनमिह वैरिणम्॥३७॥**

(श्रीभगवान् उवाच। कामः एषः क्रोधः एषः, रजोगुणसमुद्भवः। महाशनः महापाप्मा, विद्धि एनम् इह वैरिणम्॥)

श्री-भगवान् उवाच। एषः कामः एषः क्रोधः [च]। [एषः] रजस्-गुण-समुद्भवः महा-अशनः महा-पाप्मा। इह एनं वैरिणं विद्धि। (**3.37**)

The Lord said: [That seeming force is] this काम (binding desire—whether positive or negative, empowered attraction or repulsion) [and when thwarted] this anger. It [काम] is born of the रजस् गुण, is a glutton, and accumulates a lot of karmic demerit. Know it to be the enemy here.

| | | | |
|---|---|---|---|
| 1 | श्री-भगवान् उवाच | the Lord said | fr. श्री-भगवत् *m. sg. nom.*; √वच् *P. perf. 3rd sg.* (**5.10.3:**) |
| 2 | एषः कामः | [that seeming force is] this काम | fr. एतद् *prn. m. sg. nom.*; काम *m. sg. nom.* |
| 3 | एषः क्रोधः | [and] [when thwarted] this anger | fr. एतद् *prn. m. sg. nom.*; क्रोध *m. sg. nom.* |
| 5 | रजस्-गुण- | of the रजस् गुण | |
| 4 | -समुद्भवः | [it is] born | fr. रजस्-गुण-समुद्भव *a. m. sg. nom.* (**2.24:** & **.33:**) |
| 6 | महा-अशनः | [is] a glutton | fr. महा-अशन *a. m. sg. nom.* |
| 7 | महा-पाप्मा | [and] accumulates a lot of karmic demerit | fr. महा-पाप्मन् *a. m. sg. nom.* (**3.22:**) |
| 10 | इह | here | fr. इह *in.* (**6.19:**) |
| 9 | एनं वैरिणं | it [to be] the enemy | fr. एतद् *prn. m. sg. acc.* (**4.10:**); वैरिन् *m. sg. nom.* (**3.15:** & **2.92:**) |
| 8 | विद्धि | know | fr. √विद् *1.P. impv. 2nd sg.* (**5.6.a:**) (**7.8.A.1:**) |

**धूमेनाव्रियते वह्निर्यथादर्शो मलेन च। यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतम्॥३८॥**

(धूमेन आव्रियते वह्निः, यथा आदर्शः मलेन च। यथा उल्बेन आवृतः गर्भः, तथा तेन इदम् आवृतम्॥)

यथा धूमेन वह्निः आव्रियते, [यथा] मलेन आदर्शः [आव्रियते], यथा च उल्बेन गर्भः आवृतः, तथा तेन इदम् [ज्ञानम्] आवृतम्। (**3.38**)

Like fire is covered by smoke, [like] a mirror [covered] by dirt, and like a fetus covered by the womb, similarly, by that [काम] this [knowledge] is covered. [And that covering is removed by the breath of teaching, by the action of धर्म, and by time, respectively.]

| | | | |
|---|---|---|---|
| 1 | यथा | like | fr. यथा *in.* (**6.19:**) |
| 4 | धूमेन | by smoke | fr. धूम *m. sg. inst.* |
| 2 | वह्निः | fire | fr. वह्नि *m. sg. nom.* |
| 3 | आव्रियते | is covered | fr. आ + √वृ *ps. pr. 3rd sg.* (**5.37.3:**) |
| 6 | मलेन | by dirt | fr. मल *n. sg. inst.* |
| 5 | आदर्शः [आव्रियते] | [like] a mirror [covered] | fr. आदर्श *m. sg. nom.* |
| 7 | यथा च | and like | fr. यथा *in.* (**6.19:**); च *in.* |
| 10 | उल्बेन | by the womb | fr. उल्ब *n. sg. inst.* |
| 8 | गर्भः | a fetus | fr. गर्भ *m. sg. nom.* |
| 9 | आवृतः | covered | fr. आवृत *pp. of* आ + √वृ *pt. m. sg. nom.* |
| 11 | तथा | similarly | fr. तथा *in.* (**6.19:**) |
| 12 | तेन इदम् [ज्ञानम्] | by that [काम] this [knowledge] | fr. तद् *prn. m. sg. inst.*; इदम् *prn. n. sg. nom.* |
| 13 | आवृतम् | is covered | fr. आवृत *pp. of* आ + √वृ *pt. n. sg. nom.* |

**आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा। कामरूपेण कौन्तेय दुष्पूरेणानलेन च॥३९॥**

(आवृतं ज्ञानम् एतेन, ज्ञानिनः नित्यवैरिणा। कामरूपेण कौन्तेय, दुष्पूरेण अनलेन च॥)

कौन्तेय, एतेन नित्य-वैरिणा काम-रूपेण दुष्-पूरेण अन्-अलेन च ज्ञानिनः ज्ञानम् आवृतम्। (**3.39**)

O अर्जुन, by this constant enemy in the form of binding desire, insatiable [like] fire, the knowledge of the [one who is yet to be] wise is covered.

| | | | |
|---|---|---|---|
| 1 | कौन्तेय | (अर्जुन) O Son of कुन्ती | fr. कौन्तेय *m. sg. voc.* |
| 2 | एतेन | by this | fr. एतद् *prn. m. sg. inst.* |
| 3 | नित्य-वैरिणा | constant enemy | fr. नित्य-वैरिन् *a. m. sg. inst.* (**3.15: & 2.92:**) |
| 5 | काम- | of binding desire | |
| 4 | -रूपेण | in the form | fr. काम-रूप *a. m. sg. inst.* |

| | | | |
|---|---|---|---|
| 6 | दुष्-पूरेण | insatiable | fr. दुस्-पूर *a. m. sg. inst.* (दुष्◦ *before* क् प्) (**2.92:**) |
| 7 | अन्-अलेन च | [like] fire | fr. अनल *m. sg. inst.*; च *in.* |
| 9 | ज्ञानिनः | of the [one who is yet to be] wise | fr. ज्ञानिन् *a. m. sg. gen.* (**3.15:**) |
| 8 | ज्ञानम् | the knowledge | fr. ज्ञान *n. sg. nom.* |
| 10 | आवृतम् | is covered | fr. आवृत *pp. of* आ + √वृ *pt. n. sg. nom.* |

**इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते। एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनम्॥४०॥**
(इन्द्रियाणि मनः बुद्धिः, अस्य अधिष्ठानम् उच्यते। एतैः विमोहयति एषः, ज्ञानम् आवृत्य देहिनम्॥)
अस्य अधिष्ठानम् इन्द्रियाणि मनः बुद्धिः [च] उच्यते। एषः [कामः] एतैः ज्ञानम् आवृत्य देहिनं विमोहयति। (**3.40**)
Its [काम-'s] abode is said to be the senses, the mind, and the intellect. Covering knowledge through [misdirecting] these, this [काम] deludes the individual [i.e., the one identified with one's body].

| | | | |
|---|---|---|---|
| 1 | अस्य अधिष्ठानम् | its [काम-'s] abode | fr. इदम् *prn. m. sg. gen.*; अधिष्ठान *n. sg. nom.* |
| 3 | इन्द्रियाणि | the senses | fr. इन्द्रिय *n. pl. nom.* |
| 4 | मनः | the mind | fr. मनस् *n. sg. nom.* (**3.6:**) |
| 5 | बुद्धिः | [and] the intellect | fr. बुद्धि *f. sg. nom.* |
| 2 | उच्यते | is said to be | fr. √वच् *ps. pr. 3rd sg.* (**5.37.6:** & **2.3.a:**) (**7.7.1:**) |
| 8 | एषः [कामः] | this [काम] | fr. एतद् *prn. m. sg. nom.* |
| 7 | एतैः | through [misdirecting] these | fr. एतद् *prn. n. pl. inst.* (**7.5.2.a:**) |
| 6 | ज्ञानम् आवृत्य | covering knowledge | fr. ज्ञान *n. sg. acc.*; आवृत्य *in. pt. of* आ + √वृ (**6.9:**) |
| 10 | देहिनं | the individual | fr. देहिन् *a. m. sg. acc.* |
| 9 | विमोहयति | deludes | fr. वि + √मुह् *P. cs. pr. 3rd sg.* (**5.40:**) |

**तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ। पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम्॥ ४१॥**

(तस्मात् त्वम् इन्द्रियाणि आदौ, नियम्य भरतर्षभ। पाप्मानं प्रजहि हि एनं, ज्ञानविज्ञाननाशनम्॥ )

भरत-ऋषभ, तस्मात् त्वम् आदौ इन्द्रियाणि नियम्य, प्रजहि हि एनं पाप्मानं ज्ञान-विज्ञान-नाशनम्। (**3.41**)

Therefore, O अर्जुन, exercising authority over the senses at [their] source, please indeed destroy this sinful destroyer of knowledge and of the assimilation [of that knowledge].

| | | | |
|---|---|---|---|
| 2 | भरत-ऋषभ | (अर्जुन) O Prominent Among the Descendants of भरत | fr. भरत-ऋषभ *m. sg. voc.* |
| 1 | तस्मात् | therefore | fr. तस्मात् *in.* |
| 6 | त्वम् | you | fr. त्वम् *prn. sg. nom.* |
| 5 | आदौ | at [their] source | fr. आदि *m. sg. loc.* (**3.29.c:**) |
| 4 | इन्द्रियाणि | the senses | fr. इन्द्रिय *n. pl. acc.* |
| 3 | नियम्य | exercising authority over | fr. नियम्य *in. pt. of* नि + √यम् (**6.9:**) |
| 7 | प्रजहि हि | please indeed destroy | fr. प्र + √हन् *2.P. impv. 2nd sg.* (**5.19.5:** & **5.6.a:**); हि *in.* |
| 8 | एनं पाप्मानं | this sinful | fr. एनद् *prn. m. sg. acc.* (**4.10:**); पाप्मन् *a. m. sg. acc.* (**3.22:**) |
| 10 | ज्ञान- | of knowledge | |
| 11 | -विज्ञान- | and of the assimilation [of that knowledge] | |
| 9 | -नाशनम् | destroyer | fr. ज्ञान-विज्ञान-नाशन *a. m. sg. acc.* |

**इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः। मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः॥ ४२॥**

(इन्द्रियाणि पराणि आहुः, इन्द्रियेभ्यः परं मनः। मनसः तु परा बुद्धिः, यः बुद्धेः परतः तु सः॥ )

[अर्थेभ्यः] पराणि इन्द्रियाणि, इन्द्रियेभ्यः परं मनः, मनसः तु परा बुद्धिः, यः तु बुद्धेः परतः सः [परः आत्मा] [इति] आहुः। (**3.42**)

They say that the senses are superior [to the body and all other objects], the mind is superior to the senses, the intellect is superior to the mind; whereas the one who is superior to the intellect is that [limitless self].

| | | | |
|---|---|---|---|
| 3 | पराणि | are superior [to the body and all other objects] | fr. पर *prn. a. n. pl. nom.* (**4.16.3:**) |
| 2 | इन्द्रियाणि | the senses | fr. इन्द्रिय *n. pl. nom.* |
| 6 | इन्द्रियेभ्यः | to the senses | fr. इन्द्रिय *n. pl. abl.* (**7.11.2.a:**) |
| 5 | परं | [is] superior | fr. पर *prn. a. n. sg. nom.* (**4.16.3:**) |
| 4 | मनः | the mind | fr. मनस् *n. sg. nom.* (**3.6:**) |

| | | | |
|---|---|---|---|
| 9 | मनसः तु | to the mind [whereas] | fr. मनस् *n. sg. abl.* (**3.6:**); तु *in.* |
| 8 | परा | is superior | fr. पर *prn. a. f. sg. nom.* (**4.16.3:**) |
| 7 | बुद्धिः | the intellect | fr. बुद्धि *f. sg. nom.* |
| 10 | यः तु | whereas the one who [is] | fr. यद् *prn. m. sg. nom.*; तु *in.* |
| 12 | बुद्धेः | to the intellect | fr. बुद्धि *f. sg. abl.* |
| 11 | परतः | superior | fr. परतस् *in.* (**6.19:**) |
| 13 | सः [परः आत्मा] | [is] that [limitless self] | fr. तद् *prn. m. sg. nom.* |
| 1 | [इति] आहुः | they say [cf. कठोपनिषद् 1.3.10] [that] | fr. √अह् *P. perf. 3rd pl.* (**5.8.5:**) |

**एवं बुद्धेः परं बुद्ध्वा संस्तभ्यात्मानमात्मना। जहि शत्रुं महाबाहो कामरूपं दुरासदम्॥४३॥**

(एवं बुद्धेः परं बुद्ध्वा, संस्तभ्य आत्मानम् आत्मना। जहि शत्रुं महाबाहो, कामरूपं दुरासदम्॥)

महा-बाहो, एवं बुद्धेः परं [आत्मानं] बुद्ध्वा, आत्मानम् आत्मना संस्तभ्य, काम-रूपं दुर्-आसदं शत्रुं जहि। (**3.43**)

O अर्जुन, in this way [of] knowing [oneself] as superior to the intellect, steadying the one by the other one [steadying the senses by the mind, the mind by the intellect, and the intellect by self-knowledge], destroy the enemy in the form of काम, [otherwise so] difficult to get a fix on.

| | | | |
|---|---|---|---|
| 1 | महा-बाहो | (अर्जुन) O Mighty Armed One | fr. महा-बाहु *m. sg. voc.* |
| 2 | एवं | in this way | fr. एवम् *in.* (**6.19:**) |
| 5 | बुद्धेः | to the intellect | fr. बुद्धि *f. sg. abl.* |
| 4 | परं | [oneself as] superior | fr. पर *prn. a. m. acc.* (**4.16.3:**) |
| 3 | बुद्ध्वा | knowing | fr. बुद्ध्वा *in. pt. of* √बुध् (**6.9: & 2.76:** & **2.78:**) |
| 7 | आत्मानम् | the one | fr. आत्मन् *reflex. prn. a. sg. acc.* |
| 8 | आत्मना | by the other one | fr. आत्मन् *reflex. prn. a. sg. inst.* |
| 6 | संस्तभ्य | steadying | fr. संस्तभ्य *in. pt. of* सम् + √स्तभ् (**6.9:** & **2.54:**) |
| 11 | काम-रूपं | in the form of काम | fr. काम-रूप *a. m. sg. acc.* |
| 12 | दुर्- | [otherwise so] difficult | |
| 13 | -आसदं | to get a fix on | fr. दुस्-आसद *a. m. sg. acc.* (**2.24:** & **.29:**) |
| 10 | शत्रुं | the enemy | fr. शत्रु *m. sg. acc.* |
| 9 | जहि | destroy | fr. √हन् *2.P. impv. 2nd sg.* (**5.19.5:** & **5.6.a:**) |

**ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे कर्मयोगो नाम तृतीयोऽध्यायः॥३॥**

(ओं तद् सत्। इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे कर्मयोगः नाम तृतीयः अध्यायः॥)

ओं तद् सत्। इति श्रीमद्-भगवद्-गीतासु उपनिषत्सु ब्रह्म-विद्यायां योग-शास्त्रे श्री-कृष्ण-अर्जुन-संवादे कर्म-योगः नाम तृतीयः अध्यायः। (3)

ओं (ब्रह्मन्, the witness of all) is that [only] reality. Thus ends the third chapter, called "The Topic of Action," of the [eighteen chapters of] *Songs of the Glorious Lord*, which is [looked upon as] उपनिषद् [and whose teaching is] in [the form of] a dialogue between श्री कृष्ण and अर्जुन, [the subject matter being] a knowledge of ब्रह्मन् and योग.

| | | | |
|---|---|---|---|
| 1 | ओं | ओम् (ब्रह्मन्, the witness of all,) | fr. ओम् *in.* |
| 2 | तद् सत् | [is] that [only] reality | fr. तद् *prn. n. sg. nom.*; सत् *n. sg. nom.* |
| 3 | इति | (quote-end quote), thus ends | fr. इति *in.* |
| 10 | श्रीमद्- | of the venerable, the glorious | |
| 11 | -भगवद्- | one having [limitless] glories, Lord | |
| 9 | -गीतासु | in [i.e., of] songs | fr. श्रीमत्-भगवत्-गीता *f. pl. loc.* (**2.43:**) |
| 12 | उपनिषत्सु | [which are/is looked upon as] उपनिषद्, sacred scripture | fr. उपनिषद् *f. pl. loc.* (**6.24:**) |
| 17 | ब्रह्म- | of ब्रह्मन् (reality/सत्) | |
| 16 | -विद्यायां | [and] a knowledge | fr. ब्रह्म-विद्या *f. sg. loc.* |
| 18 | योग-शास्त्रे | [and instruction of] योग (means, discipline, etc.) | fr. योग-शास्त्र *n. sg. loc.* |
| 14 | श्री-कृष्ण- | between Lord कृष्ण | |
| 15 | -अर्जुन- | and अर्जुन | |
| 13 | -संवादे | in [the form of] a dialogue | fr. श्री-कृष्ण-अर्जुन-संवाद *n. sg. loc.* |
| 8 | कर्म- | of action | |
| 7 | -योगः | the topic | fr. कर्म-योग *a. m. sg. nom.* |
| 6 | नाम | by the name, called | fr. नाम *in.* |
| 4 | तृतीयः | the third | fr. तृतीय *ordinal a. m. sg. nom.* |
| 5 | अध्यायः | chapter | fr. अध्याय *m. sg. nom.* |

# अथ चतुर्थोऽध्यायः

**श्रीभगवानुवाच।**

**इमं विवस्वते योगं प्रोक्तवानहमव्ययम्। विवस्वान्मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत्॥१॥**

(श्रीभगवान् उवाच। इमं विवस्वते योगं, प्रोक्तवान् अहम् अव्ययम्। विवस्वान् मनवे प्राह, मनुः इक्ष्वाकवे अब्रवीत्॥ )

श्री-भगवान् उवाच। अहं विवस्वते इमम् अ-व्ययं योगं प्रोक्तवान्। विवस्वान् मनवे प्राह। मनुः इक्ष्वाकवे अब्रवीत्। (**4.1**)

The Lord said: I taught this unchanging योग [i.e., ज्ञान-योग and कर्म-योग] to विवस्वत् (the sun deity—considered the progenitor of the solar-clan of rulers on earth). विवस्वत् taught [it to] मनु [the first human and first of the solar kings on earth in this कल्प, cycle]. मनु taught [it to] [his son] इक्ष्वाकु.

| | | | |
|---|---|---|---|
| 1 | श्री-भगवान् उवाच | the Lord said | fr. श्री-भगवत् *m. sg. nom.*; √वच् *P. perf. 3rd sg.* (**5.10.3:**) |
| 2 | अहं | I | fr. अहम् *prn. sg. nom.* |
| 6 | विवस्वते | to विवस्वत् (the sun deity) | fr. विवस्वत् *m. sg. dat.* (**3.13:**) (**7.10.A.1:**) |
| 4 | इमम् अ-व्ययं | this unchanging | fr. इदम् *prn. m. sg. acc.*; अव्यय *a. m. sg. acc.* |
| 5 | योगं | योग | fr. योग *m. sg. acc.* |
| 3 | प्रोक्तवान् | taught | fr. प्रोक्तवत् *past acc. pt. of* प्र + √वच् *pt. m. sg. nom.* (**6.7:** & **2.3.a:** & **2.80:**) |
| 7 | विवस्वान् | विवस्वत् | fr. विवस्वत् *m. sg. nom.* (**3.13.a:**) |
| 9 | मनवे | to मनु [the first man] | fr. मनु *m. sg. dat.* (**3.30:**) |
| 8 | प्राह | taught [it] | fr. प्र + √अह् *P. perf. 3rd sg.* |
| 10 | मनुः | मनु | fr. मनु *m. sg. nom.* |
| 12 | इक्ष्वाकवे | to [his son] इक्ष्वाकु | fr. इक्ष्वाकु *m. sg. dat.* (**3.30:**) |
| 11 | अब्रवीत् | taught [it] | fr. √ब्रू *2.P. impf. 3rd sg.* (**5.19.8:**) |

**एवं परम्पराप्राप्तमिमं राजर्षयो विदुः। स कालेनेह महता योगो नष्टः परन्तप॥२॥**

(एवं परम्पराप्राप्तम्, इमं राजर्षयः विदुः। सः कालेन इह महता, योगः नष्टः परन्तप॥ )

एवं राज-ऋषयः परम्-परा-प्राप्तम् इमं [योगं] विदुः। इह सः योगः महता कालेन नष्टः, परन्-तप। (**4.2**)

In this way, being handed down from one to another, the kings who were sages [or the kings and sages] knew this [योग]. After a long time, here [today, among these kings] that योग has been lost, O अर्जुन.

| | | | |
|---|---|---|---|
| 1 | एवं | in this way | fr. एवम् *in.* (**6.19:**) |
| 4 | राज- | the kings | |
| 5 | -ऋषयः | who were sages | fr. राज-ऋषि *m. sg. nom.* |
| 3 | परम्-परा- | from one to another | |
| 2 | -प्राप्तम् | [being] handed [down] | fr. परम्-परा-प्राप्त *n. m. sg. acc.* |

| | | | |
|---|---|---|---|
| 7 | इमं | this [योग] | fr. इदम् *prn. m. sg. acc.* |
| 6 | विदुः | knew | fr. √विद् *P. perf. 3rd pl.* |
| 9 | इह | here | fr. इह *in.* |
| 10 | सः योगः | that योग | fr. तद् *prn. m. sg. nom.*; योग *m. sg. nom.* |
| 8 | महता कालेन | after a long time | fr. महत् *a. m. sg. inst.*; काल *m. sg. inst.* (**7.9.4:**) |
| 11 | नष्टः | has been lost | fr. नष्ट *pp. of* √नश् *pt. m. sg. nom.* (**2.85:**) |
| 12 | परन्-तप | (अर्जुन) O Vexer of Foes | fr. पर-म्-तप *m. sg. voc.* (**2.55:**) |

**स एवायं मया तेऽद्य योगः प्रोक्तः पुरातनः। भक्तोऽसि मे सखा चेति रहस्यं ह्येतदुत्तमम्॥३॥**

(सः एव अयं मया ते अद्य, योगः प्रोक्तः पुरातनः। भक्तः असि मे सखा च इति, रहस्यं हि एतद् उत्तमम्॥)

मया सः एव अयं पुरातनः योगः ते अद्य प्रोक्तः, मे भक्तः सखा च असि इति (=यस्मात्)। उत्तमं हि एतद् रहस्यम् [योगज्ञानम्]। (**4.3**)

I just taught to you this very same ancient योग, because you are My devotee and friend. This secret [teaching of योग] is the most profound indeed.

| | | | |
|---|---|---|---|
| 1 | मया | I | fr. अहम् *prn. sg. inst.* (**7.7:**) |
| 5 | सः एव अयं | this very same | fr. तद् *prn. m. sg. nom.*; एव *in.* (**6.19:**); इदम् *prn. m. sg. nom.* |
| 6 | पुरातनः | ancient | fr. पुरातन *a. m. sg. nom.* |
| 7 | योगः | योगः | fr. योग *m. sg. nom.* |
| 4 | ते | to you | fr. त्वम् *prn. sg. dat.* (**7.10.A.1:**) |
| 2 | अद्य | just [now] | fr. अद्य *in.* |
| 3 | प्रोक्तः | taught | fr. प्रोक्त *pp. of* प्र + √वच् *pt. m. sg. nom.* (**6.6:** & **2.3.a:** & **2.80:**) |
| 10 | मे भक्तः | My devotee | fr. अहम् *prn. sg. gen.*; भक्त *pp. of* √भज् *m. sg. nom.* (**2.81:**) |
| 11 | सखा च | and friend | fr. सखि *m. sg. nom.* (**3.33:**); च *in.* |
| 9 | असि | you are | fr. √अस् *2.P. pr. 2nd sg.* (**5.19.4:**) |
| 8 | इति (=यस्मात्) | because | fr. इति *in.* |
| 13 | उत्तमं | [is] the most profound | fr. उत्तम *spv. a. n. sg. nom.* (**6.25:**) |
| 14 | हि | indeed | fr. हि *in.* |
| 12 | एतद् रहस्यम् | this secret [teaching of योग] | fr. एतद् *prn. n. sg. nom.*; रहस्य *a. n. sg. nom.* |

**अर्जुन उवाच।**

**अपरं भवतो जन्म परं जन्म विवस्वतः। कथमेतद्विजानीयां त्वमादौ प्रोक्तवानिति॥ ४॥**

(अर्जुनः उवाच। अपरं भवतः जन्म, परं जन्म विवस्वतः। कथम् एतद् विजानीयां, त्वम् आदौ प्रोक्तवान् इति॥ )

अर्जुनः उवाच। भवतः जन्म अ-परं, विवस्वतः जन्म परम्। त्वम् आदौ प्रोक्तवान् इति — एतद् कथं विजानीयाम्। (**4.4**)

अर्जुन said: Your birth was not long ago; विवस्वत्-'s birth was long ago. How should I understand that You taught [विवस्वत्] in the beginning?

| | | | |
|---|---|---|---|
| 1 | अर्जुनः उवाच | अर्जुन said | fr. अर्जुन *m. sg. nom.*; √वच् *P. perf. 3rd sg.* (**5.10.3:**) |
| 2 | भवतः जन्म | Your birth | fr. भवत् *m. sg. gen.* (**3.13.b:**); जन्मन् *n. sg. nom.* (**3.22:**) |
| 3 | अ-परं | was not long ago | fr. अपर *prn. a. n. sg. nom.* (**4.16.3:**) |
| 4 | विवस्वतः जन्म | विवस्वत्-'s birth | fr. विवस्वत् *m. sg. gen.*; जन्मन् *n. sg. nom.* (**3.22:**) |
| 5 | परम् | was long ago | fr. पर *prn. a. n. sg. nom.* (**4.16.3:**) |
| 9 | त्वम् | You | fr. त्वम् *prn. sg. nom.* |
| 11 | आदौ | in the beginning | fr. आदि *m. sg. loc.* (**3.29.c:**) |
| 10 | प्रोक्तवान् | taught [विवस्वत्] | fr. प्रोक्तवत् *past acc. pt. of* प्र + √वच् *pt. m. sg. nom.* (**6.7:** & **2.3.a:** & **2.80:**) |
| 8 | इति एतद् | that | fr. इति *in.*; एतद् *prn. n. sg. nom.* |
| 6 | कथं | how? | fr. कथम् *in.* (**6.19:**) |
| 7 | विजानीयाम् | should I understand | fr. वि + √ज्ञा *9.P. pot. 1st sg.* (**5.23.2:** & **5.3:**) |

**श्रीभगवानुवाच।**

**बहूनि मे व्यतीतानि जन्मानि तव चार्जुन। तान्यहं वेद सर्वाणि न त्वं वेत्थ परन्तप॥ ५॥**

(श्रीभगवान् उवाच। बहूनि मे व्यतीतानि, जन्मानि तव च अर्जुन। तानि अहं वेद सर्वाणि, न त्वं वेत्थ परन्तप॥ )

श्री-भगवान् उवाच। मे तव च बहूनि जन्मानि व्यतीतानि, अर्जुन। अहं तानि सर्वाणि वेद, त्वं न वेत्थ, परन्-तप। (**4.5**)

The Lord said: Many births have passed for Me and for you, O अर्जुन. I know them all; you do not, O अर्जुन.

| | | | |
|---|---|---|---|
| 1 | श्री-भगवान् उवाच | the Lord said | fr. श्री-भगवत् *m. sg. nom.*; √वच् *P. perf. 3rd sg.* (**5.10.3:**) |
| 4 | मे | for Me | fr. अहम् *prn. sg. gen.* |
| 5 | तव च | and for you | fr. त्वम् *prn. sg. gen.*; च *in.* |
| 2 | बहूनि जन्मानि | many births | fr. बहु *a. n. pl. nom.*; जन्मन् *n. pl. nom.* (**3.22:**) |
| 3 | व्यतीतानि | have passed | fr. व्यतीत *pp. of* वि + अति + √इ *pt. n. pl. nom.* |
| 6 | अर्जुन | O अर्जुन | fr. अर्जुन *m. sg. voc.* |

| | | | |
|---|---|---|---|
| 7 | अहं | I | fr. अहम् *prn. sg. nom.* |
| 9 | तानि सर्वाणि | them all | fr. तद् *prn. n. pl. acc.*; सर्व *prn. a. n. pl. acc.* |
| 8 | वेद | know | fr. √विद् *P. perf.* $1^{st}$ *sg.* (**5.28:**) |
| 10 | त्वं | you | fr. त्वम् *prn. sg. nom.* |
| 11 | न वेत्थ | do not know | fr. न *in.*; √विद् *P. perf.* $2^{nd}$ *sg.* (**5.28:** & **2.42:**) |
| 12 | परन्-तप | (अर्जुन) O Vexer of Foes | fr. पर-म्-तप *m. sg. voc.* (**2.55:**) |

**अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन्। प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया॥६॥**

(अजः अपि सन् अव्ययात्मा, भूतानाम् ईश्वरः अपि सन्। प्रकृतिं स्वाम् अधिष्ठाय, सम्भवामि आत्ममायया॥)

अ-जः अपि सन् अ-व्यय-आत्मा [सन्] भूतानाम् ईश्वरः अपि सन् स्वां प्रकृतिम् अधिष्ठाय आत्म-मायया सम्भवामि। (**4.6**)

Though unborn, undiminished, and the Lord of [all] beings, wielding My प्रकृति (the projecting power of the Lord, which manifests as all of nature), I [as an incarnate form] am [as though] born by My own माया (projecting power; i.e., प्रकृति).

| | | | |
|---|---|---|---|
| 2 | अ-जः | unborn | fr. अज *a. m. sg. nom.* (**6.24.3:**) |
| 1 | अपि सन् (**2.62:**) | though [being] | fr. अपि *in.*; सत् *pr. pt. of* √अस् *pt. m. sg. nom.* (**6.4:** & **5.19.4:**) |
| 3 | अ-व्यय-आत्मा | undiminished | fr. अव्यय-आत्मन् *a. m. sg. nom.* (**3.22:**) |
| 6 | भूतानाम् | of [all] beings | fr. भूत *pp. of* √भू *n. pl. gen.* |
| 5 | ईश्वरः | [and] the Lord | fr. ईश्वर *m. sg. nom.* |
| 4 | अपि सन् | [though being] | fr. अपि *in.*; सत् *pr. pt. of* √अस् *pt. m. sg. nom.* (**6.4:** & **5.19.4:**) |
| 8 | स्वां प्रकृतिम् | My प्रकृति (the projecting power) | fr. स्व *prn. a. f. sg. acc.*; प्रकृति *f. sg. acc.* |
| 7 | अधिष्ठाय | wielding | fr. अधिष्ठाय *in. pt. of* अधि + √स्था (**6.9:**) |
| 10 | आत्म- | by My own | |
| 11 | -मायया | माया (projecting power) | fr. मिथ्या-आचार *f. sg. inst.* |
| 9 | सम्भवामि | I am [as though] born | fr. सम् + √भू *1.P. pr.* $1^{st}$ *sg.* (**5.5.a:**) |

**यदा यदा हि धर्मस्य ग्लानिर्भवति भारत। अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्॥७॥**

(यदा यदा हि धर्मस्य, ग्लानिः भवति भारत। अभ्युत्थानम् अधर्मस्य, तदा आत्मानं सृजामि अहम्॥)

भारत, यदा यदा हि धर्मस्य ग्लानिः अ-धर्मस्य [च] अभ्युत्थानं भवति, तदा अहम् आत्मानं सृजामि। (**4.7**)

O अर्जुन, whenever indeed there is a wane of धर्म and an ascendancy of अधर्म, then I manifest Myself.

| | | | |
|---|---|---|---|
| 1 | भारत | (अर्जुन) O Descendant of Emperor भरत, (Brilliant) Son of India | fr. भारत *m. sg. voc.* |
| 2 | यदा यदा | whenever | fr. यदा *in.* (**6.19:**) (**7.6.B.2.e:**) |
| 3 | हि | indeed | fr. हि *in.* |
| 6 | धर्मस्य | of धर्म | fr. धर्म *m. sg. gen.* |
| 5 | ग्लानिः | a wane | fr. ग्लानि *f. sg. nom.* |
| 8 | अ-धर्मस्य | of अधर्म | fr. धर्म *m. sg. gen.* |
| 7 | [च] अभ्युत्थानं | [and] an ascendancy | fr. अभ्युत्थान *n. sg. nom.* |
| 4 | भवति | there is | fr. √भू *1.P. pr. 3rd sg.* |
| 9 | तदा | then | fr. तदा *in.* (**6.19:**) |
| 10 | अहम् | I | fr. अहम् *prn. sg. nom.* |
| 12 | आत्मानं | Myself | fr. आत्मन् *m. sg. acc.* (**3.22:**) |
| 11 | सृजामि | manifest | fr. √सृज् *6.P. pr. 1st sg.* |

**परित्राणाय साधूनां विनाशाय च दुष्कृताम्। धर्मसंस्थापनार्थाय सम्भवामि युगे युगे॥८॥**

(परित्राणाय साधूनां, विनाशाय च दुष्कृताम्। धर्मसंस्थापनार्थाय, सम्भवामि युगे युगे॥)

साधूनां परित्राणाय, दुष्-कृतां विनाशाय, धर्म-संस्थापन-अर्थाय च युगे युगे सम्भवामि। (**4.8**) I appear in every युग (the various ages within the cycles of the universe) for the protection of those committed to धर्म, for the destruction of those committed to अधर्म (what is opposed to धर्म), and for the [re-]establishment of धर्म.

| | | | |
|---|---|---|---|
| 4 | साधूनां | of those committed to धर्म | fr. साधु *m. pl. gen.* |
| 3 | परित्राणाय | for the protection | fr. परित्राण *m. sg. dat.* (**7.10.B.1.a:**) |
| 6 | दुष्-कृतां | of those committed to अधर्म | fr. दुस्-कृत् *m. pl. gen.* (दुष्॰ *before* क् प्) (**6.24.2: & 3.5:**) |
| 5 | विनाशाय | for the destruction | fr. विनाश *m. sg. dat.* (**7.10.B.1.a:**) |
| 8 | धर्म-संस्थापन- | the [re-]establishment of धर्म | |
| 7 | -अर्थाय च | and for | fr. धर्म-संस्थापन-अर्थ *m. sg. dat.* (**7.10.B.1.a:**); च *in.* |
| 2 | युगे युगे | in every युग (age of the universe) | fr. युग *n. sg. loc.* (**7.6.B.2.e:**) |
| 1 | सम्भवामि | I appear | fr. सम् + √भू *1.P. pr. 1st sg.* |

**जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः। त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन॥९॥**

(जन्म कर्म च मे दिव्यम्, एवं यः वेत्ति तत्त्वतः। त्यक्त्वा देहं पुनः जन्म, न एति माम् एति सः अर्जुन॥)

यः एवं मे दिव्यं जन्म कर्म च तत्त्वतः वेत्ति, सः देहं त्यक्त्वा पुनः जन्म न एति। माम् एति, अर्जुन। (**4.9**)

The one who thus knows in reality My divine birth and action [i.e., knows the nature of Me and प्रकृति]—that one, upon giving up the body, is not reborn. [That one] attains Me, O अर्जुन.

| | | | |
|---|---|---|---|
| 1 | यः एवं | the one who thus | fr. यद् *prn. m. sg. nom.*; एवम् *in.* (**6.19:**) |
| 4 | मे दिव्यं | My divine | fr. अहम् *prn. sg. gen.*; दिव्य *a. n. sg. acc.* |
| 5 | जन्म कर्म च | birth and action | fr. जन्मन् *n. sg. acc.* (**3.22:**); कर्मन् *n. sg. acc.* (**3.22:**); च *in.* |
| 3 | तत्त्वतः | in reality | fr. तत्त्वतस् *in.* (**6.19:**) |
| 2 | वेत्ति | knows | fr. √विद् *2.P. pr.* $3^{rd}$ *sg.* (**5.3:** & **2.42:**) |
| 6 | सः | that one | fr. तद् *prn. m. sg. nom.* |
| 8 | देहं | the body | fr. देह *m. sg. acc.* |
| 7 | त्यक्त्वा | upon giving up | fr. त्यक्त्वा *in. pt. of* √त्यज् (**6.9:** & **2.81:**) |
| 10 | पुनः जन्म | reborn | fr. पुनर् *in.* (**2.24:** & **.34:**); जन्मन् *n. sg. acc.* (**3.22:**) |
| 9 | न एति | does not go, is not | fr. न *in.*; √इ *2.P. pr.* $3^{rd}$ *sg.* (**5.3:**) |
| 12 | माम् | Me | fr. अहम् *prn. sg. acc.* |
| 11 | एति | [that one] attains | fr. √इ *2.P. pr.* $3^{rd}$ *sg.* (**5.3:**) |
| 13 | अर्जुन | O अर्जुन | fr. अर्जुन *m. sg. voc.* |

**वीतरागभयक्रोधा मन्मया मामुपाश्रिताः। बहवो ज्ञानतपसा पूता मद्भावमागताः॥१०॥**

(वीतरागभयक्रोधाः, मन्मयाः माम् उपाश्रिताः। बहवः ज्ञानतपसा, पूताः मद्भावम् आगताः॥)

वीत-राग-भय-क्रोधाः, मन्मयाः माम् उपाश्रिताः, ज्ञान-तपसा पूताः — बहवः मद्-भावम् आगताः। (**4.10**)

Freed from longing, fear, and anger, having taken refuge in Me [by] being Me alone, and purified by the discipline that is knowledge—many have attained My nature [i.e., complete freedom].

| | | | |
|---|---|---|---|
| 1 | वीत- | freed | |
| 2 | -राग-भय-क्रोधाः | from longing, fear and anger | fr. वीत-राग-भय-क्रोध *a. m. pl. nom.* |
| 5 | मन्मयाः | [by] being Me alone | fr. मन्मय *a. m. pl. nom.* (**4.2:** & **6.27:** & **2.4:** & **2.24:** & **2.44:**) |
| 4 | माम् | Me | fr. अहम् *prn. sg. acc.* |
| 3 | उपाश्रिताः | taken refuge in | fr. उपाश्रित *pp. of* उप + आ + √श्रि *a. m. pl. nom.* |

| | | | |
|---|---|---|---|
| 8 | ज्ञान- | that is knowledge | |
| 7 | -तपसा | by the discipline | fr. ज्ञान-तपस् *n. sg. inst.* (**3.6:**) |
| 6 | पूताः | and purified | fr. पूत *pp. of* √पू *a. m. pl. nom.* |
| 9 | बहवः | many | fr. बहु *a. m. pl. nom.* |
| 11 | मद्-भावम् | My nature | fr. मद्-भाव *m. sg. acc.* (**4.2: & 2.24:** & **2.43:**) |
| 10 | आगताः | have attained | fr. आगत *pp. of* आ + √गम् *a. m. pl. nom.* (**6.6:**) |

**ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्। मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः।।११।।**

(ये यथा मां प्रपद्यन्ते, तान् तथा एव भजामि अहम्। मम वर्त्म अनुवर्तन्ते, मनुष्याः पार्थ सर्वशः।।)

यथा ये मां प्रपद्यन्ते, तथा एव अहं तान् भजामि। पार्थ, मनुष्याः मम वर्त्म सर्वशः अनुवर्तन्ते। (**4.11**)

In which[ever] way the [people] worship Me, in that very same way I bless them. O अर्जुन, people follow My path [karmic order] in every way.

| | | | |
|---|---|---|---|
| 1 | यथा | in which[ever] way | fr. यथा *in.* (**6.19:**) |
| 2 | ये | the [people] | fr. यद् *prn. m. pl. nom.* |
| 4 | मां | Me | fr. माम् *prn. sg. acc.* |
| 3 | प्रपद्यन्ते | worship | fr. प्र + √पद् *4.Ā. pr.* $3^{rd}$ *pl.* |
| 5 | तथा एव | in that very same way | fr. तथा *in.* (**6.19:**); एव *in.* |
| 6 | अहं | I | fr. अहम् *prn. sg. nom.* |
| 8 | तान् | them | fr. तद् *prn. m. pl. acc.* |
| 7 | भजामि | bless | fr. √भज् *1.P. pr.* $1^{st}$ *sg.* (**5.5.a:**) |
| 9 | पार्थ | (अर्जुन) O Son of पृथा | fr. पार्थ *m. sg. voc.* |
| 10 | मनुष्याः | people | fr. मनुष्य *m. pl. nom.* |
| 12 | मम वर्त्म | My path [karmic order] | fr. अहम् *prn. sg. gen.*; वर्त्मन् *n. sg. acc.* (**3.22:**) |
| 13 | सर्वशः | in every way | fr. सर्वशस् *in.* (**6.19:**) |
| 11 | अनुवर्तन्ते | follow | fr. अनु + √वृत् *1.Ā. pr.* $3^{rd}$ *pl.* |

**काङ्क्षन्तः कर्मणां सिद्धिं यजन्त इह देवताः। क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्मजा॥१२॥**

(काङ्क्षन्तः कर्मणां सिद्धिं, यजन्ते इह देवताः। क्षिप्रं हि मानुषे लोके, सिद्धिः भवति कर्मजा॥)

कर्मणां सिद्धिं काङ्क्षन्तः इह [बहवः मनुष्याः] देवताः [प्रति] यजन्ते, मानुषे लोके हि (=यस्मात्) कर्म-जा सिद्धिः क्षिप्रं भवति। (**4.12**)

Desiring a result of action here, [many] worship the deities—because in the human world a result born of action comes quickly.

| | | | |
|---|---|---|---|
| 2 | कर्मणां सिद्धिं | a result of action | fr. कर्मन् *n. sg. gen.* (**3.22:**); सिद्धि *f. sg. acc.* |
| 1 | काङ्क्षन्तः | desiring | fr. काङ्क्षत् *pr. pt. of* √काङ्क्ष् *pt. m. pl. nom.* (**6.4:** & **3.12:**) |
| 3 | इह [मनुष्याः] | here [many people] | fr. इह *in.* (**6.19:**) |
| 5 | देवताः [प्रति] | the deities | fr. देवता *f. pl. acc.* |
| 4 | यजन्ते | worship | fr. √यज् *1.Ā. pr. 3rd pl.* |
| 7 | मानुषे लोके | in the human world | fr. मानुष *a. m. sg. loc.*; लोक *m. sg. loc.* |
| 6 | हि (=यस्मात्) | because | fr. हि *in.* |
| 9 | कर्म-जा | born of action | fr. कर्म-ज *a. f. sg. nom.* (**6.24.3:**) |
| 8 | सिद्धिः | a result | fr. सिद्धि *f. sg. nom.* |
| 10 | क्षिप्रं भवति | comes quickly | fr. क्षिप्रम् *in.*; √भू *1.P. pr. 3rd sg.* |

**चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः। तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम्॥१३॥**

(चातुर्वर्ण्यं मया सृष्टं, गुणकर्मविभागशः। तस्य कर्तारम् अपि मां, विद्धि अकर्तारम् अव्ययम्॥)

मया गुण-कर्म-विभागशः चातुर्-वर्ण्यं सृष्टम्। तस्य कर्तारम् अपि, माम् अ-व्ययम् अ-कर्तारं विद्धि। (**4.13**)

I manifested the four-fold वर्ण (grouping within society—educators, administrators, entrepreneurs, and laborers) according to the divisions of गुण (mental disposition) and कर्मन् (duty). Though its author, know Me to be changeless and not a doer.

| | | | |
|---|---|---|---|
| 1 | मया | I | fr. अहम् *prn. sg. inst.* (**7.7:**) |
| 6 | गुण-कर्म- | of गुण (mental disposition) and कर्मन् (duty) | |
| 5 | -विभागशः | according to the divisions | fr. गुण-कर्म-विभागशस् *in.* (**6.19:**) |
| 3 | चातुर्- | the four-fold | |
| 4 | -वर्ण्यं | वर्ण (grouping within society) | fr. चातुर्-वर्ण्य *n. sg. nom.* (**2.24:** & **.29:**) |
| 2 | सृष्टम् | manifested | fr. सृष्ट *pp. of* √सृज् *pt. m. sg. nom.* (**2.81:** & **.88:**) |

| | | | |
|---|---|---|---|
| 8 | तस्य कर्तारम् | its author | fr. तद् *prn. n. sg. gen.*; कर्तृ *m. sg. acc.* (**3.38:**) |
| 7 | अपि | though | fr. अपि *in.* |
| 10 | माम् | Me | fr. अहम् *prn. sg. acc.* |
| 11 | अ-व्ययम् | to be changeless | fr. अव्यय *a. m. sg. acc.* |
| 12 | अ-कर्तारं | [and] not a doer | fr. अकर्तृ *m. sg. acc.* (**3.38:**) |
| 9 | विद्धि | know | fr. √विद् *2.P. impv. 2nd sg.* (**5.6.a:**) |

**न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा। इति मां योऽभिजानाति कर्मभिर्न स बध्यते॥१४॥**

(न मां कर्माणि लिम्पन्ति, न मे कर्मफले स्पृहा। इति मां यः अभिजानाति, कर्मभिः न सः बध्यते॥)

कर्माणि मां न लिम्पन्ति, मे न कर्म-फले स्पृहा। इति यः माम् अभिजानाति, सः कर्मभिः न बध्यते। (**4.14**)

Actions do not affect Me, nor do I have longing toward the result of action. The one who knows Me thus, that one is not bound by actions.

| | | | |
|---|---|---|---|
| 1 | कर्माणि | actions | fr. कर्मन् *n. pl. nom.* |
| 3 | मां | Me | fr. अहम् *prn. sg. acc.* |
| 2 | न लिम्पन्ति | do not affect | fr. न *in.*; √लिप् *6.P. pr. 3rd pl.* (**5.17.1:**) |
| 4 | मे न | nor do I have | fr. अहम् *prn. sg. gen.* (**7.12.1.a:**); न *in.* |
| 6 | कर्म-फले | towards the result of action | fr. कर्म-फल *n. sg. loc.* |
| 5 | स्पृहा | longing | fr. स्पृहा *f. sg. nom.* |
| 10 | इति | thus | fr. इति *in.* |
| 7 | यः | the one who | fr. यद् *prn. m. sg. nom.* |
| 9 | माम् | Me | fr. अहम् *prn. sg. acc.* |
| 8 | अभिजानाति | knows | fr. अभि + √ज्ञा *9.P. pr. 3rd sg.* (**5.23.2:** & **5.3:**) |
| 11 | सः | that one | fr. तद *prn. m. sg. nom.* |
| 13 | कर्मभिः | by actions | fr. कर्मन् *n. pl. inst.* |
| 12 | न बध्यते | is not bound | fr. न *in.*; √बन्ध् *ps. pr. 3rd sg.* (**5.37.5:**) |

**एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः। कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतम्॥१५॥**

(एवं ज्ञात्वा कृतं कर्म, पूर्वैः अपि मुमुक्षुभिः। कुरु कर्म एव तस्मात् त्वं, पूर्वैः पूर्वतरं कृतम्॥)

एवं ज्ञात्वा पूर्वैः मुमुक्षुभिः अपि कर्म कृतम्। तस्मात् त्वं पूर्वैः पूर्वतरं कृतं [एवं] कर्म एव कुरु। (**4.15**)

Knowing [Me] in this way, even previous desirers of complete freedom performed [their] duty. Therefore, you [also] perform [your] duty, [as] the previous ones did before.

| | | | |
|---|---|---|---|
| 2 | एवं | in this way | fr. एवम् *in.* (**6.19:**) |
| 1 | ज्ञात्वा | knowing [Me] | fr. ज्ञात्वा *in. pt. of* √ज्ञा (**6.9:**) |
| 4 | पूर्वैः | previous | fr. पूर्व *prn. a. m. pl. inst.* |
| 3 | मुमुक्षुभिः अपि | even desirers of complete freedom | fr. मुमुक्षु *a. m. pl. inst.* (**5.41:**) (**7.7:**); अपि *in.* |
| 5 | कर्म कृतम् | performed [their] duty | fr. कर्मन् *n. sg. nom.*; कृत *pp. of* √कृ *pt. n. sg. nom.* |
| 6 | तस्मात् | therefore | fr. तस्मात् *in.* |
| 7 | त्वं | you [also] | fr. त्वम् *prn. sg. nom.* |
| 11 | पूर्वैः | [by] the previous ones | fr. पूर्व *prn. a. m. pl. inst.* |
| 10 | पूर्वतरं कृतं [एवं] | [as] was done, did earlier | fr. पूर्वतर *cpv. a. n. sg. acc.* (**6.25:**); कृत *pp. of* √कृ *pt. n. sg. nom.* |
| 9 | कर्म एव | [your] duty | fr. कर्मन् *n. sg. acc.*; एव *in.* (**6.19:**) |
| 8 | कुरु | perform | fr. √कृ *8.P. impv. 2nd sg.* (**5.22.1:**) |

**किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः। तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात्॥१६॥**

(किं कर्म किम् अकर्म इति, कवयः अपि अत्र मोहिताः। तद् ते कर्म प्रवक्ष्यामि, यद् ज्ञात्वा मोक्ष्यते अशुभात्॥)

किं कर्म किम् अ-कर्म इति अत्र कवयः अपि मोहिताः। यद् ज्ञात्वा अ-शुभात् मोक्ष्यते, तद् कर्म ते प्रवक्ष्यामि। (**4.16**)

What is action? What is inaction? Regarding this, even the [so-called] wise are confused. I will teach you about that action, knowing which one is freed from the unpleasant [life of becoming; i.e., from संसार].

| | | | |
|---|---|---|---|
| 1 | किं कर्म | what is action? | fr. किम् *prn. n. sg. nom.*; कर्मन् *n. sg. nom.* |
| 2 | किम् अ-कर्म | what is inaction? | fr. किम् *prn. n. sg. nom.*; अकर्मन् *n. sg. nom.* |
| 3 | इति अत्र | regarding this | fr. इति *in.*; अत्र *in.* (**6.19:**) |
| 4 | कवयः अपि | even the [so-called] wise | fr. कवि *m. pl. nom.*; अपि *in.* |
| 5 | मोहिताः | are confused | fr. मोहित *pp. of cs.* √मुह् *a. m. pl. nom.* (**6.6:**) |

| | | | |
|---|---|---|---|
| 9 | यद् ज्ञात्वा | knowing which | fr. यद् *prn. n. sg. acc.*; ज्ञात्वा *in. pt.* √ज्ञा |
| 11 | अ-शुभात् | from the unpleasant [life of becoming] | fr. अशुभ *n. sg. abl.* |
| 10 | मोक्ष्यते | one is freed | fr. √मुच् *Ā. fut. 3rd sg.* (**5.33:** & **2.80:** & **2.101:**) (**5.36.a:**) |
| 8 | तद् कर्म | about that action | fr. तद् *prn. n. sg. acc.*; कर्मन् *n. sg. acc.* |
| 7 | ते | you | fr. त्वम् *prn. sg. dat.* (**7.10.A.1:**) |
| 6 | प्रवक्ष्यामि | I will teach | fr. प्र + √वच् *P. fut. 1st sg.* (**2.80:** & **2.101:**) |

**कर्मणो ह्यपि बोद्धव्यं बोद्धव्यं च विकर्मणः। अकर्मणश्च बोद्धव्यं गहना कर्मणो गतिः॥१७॥**

(कर्मणः हि अपि बोद्धव्यं, बोद्धव्यं च विकर्मणः। अकर्मणः च बोद्धव्यं, गहना कर्मणः गतिः॥)

कर्मणः हि (=यस्मात्) अपि बोद्धव्यं, वि-कर्मणः च बोद्धव्यम्, अ-कर्मणः च बोद्धव्यं। गहना कर्मणः गतिः। (**4.17**)

—Because what is to be known is also about [enjoined] action, about prohibited action, and about inaction. The nature of action is difficult to know.

| | | | |
|---|---|---|---|
| 4 | कर्मणः | about [enjoined] action | fr. कर्मन् *n. sg. gen.* (**3.22:**) (**7.12.2.b:**) |
| 1 | हि (=यस्मात्) | because | fr. हि *in.* |
| 3 | अपि | also | fr. अपि *in.* |
| 2 | बोद्धव्यं | what is to be known [is] | fr. बोद्धव्य *pot. ps. pt. of* √बुध् *a. n. sg. nom.* (**6.8:** & **2.76:** & **2.78:**) |
| 6 | वि-कर्मणः च | about prohibited action | fr. विकर्मन् *n. sg. gen.* (**3.22:**) (**7.12.2.b:**); च *in.* |
| 5 | बोद्धव्यम् | (what is to be known) [is] | fr. बोद्धव्य *pot. ps. pt. of* √बुध् *a. n. sg. nom.* (**6.8:** & **2.76:** & **2.78:**) |
| 8 | अ-कर्मणः च | and about inaction | fr. अकर्मन् *n. sg. gen.* (**3.22:**) (**7.12.2.b:**); च *in.* |
| 7 | बोद्धव्यं | (what is to be known) [is] | fr. बोद्धव्य *pot. ps. pt. of* √बुध् *a. n. sg. nom.* (**6.8:** & **2.76:** & **2.78:**) |
| 11 | गहना | [is] difficult to know | fr. गहना *a. f. sg. nom.* |
| 10 | कर्मणः | of action | fr. कर्मन् *n. sg. gen.* (**3.22:**) |
| 9 | गतिः | the nature | fr. गति *f. sg. nom.* |

**कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः। स बुद्धिमान्मनुष्येषु स युक्तः कृत्स्नकर्मकृत्॥१८॥**

(कर्मणि अकर्म यः पश्येत्, अकर्मणि च कर्म यः। सः बुद्धिमान् मनुष्येषु, सः युक्तः कृत्स्नकर्मकृत्॥)

यः कर्मणि अ-कर्म पश्येत्, यः च अ-कर्मणि कर्म [पश्येत्], सः मनुष्येषु बुद्धिमान्। सः युक्तः कृत्स्न-कर्म-कृत् [च]। (**4.18**)

The one who can see inaction [i.e., actionlessness] in action, and action in inaction [i.e., in not doing one's duty]—that one is wise among people. That one is युक्त [i.e., a योगिन्] and has accomplished everything that is [essential] to be done.

| | | | |
|---|---|---|---|
| 1 | यः | the one who | fr. यद् *prn. m. sg. nom.* |
| 4 | कर्मणि | in action | fr. कर्मन् *n. sg. loc.* (**3.22:**) |
| 3 | अ-कर्म | inaction [i.e., actionlessness] | fr. अकर्मन् *n. sg. acc.* (**3.22:**) |
| 2 | पश्येत् | can see | fr. √दृश् *1.P. pot. 3rd sg.* (**5.15.6:**) |
| 5 | यः च | [and] who | fr. यद् *prn. m. sg. nom.*; च *in.* |
| 7 | अ-कर्मणि | in inaction [i.e., in not doing one's duty] | fr. अकर्मन् *n. sg. loc.* (**3.22:**) |
| 6 | कर्म [पश्येत्] | [can see] action | fr. कर्मन् *n. sg. acc.* (**3.22:**) |
| 8 | सः | that one [is] | fr. तद् *prn. m. sg. nom.* |
| 10 | मनुष्येषु | among people | fr. मनुष्य *m. pl. loc.* |
| 9 | बुद्धिमान् | wise | fr. बुद्धिमत् *a. m. sg. nom.* (**3.13.a:**) |
| 11 | सः | that one | fr. तद् *prn. m. sg. nom.* |
| 12 | युक्तः | [is] युक्त [i.e., a कर्मयोगिन्] | fr. युक्त *pp. of* √युज् *a. m. sg. nom.* (**2.81:**) |
| 13 | कृत्स्न-कर्म-कृत् [च] | [and] has accomplished everything that is [essential] to-be-done | fr. कृत्स्न-कर्म-कृत् *a. m. sg. nom.* (**6.24.2:** & **3.5:**) |

**यस्य सर्वे समारम्भाः कामसङ्कल्पवर्जिताः। ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः॥१९॥**

(यस्य सर्वे समारम्भाः, कामसङ्कल्पवर्जिताः। ज्ञानाग्निदग्धकर्माणं, तम् आहुः पण्डितं बुधाः॥)

यस्य सर्वे समारम्भाः काम-सङ्कल्प-वर्जिताः, तं ज्ञान-अग्नि-दग्ध-कर्माणं बुधाः पण्डितम् आहुः। (**4.19**)

Whose every activity is free from काम (requiring and anticipating) and [its cause] सङ्कल्प (scheming for the future), that one—whose [accumulated] कर्मन्-s are burned up by the fire that is knowledge [like toasted seeds unable to sprout]—the sages call wise.

| | | | |
|---|---|---|---|
| 1 | यस्य | whose | fr. यद् *prn. m. sg. gen.* |
| 2 | सर्वे समारम्भाः | every activity | fr. सर्व *prn. a. pl. nom.* (**4.16.2:**); समारम्भ *m. pl. nom.* |
| 4 | काम-सङ्कल्प- | from काम (requiring and anticipating) and सङ्कल्प (scheming for the future) | |
| 3 | -वर्जिताः | is free | fr. काम-सङ्कल्प-वर्जित *a. m. pl. nom.* |

| | | | |
|---|---|---|---|
| 5 | तं | that one | fr. तद् *prn. m. sg. acc.* |
| 7 | ज्ञान-अग्नि- | by the fire that is knowledge | |
| 6 | -दग्ध-कर्माणं | whose [accumulated] कर्मन्-s are burned up | fr. ज्ञान-अग्नि-दग्ध-कर्मन् *a. m. sg. acc.* |
| 8 | बुधाः | the sages | fr. बुध *m. pl. nom.* |
| 10 | पण्डितम् | wise | fr. पण्डित *m. sg. acc.* |
| 9 | आहुः | call | fr. √अह् *P. perf. 3rd pl.* (**5.8.5:**) |

**त्यक्त्वा कर्मफलासङ्गं नित्यतृप्तो निराश्रयः। कर्मण्यभिप्रवृत्तोऽपि नैव किञ्चित्करोति सः॥२०॥**

(त्यक्त्वा कर्मफलासङ्गं, नित्यतृप्तः निराश्रयः। कर्मणि अभिप्रवृत्तः अपि, न एव किञ्चिद् करोति सः॥)

कर्म-फल-आसङ्गं त्यक्त्वा, नित्य-तृप्तः, निर्-आश्रयः, सः कर्मणि अभिप्रवृत्तः अपि किञ्-चिद् एव न करोति। (**4.20**)

Giving up identification with actions and attachment to results, always contented, without dependence [on anything], that one—though fully engaged in action—does not [in reality] do anything [i.e., is truly actionless].

| | | | |
|---|---|---|---|
| 3 | कर्म-फल- | actions and results | |
| 2 | -आसङ्गं | attachment to, identification with | fr. कर्म-फल-आसङ्ग *m. sg. acc.* |
| 1 | त्यक्त्वा | giving up | fr. त्यक्त्वा *in. pt. of* √त्यज् (**6.9:**) |
| 4 | नित्य-तृप्तः | always contented | fr. नित्य-तृप्त *a. m. sg. nom.* |
| 5 | निर्-आश्रयः | without dependence [on anything] | fr. निस्-आश्रय *a. m. sg. nom.* (**2.24:** & **.29:**) |
| 6 | सः | that one | fr. तद् *prn. m. sg. nom.* |
| 8 | कर्मणि | in action | fr. कर्मन् *n. sg. loc.* (**3.22:**) |
| 7 | अभिप्रवृत्तः अपि | though fully engaged | fr. अभिप्रवृत्त *pp. of* अभि + प्र + √वृत् *a. m. sg. nom.*; अपि *in.* |
| 10 | किञ्-चिद् एव | anything | fr. क-चिद् *prn. cmpd. n. sg. acc.* (**4.20:** & **2.55:**); एव *in.* (**6.19:**) |
| 9 | न करोति | does not [in reality] do | fr. न *in.*; √कृ *9.P. pr. 3rd sg.* (**5.22.1:**) |

**निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः। शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषम्॥२१॥**

(निराशीः यतचितात्मा, त्यक्तसर्वपरिग्रहः। शारीरं केवलं कर्म, कुर्वन् न आप्नोति किल्बिषम्॥)

निर्-आशीः, यत-चित-आत्मा, त्यक्त-सर्व-परिग्रहः, केवलं शारीरं कर्म कुर्वन्, [सः] किल्बिषं न आप्नोति। (**4.21**)

Free from fancies [of the future], by whom the body and mind are mastered, who has disowned every possession, doing action only for sustaining the body, that [सन्न्यासिन्, renunciate] incurs no fault [i.e., no binding karmic merit or demerit].

| | | | |
|---|---|---|---|
| 1 | निर्-आशीः | free from fancies [of the future] | fr. निस्-आशिस् *a. m. sg. nom.* (**2.24:** & **2.29:** & **3.6.1:**) |
| 3 | यत- | are mastered | |
| 2 | -चित-आत्मा | by whom the body and mind | fr. यत-चित-आत्मन् *a. m. sg. nom.* |
| 5 | त्यक्त- | disowned | |
| 4 | -सर्व-परिग्रहः | who has every possession | fr. त्यक्त-सर्व-परिग्रह *a. m. sg. nom.* |
| 8 | केवलं | only | fr. केवलम् *in.* |
| 9 | शारीरं | for sustaining the body | fr. शारीर *a. n. sg. acc.* |
| 7 | कर्म | action | fr. कर्मन् *n. sg. acc.* (**3.22:**) |
| 6 | कुर्वन् | doing | fr. कुर्वत् *pr. pt. of* √कृ *pt. n. sg. nom.* (**5.22.1:** & **3.12:**) |
| 11 | किल्बिषं | fault | fr. किल्बिष *n. sg. acc.* |
| 10 | न आप्नोति | incurs no | fr. न *in.*; √आप् *5.P. pr. 3rd sg.* |

**यदृच्छालाभसन्तुष्टो द्वन्द्वातीतो विमत्सरः। समः सिद्धावसिद्धौ च कृत्वापि न निबध्यते॥२२॥**

(यदृच्छालाभसन्तुष्टः, द्वन्द्वातीतः विमत्सरः। समः सिद्धौ असिद्धौ च, कृत्वा अपि न निबध्यते॥)

यदृच्छा-लाभ-सन्तुष्टः, द्वन्-द्व-अतीतः, वि-मत्सरः, सिद्धौ अ-सिद्धौ च समः, [सः] कृत्वा अपि न निबध्यते। (**4.22**)

Satisfied with whatever happens [unasked], [whose mind is] unaffected by the [natural] pairs of opposites, free of repulsion [on account of another's virtue or prosperity], and equanimous in success or failure, [that one]—though engaged in action—is not bound.

| | | | |
|---|---|---|---|
| 2 | यदृच्छा-लाभ- | what occurs by happenstance, whatever happens | |
| 1 | -सन्तुष्टः | satisfied with | fr. यदृच्छालाभसन्तुष्ट *a. m. sg. nom.* |
| 4 | द्वन्-द्व- | by the [natural] pairs of opposites | |
| 3 | -अतीतः | [whose mind is] unaffected | fr. द्वन्द्व-अतीत *a. m. sg. nom.* |
| 5 | वि-मत्सरः | free of repulsion | fr. विमत्सर *a. m. sg. nom.* |

| | | | |
|---|---|---|---|
| 7 | सिद्धौ | in success | fr. सिद्धि *f. sg. loc.* (**3.29.c:**) |
| 8 | अ-सिद्धौ च | or failure | fr. असिद्धि *f. sg. loc.* (**3.29.c:**); च *in.* |
| 6 | समः | [and] equanimous | fr. सम *a. m. sg. nom.* |
| 9 | [सः] कृत्वा अपि | [that one] though engaged in action | fr. कृत्वा *in. pt. of* √कृ (**6.9:**); अपि *in.* |
| 10 | न निबध्यते | is not bound | fr. न *in.*; नि + √बन्ध् *ps. pr. 3rd sg.* (**5.37.5:**) |

**गतसङ्गस्य मुक्तस्य ज्ञानावस्थितचेतसः। यज्ञायाचरतः कर्म समग्रं प्रविलीयते॥२३॥**

(गतसङ्गस्य मुक्तस्य, ज्ञानावस्थितचेतसः। यज्ञाय आचरतः कर्म, समग्रं प्रविलीयते॥)

गत-सङ्गस्य मुक्तस्य ज्ञान-अवस्थित-चेतसः यज्ञाय आचरतः समग्रं कर्म प्रविलीयते। (**4.23**)

For the one who is without attachment, who is free, whose mind is rooted in [self-]knowledge, and who acts for the sake of यज्ञ, all कर्मन् [along with its pending results] dissolves.

| | | | |
|---|---|---|---|
| 1 | गत-सङ्गस्य | for the one who is without attachment | fr. गत-सङ्ग *a. m. sg. gen.* |
| 2 | मुक्तस्य | who is free | fr. मुक्त *pp. of* √मुच् *a. m. sg. gen.* (**2.80:**) |
| 4 | ज्ञान-अवस्थित- | is rooted in [self-]knowledge | |
| 3 | -चेतसः | whose mind | fr. ज्ञान-अवस्थित-चेतस् *a. m. sg. gen.* (**3.6:**) |
| 6 | यज्ञाय | for the sake of यज्ञ | fr. यज्ञ *m. sg. dat.* (**7.10.B:**). |
| 5 | आचरतः | [and] who acts | fr. आचरत् *pr. pt. of* आ + √चर् *a. m. sg. gen.* (**3.12:**) |
| 7 | समग्रं कर्म | all कर्मन् [with its pending results] | fr. समग्र *a. n. sg. acc.*; कर्मन् *n. sg. acc.* (**3.22:**) |
| 8 | प्रविलीयते | dissolves | fr. प्र + वि + √ली *ps. pr. 3rd sg.* |

**ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम्। ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना॥२४॥**

(ब्रह्म अर्पणं ब्रह्म हविः, ब्रह्माग्नौ ब्रह्मणा हुतम्। ब्रह्म एव तेन गन्तव्यं, ब्रह्मकर्मसमाधिना॥)

ब्रह्म अर्पणं। ब्रह्म हविः ब्रह्म-अग्नौ ब्रह्मणा हुतं। तेन ब्रह्म-कर्म-समाधिना ब्रह्म एव गन्तव्यम्। (**4.24**) The instrument for offering is ब्रह्मन् (reality, the limitless self). The oblation is ब्रह्मन्, offered by ब्रह्मन् into the fire that is ब्रह्मन्. ब्रह्मन् indeed is to be attained by the one whose vision of identity is that [every aspect of] action is ब्रह्मन्.

| | | | |
|---|---|---|---|
| 2 | ब्रह्म | [is] ब्रह्मन् (reality, the limitless self) | fr. ब्रह्मन् *n. sg. nom.* (**3.22:**) |
| 1 | अर्पणं | the instrument for offering | fr. अर्पण *n. sg. nom.* |
| 4 | ब्रह्म | [is] ब्रह्मन् | fr. ब्रह्मन् *n. sg. nom.* (**3.22:**) |
| 3 | हविः | the oblation | fr. हविस् *n. sg. nom.* |
| 7 | ब्रह्म-अग्नौ | into the fire that is ब्रह्मन् | fr. ब्रह्म-अग्नि *m. sg. loc.* (**3.29.c:**) |
| 6 | ब्रह्मणा | by ब्रह्मन् | fr. ब्रह्मन् *n. sg. inst.* (**3.22:**) |
| 5 | हुतं | offered | fr. हुत *pp. of* √हु *pt. n. sg. nom.* |

| | | |
|---|---|---|
| 10 तेन | by the one | fr. तद् *prn. m. sg. inst.* |
| 12 ब्रह्म-कर्म- | is that [every aspect of] action is ब्रह्मन् | |
| 11 -समाधिना | whose vision of identity | fr. ब्रह्म-कर्म-समाधि *a. m. sg. inst.* |
| 8 ब्रह्म एव | ब्रह्मन् indeed | fr. ब्रह्मन् *n. sg. nom.* (**3.22:**); एव *in.* (**6.19:**) |
| 9 गन्तव्यम् | is to be attained | fr. गन्तव्य *pot. ps. pt. of* √गम् *a. n. sg. nom.* (**2.55:**) |

**दैवमेवापरे यज्ञं योगिनः पर्युपासते। ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोपजुह्वति॥२५॥**

(दैवम् एव अपरे यज्ञं, योगिनः पर्युपासते। ब्रह्माग्नौ अपरे यज्ञं, यज्ञेन एव उपजुह्वति॥)

अपरे योगिनः दैवम् एव यज्ञं पर्युपासते। अपरे ब्रह्म-अग्नौ यज्ञं (=ब्रह्म-आत्मानं) यज्ञेन (=ब्रह्म-आत्मना) एव उपजुह्वति। (**4.25**)

Some [कर्म-] योगिन्-s perform यज्ञ only for invoking [the Lord in the form of] a deity. Others [who are सन्न्यासिन्-s, who have given up entitlement to ritual] offer यज्ञ [as themselves] by यज्ञ [as themselves] into the fire [i.e., knowledge] that is ब्रह्मन्.

| | | |
|---|---|---|
| 1 अपरे | some | fr. अपर *prn. a. m. pl. nom.* (**4.16.3:**) |
| 2 योगिनः | [कर्म-] योगिन्-s | fr. योगिन् *m. pl. nom.* (**3.15:**) |
| 4 दैवम् एव | only a deity | fr. दैव *a. sg. acc.*; एव *in.* (**6.19:**) |
| 3 यज्ञं पर्युपासते | perform यज्ञ [for invoking] | fr. यज्ञ *m. sg. acc.*; परि + उप + √आस् *2.Ā. pr. 3rd pl.* (**5.6.b:**) |
| 5 अपरे | others | fr. अपर *prn. a. m. pl. nom.* (**4.16.3:**) |
| 10 ब्रह्म-अग्नौ | into the fire [i.e., knowledge] that is ब्रह्मन् | fr. ब्रह्म-अग्नि *m. sg. loc.* (**3.29.c:**) |
| 7 यज्ञं (=ब्रह्म-आत्मानं) | यज्ञ [as themselves] | fr. यज्ञ *m. sg. acc.* |
| 8 यज्ञेन (=ब्रह्म-आत्मना) | by यज्ञ [as themselves] | fr. यज्ञ *m. sg. inst.* |
| 9 एव | [only] | fr. एव *in.* (**6.19:**) |
| 6 उपजुह्वति | offer | fr. उप + √हु *3.P. pr. 3rd pl.* (**5.8.3:** & **5.6.c:** & **2.11:**) |

**श्रोत्रादीनीन्द्रियाण्यन्ये संयमाग्निषु जुह्वति। शब्दादीन्विषयानन्य इन्द्रियाग्निषु जुह्वति॥२६॥**

(श्रोत्रादीनि इन्द्रियाणि अन्ये, संयमाग्निषु जुह्वति। शब्दादीन् विषयान् अन्ये, इन्द्रियाग्निषु जुह्वति॥)

अन्ये संयम-अग्निषु श्रोत्र-आदीनि इन्द्रियाणि जुह्वति। अन्ये इन्द्रिय-अग्निषु शब्द-आदीन् विषयान् जुह्वति। (**4.26**)

Others offer [their] sense organs—such as hearing, etc.—into the fires that are the mastery [over each of the senses]. Others [deliberately] offer sense objects—such as [only proper] sound, etc.—into the fires that are the senses [themselves].

| | | | |
|---|---|---|---|
| 1 | अन्ये | others | fr. अन्य *prn. a. m. pl. nom.* (**4.16.1:**) |
| 5 | संयम-अग्निषु | into the fires that are the mastery [over each sense] | fr. संयम-अग्नि *m. pl. loc.* |
| 4 | श्रोत्र-आदीनि | such as hearing, etc. | fr. श्रोत्र-आदि *a. n. pl. acc.* |
| 3 | इन्द्रियाणि | [their] sense organs | fr. इन्द्रिय *n. pl. acc.* |
| 2 | जुह्वति | offer | fr. √हु *3.P. pr. 3rd pl.* (**5.8.3:** & **5.6.c:** & **2.11:**) |
| 6 | अन्ये (**2.13:**) | others | fr. अन्य *prn. a. m. pl. nom.* (**4.16.1:**) |
| 10 | इन्द्रिय-अग्निषु | into the fires that are the senses [themselves] | fr. इन्द्रिय-अग्नि *m. pl. loc.* |
| 9 | शब्द-आदीन् | such as [only proper] sound, etc. | fr. शब्द-आदि *a. m. pl. acc.* |
| 8 | विषयान् | sense objects | fr. विषय *m. pl. acc.* |
| 7 | जुह्वति | offer | fr. √हु *3.P. pr. 3rd pl.* (**5.8.3:** & **5.6.c:** & **2.11:**) |

**सर्वाणीन्द्रियकर्माणि प्राणकर्माणि चापरे। आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते॥ २७॥**

(सर्वाणि इन्द्रियकर्माणि, प्राणकर्माणि च अपरे। आत्मसंयमयोगाग्नौ, जुह्वति ज्ञानदीपिते॥)

अपरे सर्वाणि इन्द्रिय-कर्माणि प्राण-कर्माणि च ज्ञान-दीपिते आत्म-संयम-योग-अग्नौ जुह्वति। (**4.27**)

Others offer all activities of the organs and activities of the vital energies into the fire, lit by knowledge, that is the discipline consisting of mastery over oneself [the body-mind complex].

| | | | |
|---|---|---|---|
| 1 | अपरे | others | fr. अपर *prn. a. m. pl. nom.* (**4.16.3:**) |
| 3 | सर्वाणि | all | fr. सर्व *prn. a. n. pl. acc.* (**4.16.2:**) |
| 4 | इन्द्रिय-कर्माणि | activities of the organs | fr. इन्द्रिय-कर्मन् *n. pl. acc.* (**3.22:**) |
| 5 | प्राण-कर्माणि च | and activities of the vital energies | fr. प्राण-कर्मन् *n. pl. acc.*; च *in.* |
| 9 | ज्ञान- | by knowledge | |
| 8 | -दीपिते | lit | fr. ज्ञान-दीपित *a. m. sg. loc.* |
| 7 | आत्म-संयम- | consisting of mastery over oneself | |
| 6 | -योग-अग्नौ | into the fire that is the discipline | fr. आत्म-संयम-योग-अग्नि *m. sg. loc.* (**3.29.c:**) |
| 2 | जुह्वति | offer | fr. √हु *3.P. pr. 3rd pl.* (**5.8.3:** & **5.6.c:** & **2.11:**) |

**द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे। स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः॥ २८॥**

(द्रव्ययज्ञाः तपोयज्ञाः, योगयज्ञाः तथा अपरे। स्वाध्यायज्ञानयज्ञाः च, यतयः संशितव्रताः॥)

तथा अपरे द्रव्य-यज्ञाः, तपस्-यज्ञाः, योग-यज्ञाः, स्व-अध्याय-ज्ञान-यज्ञाः च संशित-व्रताः यतयः। (**4.28**)

So too are those others who [distribute] wealth as a यज्ञ, those for whom prayerful discipline is the यज्ञ, those whose [very] योग practices are the यज्ञ, and those of firm vows and efforts who recite and/or who study the meaning [of the वेद] as a यज्ञ.

| | | | |
|---|---|---|---|
| 1 | तथा अपरे | so too others [are] | fr. तथा *in.* (**6.19:**); अपर *prn. a. m. pl. nom.* (**4.16.3:**) |
| 2 | द्रव्य-यज्ञाः | those who [distribute] wealth as a यज्ञ | fr. द्रव्य-यज्ञ *a. m. pl. nom.* |
| 3 | तपस्-यज्ञाः | those for whom prayerful discipline is the यज्ञ | fr. तपस्-यज्ञ *a. m. pl. nom.* (**2.24:** & **.33:**) |
| 4 | योग-यज्ञाः | those whose [very] योग practices are the यज्ञ | fr. योग-यज्ञ *a. m. pl. nom.* |
| 8 | स्व-अध्याय- | who recite and/or who study | |
| 9 | -ज्ञान-यज्ञाः | the meaning [of the वेद] as a यज्ञ | fr. स्व-अध्याय-ज्ञान-यज्ञ *a. m. pl. nom.* |
| 5 | च | and | fr. च *in.* |
| 6 | संशित- व्रताः | those of firm vows | fr. संशित-व्रत *a. m. pl. nom.* |
| 7 | यतयः | [and] who make efforts | fr. यति *m. pl. nom.* |

**अपाने जुह्वति प्राणं प्राणेऽपानं तथापरे। प्राणापानगती रुद्ध्वा प्राणायामपरायणाः ॥ २९ ॥**

(अपाने जुह्वति प्राणं, प्राणे अपानं तथा अपरे। प्राणापानगती रुद्ध्वा, प्राणायामपरायणाः ॥ )

तथा अपरे प्राण-आयाम-परायणाः प्राण-अपान-गती रुद्ध्वा अपाने प्राणं प्राणे अपानं [च] जुह्वति। (**4.29**)

So too, others whose ultimate end is the practice of breath control—stopping the flow of exhalation and inhalation—they [thus] offer [as a discipline] the outgoing breath into the ingoing breath and the ingoing breath into the outgoing breath.

| | | | |
|---|---|---|---|
| 1 | तथा अपरे | so too others | fr. तथा *in.* (**6.19:**); अपर *prn. a. m. pl. nom.* (**4.16.3:**) |
| 3 | प्राण-आयाम- | is the practice of breath control | |
| 2 | -परायणाः | whose ultimate end | fr. प्राण-आयाम-परायण *a. m. pl. nom.* |
| 6 | प्राण-अपान- | of exhalation and inhalation | |
| 5 | -गती | the flow | fr. प्राण-अपान-गति *f. du. acc.* |
| 4 | रुद्ध्वा | stopping | fr. रुद्ध्वा *in. pt. of* √रुध् (**2.76:** & **.78:**) |
| 8 | अपाने प्राणं | the outgoing breath into the ingoing breath | fr. अपान *m. sg. loc.*; प्राण *m. sg. acc.* |
| 9 | प्राणे अपानं [च] | [and] the ingoing breath into the outgoing breath | fr. प्राण *m. sg. loc.*; अपान *m. sg. acc.* |
| 7 | जुह्वति | they [thus] offer | fr. √हु *3.P. pr. 3rd pl.* (**5.8.3:** & **5.6.c:** & **2.11:**) |

**अपरे नियताहाराः प्राणान्प्राणेषु जुह्वति। सर्वेऽप्येते यज्ञविदो यज्ञक्षपितकल्मषाः ॥ ३० ॥**

(अपरे नियताहाराः, प्राणान् प्राणेषु जुह्वति। सर्वे अपि एते यज्ञविदः, यज्ञक्षपितकल्मषाः ॥ )

अपरे नियत-आहाराः प्राणेषु प्राणान् जुह्वति। सर्वे अपि एते यज्ञ-विदः यज्ञ-क्षपित-कल्मषाः [सन्ति]। (**4.30**)

Others, whose food [consumption] is regulated, offer [their] प्राण-s (energies) into the प्राण-s (digestive fires). All of those [preceding] who have an attitude of worship [during their activities] have [to that extent] their impurities [that obstruct self-knowledge] destroyed by यज्ञ.

| | | | |
|---|---|---|---|
| 1 | अपरे | others | fr. अपर *prn. a. m. pl. nom.* (**4.16.3:**) |
| 3 | नियत- | is regulated | |
| 2 | -आहाराः | whose food [consumption] | fr. नियत-आहार *a. m. pl. nom.* |
| 6 | प्राणेषु | into the प्राण-s (digestive fires) | fr. प्राण *m. pl. loc.* |
| 5 | प्राणान् | [their] प्राण-s (energies) | fr. प्राण *m. pl. acc.* |
| 4 | जुह्वति | offer | fr. √हु *3.P. pr. 3rd pl.* (**5.8.3:** & **5.6.c:** & **2.11:**) |

| | | | |
|---|---|---|---|
| 7 | सर्वे अपि | all of | fr. सर्व *prn. a. m. pl. nom.* (**4.16.2:**); अपि *in.* |
| 8 | एते | those [preceding] | fr. एतद् *prn. m. pl. nom.* |
| 9 | यज्ञ-विदः | who have an attitude of worship | fr. यज्ञ-विद् *a. m. pl. nom.* (**6.24:** & **3.6:**) |
| 11 | यज्ञ-क्षपित- | destroyed by यज्ञ | |
| 10 | -कल्मषाः | have [to that extent] their impurities [that obstruct self-knowledge] | fr. यज्ञ-क्षपित-कल्मष *a. m. pl. nom.* |

**यज्ञशिष्टामृतभुजो यान्ति ब्रह्म सनातनम्। नायं लोकोऽस्त्ययज्ञस्य कुतोऽन्यः कुरुसत्तम॥३१॥**

(यज्ञशिष्टामृतभुजः, यान्ति ब्रह्म सनातनम्। न अयं लोकः अस्ति अयज्ञस्य, कुतः अन्यः कुरुसत्तम॥)

यज्ञ-शिष्ट-अ-मृत-भुजः सना-तनं ब्रह्म यान्ति। अ-यज्ञस्य अयं लोकः न अस्ति, अन्यः कुतः, कुरु-सत्तम। (**4.31**)

Those who [seek ब्रह्मन् and] partake of the offering [made] immortal after यज्ञ [eventually] attain [in knowledge] the ever existent ब्रह्मन् (reality). This [human] world is not there for [the benefit of] one without यज्ञ, much less another world [where effort is not available], O अर्जुन.

| | | | |
|---|---|---|---|
| 3 | यज्ञ-शिष्ट- | after यज्ञ | |
| 2 | -अ-मृत- | of the offering [made] immortal | |
| 1 | -भुजः | those who [seek ब्रह्मन् and] partake | fr. यज्ञ-शिष्ट-अमृत-भुज् *a. m. pl. nom.* (**6.24:** & **3.6:**) |
| 5 | सना-तनं | the ever existent | fr. सनातन *a. n. sg. acc.* |
| 6 | ब्रह्म | ब्रह्मन् (reality) | fr. ब्रह्मन् *n. sg. acc.* (**3.22:**) |
| 4 | यान्ति | [eventually] attain | fr. √या *2.P. pr. 3rd pl.* |
| 9 | अ-यज्ञस्य | for [the benefit of] one without यज्ञ | fr. अयज्ञ *m. sg. gen.* |
| 7 | अयं लोकः | this [human] world | fr. इदम् *prn. m. sg. nom.*; लोक *m. sg. nom.* |
| 8 | न अस्ति | is not there | fr. न *in.*; √अस् *2.P. pr. 3rd sg.* |
| 11 | अन्यः | another [world] [where effort is not available] | fr. अन्य *prn. a. m. sg. nom.* (**4.16.1:**) |
| 10 | कुतः | much less | fr. कुतस् *in.* (**6.19:** & **.36:**) |
| 12 | कुरु-सत्तम | (अर्जुन) O Very Best of the कुरु People | fr. कुरु-सत्तम *m. sg. voc.* |

**एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे। कर्मजान्विद्धि तान्सर्वानेवं ज्ञात्वा विमोक्ष्यसे॥ ३२॥**

(एवं बहुविधाः यज्ञाः, विततः ब्रह्मणः मुखे। कर्मजान् विद्धि तान् सर्वान्, एवं ज्ञात्वा विमोक्ष्यसे॥ )

एवं ब्रह्मणः मुखे (=वेदशब्दे) बहु-विधाः यज्ञाः विततः। तान् सर्वान् कर्म-जान् विद्धि। एवं ज्ञात्वा विमोक्ष्यसे। (**4.32**)

In this manner, there are many and various यज्ञ-s elaborated in the words of the वेद. Know all of them to be produced by [त्रैगुण्य-] कर्मन् [not by आत्मन्, oneself]. With this understanding, you will be freed [from their otherwise binding nature].

| | | | |
|---|---|---|---|
| 1 | एवं | in this manner | fr. एवम् *in.* (**6.19:**) |
| 6 | ब्रह्मणः | of the Veda | fr. ब्रह्मन् *n. sg. gen.* (**3.22:** & **2.92:**) |
| 5 | मुखे | in the words | fr. मुख *n. sg. loc.* |
| 2 | बहु-विधाः | [there are] many and various | fr. बहु-विध *a. m. pl. nom.* |
| 3 | यज्ञाः | यज्ञ-s | fr. यज्ञ *m. pl. nom.* |
| 4 | विततः | elaborated | fr. वितत *pp. of* वि + √तन् *a. m. pl. nom.* (**6.6:**) |
| 8 | तान् सर्वान् | all of them | fr. तद् *prn. m. pl. acc.*; सर्व *prn. a. m. pl. acc.* (**4.16.2:**) |
| 9 | कर्म-जान् | to be produced by [त्रैगुण्य-] कर्मन् | fr. कर्म-ज *a. m. pl. acc.* (**6.24.3:**) |
| 7 | विद्धि | know | fr. √विद् *2.P. impv. 2nd sg.* (**5.6.a:**) |
| 10 | एवं ज्ञात्वा | with this understanding | fr. एवम् *in.* (**6.19:**); ज्ञात्वा *in. pt. of* √ज्ञा (**6.9:**) |
| <u>11</u> | विमोक्ष्यसे | you will be freed | fr. वि + √मुच् *Ā. fut. 2nd sg.*.( **5.33:** & **2.80:** & **2.101:**) |

**श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परन्तप। सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते॥ ३३॥**

(श्रेयान् द्रव्यमयात् यज्ञात्, ज्ञानयज्ञः परन्तप। सर्वं कर्म अखिलं पार्थ, ज्ञाने परिसमाप्यते॥ )

द्रव्यमयात् यज्ञात् श्रेयान् ज्ञान-यज्ञः, परन्-तप। पार्थ, सर्वम् अ-खिलं कर्म ज्ञाने परिसमाप्यते। (**4.33**)

यज्ञ consisting of knowledge is superior to यज्ञ consisting of materials [and action], O अर्जुन. O अर्जुन, all action in its entirety is culminated in knowledge [i.e., as various means to the end, action should be undertaken for gaining a mind that can gain this knowledge].

| | | | |
|---|---|---|---|
| 4 | द्रव्यमयात् | consisting of materials [and action] | fr. द्रव्यमय *a. m. sg. abl.* |
| 3 | यज्ञात् | to यज्ञ | fr. यज्ञ *m. sg. abl.* |
| 2 | श्रेयान् | is superior | fr. श्रेयस् *cpv. a. m. sg. nom.* (**6.25:** & **3.14:**) |
| 1 | ज्ञान-यज्ञः | यज्ञ consisting of knowledge | fr. ज्ञान-यज्ञ *m. sg. nom.* |
| 5 | परन्-तप | (अर्जुन) O Vexer of Foes | fr. पर-म्-तप *m. sg. voc.* (**2.55:**) |

| | | | |
|---|---|---|---|
| 6 | पार्थ | (अर्जुन) O Son of पृथा | fr. पार्थ *m. sg. voc.* |
| 7 | सर्वम् | all | fr. सर्व *prn. a. n. sg. nom.* (**4.16.2:**) |
| 9 | अ-खिलं | in its entirety | fr. अखिल *a. n. sg. nom.* |
| 8 | कर्म | action | fr. कर्मन् *n. sg. nom.* (**3.22:**) |
| 11 | ज्ञाने | in knowledge | fr. ज्ञान *n. sg. loc.* |
| 10 | परिसमाप्यते | is culminated | fr. परि + सम् + √आप् *ps. pr. 3rd sg.* |

**तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया। उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः॥३४॥**

(तद् विद्धि प्रणिपातेन, परिप्रश्नेन सेवया। उपदेक्ष्यन्ति ते ज्ञानं, ज्ञानिनः तत्त्वदर्शिनः॥)

प्रणिपातेन परिप्रश्नेन सेवया तद् [ज्ञानं] विद्धि। ज्ञानिनः तत्त्व-दर्शिनः ते ज्ञानम् उपदेक्ष्यन्ति। (**4.34**)

Understand that [knowledge] by surrender [to the feet of the teacher; i.e., with an attitude of acceptance of the teacher as a source of knowledge], by inquiry, and by service [to the teacher—as traditionally no tuition is charged during the study], the wise—who have the vision of the truth—will teach you [this] knowledge.

| | | | |
|---|---|---|---|
| 3 | प्रणिपातेन | by surrender [to the feet of the teacher] | fr. प्रणिपात *m. sg. inst.* |
| 4 | परिप्रश्नेन | by inquiry | fr. परिप्रश्न *m. sg. inst.* |
| 5 | सेवया | [and] by service [to the teacher] | fr. सेवा *f. sg. inst.* (**3.28.c:**) |
| 2 | तद् [ज्ञानं] | that [knowledge] | fr. तद् *n. sg. acc.* |
| 1 | विद्धि | understand | fr. √विद् *2.P. impv. 2nd sg.* (**5.6.a:**) |
| 6 | ज्ञानिनः | the wise | fr. ज्ञानिन् *a. m. pl. nom.* (**3.15:**) |
| 8 | तत्त्व- | of the truth | |
| 7 | -दर्शिनः | who have the vision | fr. तत्त्व-दर्शिन् *a. m. pl. nom.* (**3.15:**) |
| 10 | ते | you | fr. त्वम् *prn. sg. dat.* (**7.10.A.1:**) |
| 11 | ज्ञानम् | [this] knowledge | fr. ज्ञान *n. sg. acc.* |
| 9 | उपदेक्ष्यन्ति | will teach | fr. उप + √दिश् *P. fut. 3rd pl.* (**2.86:**) |

**यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पाण्डव। येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि॥ ३५॥**

(यद् ज्ञात्वा न पुनः मोहम्, एवं यास्यसि पाण्डव। येन भूतानि अशेषेण, द्रक्ष्यसि आत्मनि अथो मयि॥)

यद् ज्ञात्वा न पुनः एवं मोहं यास्यसि, पाण्डव। येन अ-शेषेण भूतानि आत्मनि अथ-उ मयि द्रक्ष्यसि। (**4.35**)

Understanding this [knowledge], you will not again in this way become deluded, O अर्जुन. By this [knowledge] you will see all beings in Me and even in yourself.

| | | | |
|---|---|---|---|
| 1 | यद् ज्ञात्वा | understanding this [knowledge] | fr. यद् *prn. n. sg. acc.*; ज्ञात्वा *in. pt. of* √ज्ञा (**6.9:**) |
| 3 | न पुनः | not again | fr. न *in.*; पुनर् *in.* |
| 4 | एवं | in this way | fr. एवम् *in.* (**6.19:**) |
| 5 | मोहं | deluded | fr. मोह *m. sg. acc.* |
| 2 | यास्यसि | you will become | fr. √या *P. fut. 2nd sg.* |
| 6 | पाण्डव | (अर्जुन) O Son of King पाण्डु | fr. पाण्डव *m. sg. voc.* |
| 7 | येन | by this [knowledge] | fr. यद् *prn. n. sg. inst.* |
| 9 | अ-शेषेण | all | fr. अशेषेण *in.* (**2.92:**) (**7.9.14:**) |
| 10 | भूतानि | beings | fr. भूत *pp. of* √भू *n. pl. acc.* |
| 13 | आत्मनि | in yourself | fr. आत्मन् *m. sg. loc.* (**3.22:**) |
| 12 | अथ-उ | and even | fr. अथ-उ *in.* |
| 11 | मयि | in Me | fr. अहम् *prn. sg. loc.* |
| <u>8</u> | द्रक्ष्यसि | you will see | fr. √दृश् *P. fut. 2nd sg.* (**2.86:**) |

**अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः। सर्वं ज्ञानप्लवेनैव वृजिनं सन्तरिष्यसि॥ ३६॥**

(अपि चेद् असि पापेभ्यः, सर्वेभ्यः पापकृत्तमः। सर्वं ज्ञानप्लवेन एव, वृजिनं सन्तरिष्यसि॥)

अपि चेद् सर्वेभ्यः पापेभ्यः पाप-कृत्तमः असि, ज्ञान-प्लवेन एव सर्वं वृजिनं (=पापं) सन्तरिष्यसि। (**4.36**)

Even if you are one who has done sins worse than any sinner, by the raft that is knowledge alone you will cross over all [forms of] karmic demerit.

| | | | |
|---|---|---|---|
| 1 | अपि चेद् | even if | fr. अपि *in.*; चेद् *in.* |
| 4 | सर्वेभ्यः पापेभ्यः | than any sinner | fr. सर्व *prn. a. n. pl. abl.* (**4.16.2:**); पाप *n. pl. abl.* |
| 3 | पाप-कृत्तमः | one who has done sins worse | fr. पाप-कृत्तम *spv. a. m. sg. nom.* (**6.24.2:** & **.25:**) |
| 2 | असि | you are | fr. √अस् *2.P. pr. 2nd sg.* (**5.19.4:**) |

| | | | |
|---|---|---|---|
| 5 | ज्ञान-प्लवेन | by the raft that is knowledge | fr. ज्ञान-प्लव *m. sg. inst.* |
| 6 | एव | alone | fr. एव *in.* (**6.19:**) |
| 8 | सर्वं | all | fr. सर्व *prn. a. n. sg. acc.* (**4.16.2:**) |
| 9 | वृजिनं (=पापं) | karmic demerit | fr. वृजिन *n. sg. acc.* |
| 7 | सन्तरिष्यसि | you will cross over | fr. सम् + √तॄ *P. fut. 2nd sg.* (**2.55:**) |

**यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जन। ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा॥३७॥**
(यथा एधांसि समिद्धः अग्निः, भस्मसात् कुरुते अर्जुन। ज्ञानाग्निः सर्वकर्माणि, भस्मसात् कुरुते तथा॥)
अर्जुन, यथा समिद्धः अग्निः एधांसि भस्म-सात् कुरुते, तथा ज्ञान-अग्निः सर्व-कर्माणि भस्म-सात् कुरुते। (**4.37**)
O अर्जुन, just as a well-ignited fire reduces logs to ashes, so [this] fire that is knowledge reduces all कर्मन्-s [i.e., all कर्म-फल-s waiting to fructify in the जीव-'s (individual's) karmic account] to ashes.

| | | | |
|---|---|---|---|
| 1 | अर्जुन | O अर्जुन | fr. अर्जुन *m. sg. voc.* |
| 2 | यथा | just as | fr. यथा *in.* (**6.19:**) |
| 3 | समिद्धः | a well-ignited | fr. समिद्ध *pp. of* सम् + √इध् *a. m. sg. nom.* (**2.76:** & **.78:**) |
| 4 | अग्निः | fire | fr. अग्नि *m. sg. nom.* |
| 6 | एधांसि | logs | fr. एधस् *n. pl. acc.* (**3.6.i:**) |
| 5 | भस्म-सात् कुरुते | reduces to ashes | fr. भस्म-सात् *in.*; √कृ *8.Ā. pr. 3rd sg.* (**5.22.1:**) |
| 7 | तथा | so | fr. तथा *in.* (**6.19:**) |
| 8 | ज्ञान-अग्निः | [this] fire that is knowledge | fr. ज्ञान-अग्नि *m. sg. nom.* |
| 10 | सर्व-कर्माणि | all कर्मन्-s | fr. सर्व-कर्मन् *n. pl. acc.* (**3.22:**) |
| 9 | भस्म-सात् कुरुते | reduces to ashes | fr. भस्म-सात् *in.*; √कृ *8.Ā. pr. 3rd sg.* (**5.22.1:**) |

**न हि ज्ञानेन सदृशं पवित्रमिह विद्यते। तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति॥ ३८॥**

(न हि ज्ञानेन सदृशं, पवित्रम् इह विद्यते। तद् स्वयं योगसंसिद्धः, कालेन आत्मनि विन्दति॥ )

इह हि ज्ञानेन सदृशं पवित्रं न विद्यते। कालेन योग-संसिद्धः आत्मनि स्वयं तद् [ज्ञानं] विन्दति। (**4.38**)

In this world, indeed, there is no purifier equal to knowledge. In time, the one who is prepared by [कर्म-] योग [and has a proper teacher] gains that [knowledge] easily in [one's prepared] mind.

| | | | |
|---|---|---|---|
| 1 | इह हि | in this (world) indeed | fr. इह *in.* (**6.19:**); हि *in.* |
| 5 | ज्ञानेन | to knowledge | fr. ज्ञान *n. sg. inst.* (**7.9.12:**) |
| 4 | सदृशं | equal | fr. सदृश *a. n. sg. nom.* (**4.17.2:**) |
| 3 | पवित्रं | purifier | fr. पवित्र *n. sg. nom.* |
| 2 | न विद्यते | there is no | fr. न *in.*; विद् *ps. pr. 3rd sg.* |
| 6 | कालेन | in time | fr. काल *m. sg. inst.* (**7.9.4:**) |
| 8 | योग- | by [कर्म-] योग | |
| 7 | -संसिद्धः | the one who is prepared | fr. योग-संसिद्ध *a. m. sg. nom.* |
| 12 | आत्मनि | in [one's prepared] mind | fr. आत्मन् *m. sg. loc.* (**3.22:**) |
| 11 | स्वयं | without effort, easily | fr. स्वयम् *in. reflex. prn.* (**4.14:**) |
| 10 | तद् [ज्ञानं] | that [knowledge] | fr. तद् *prn. n. sg. acc.* |
| 9 | विन्दति | gains | fr. √विद् *6.P. pr. 3rd sg.* (**5.17.1:**) |

**श्रद्धावाल्ँलभते ज्ञानं तत्परः संयतेन्द्रियः। ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति॥ ३९॥**

(श्रद्धावान् लभते ज्ञानं, तत्परः संयतेन्द्रियः। ज्ञानं लब्ध्वा परां शान्तिम्, अचिरेण अधिगच्छति॥ )

श्रद्धावान् तत्-परः संयत-इन्द्रियः ज्ञानं लभते। ज्ञानं लब्ध्वा परां शान्तिम् अ-चिरेण अधिगच्छति। (**4.39**)

One who has trust [in this teaching as a valid means of knowledge], for whom that [knowledge] is the ultimate, and whose senses are mastered [by कर्म-योग]—that one attains knowledge. Having gained knowledge, one immediately attains limitless peace.

| | | | |
|---|---|---|---|
| 1 | श्रद्धावान् (**2.51:**) | one who has trust [in this teaching as a valid means of knowledge] | fr. श्रधावत् *a. m. sg. nom.* (**3.13.a:**) |
| 2 | तत्-परः | for whom that [knowledge] is the ultimate | fr. तद्-पर *a. m. sg. nom.* (**2.24:**) |
| 4 | संयत- | are mastered [by कर्म-योग] | |
| 3 | -इन्द्रियः | [and] whose senses | fr. संयत-इन्द्रिय *a. m. sg. nom.* |

| | | | |
|---|---|---|---|
| 6 | ज्ञानं | knowledge | fr. ज्ञान *n. sg. acc.* |
| 5 | लभते | that one attains | fr. √लभ् *1.Ā. pr. 3rd sg.* |
| 7 | ज्ञानं लब्ध्वा | having gained knowledge | fr. ज्ञान *n. sg. acc.*; लब्ध्वा *in. pt. of* √लभ् (**2.76:** & **.78:**) |
| 10 | परां | limitless | fr. परा *prn. a. n. sg. acc.* (**4.16.3:**) |
| 11 | शान्तिम् | peace | fr. शान्ति *n. sg. acc.* |
| 9 | अ-चिरेण | immediately | fr. अचिरेण *in.* |
| 8 | अधिगच्छति | one attains | fr. अधि + √गम् *1.P. pr. 3rd sg.* (**5.15.6:**) |

**अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति। नायं लोकोऽस्ति न परो न सुखं संशयात्मनः॥४०॥**

(अज्ञः च अश्रद्दधानः च, संशयात्मा विनश्यति। न अयं लोकः अस्ति न परः, न सुखं संशयात्मनः॥)

अ-ज्ञः च अ-श्रद्-दधानः च संशय-आत्मा [च] विनश्यति। संशय-आत्मनः अयं लोकः न अस्ति, न परः, न सुखम्। (**4.40**)

The nondiscerning, having no trust, whose mind is [full] of doubts—that one perishes [i.e., remains in संसार (the life of becoming)]. For the one whose mind is [full] of doubts, this world is not there, nor the next, nor is there [any] happiness [because of constant doubts].

| | | | |
|---|---|---|---|
| 1 | अ-ज्ञः च | the non-discerning | fr. अज्ञ *a. m. sg. nom.* (**6.24.1:**); च *in.* |
| 2 | अ-श्रद्-दधानः च | having no trust | fr. अश्रद्-दधान *pr. mid. pt. of* श्रद् *in.* + √धा *a. m. sg. nom.* (**6.5:**, **5.8.2:**, **5.20.2:**, **6.13:**, **2.24:** & **2.43:**); च *in.* |
| 3 | संशय-आत्मा [च] | whose mind is [full] of doubts | fr. संशय-आत्मन् *a. m. sg. nom.* (**3.22:**) |
| 4 | विनश्यति | that one perishes | fr. वि + √नश् *4.P. pr. 3rd sg.* |
| 5 | संशय-आत्मनः | for the one whose mind is [full] of doubts | fr. संशय-आत्मन् *a. m. sg. gen.* (**3.22:**) |
| 6 | अयं लोकः | this world | fr. इदम् *prn. m. sg. nom.*; लोक *m. sg. nom.* |
| 7 | न अस्ति | is not there | fr. न *in.*; √अस् *2.P. pr. 3rd sg.* |
| 8 | न परः | nor the next | fr. न *in.*; पर *prn. a. m. sg. nom.* (**4.16.3:**) |
| 9 | न सुखम् | nor is there [any] happiness | fr. न *in.*; सुख *n. sg. nom.* |

**योगसन्न्यस्तकर्माणं ज्ञानसञ्छिन्नसंशयम्। आत्मवन्तं न कर्माणि निबध्नन्ति धनञ्जय॥ ४१॥**

(योगसन्न्यस्तकर्माणं, ज्ञानसञ्छिन्नसंशयम्। आत्मवन्तं न कर्माणि, निबध्नन्ति धनञ्जय॥)

कर्माणि योग-सन्न्यस्त-कर्माणं ज्ञान-सञ्छिन्न-संशयम् आत्मवन्तं न निबध्नन्ति, धनञ्-जय। (**4.41**) Actions do not bind the one who has renounced कर्मन् through [ज्ञान-] योग [even though engaged in activity], whose doubt has been completely severed by knowledge, and who is attentive [i.e., whose vision of reality is never lost], O अर्जुन.

| | | | |
|---|---|---|---|
| 1 | कर्माणि | actions | fr. कर्मन् *n. pl. nom.* (**3.22:**) |
| 4 | योग- | through [ज्ञान-] योग | |
| 3 | -सन्न्यस्त-कर्माणं | one who has renounced कर्मन् | fr. योग-सन्न्यस्त-कर्मन् *a. m. sg. acc.* (**3.22:**) |
| 6 | ज्ञान- | by knowledge | |
| 5 | -सञ्छिन्न-संशयम् | whose doubt has been completely severed | fr. ज्ञान-सञ्छिन्न-संशय *a. m. sg. acc.* (**2.55:**) |
| 7 | आत्मवन्तं | [and] who is attentive | fr. आत्मवत् *a. m. sg. acc.* (**3.13:**) |
| 2 | न निबध्नन्ति | do not bind | fr. न *in.*; नि + √बन्ध् *9.P. pr. 3rd pl.* (**5.3.h:**) |
| 8 | धनञ्-जय | (अर्जुन) O Winner of Laurels | fr. धन-म्-जय *m. sg. voc.* (**2.55:**) |

**तस्मादज्ञानसम्भूतं हृत्स्थं ज्ञानासिनात्मनः। छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत॥ ४२॥**

(तस्मात् अज्ञानसम्भूतं, हृत्स्थं ज्ञानासिना आत्मनः। छित्त्वा एनम् संशयं योगम्, आतिष्ठ उत्तिष्ठ भारत॥)

तस्मात् ज्ञान-असिना एनम् अ-ज्ञान-सम्भूतं हृत्-स्थम् आत्मनः संशयं छित्त्वा, योगम् आतिष्ठ, उत्तिष्ठ [च], भारत। (**4.42**)

Therefore, severing with the sword that is knowledge this doubt about yourself [initially in regard to one's duty, later in regard to the आत्मन्] rooted in the intellect and born of a lack of discernment, commit to [कर्म-] योग and get up, O अर्जुन!

| | | | |
|---|---|---|---|
| 1 | तस्मात् | therefore | fr. तस्मात् *in.* |
| 3 | ज्ञान-असिना | with the sword that is knowledge | fr. ज्ञान-असि *m. sg. inst.* |
| 4 | एनम् | this | fr. एनद् *prn. m. sg. acc.* (**4.10:**) |
| 9 | अ-ज्ञान- | of a lack of discernment | |
| 8 | -सम्भूतं | [and] born | fr. अज्ञान-सम्भूत *a. m. sg. acc.* |
| 7 | हृत्-स्थम् | rooted in the intellect | fr. हृद्-स्थ *a. m. sg. acc.* (**6.24.1:** & **2.24:** & **2.43:**) |
| 6 | आत्मनः | about yourself | fr. आत्मन् *m. sg. gen.* (**3.22:**) |
| 5 | संशयं | doubt | fr. संशय *m. sg. acc.* |
| 2 | छित्त्वा | severing | fr. छित्त्वा *in. pt. of* √छिद् (**2.42:**) |
| 11 | योगम् | to [कर्म-] योग | fr. योग *m. sg. acc.* |
| 10 | आतिष्ठ | commit | fr. आ + √स्था *1.P. impv. 2nd sg.* (**5.15.4:**) |

| | | | |
|---|---|---|---|
| 12 | उत्तिष्ठ [च] | [and] get up | fr. उद् + √स्था *1.P. impv. 2nd sg.* (**5.15.4:** & **2.24:**) |
| 13 | भारत | (अर्जुन) O (Brilliant) Son of India | fr. भारत *m. sg. voc.* |

**ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे ज्ञानकर्मसन्न्यासयोगो नाम चतुर्थोऽध्यायः॥४॥**

(ओं तद् सत्। इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे ज्ञानकर्मसन्न्यासयोगः नाम चतुर्थः अध्यायः॥)

ओं तद् सत्। इति श्रीमद्-भगवद्-गीतासु उपनिषत्सु ब्रह्म-विद्यायां योग-शास्त्रे श्री-कृष्ण-अर्जुन-संवादे ज्ञान-कर्म-सन्न्यास-योगः नाम चतुर्थः अध्यायः। (4)

ओं (ब्रह्मन्, the witness of all) is that [only] reality. Thus ends the fourth chapter, called "The Topic of Knowledge and the Renunciation of Action," of the [eighteen chapters of] *Songs of the Glorious Lord*, which is [looked upon as] उपनिषद् [and whose teaching is] in [the form of] a dialogue between श्री कृष्ण and अर्जुन, [the subject matter being] a knowledge of ब्रह्मन् and योग.

| | | | |
|---|---|---|---|
| 1 | ओं | ओम् (ब्रह्मन्, the witness of all,) | fr. ओम् *in.* |
| 2 | तद् सत् | [is] that [only] reality | fr. तद् *prn. n. sg. nom.*; सत् *n. sg. nom.* |
| 3 | इति | (quote-end quote), thus ends | fr. इति *in.* |
| 11 | श्रीमद्- | of the venerable, the glorious | |
| 12 | -भगवद्- | one having [limitless] glories, Lord | |
| 10 | -गीतासु | in [i.e., of] songs | fr. श्रीमत्-भगवत्-गीता *f. pl. loc.* (**2.43:**) |
| 13 | उपनिषत्सु | [which are/is looked upon as] उपनिषद्, sacred scripture | fr. उपनिषद् *f. pl. loc.* (**6.24:**) |
| 18 | ब्रह्म- | of ब्रह्मन् (reality/सत्) | |
| 17 | -विद्यायां | [and] a knowledge | fr. ब्रह्म-विद्या *f. sg. loc.* |
| 19 | योग-शास्त्रे | [and instruction of] योग (means, discipline, etc.) | fr. योग-शास्त्र *n. sg. loc.* |
| 15 | श्री-कृष्ण- | between Lord कृष्ण | |
| 16 | -अर्जुन- | and अर्जुन | |
| 14 | -संवादे | in [the form of] a dialogue | fr. श्री-कृष्ण-अर्जुन-संवाद *n. sg. loc.* |
| 8 | ज्ञान- | of knowledge | |
| 9 | -कर्म-सन्न्यास- | and the renunciation of action | |
| 7 | -योगः | the topic | fr. ज्ञान-कर्म-सन्न्यास-योग *a. m. sg. nom.* |
| 6 | नाम | by the name, called | fr. नाम *in.* |
| 4 | चतुर्थः | the fourth | fr. चतुर्थ *ordinal a. m. sg. nom.* |
| 5 | अध्यायः | chapter | fr. अध्याय *m. sg. nom.* |

# अथ पञ्चमोऽध्यायः

**अर्जुन उवाच।**

**सन्न्यासं कर्मणां कृष्ण पुनर्योगं च शंससि। यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितम्॥१॥**

(अर्जुनः उवाच। सन्न्यासं कर्मणां कृष्ण, पुनः योगं च शंससि। यद् श्रेयः एतयोः एकं, तद् मे ब्रूहि सुनिश्चितम्॥)

अर्जुनः उवाच। कृष्ण, कर्मणां सन्न्यासं पुनः योगं च शंससि। एतयोः यद् श्रेयः तद् एकं मे सु-निश्चितं ब्रूहि। (**5.1**)

अर्जुन said: O कृष्ण, You praise the renunciation of action and also [कर्म-] योग. Of these two, please tell me definitely that one which is better [for me].

| | | | |
|---|---|---|---|
| 1 | अर्जुनः उवाच | अर्जुन said | fr. अर्जुन *m. sg. nom.*; √वच् *P. perf. 3rd sg.* (**5.10.3:**) |
| 2 | कृष्ण | O कृष्ण | fr. कृष्ण *m. sg. voc.* |
| 4 | कर्मणां सन्न्यासं | the renunciation of action | fr. कर्मन् *n. pl. gen.* (**3.22:**); सन्न्यास *m. sg. acc.* |
| 5 | पुनः योगं च | and also [कर्म-] योग | fr. पुनर् *in.*; योग *m. sg. acc.*; च *in.* |
| 3 | शंससि | You praise | fr. √शंस् *1.P. pr. 2nd sg.* |
| 6 | एतयोः | of these two | fr. एतद् *prn. m. du. gen.* |
| 11 | यद् श्रेयः | which [is] better [for me] | fr. यद् *n. sg. nom.*; श्रेयस् *n. sg. nom.* (**6.25:**) |
| 10 | तद् एकं | that one | fr. तद् *prn. n. sg. acc.*; एक *num. a. sg. acc.* (**4.25:**) |
| 8 | मे | me | fr. अहम् *prn. sg. dat.* (**4.3:**) (**7.10.A.1:**) |
| 9 | सु-निश्चितं | definitely | fr. सु-निश्चित *in.* (**6.36:** & **7.8.8:**) |
| 7 | ब्रूहि | please tell | fr. √ब्रू *2.P. impv. 2nd sg.* (**5.6.a:**) |

**श्रीभगवानुवाच।**

**सन्न्यासः कर्मयोगश्च निःश्रेयसकरावुभौ। तयोस्तु कर्मसन्न्यासात्कर्मयोगो विशिष्यते॥२॥**

(श्रीभगवान् उवाच। सन्न्यासः कर्मयोगः च, निःश्रेयसकरौ उभौ। तयोः तु कर्मसन्न्यासात्, कर्मयोगः विशिष्यते॥)

श्री-भगवान् उवाच। सन्न्यासः कर्म-योगः च उभौ निःश्रेयस-करौ। तयोः तु कर्म-सन्न्यासात् कर्म-योगः विशिष्यते। (**5.2**)

The Lord said: Both [lifestyles of] सन्न्यास and कर्म-योग lead to complete freedom. But, of the two, कर्म-योग is better than renunciation of action [for you, अर्जुन].

| | | | |
|---|---|---|---|
| 1 | श्री-भगवान् उवाच | the Lord said | fr. श्री-भगवत् *m. sg. nom.*; √वच् *P. perf. 3rd sg.* (**5.10.3:**) |
| 3 | सन्न्यासः | [lifestyles of] सन्न्यास | fr. सन्न्यास *m. sg. nom.* |
| 4 | कर्म-योगः च | and कर्म-योग | fr. कर्म-योग *m. sg. nom.*; च *in.* |
| 2 | उभौ | both | fr. उभ *prn. a. m. du. nom.* (**4.16.b:**) |
| 5 | निःश्रेयस-करौ | lead to complete freedom | fr. निःश्रेयस-कर *a. m. du. nom.* (**6.38:**) |

| | | | |
|---|---|---|---|
| 6 | तयोः तु | but of the two | fr. तद् *prn. m. du. gen.*; तु *in.* |
| 10 | कर्म- | of action | |
| 9 | -सन्न्यासात् | than renunciation | fr. कर्म-सन्न्यास *m. sg. abl.* |
| 7 | कर्म-योगः | कर्म-योग | fr. कर्म-योग *m. sg. nom.* |
| 8 | विशिष्यते | is better [for you, अर्जुन] | fr. वि + √शिष् *ps. pr. 3rd sg.* |

**ज्ञेयः स नित्यसन्न्यासी यो न द्वेष्टि न काङ्क्षति। निर्द्वन्द्वो हि महाबाहो सुखं बन्धात्प्रमुच्यते॥३॥**
(ज्ञेयः सः नित्यसन्न्यासी, यः न द्वेष्टि न काङ्क्षति। निर्द्वन्द्वः हि महाबाहो, सुखं बन्धात् प्रमुच्यते॥)
यः न द्वेष्टि न काङ्क्षति, सः नित्य-सन्न्यासी ज्ञेयः। महा-बाहो, निर्-द्वन्-द्वः हि (=यस्मात्) बन्धात् सुखं प्रमुच्यते। (**5.3**)
The one who neither hates nor longs [for anything] should be known as always a सन्न्यासिन् (renunciate) [no matter which lifestyle]. Because, O अर्जुन, being free from [the hold of] the opposites [i.e., राग and द्वेष], one is effortlessly freed from bondage.

| | | | |
|---|---|---|---|
| 2 | यः | who | fr. यद् *prn. m. sg. nom.* |
| 3 | न द्वेष्टि | neither hates | fr. न *in.*; √द्विष् *2.P. pr. 3rd sg.* (**2.88:**) |
| 4 | न काङ्क्षति | nor longs [for anything] | fr. न *in.*; √काङ्क्ष् *1.P. pr. 3rd sg.* |
| 1 | सः | the one | fr. तद् *prn. m. sg. nom.* |
| 6 | नित्य-सन्न्यासी | always a सन्न्यासिन् (renunciate) | fr. नित्य-सन्न्यासिन् *a. m. sg. nom.* (**3.15:**) |
| 5 | ज्ञेयः | should be known as | fr. ज्ञेय *pot. ps. pt. of* √ज्ञा *pt. m. sg. nom.* (**6.8:**) |
| 8 | महा-बाहो | (अर्जुन) O Mighty Armed One | fr. महा-बाहु *m. sg. voc.* |
| 9 | निर्-द्वन्-द्वः | being free from [the hold of] the opposites [i.e., राग and द्वेष] | fr. निस्-द्वन्द्व *a. m. sg. nom.* (**2.24:** & **2.29:** & **6.36:**) |
| 7 | हि (=यस्मात्) | because | fr. हि *in.* |
| 11 | बन्धात् | from bondage | fr. बन्ध *m. sg. abl.* |
| 10 | सुखं प्रमुच्यते | one is effortlessly freed | fr. सुखम् *in.* (**7.8.8:**); प्र + √मुच् *ps. pr. 3rd sg.* |

**साङ्ख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः। एकमप्यास्थितः सम्यगुभयोर्विन्दते फलम्॥ ४॥**
(साङ्ख्ययोगौ पृथक् बालाः, प्रवदन्ति न पण्डिताः। एकम् अपि आस्थितः सम्यक्, उभयोः विन्दते फलम्॥)
बालाः साङ्ख्य-योगौ पृथक् प्रवदन्ति, न पण्डिताः। एकम् अपि सम्यक् आस्थितः उभयोः फलं विन्दते। (5.4)
Children [i.e., the nondiscerning], not the wise, claim that साङ्ख्य [i.e., सन्न्यास, renunciation] and [कर्म-] योग are different. One who has completely followed just one [of the two lifestyles] attains the result of both.

| | | | |
|---|---|---|---|
| 1 | बालाः | children [i.e., the non-discerning] | fr. बाल *m. pl. nom.* |
| 4 | साङ्ख्य- | साङ्ख्य [i.e., सन्न्यास/renunciation] | |
| 5 | -योगौ | and [कर्म-] योग | fr. साङ्ख्य-योग *m. du. acc.* |
| 6 | पृथक् | [are] different | fr. पृथक् *in.* |
| 3 | प्रवदन्ति | claim [that] | fr. प्र + √वद् *1.P. pr. 3rd pl.* |
| 2 | न पण्डिताः | not the wise | fr. न *in.*; पण्डित *m. pl. nom.* |
| 9 | एकम् अपि | just one [of the two lifestyles] | fr. एक *num. a. m. sg. acc.* (**4.25:**); अपि *in.* |
| 8 | सम्यक् | completely | fr. सम्यक् *in.* |
| 7 | आस्थितः | one who has followed | fr. आस्थित *pp. of* आ + √स्था *a. m. sg. nom.* (**6.6:**) |
| 11 | उभयोः फलं | the result of both | fr. उभ *prn. a. m. du. gen.* (**4.16.b:**); फल *n. sg. acc.* |
| 10 | विन्दते | attains | fr. √विद् *6.P. pr. 3rd sg.* (**5.17.1:**) |

**यत्साङ्ख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते। एकं साङ्ख्यं च योगं च यः पश्यति स पश्यति॥ ५॥**
(यद् साङ्ख्यैः प्राप्यते स्थानं, तद् योगैः अपि गम्यते। एकं साङ्ख्यं च योगं च, यः पश्यति सः पश्यति॥)
साङ्ख्यैः यद् स्थानं प्राप्यते, योगैः अपि तद् गम्यते। यः साङ्ख्यं च योगं च एकं पश्यति, सः पश्यति। (5.5)
The status [i.e., मोक्ष, complete freedom] that is gained by those who follow renunciation is also gained by those who follow [कर्म-] योग. One [really] sees, who sees that साङ्ख्य (renunciation) and [कर्म-] योग are one.

| | | | |
|---|---|---|---|
| 3 | साङ्ख्यैः | by those who follow renunciation | fr. साङ्ख्य *m. pl. inst.* |
| 1 | यद् स्थानं | the status [which] | fr. यद् *prn. n. sg. nom.*; स्थान *n. sg. nom.* |
| 2 | प्राप्यते | is gained | fr. प्र + √आप् *ps. pr. 3rd sg.* |
| 5 | योगैः अपि | by those who follow [कर्म-] योग also | fr. योग *m. pl. inst.*; अपि *in.* |
| 4 | तद् गम्यते | that is gained | fr. तद् *prn. n. sg. nom.*; √गम् *ps. pr. 3rd sg.* |

| | | | |
|---|---|---|---|
| 7 | यः | who | fr. यद् *prn. m. sg. nom.* |
| 9 | साङ्ख्यं च | साङ्ख्य (renunciation) | fr. साङ्ख्य *m. sg. acc.*; च *in.* |
| 10 | योगं च | and [कर्म-] योग | fr. योग *m. sg. acc.*; च *in.* |
| 11 | एकं | [are] one | fr. एक *num. a. m. acc.* (**4.25:**) |
| 8 | पश्यति | sees [that] | fr. √दृश् *1.P. pr. 3rd sg.* (**5.15.6:**) |
| 6 | सः पश्यति | one [really] sees | fr. तद् *prn. m. sg. nom.*; √दृश् *1.P. pr. 3rd sg.* (**5.15.6:**) |

**सन्न्यासस्तु महाबाहो दुःखमाप्तुमयोगतः। योगयुक्तो मुनिर्ब्रह्म नचिरेणाधिगच्छति॥६॥**

(सन्न्यासः तु महाबाहो, दुःखम् आप्तुम् अयोगतः। योगयुक्तः मुनिः ब्रह्म, नचिरेण अधिगच्छति॥)

महा-बाहो, अ-योगतः तु सन्न्यासः दुःखम् आप्तुम्। योग-युक्तः मुनिः न-चिरेण ब्रह्म अधिगच्छति। (**5.6**)

Whereas, O अर्जुन, without [first following] [कर्म-] योग, सन्न्यास [as renunciation or as a lifestyle] is difficult to accomplish. The मुनि (one who is contemplative) who has been prepared through [कर्म-] योग [in this life and/or prior lives] in no time attains ब्रह्मन्.

| | | | |
|---|---|---|---|
| 2 | महा-बाहो | (अर्जुन) O Mighty Armed One | fr. महा-बाहु *m. sg. voc.* |
| 1 | अ-योगतः तु | whereas without [first following] [कर्म-] योग | fr. अयोगतस् *in.* (**6.19:**); तु *in.* |
| 3 | सन्न्यासः | सन्न्यास [as renunciation or as a lifestyle] | fr. सन्न्यास *m. sg. nom.* |
| 4 | दुःखम् आप्तुम् | is difficult to accomplish | fr. दुःख *in.* (**7.8.8:**); आप्तुम् *inf. of* √आप् *in.* |
| 6 | योग-युक्तः | who has been prepared through [कर्म-] योग | fr. योग-युक्त *a. m. sg. nom.* |
| 5 | मुनिः | the मुनि (one who is contemplative) | fr. मुनि *m. sg. nom.* |
| 7 | न-चिरेण | in no time | fr. न-चिरेण *in.* (**6.33:** & **2.92:**) (**7.9.14:**) |
| 9 | ब्रह्म | ब्रह्मन् | fr. ब्रह्मन् *n. sg. acc.* (**3.22:**) |
| 8 | अधिगच्छति | attains | fr. अधि + √गम् *1.P. pr. 3rd sg.* (**5.15.6:**) |

**योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रियः। सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते॥७॥**

(योगयुक्तः विशुद्धात्मा, विजितात्मा जितेन्द्रियः। सर्वभूतात्मभूतात्मा, कुर्वन् अपि न लिप्यते॥)

योग-युक्तः विशुद्ध-आत्मा विजित-आत्मा जित-इन्द्रियः सर्व-भूत-आत्म-भूत-आत्मा कुर्वन् अपि न लिप्यते। (**5.7**) Prepared by [कर्म-] योग [thus] whose character is without defect, who has discipline over the body, who has mastered the senses, and [finally] whose self [is known] as the self of all beings—though performing action, that one is not affected.

| | | | |
|---|---|---|---|
| 1 | योग-युक्तः | prepared by [कर्म-] योग [thus] | fr. योग-युक्त *a. m. sg. nom.* |
| 3 | विशुद्ध- | is without defect | |
| 2 | -आत्मा | whose character | fr. विशुद्ध-आत्मन् *a. m. sg. nom.* (**3.22:**) |
| 4 | विजित-आत्मा | who has discipline over the body | fr. विजित-आत्मन् *a. m. sg. nom.* (**3.22:**) |
| 5 | जित-इन्द्रियः | who has mastered the senses | fr. जित-इद्रिय *a. m. sg. nom.* |
| 8 | सर्व-भूत- | of all beings | |
| 7 | -आत्म-भूत- | as the self | |
| 6 | -आत्मा | whose self [is known] | fr. सर्व-भूत-आत्म-भूत-आत्मन् *a. m. sg. nom.* (**3.22:**) |
| 9 | कुर्वन् अपि | though performing action | fr. कुर्वत् *pr. pt. of* √कृ *pt. m. sg. nom.* (**5.22.1:**); अपि *in.* |
| 10 | न लिप्यते | that one is not affected | fr. न *in.*; √लिप् *ps. pr. 3rd sg.* |

**नैव किञ्चित्करोमीति युक्तो मन्येत तत्त्ववित्। पश्यञ्शृण्वन्स्पृशञ्जिघ्रन्नश्नन्गच्छन्स्वपञ्श्वसन्॥८॥**
**प्रलपन्विसृजन्गृह्णन्नुन्मिषन्निमिषन्नपि। इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन्॥९॥**

(न एव किञ्चिद् करोमि इति, युक्तः मन्येत तत्त्वविद्। पश्यन् शृण्वन् स्पृशन् जिघ्रन्, अश्नन् गच्छन् स्वपन् श्वसन्॥
प्रलपन् विसृजन् गृह्णन्, उन्मिषन् निमिषन् अपि। इन्द्रियाणि इन्द्रियार्थेषु, वर्तन्ते इति धारयन्॥)

इन्द्रियाणि इन्द्रिय-अर्थेषु वर्तन्ते इति धारयन् युक्तः तत्त्व-विद् — पश्यन् शृण्वन् स्पृशन् जिघ्रन् अश्नन् गच्छन् स्वपन् श्वसन् प्रलपन् विसृजन् गृह्णन् उन्मिषन् निमिषन् अपि — न एव किञ्-चिद् करोमि इति मन्येत। (**5.8-9**)

The contemplative knower of the truth, maintaining that the organs [of sense and action] engage in their objects, would think "I do not do anything," even though seeing, hearing, touching, smelling, eating, moving, sleeping, breathing, talking, releasing, grasping, [or] opening and closing [the eyes].

| | | | |
|---|---|---|---|
| 4 | इन्द्रियाणि | the organs [of sense and action] | fr. इन्द्रिय *n. pl. nom.* |
| 6 | इन्द्रिय-अर्थेषु | in their objects | fr. इन्द्रिय-अर्थ *m. pl. loc.* |
| 5 | वर्तन्ते | engage | fr. √वृत् *1.Ā. pr. 3rd pl.* |
| 3 | इति धारयन् | maintaining that | fr. इति *in.*; धारयत् *pr. pt. of cs.* √धृ *pt. m. sg. nom.* (**5.40: & 3.12:**) |
| 1 | युक्तः | the contemplative | fr. युक्त *pp. of* √युज् *a. m. sg. nom.* (**2.81:**) |
| 2 | तत्त्व-विद् | knower of the truth | fr. तत्व-विद् *a. m. sg. nom.* (**6.24:**) |

| | | | |
|---|---|---|---|
| 12 | पश्यन् (**2.52:**) | seeing | fr. पश्यत् *pr. pt. of* √दृश् *pt. m. sg. nom.* (**5.15.6:**) |
| 13 | शृण्वन् | hearing | fr. शृण्वत् *pr. pt. of* √श्रु *pt. m. sg. nom.* (**5.21.3:**) |
| 14 | स्पृशन् (**2.52:**) | touching | fr. स्पृशत् *pr. pt. of* √स्पृश् *pt. m. sg. nom.* |
| 15 | जिघ्रन् (**2.62:**) | smelling | fr. जिघ्रत् *pr. pt. of* √घ्र *pt. m. sg. nom.* (**5.15.4:**) |
| 16 | अश्नन् | eating | fr. अश्नत् *pr. pt. of* √अश् *pt. m. sg. nom.* |
| 17 | गच्छन् | moving | fr. गच्छत् *pr. pt. of* √गम् *pt. m. sg. nom.* (**5.15.6:**) |
| 18 | स्वपन् (**2.52:**) | sleeping | fr. स्वपत् *pr. pt. of* √स्वप् *pt. m. sg. nom.* (**5.15.6:**) |
| 19 | श्वसन् | breathing | fr. श्वसत् *pr. pt. of* √श्वस् *pt. m. sg. nom.* |
| 20 | प्रलपन् | talking | fr. प्रलपत् *pr. pt. of* प्र + √लप् *pt. m. sg. nom.* |
| 21 | विसृजन् | releasing | fr. विसृजत् *pr. pt. of* वि + √सृज् *pt. m. sg. nom.* (**2.101:**) |
| 22 | गृह्णन् (**2.62:**) | grasping | fr. गृह्णत् *pr. pt. of* √ग्रह् *pt. m. sg. nom.* (**5.23.2:**) |
| 23 | उन्मिषन् | [or] opening | fr. उन्मिषत् *pr. pt. of* उद् + √मिष् *pt. m. sg. nom.* (**2.24:** & **.44:**) |
| 24 | निमिषन् | [and] closing [the eyes] | fr. निमिषत् *pr. pt. of* नि + √मिष् *pt. m. sg. nom.* |
| 11 | अपि | even though | fr. अपि *in.* |
| 9 | न एव | not [do] | fr. न *in.*; एव *in.* |
| 10 | किञ्-चिद् | anything | fr. क-चिद् *prn. cmpd. n. sg. acc.* (**4.20:** & **2.55:**) |
| 8 | करोमि | I do | fr. √कृ *8.P. pr.* $1^{st}$ *sg.* (**5.22.1:**) |
| 7 | इति मन्येत | would think | fr. इति *in.*; √मन् *4.Ā. pot.* $3^{rd}$ *sg.* (**5.5:**) |

**ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः। लिप्यते न स पापेन पद्मपत्रमिवाम्भसा॥१०॥**

(ब्रह्मणि आधाय कर्माणि, सङ्गं त्यक्त्वा करोति यः। लिप्यते न सः पापेन, पद्मपत्रम् इव अम्भसा॥)

यः सङ्गं त्यक्त्वा कर्माणि ब्रह्मणि आधाय करोति, सः पद्म-पत्रम् अम्भसा इव पापेन न लिप्यते। (**5.10**)

Giving up attachment [i.e., not anticipating results], the one who performs actions offering [them] unto ब्रह्मन् (the Lord—as प्रकृति, nature, the cosmic order)—that one—is not affected by पाप (karmic demerit), like a lotus leaf [is not soaked] by water.

| | | | |
|---|---|---|---|
| 2 | यः | the one who | fr. यद् *prn. m. sg. nom.* |
| 1 | सङ्गं त्यक्त्वा | giving up attachment | fr. सङ्ग *m. sg. acc.*; त्यक्त्वा *in. pt. of* √त्यज् (**2.81:**) |
| 4 | कर्माणि | actions | fr. कर्मन् *n. pl. acc.* (**3.22:**) |
| 6 | ब्रह्मणि | unto ब्रह्मन् (the Lord—as प्रकृति/nature, the cosmic order) | fr. ब्रह्मन् *n. sg. loc.* (**3.22:**) |
| 5 | आधाय | offering [them] | fr. आधाय *in. pt. of* आ + √धा |
| 3 | करोति | performs | fr. √कृ *8.P. pr.* $3^{rd}$ *sg.* (**5.22.1:**) |

| | | | |
|---|---|---|---|
| 7 | सः | that one | fr. तद् *prn. m. sg. nom.* |
| 11 | पद्म- | a lotus | |
| 12 | -पत्रम् | leaf | fr. पद्म-पत्र *n. sg. nom.* |
| 13 | अम्भसा | [is not soaked] by water | fr. अम्भस् *n. sg. inst.* (**3.6:**) |
| 10 | इव | like | fr. इव *in.* |
| 9 | पापेन | by पाप (karmic demerit) | fr. पाप *n. sg. inst.* |
| 8 | न लिप्यते | is not affected | fr. न *in.*; √लिप् *ps. pr. 3rd sg.* |

**कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि। योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धये॥११॥**

(कायेन मनसा बुद्ध्या, केवलैः इन्द्रियैः अपि। योगिनः कर्म कुर्वन्ति, सङ्गं त्यक्त्वा आत्मशुद्धये॥)

योगिनः सङ्गं त्यक्त्वा आत्म-शुद्धये केवलैः कायेन मनसा बुद्ध्या इन्द्रियैः अपि कर्म कुर्वन्ति। (**5.11**)

Giving up attachment, the [कर्म-] योगिन्-s perform action with [their] body, mind, intellect, and senses only [not by "I"], for आत्म-शुद्धि (transparency, clarity of character, mind).

| | | | |
|---|---|---|---|
| 2 | योगिनः | the [कर्म-] योगिन्-s | fr. योगिन् *m. pl. nom.* (**3.15:**) |
| 1 | सङ्गं त्यक्त्वा | giving up attachment | fr. सङ्ग *m. sg. acc.*; त्यक्त्वा *in. pt. of* √त्यज् (**2.81:**) |
| 11 | आत्म- | of character/mind | |
| 10 | -शुद्धये | for transparency/clarity | fr. आत्म-शुद्धि *f. sg. dat.* (**7.10.B:**) |
| 9 | केवलैः | only [not by "I"] | fr. केवल *a. n. pl. inst.* |
| 5 | कायेन | with [their] body | fr. काय *m. sg. inst.* |
| 6 | मनसा | mind | fr. मनस् *m. sg. inst.* (**3.6:**) |
| 7 | बुद्ध्या | intellect | fr. बुद्धि *f. sg. inst.* |
| 8 | इन्द्रियैः अपि | and senses | fr. इन्द्रिय *n. pl. inst.*; अपि *in.* |
| 4 | कर्म | action | fr. कर्मन् *n. sg. acc.* |
| 3 | कुर्वन्ति | perform | fr. √कृ *8.P. pr. 3rd pl.* (**5.22.1:** & **2.67:**) |

**युक्तः कर्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम्। अयुक्तः कामकारेण फले सक्तो निबध्यते॥१२॥**

(युक्तः कर्मफलं त्यक्त्वा, शान्तिम् आप्नोति नैष्ठिकीम्। अयुक्तः कामकारेण, फले सक्तः निबध्यते॥)

युक्तः कर्म-फलं त्यक्त्वा नैष्ठिकीं शान्तिम् आप्नोति। अ-युक्तः काम-कारेण फले सक्तः निबध्यते। (**5.12**)

Giving up [अधिकारत्वं, the notion of control over] the result of action, the युक्त [i.e., कर्म-योगिन्] attains a peace born of [the amount of] commitment; [whereas] not [committed to] कर्म-योग, attached to result(s) by the pressure of requirements, that one is bound.

| | | | |
|---|---|---|---|
| 3 | युक्तः | युक्त [i.e., a कर्मयोगिन्] | fr. युक्त *pp. of* √युज् *a. m. sg. nom.* (**2.81:**) |
| 2 | कर्म-फलं | the result of action | fr. कर्म-फल *n. sg. acc.* |
| 1 | त्यक्त्वा | giving up [अधिकारत्वं/the notion of control over] | fr. त्यक्त्वा *in. pt. of* √त्यज् (**2.81:**) |
| 6 | नैष्ठिकीं | born of [one's amount of] commitment | fr. नैष्ठिकी *a. f. sg. acc.* (**6.19:**) |
| 5 | शान्तिम् | a peace | fr. शान्ति *f. sg. acc.* |
| 4 | आप्नोति | attains | fr. √आप् *1.P. pr. 3rd sg.* |
| 7 | अ-युक्तः | [whereas] not [committed to] कर्म-योग | fr. अ-युक्त *pp. of* √युज् *a. m. sg. nom.* (**2.81:**) |
| 10 | काम- | of requirements | |
| 9 | -कारेण | by the pressure | fr. काम-कार *m. sg. inst.* (**2.92:**) |
| 8 | फले सक्तः | attached to result(s) | fr. फल *n. sg. loc.*; सक्त *pp. of* √सञ्ज् (**6.6: & 2.81:**) |
| 11 | निबध्यते | [that one] is bound | fr. नि + √बन्ध् *ps. pr. 3rd sg.* (**5.37.5:**) |

**सर्वकर्माणि मनसा सन्न्यस्यास्ते सुखं वशी। नवद्वारे पुरे देही नैव कुर्वन्न कारयन्॥१३॥**

(सर्वकर्माणि मनसा, सन्न्यस्य आस्ते सुखं वशी। नवद्वारे पुरे देही, न एव कुर्वन् न कारयन्॥)

वशी देही मनसा सर्व-कर्माणि सन्न्यस्य न एव कुर्वन् न कारयन् नव-द्वारे पुरे सुखम् आस्ते। (**5.13**)

The embodied one who has self-control—renouncing all actions through the mind [i.e., by knowledge, not by bodily inaction]—remains happy within the nine-gated city [i.e., the body with its nine apertures], neither doing nor causing activity.

| | | | |
|---|---|---|---|
| 2 | वशी | who has self-control | fr. वशिन् *a. m. sg. nom.* (**3.15:**) |
| 1 | देही | the embodied one | fr. देहिन् *a. m. sg. nom.* (**3.15:**) |
| 5 | मनसा | through the mind [i.e., by knowledge, not by bodily inaction] | fr. मनस् *n. sg. inst.* (**3.6:**) |
| 4 | सर्व-कर्माणि | all actions | fr. सर्व-कर्मन् *n. pl. acc.* |
| 3 | सन्न्यस्य | renouncing | fr. सन्न्यस्य *in. pt. of* सम् + नि + √अस् (**2.55:**) |

| | | | |
|---|---|---|---|
| 8 | न एव | neither | fr. न *in.*; एव *in.* |
| 9 | कुर्वन् | doing activity | fr. कुर्वत् *pr. pt. of* √कृ *a. m. sg. nom.* (**5.22.1:**) |
| 10 | न कारयन् | nor causing activity | fr. न *in.*; कारयत् *pr. pt. of cs.* √कृ *a. m. sg. nom.* (**5.40:**) |
| 7 | नव-द्वारे पुरे | within the nine-gated city [i.e., the body] | fr. नव-द्वार *a. n. sg. loc.*; पुर *n. sg. loc.* |
| 6 | सुखम् आस्ते | remains happy | fr. सुखम् *in.* (**7.8.8:**); √आस् *2.Ā. pr.* $3^{rd}$ *sg.* |

**न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः। न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते।।१४।।**

(न कर्तृत्वं न कर्माणि, लोकस्य सृजति प्रभुः। न कर्मफलसंयोगं, स्वभावः तु प्रवर्तते।।)

प्रभुः लोकस्य न कर्तृत्वं न कर्माणि न कर्म-फल-संयोगं सृजति स्व-भावः तु प्रवर्तते। (**5.14**)

The master [of the nine-gated city; i.e., आत्मन्] effects neither doership nor actions for the person, nor connection with [i.e., attainment of] the results of action; whereas स्व-भाव (the person's constitution, the complex of the गुण-s) engages [in action].

| | | | |
|---|---|---|---|
| 1 | प्रभुः | the master [of the nine-gated city, i.e., आत्मन्] | fr. प्रभु *m. sg. nom.* |
| 5 | लोकस्य | for the person | fr. लोक *m. sg. gen.* |
| 3 | न कर्तृत्वं | neither doership | fr. न *in.*; कर्तृत्व *n. sg. acc.* |
| 4 | न कर्माणि | nor actions | fr. न *in.*; कर्मन् *n. pl. acc.* (**3.22:**) |
| 6 | न | nor | fr. न *in.* |
| 8 | कर्म-फल- | the results of action | |
| 7 | -संयोगं | connection with [i.e., attainment of] | fr. कर्म-फल-संयोग *m. sg. acc.* |
| 2 | सृजति | effects | fr. √सृज् *6.P. pr.* $3^{rd}$ *sg.* |
| 9 | स्व-भावः तु | whereas स्वभाव (the person's constitution – the complex of the गुण-s) | fr. स्व-भाव *m. sg. nom.*; तु *in.* |
| 10 | प्रवर्तते | engages [in action] | fr. प्र + √वृत् *1.Ā. pr.* $3^{rd}$ *sg.* |

**नादत्ते कस्यचित्पापं न चैव सुकृतं विभुः। अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः॥१५॥**

(न आदत्ते कस्यचिद् पापं, न च एव सुकृतं विभुः। अज्ञानेन आवृतं ज्ञानं, तेन मुह्यन्ति जन्तवः॥)

विभुः कस्य-चिद् न पापं न च एव सु-कृतम् आदत्ते। अ-ज्ञानेन ज्ञानम् आवृतं, तेन जन्तवः मुह्यन्ति। (**5.15**)

The locationless [आत्मन्, self] takes on neither the karmic demerit nor merit of anyone [whether of a ज्ञानिन्, a कर्म-योगिन् or a non-कर्म-योगिन्]. Knowledge is covered by ignorance and, because of that, individuals are deluded [thinking, "I have merit or demerit."].

| | | | |
|---|---|---|---|
| 1 | विभुः | the locationless [आत्मन्/self] | fr. विभु *m. sg. nom.* |
| 6 | कस्य-चिद् | of anyone | fr. क-चिद् *prn. cmpd. m. sg. gen.* (**4.20:**) |
| 3 | न पापं | neither the karmic demerit | fr. न *in.*; पाप *n. sg. acc.* |
| 4 | न च एव | nor | fr. न *in.*; च *in.*; एव *in.* |
| 5 | सु-कृतम् | karmic merit | fr. सु-कृत *n. sg. acc.* |
| 2 | आदत्ते | takes on | fr. आ + √दा *3.Ā. pr. 3rd sg.* (**5.20.1:**) |
| 9 | अ-ज्ञानेन | by ignorance | fr. अज्ञान *n. sg. inst.* |
| 7 | ज्ञानम् | knowledge | fr. ज्ञान *n. sg. nom.* |
| 8 | आवृतं | is covered | fr. आवृत *pp. of* आ + √वृ *pt. n. sg. nom.* |
| 10 | तेन | [and] because of that [self-ignorance] | fr. तद् *prn. a. n. sg. inst.* |
| 11 | जन्तवः | individuals | fr. जन्तु *m. pl. nom.* |
| 12 | मुह्यन्ति | are deluded | fr. √मुह् *4.P. pr. 3rd pl.* |

**ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः। तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम्॥१६॥**

(ज्ञानेन तु तद् अज्ञानं, येषां नाशितम् आत्मनः। तेषां आदित्यवत् ज्ञानं, प्रकाशयति तद् परम्॥)

येषां तु आत्मनः ज्ञानेन तद् अ-ज्ञानं नाशितं, तेषां ज्ञानम् आदित्यवत् तद् परं प्रकाशयति। (**5.16**)

—Whereas, for those whose very ignorance is destroyed by knowledge of the self, [this] knowledge, like the sun, reveals [the fact that their self-evident self is] that limitless [ब्रह्मन्, reality].

| | | | |
|---|---|---|---|
| 3 | येषां | whose | fr. यद् *prn. m. pl. gen.* |
| 1 | तु | whereas | fr. तु *in.* |
| 7 | आत्मनः | of the self | fr. आत्मन् *m. sg. gen.* (**3.22:**) |
| 6 | ज्ञानेन | by knowledge | fr. ज्ञान *n. sg. inst.* |
| 4 | तद् अ-ज्ञानं | very ignorance | fr. तद् *prn. n. sg. nom.*; ज्ञान *n. sg. nom.* |
| 5 | नाशितं | is destroyed | fr. नाशित *pp. of cs.* √नश् *pt. n. sg. nom.* (**6.6:**) |
| 2 | तेषां | for those | fr. तद् *prn. m. pl. gen.* |

| | | |
|---|---|---|
| 8 ज्ञानम् | [this] knowledge | fr. ज्ञान *n. sg. nom.* |
| 9 आदित्यवत् | like the sun | fr. आदित्यवत् *in.* (**6.19:**) |
| 11 तद् परं | that limitless [ब्रह्मन्/reality] | fr. तद् *prn. n. sg. acc.*; पर *prn. a. sg. acc.* (**4.16.3:**) |
| 10 प्रकाशयति | reveals | fr. प्र + √काश् *P. cs. pr. 3rd sg.* (**5.40:**) |

**तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः। गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः॥१७॥**
(तद्बुद्धयः तदात्मानः, तन्निष्ठाः तत्परायणाः। गच्छन्ति अपुनरावृत्तिं, ज्ञाननिर्धूतकल्मषाः॥)
तद्-बुद्धयः तद्-आत्मानः तन्-निष्ठाः तत्-पर-अयणाः ज्ञान-निर्धूत-कल्मषाः अ-पुनर्-आवृत्तिं गच्छन्ति। (**5.17**)
Those whose intellect [i.e., knowledge] has attained that [ब्रह्मन्], whose self is [recognized as] that [ब्रह्मन्], whose commitment is in that [ब्रह्मन्], having that [ब्रह्मन्] as the ultimate end, and whose impurities have been shaken off by knowledge—gain no rebirth.

| | | |
|---|---|---|
| 1 तद्-बुद्धयः | those whose intellect [i.e., knowledge] has attained that [ब्रह्मन्] | fr. तद्-बुद्धि *a. m. pl. nom.* (**2.24:** & **.43:**) |
| 2 तद्-आत्मानः | whose self [is recognized as] that [ब्रह्मन्] | fr. तद्-आत्मन् *a. m. pl. nom.* (**2.24:** & **2.43:** & **3.22:**) |
| 3 तन्-निष्ठाः | whose commitment is in that [ब्रह्मन्] | fr. तन्-निष्ठ *a. m. pl. nom.* (**2.24: & .44:**) |
| 4 तत्- | having that [ब्रह्मन्] | |
| 5 -पर-अयणाः | as the ultimate end | fr. तद्-पर-अयण *a. m. pl. nom.* (**2.24:**) |
| 7 ज्ञान- | by knowledge | |
| 6 -निर्धूत-कल्मषाः | [and] whose impurities have been shaken off | fr. ज्ञान-निर्धूत-कल्मष *a. m. pl. nom.* |
| 9 अ-पुनर्-आवृत्तिं | no rebirth | fr. अ-पुर्नर्-आवृत्ति *f. sg. acc.* (**2.24:** & **.34:**) |
| 8 गच्छन्ति | gain | fr. √गम् *1.P. pr. 3rd pl.* (**5.15.6:**) |

**विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि। शुनि चैव श्वपाके च पण्डिताः समदर्शिनः॥१८॥**

(विद्याविनयसम्पन्ने, ब्राह्मणे गवि हस्तिनि। शुनि च एव श्वपाके च, पण्डिताः समदर्शिनः॥)

विद्या-विनय-सम्पन्ने ब्राह्मणे गवि हस्तिनि शुनि च श्व-पाके च एव सम-दर्शिनः पण्डिताः। (**5.18**)

[These] wise people see सम (the same one—i.e., immutable ब्रह्मन्—in all beings): in a ब्राह्मण endowed with knowledge and discretion, in a cow, an elephant, a dog, and a dog-eater [i.e., one who lives outside the cultural norms of Vedic society].

| | | | |
|---|---|---|---|
| 5 | विद्या-विनय- | with knowledge and discretion | |
| 4 | -सम्पन्ने | endowed | fr. विद्या-विनय-सम्पन्न *a. m. sg. loc.* |
| 3 | ब्राह्मणे | in a ब्राह्मण | fr. ब्राह्मण *m. sg. loc.* |
| 6 | गवि | in a cow | fr. गो *m. or f. sg. loc.* (**3.41:**) |
| 7 | हस्तिनि | an elephant | fr. हस्तिन् *m. sg. loc* (**3.15:**). |
| 8 | शुनि च | a dog | fr. श्वन् *m. sg. loc.* (**3.21:**); च *in.* |
| 9 | श्व-पाके च एव | and a dog-eater | fr. श्व-पाक *m. sg. loc.* (**3.22:**); च *in.*; एव *in.* |
| 2 | सम-दर्शिनः | see सम (the same one, i.e., immutable ब्रह्मन् in all beings) | fr. सम-दर्शिन् *a. m. pl. nom.* (**3.15:**) |
| 1 | पण्डिताः | [these] wise people | fr. पण्डित *m. pl. nom.* |

**इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः। निर्दोषं हि समं ब्रह्म तस्माद् ब्रह्मणि ते स्थिताः॥१९॥**

(इह एव तैः जितः सर्गः, येषां साम्ये स्थितं मनः। निर्दोषं हि समं ब्रह्म, तस्मात् ब्रह्मणि ते स्थिताः॥)

येषां मनः साम्ये स्थितम्, इह एव तैः सर्गः जितः। निर्-दोषं हि (=यस्मात्) ब्रह्म समं, तस्मात् ते ब्रह्मणि स्थिताः। (**5.19**)

Those whose mind is rooted in what is by nature सम (the same) win over birth here itself. Because the defectless ब्रह्मन् is सम (the same), therefore they abide in ब्रह्मन् (reality).

| | | | |
|---|---|---|---|
| 2 | येषां मनः | whose mind | fr. यद् *prn. m. pl. gen.*; मनस् *n. sg. nom.* (**3.6:**) |
| 4 | साम्ये | in what is by nature सम (the same) | fr. साम्य *n. sg. loc.* |
| 3 | स्थितम् | is rooted | fr. स्थित *pp. of* √स्था *a. n. sg. nom.* (**6.6:**) |
| 6 | इह एव | here itself | fr. इह *in.* (**6.19:**); एव *in.* (**6.19:**) |
| 1 | तैः | those | fr. तद् *prn. m. pl. inst.* |
| 5 | सर्गः जितः | win over birth | fr. सर्ग *m. sg. nom.*; जित *pp. of* √जि *pt. m. sg. nom.* |

| | | | |
|---|---|---|---|
| 8 | निर्-दोषं | the defect-less | fr. निस्-दोष *a. n. sg. nom.* (**2.24:** & **.29:**) |
| 7 | हि (=यस्मात्) | because | fr. हि *in.* |
| 9 | ब्रह्म | ब्रह्मन् | fr. ब्रह्मन् *n. sg. nom.* (**3.22:**) |
| 10 | समं | [is] सम (the same) | fr. सम *a. n. sg. nom.* |
| 11 | तस्मात् | therefore | fr. तस्मात् *in.* |
| 12 | ते | they | fr. तद् *prn. m. pl. nom.* |
| 14 | ब्रह्मणि | in ब्रह्मन् (reality) | fr. ब्रह्मन् *n. sg. loc.* (**3.22:**) |
| 13 | स्थिताः | abide | fr. स्थित *pp. of* √स्था *a. m. pl. nom.* (**6.6:**) |

**न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रियम्। स्थिरबुद्धिरसम्मूढो ब्रह्मविद् ब्रह्मणि स्थितः॥२०॥**

(न प्रहृष्येत् प्रियं प्राप्य, न उद्विजेत् प्राप्य च अप्रियम्। स्थिरबुद्धिः असम्मूढः, ब्रह्मविद् ब्रह्मणि स्थितः॥)

ब्रह्म-विद् ब्रह्मणि स्थितः स्थिर-बुद्धिः अ-सम्मूढः [च] प्रियं प्राप्य न प्रहृष्येत् अ-प्रियं च प्राप्य न उद्विजेत्। (**5.20**)

The one who knows ब्रह्मन्, who is established in ब्रह्मन्, whose knowledge is without doubts and who is no longer deluded would not be elated at obtaining what is liked, nor agitated at obtaining what is disliked.

| | | | |
|---|---|---|---|
| 1 | ब्रह्म-विद् | the one who knows ब्रह्मन् | fr. ब्रह्म-विद् *a. m. sg. nom.* |
| 3 | ब्रह्मणि | in ब्रह्मन् | fr. ब्रहन् *n. sg. loc.* |
| 2 | स्थितः | who is established | fr. स्थित *pp. of* √स्था *a. m. sg. nom* (**6.6:**) |
| 4 | स्थिर-बुद्धिः | whose knowledge is without doubts | fr. स्थिर-बुद्धि *a. m. sg. nom.* |
| 5 | अ-सम्मूढः [च] | [and] who is no longer deluded | fr. असम्मूढ *pp. of* सम् + √मुह् *a. m. sg. nom* (**2.107:**) |
| 7 | प्रियं प्राप्य | at obtaining what is liked | fr. प्रिय *a. n. sg. acc.*; प्राप्य *in. pt. of* प्र + √आप् |
| 6 | न प्रहृष्येत् | would not be elated | fr. न *in.*; प्र + √हृष् *4.Ā. pot. 3rd sg.* |
| 10 | अ-प्रियं च | what is disliked | fr. अ-प्रिय *a. n. sg. acc.*; च *in.* |
| 9 | प्राप्य | at obtaining | fr. प्राप्य *in. pt. of* प्र + √आप् |
| 8 | न उद्विजेत् | nor agitated | fr. न *in.*; उद् + √विज् *6.Ā. pot. 3rd sg.* |

**बाह्यस्पर्शेष्वसक्तात्मा विन्दत्यात्मनि यत्सुखम्। स ब्रह्मयोगयुक्तात्मा सुखमक्षयमश्नुते॥ २१॥**

(बाह्यस्पर्शेषु असक्तात्मा, विन्दति आत्मनि यद् सुखम्। सः ब्रह्मयोगयुक्तात्मा, सुखम् अक्षयम् अश्नुते॥)

बाह्य-स्पर्शेषु अ-सक्त-आत्मा आत्मनि यद् सुखं विन्दति। सः ब्रह्म-योग-युक्त-आत्मा अ-क्षयं सुखम् अश्नुते। (**5.21**)

The one whose mind is [relatively or absolutely] not attached to external sense objects finds [relative or absolute] happiness in the self. That one whose mind is endowed with clear knowledge of ब्रह्मन् attains the सुख (fulfillment) that does not wane [i.e., मोक्ष].

| | | | |
|---|---|---|---|
| 2 | बाह्य-स्पर्शेषु | towards external sense objects | fr. बाह्य-स्पर्श *m. pl. loc.* |
| 1 | अ-सक्त-आत्मा | the one whose mind is not attached | fr. असक्त-आत्मन् *a. m. sg. nom.* (**3.22:**) |
| 5 | आत्मनि यद् | which [is] in the self | fr. आत्मन् *m. sg. loc.* (**3.22:**); यद् *prn. n. sg. acc.* |
| 4 | सुखं | the [relative or absolute] happiness | fr. सुख *n. sg. acc.* |
| 3 | विन्दति | finds | fr. √विद् *6.P. pr. 3rd sg.* (**5.17.1:**) |
| 6 | सः | that one | fr. तद् *prn. m. sg. nom.* |
| 8 | ब्रह्म-योग- | with clear knowledge of ब्रह्मन् | |
| 7 | -युक्त-आत्मा | whose mind is endowed | fr. ब्रह्म-योग-युक्त-आत्मन् *a. m. sg. nom.* (**3.22:**) |
| 11 | अ-क्षयं | that does not wane | fr. अक्षय *a. n. sg. acc.* |
| 10 | सुखम् | the fulfillment | fr. सुख *n. sg. acc.* |
| 9 | अश्नुते | attains | fr. √अश् *5.Ā. pr. 3rd sg.* |

**ये हि संस्पर्शजा भोगा दुःखयोनय एव ते। आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः॥ २२॥**

(ये हि संस्पर्शजाः भोगाः, दुःखयोनयः एव ते। आद्यन्तवन्तः कौन्तेय, न तेषु रमते बुधः॥)

कौन्तेय, ये हि (=यस्मात्) संस्पर्श-जाः भोगाः, ते दुःख-योनयः एव आदि-अन्तवन्तः, [तस्मात्] बुधः तेषु न रमते। (**5.22**)

O अर्जुन, because those experiences—which are born of sense objects, are sources of pain alone [i.e., are immeasurably less than the सुख, the fulfillment that does not wane] and have a beginning and end—the wise one does not revel in those [experiences].

| | | | |
|---|---|---|---|
| 1 | कौन्तेय | (अर्जुन) O Son of कुन्ती | fr. कौन्तेय *m. sg. voc.* |
| 5 | ये | which [are] | fr. यद् *prn. m. pl. nom.* |
| 2 | हि (=यस्मात्) | since | fr. हि *in.* |
| 6 | संस्पर्श-जाः | born of sense objects | fr. संस्पर्श-ज *a. m. pl. nom.* (**6.24.3:**) |
| 4 | भोगाः | experiences | fr. भोग *m. pl. nom.* |
| 3 | ते | those | fr. तद् *prn. m. pl. nom.* |
| 7 | दुःख-योनयः एव | [are] sources of pain alone | fr. दुःख-योनि *f. pl. nom.*; एव *in.* |

| | | | |
|---|---|---|---|
| 8 | आदि-अन्तवन्तः | [and] have a beginning and end | fr. आदि-अन्तवत् *a. m. pl. nom.* (**3.13:**) |
| 9 | बुधः | the wise one | fr. बुध *m. sg. nom.* |
| 11 | तेषु | in those [experiences] | fr. तद् *prn. m. pl. loc.* |
| <u>10</u> | न रमते | does not revel | fr. न *in.*; √रम् *1.Ā. pr. 3rd sg.* |

**शक्नोतीहैव यः सोढुं प्राक्शरीरविमोक्षणात्। कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः॥२३॥**

(शक्नोति इह एव यः सोढुं, प्राक् शरीरविमोक्षणात्। कामक्रोधोद्भवं वेगं, सः युक्तः सः सुखी नरः॥)

यः प्राक् शरीर-विमोक्षणात् काम-क्रोध-उद्भवं वेगम् इह एव सोढुं शक्नोति, सः युक्तः [कर्मयोगिन् इत्यर्थः]। सः सुखी नरः। (**5.23**)

The one who is able to withstand here itself the force born of काम (requiring) and क्रोध (anger) before release from the body [i.e., before death] is a युक्त [i.e., कर्म-योगिन्]. That one is a happy person.

| | | | |
|---|---|---|---|
| 2 | यः | who | fr. यद् *prn. m. sg. nom.* |
| 8 | प्राक् | before | fr. प्राक् *in.* (**6.16:**) |
| 10 | शरीर- | from the body [i.e., before death] | |
| 9 | -विमोक्षणात् | release | fr. शरीर-विमोक्षण *n. sg. abl.* (**7.11:**) |
| 7 | काम-क्रोध- | of काम (requiring) and क्रोध (anger) | |
| 6 | -उद्भवं | born | fr. काम-क्रोध-उद्भव *a. m. sg. acc.* |
| 5 | वेगम् | the force | fr. वेग *m. sg. acc.* (**7.20:**) |
| 4 | इह एव | here itself | fr. इह *in.* (**6.19:**); एव *in.* (**6.19:**) |
| 3 | सोढुं शक्नोति | is able to withstand | fr. सोढुम् *inf. of* √सह् *in.* (**2.109:**); √शक् *5.P. pr. 3rd sg.* |
| 1 | सः | the one | fr. तद् *prn. m. sg. nom.* |
| 11 | युक्तः | [is] युक्त [i.e., a कर्मयोगिन्] | fr. युक्त *pp. of* √युज् *a. m. sg. nom.* (**2.81:**) |
| 12 | सः | that one | fr. तद् *prn. m. sg. nom.* |
| <u>13</u> | सुखी नरः | [is] a happy person | fr. सुखिन् *a. m. sg. nom.* (**3.15:**); नर *m. sg. nom.* |

**योऽन्तःसुखोऽन्तरारामस्तथान्तर्ज्योतिरेव यः। स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोऽधिगच्छति॥ २४॥**

(यः अन्तःसुखः अन्तरारामः, तथा अन्तर्ज्योतिः एव यः। सः योगी ब्रह्मनिर्वाणं, ब्रह्मभूतः अधिगच्छति॥)

यः अन्तः-सुखः अन्तर्-आरामः तथा यः अन्तर्-ज्योतिः, सः एव योगी ब्रह्म-भूतः ब्रह्म-निर्वाणम् अधिगच्छति। (**5.24**)

Whose fulfillment is within [the self], whose reveling is within [the self], and whose mind is within [i.e., centered on] [the self]—that one alone is a योगिन् who, being ब्रह्मन्, gains liberation in/as ब्रह्मन् [i.e., gains मोक्ष, complete freedom].

| | | | |
|---|---|---|---|
| 1 | यः | [the one] | fr. यद् *prn. m. sg. nom.* |
| 3 | अन्तः- | is within [oneself] | |
| 2 | -सुखः | whose fulfillment | fr. अन्तर्-सुख *a. m. sg. nom.* (**2.24:**) |
| 5 | अन्तर्- | is within [oneself] | |
| 4 | -आरामः | whose reveling | fr. अन्तर्-आराम *a. m. sg. nom.* (**2.24:** & **.34:**) |
| 6 | तथा यः | and [the one] | fr. तथा *in.* (**6.19:**); यद् *prn. m. sg. nom.* |
| 8 | अन्तर्- | is within [i.e., centered on] [oneself] | |
| 7 | -ज्योतिः | whose mind | fr. अन्तर्-ज्योति *a. m. sg. nom.* (**2.24:** & **.34:**) |
| 9 | सः एव | that one alone | fr. तद् *prn. m. sg. nom.*; एव *in.* (**6.19:**) |
| 10 | योगी | is a योगिन् | fr. योगिन् *m. sg. nom.* |
| 11 | ब्रह्म-भूतः | who being ब्रह्मन् | fr. ब्रह्म-भूत *a. m. sg. nom.* |
| 13 | ब्रह्म-निर्वाणम् | liberation in/as ब्रह्मन् | fr. ब्रह्म-निर्वाण *n. sg. acc.* |
| 12 | अधिगच्छति | gains | fr. अधि + √गम् *1.P. pr. 3rd sg.* (**5.15.6:**) |

**लभन्ते ब्रह्मनिर्वाणमृषयः क्षीणकल्मषाः। छिन्नद्वैधा यतात्मानः सर्वभूतहिते रताः॥ २५॥**

(लभन्ते ब्रह्मनिर्वाणम्, ऋषयः क्षीणकल्मषाः। छिन्नद्वैधाः यतात्मानः, सर्वभूतहिते रताः॥)

क्षीण-कल्मषाः छिन्न-द्वैधाः यत-आत्मानः सर्व-भूत-हिते रताः ऋषयः ब्रह्म-निर्वाणं लभन्ते। (**5.25**)

The ऋषि-s (wise)—whose impediments have been destroyed, whose doubts have been resolved, who have mastered themselves [i.e., their body-mind complex], who are happily engaged in the good of all beings—they gain liberation in/as ब्रह्मन्.

| | | | |
|---|---|---|---|
| 3 | क्षीण- | have been destroyed | |
| 2 | -कल्मषाः | whose impediments | fr. क्षीण-कल्मष *a. m. pl. nom.* |
| 5 | छिन्न- | have been resolved | |
| 4 | -द्वैधाः | whose doubts | fr. छिन्न-द्वैध *a. m. pl. nom.* |
| 6 | यत-आत्मानः | who have mastered themselves | fr. यत-आत्मन् *a. m. pl. nom.* (**3.22:**) |
| 9 | सर्व-भूत- | of all beings | |
| 8 | -हिते | in the good | fr. सर्व-भूत-हित *n. sg. loc.* |
| 7 | रताः | who are happily engaged | fr. रत *pp. of* √रम् *a. m. pl. nom.* (**6.6:**) |
| 1 | ऋषयः | the ऋषि-s (wise) | fr. ऋषि *m. pl. nom.* |
| 11 | ब्रह्म-निर्वाणं | liberation in/as ब्रह्मन् | fr. ब्रह्म-निर्वाण *n. sg. acc.* |
| 10 | लभन्ते | they gain | fr. √लभ् *1.Ā. pr. 3rd pl.* |

**कामक्रोधवियुक्तानां यतीनां यतचेतसाम्। अभितो ब्रह्मनिर्वाणं वर्तते विदितात्मनाम्॥ २६॥**

(कामक्रोधवियुक्तानां, यतीनां यतचेतसाम्। अभितः ब्रह्मनिर्वाणं, वर्तते विदितात्मनाम्॥)

काम-क्रोध-वियुक्तानां यत-चेतसां विदित-आत्मनां यतीनाम् अभितः ब्रह्म-निर्वाणं वर्तते। (**5.26**)

For the one who makes [proper] effort—free from requirements/anticipations and anger, whose mind is mastered and whose self is known—there is liberation in/as ब्रह्मन् both [here and hereafter; i.e., before and after the death of the body].

| | | | |
|---|---|---|---|
| 3 | काम-क्रोध- | from requirements/anticipations and anger | |
| 2 | -वियुक्तानां | free | fr. काम-क्रोध-वियुक्त *a. m. pl. gen.* |
| 4 | यत-चेतसां | whose mind is mastered | fr. यत-चेतस् *a. m. pl. gen.* |
| 6 | विदित- | is known | |
| 5 | -आत्मनां | [and] whose self | fr. विदित-आत्मन् *a. m. pl. gen.* |
| 1 | यतीनाम् | for the one who makes [proper] effort | fr. यति *m. pl. gen.* |
| 9 | अभितः | both [here and hereafter] | fr. अभितस् *in.* (**6.19:**) |
| 8 | ब्रह्म-निर्वाणं | liberation in/as ब्रह्मन् | fr. ब्रह्म-निर्वाण *n. sg. acc.* |
| 7 | वर्तते | there is | fr. √वृत् *1.Ā. pr. 3rd sg.* |

**स्पर्शान्कृत्वा बहिर्बाह्यांश्चक्षुश्चैवान्तरे भ्रुवोः। प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणौ॥२७॥**
**यतेन्द्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः। विगतेच्छाभयक्रोधो यः सदा मुक्त एव सः॥२८॥**
(स्पर्शान् कृत्वा बहिः बाह्यान्, चक्षुः च एव अन्तरे भ्रुवोः। प्राणापानौ समौ कृत्वा, नासाभ्यन्तरचारिणौ॥
यतेन्द्रियमनोबुद्धिः, मुनिः मोक्षपरायणः। विगतेच्छाभयक्रोधः, यः सदा मुक्तः एव सः॥)

बाह्यान् स्पर्शान् बहिः कृत्वा, चक्षुः च भ्रुवोः अन्तरे एव [कृत्वा], नासा-अभ्यन्तर-चारिणौ प्राण-अपानौ समौ कृत्वा, यः मुनिः यत-इन्द्रिय-मनस्-बुद्धिः मोक्ष-पर-अयणः विगत-इच्छा-भय-क्रोधः, सः सदा मुक्तः एव। (**5.27-28**)

Keeping external the external sense objects and the vision within the eyebrows [i.e., the eyes shut], keeping [naturally] equal the exhalation and inhalation moving within the nostrils, the one who is contemplative—whose senses, mind, and intellect are mastered [enough to sit in meditation], having मोक्ष (complete freedom) as the ultimate end, from whom are [mostly or completely] gone requiring/anticipating, fear and anger—that one [who sits in meditation, contemplating this teaching] is always liberated indeed.

| | | | |
|---|---|---|---|
| 2 | बाह्यान् स्पर्शान् | the external sense objects | fr. बाह्य *a. m. pl. acc.*; स्पर्श *a. m. pl. acc.* |
| 1 | बहिः कृत्वा | keeping external | fr. बहिस् *in.*; कृत्वा *in. pt. of* √कृ |
| 3 | चक्षुः च | and the vision | fr. चक्षुस् *n. sg. acc.*; च *in.* |
| 4 | भ्रुवोः अन्तरे एव | within the eyebrows [i.e., the eyes shut] | fr. भ्रू *f. du. loc.*; अन्तरे *in.* (**7.13.3:**); च *in.* |
| 8 | नासा-अभ्यन्तर- | within the nostrils | |
| 7 | -चारिणौ | moving | fr. नासा-अभ्यन्तर-चारिन् *a. m. du. acc.* (**3.15:**) |
| 6 | प्राण-अपानौ | the exhalation and inhalation | fr. प्राण-अपान *m. du. acc.* |
| 5 | समौ कृत्वा | keeping [naturally] equal | fr. सम *a. m. du. acc.*; कृत्वा *in. pt. of* √कृ |
| 9 | यः मुनिः | the one who is contemplative | fr. यद् *prn. m. sg. nom.*; मुनि *m. sg. nom.* |
| 11 | यत- | are mastered | |
| 10 | -इन्द्रिय-मनस्-बुद्धिः | whose senses, mind and intellect | fr. यत-इन्द्रिय-मनस्-बुद्धि *a. m. sg. nom.* (**2.33:**) |
| 12 | मोक्ष- | having मोक्ष (complete freedom) | |
| 13 | -पर-अयणः | as the ultimate end | fr. मोक्ष-पर-अयण *a. m. sg. nom.* (**2.92:**) |
| 14 | विगत- | from whom are [mostly or completely] gone | |
| 15 | -इच्छा-भय-क्रोधः | requiring/anticipating, fear and anger | fr. विगत-इच्छा-भय-क्रोध *a. m. sg. nom.* |
| 16 | सः | that one [is] | fr. तद् *prn. m. sg. nom.* |
| 17 | सदा | always | fr. सदा *in.* |
| 18 | मुक्तः एव | liberated indeed | fr. मुक्त *pp. of* √मुच् *a. m. sg. nom.* (**2.80:**); एव *in.* |

**भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम्। सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति॥ २९॥**

(भोक्तारं यज्ञतपसां, सर्वलोकमहेश्वरम्। सुहृदं सर्वभूतानां, ज्ञात्वा मां शान्तिम् ऋच्छति॥)

यज्ञ-तपसां भोक्तारं सर्व-लोक-महा-ईश्वरं सर्व-भूतानां सु-हृदं मां ज्ञात्वा शान्तिम् ऋच्छति। (**5.29**)

Knowing Me as [the doer and] the experiencer of यज्ञ and prayerful discipline, the limitless Lord of all worlds, and the [natural] friend of all beings, one attains the clarity [called मोक्ष].

| | | | |
|---|---|---|---|
| 3 | यज्ञ-तपसां | of यज्ञ-s and prayerful disciplines | fr. यज्ञ-तपस् *n. pl. gen.* (**3.6:**) |
| 2 | भोक्तारं | [the doer and] the experiencer | fr. भोक्तृ *m. sg. acc.* (**3.38:**) |
| 5 | सर्व-लोक- | of all worlds | |
| 4 | -महा-ईश्वरं | the limitless Lord | fr. सर्व-लोक-महा-ईश्वर *m. sg. acc.* |
| 7 | सर्व-भूतानां | of all beings | fr. सर्व-भूत *n. pl. gen.* |
| 6 | सु-हृदं | [and] the [natural] friend | fr. सुहृद् *m. sg. acc.* (**3.6:**) |
| 1 | मां ज्ञात्वा | knowing Me as | fr. अहम् *prn. sg. acc.*; ज्ञात्वा *in. pt. of* √ज्ञा |
| 9 | शान्तिम् | the clarity [called मोक्ष] | fr. शान्ति *f. sg. acc.* |
| 8 | ऋच्छति | one attains | fr. √ऋ *6.P. pr. 3rd sg.* (**5.17.3:**) |

**ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे कर्मसन्यासयोगो नाम पञ्चमोऽध्यायः॥ ५॥**

(ओं तद् सत्। इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे कर्मसन्यासयोगः नाम पञ्चमः अध्यायः॥)

ओं तद् सत्। इति श्रीमद्-भगवद्-गीतासु उपनिषत्सु ब्रह्म-विद्यायां योग-शास्त्रे श्री-कृष्ण-अर्जुन-संवादे कर्म-सन्यास-योगः नाम पञ्चमः अध्यायः। (**5**)

ओं (ब्रह्मन्, the witness of all) is that [only] reality. Thus ends the fifth chapter, called "The Topic of Renunciation of Action," of the [eighteen chapters of] *Songs of the Glorious Lord*, which is [looked upon as] उपनिषद् [and whose teaching is] in [the form of] a dialogue between श्री कृष्ण and अर्जुन, [the subject matter being] a knowledge of ब्रह्मन् and योग.

| | | | |
|---|---|---|---|
| 1 | ओं | ओम् (ब्रह्मन्, the witness of all,) | fr. ओम् *in.* |
| 2 | तद् सत् | [is] that [only] reality | fr. तद् *prn. n. sg. nom.*; सत् *n. sg. nom.* |
| 3 | इति | (quote-end quote), thus ends | fr. इति *in.* |

| | | | |
|---|---|---|---|
| 10 | श्रीमद्- | of the venerable, the glorious | |
| 11 | -भगवद्- | one having [limitless] glories, Lord | |
| 9 | -गीतासु | in [i.e., of] songs | fr. श्रीमत्-भगवत्-गीता *f. pl. loc.* (**2.43:**) |
| 12 | उपनिषत्सु | [which are/is looked upon as] उपनिषद्, sacred scripture | fr. उपनिषद् *f. pl. loc.* (**6.24:**) |
| 17 | ब्रह्म- | of ब्रह्मन् (reality/सत्) | |
| 16 | -विद्यायां | [and] a knowledge | fr. ब्रह्म-विद्या *f. sg. loc.* |
| 18 | योग-शास्त्रे | [and instruction of] योग (means, discipline, etc.) | fr. योग-शास्त्र *n. sg. loc.* |
| 14 | श्री-कृष्ण- | between Lord कृष्ण | |
| 15 | -अर्जुन- | and अर्जुन | |
| 13 | -संवादे | in [the form of] a dialogue | fr. श्री-कृष्ण-अर्जुन-संवाद *n. sg. loc.* |
| 8 | कर्म-सन्न्यास- | of the renunciation of action | |
| 7 | -योगः | the topic | fr. कर्म-सन्न्यास-योग *a. m. sg. nom.* |
| 6 | नाम | by the name, called | fr. नाम *in.* |
| 4 | पञ्चमः | the fifth | fr. पञ्चम *ordinal a. m. sg. nom.* |
| 5 | अध्यायः | chapter | fr. अध्याय *m. sg. nom.* |

# अथ षष्ठोऽध्यायः

**श्रीभगवानुवाच।**

**अनाश्रितः कर्मफलं कार्यं कर्म करोति यः। स सन्न्यासी च योगी च न निरग्निर्न चाक्रियः॥१॥**

(श्रीभगवान् उवाच। अनाश्रितः कर्मफलं, कार्यं कर्म करोति यः। सः सन्न्यासी च योगी च, न निरग्निः न च अक्रियः॥)

श्री-भगवान् उवाच। यः कर्म-फलम् अन्-आश्रितः कार्यं कर्म करोति, सः सन्न्यासी च योगी च — न निर्-अग्निः न च अ-क्रियः। **(6.1)**

The Lord said: One who does action to be done without depending on the result of action is a सन्न्यासिन् (a renunciate—at least in terms of one's राग-द्वेष-s) and a [कर्म-] योगिन्, not the one who [just] [takes a vow] not to do rituals or duties.

| | | | |
|---|---|---|---|
| 1 | श्री-भगवान् उवाच | the Lord said | fr. श्री-भगवत् *m. sg. nom.*; √वच् *P. perf. 3rd sg.* (**5.10.3:**) |
| 3 | यः | who | fr. यद् *prn. m. sg. nom.* |
| 7 | कर्म-फलम् | on the result of action | fr. कर्म-फल *n. sg. acc.* |
| 6 | अन्-आश्रितः | without depending | fr. अनाश्रित *pp. of* आ + √श्रि *pt. m. sg. nom.* |
| 5 | कार्यं कर्म | action to be done | fr. कार्य *pot. ps. pt. of* √कृ *a. n. sg. acc.* (**6.8:**); कर्मन् *n. sg. acc.* |
| 4 | करोति | does | fr. √कृ *8.P. pr. 3rd sg.* (**5.22.1:**) |
| 2 | सः | one | fr. तद् *prn. m. sg. nom.* |
| 8 | सन्न्यासी च | [is] a सन्न्यासिन् (a renunciate) | fr. सन्न्यासिन् *m. sg. nom.*; च *in.* |
| 9 | योगी च | and a [कर्म-] योगिन् | fr. योगिन् *m. sg. nom.* (**3.15:**); च *in.* |
| 10 | न निर्-अग्निः | not the one who [just] [takes a vow] not to do rituals | fr. न *in.*; निस्-अग्नि *a. m. sg. nom.* (**2.24:** & **.29:**) |
| 11 | न च अ-क्रियः | nor the one who does not do [one's] duties | fr. न *in.*; च *in.*; अक्रिय *a. m. sg. nom.* |

**यं सन्न्यासमिति प्राहुर्योगं तं विद्धि पाण्डव। न ह्यसन्न्यस्तसङ्कल्पो योगी भवति कश्चन॥२॥**

(यं सन्न्यासम् इति प्राहुः, योगं तं विद्धि पाण्डव। न हि असन्न्यस्तसङ्कल्पः, योगी भवति कश्चन॥)

यं सन्न्यासम् इति प्राहुः तं योगं विद्धि, पाण्डव। कश्-चन हि (=यस्मात्) अ-सन्न्यस्त-सङ्कल्पः योगी न भवति। (**6.2**) What they call सन्न्यास (renunciation)—know that to be [the defining core of] [कर्म-] योग, O अर्जुन. Because anyone who has not सन्न्यस्त (renounced, given up) requirements/anticipations [regarding the result of action] is not a [कर्म-] योगिन्.

| | | | |
|---|---|---|---|
| 1 | यं | what | fr. यद् *prn. m. sg. acc.* |
| 3 | सन्न्यासम् इति | सन्न्यास (renunciation) | fr. सन्न्यास *m. sg. acc.*; इति *in.* |
| 2 | प्राहुः | they call | fr. प्र + √अह् *P. perf.* $3^{rd}$ *pl.* (**5.8.5:**) |
| 5 | तं | that | fr. तद् *prn. m. sg. acc.* |
| 6 | योगं | to be [the defining core of] [कर्म-] योग | fr. योग *m. sg. acc.* |
| 4 | विद्धि | know | fr. √विद् *2.P. impv.* $2^{nd}$ *sg.* (**5.6.a:**) |
| 7 | पाण्डव | (अर्जुन) O Son of King पाण्डु | fr. पाण्डव *m. sg. voc.* |
| 8 | कश्-चन हि (=यस्मात्) | because anyone | fr. क-चन *prn. cmpd. m. sg. nom.* (**4.20:**); हि *in.* |
| 10 | अ-सन्न्यस्त- | have not been सन्न्यस्त (renounced, given up) | |
| 9 | -सङ्कल्पः | whose requirements/anticipations | fr. असन्न्यस्त-सङ्कल्प *a. m. sg. nom.* |
| 12 | योगी | a [कर्म-] योगिन् | fr. योगिन् *m. sg. nom.* (**3.15:**) |
| 11 | न भवति | is not | fr. न *in.*; √भू *1.P. pr.* $3^{rd}$ *sg.* (**5.3:** & **2.3:** & **2.71:**) |

**आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते। योगारूढस्य तस्यैव शमः कारणमुच्यते॥३॥**

(आरुरुक्षोः मुनेः योगं, कर्म कारणम् उच्यते। योगारूढस्य तस्य एव, शमः कारणम् उच्यते॥)

योगम् आरुरुक्षोः मुनेः कर्म कारणम् उच्यते। तस्य योग-आरूढस्य एव शमः कारणम् उच्यते। (**6.3**)

For the [relatively] contemplative one who desires to attain योग [i.e., the contemplation presented herein], कर्म [-योग] is said to be the means. Only for that one who has attained योग (contemplation), शम (cessation of duties; i.e., सन्न्यास lifestyle of ज्ञान-योग) is said to be the means.

| | | | |
|---|---|---|---|
| 3 | योगम् | योग [i.e., the contemplation presented herein] | fr. योग *m. sg. acc.* |
| 2 | आरुरुक्षोः | who desires to attain | fr. आरुरुक्षु *a. m. sg. gen.* (**5.41:**) |
| 1 | मुनेः | for the [relatively] contemplative one | fr. मुनि *m. sg. gen.* |
| 4 | कर्म | कर्म[-योग] | fr. कर्मन् *n. sg. nom.* |
| 6 | कारणम् | the means | fr. कारण *n. sg. nom.* (**7.8.A.1:**) |
| 5 | उच्यते | is said to be | fr. √वच् *ps. pr.* $3^{rd}$ *sg.* (**5.37.6:** & **2.3.a:**) |

| | | | |
|---|---|---|---|
| 8 | तस्य | for that one | fr. तद् *prn. m. sg. gen.* |
| 10 | योग- | योग (contemplation) | |
| 9 | -आरूढस्य | who has attained | fr. योग-आरूढ *a. m. sg. gen.* |
| 7 | एव | only | fr. एव *in.* |
| 11 | शमः | शम (cessation of duties, i.e., सन्न्यास lifestyle of ज्ञान-योग) | fr. शम *m.sg. nom.* |
| 13 | कारणम् | the means | fr. कारण *n. sg. nom.* (**7.8.A.1:**) |
| 12 | उच्यते | is said to be | fr. √वच् *ps. pr. 3rd sg.* (**5.37.6:** & **2.3.a:**) |

**यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्जते। सर्वसङ्कल्पसन्न्यासी योगारूढस्तदोच्यते॥४॥**

(यदा हि न इन्द्रियार्थेषु, न कर्मसु अनुषज्जते। सर्वसङ्कल्पसन्न्यासी, योगारूढः तदा उच्यते॥)

यदा हि न इन्द्रिय-अर्थेषु न कर्मसु अनुषज्जते, तदा सर्व-सङ्कल्प-सन्न्यासी योग-आरूढः उच्यते। (**6.4**)

When indeed one is attached neither to the sense objects nor to the actions [themselves], then [this] renunciate of all fancies is said to be योगारूढ (one who has attained contemplation and, hence, is qualified for सन्न्यास lifestyle of only contemplation).

| | | | |
|---|---|---|---|
| 1 | यदा हि | when indeed | fr. यदा *in.* (**6.19:**); हि *in.* |
| 3 | न इन्द्रिय-अर्थेषु | neither to the sense objects | fr. न *in.*; इन्द्रिय-अर्थ *m. pl. loc.* |
| 4 | न कर्मसु | nor to the actions [themselves] | fr. न *in.*; कर्मन् *n. pl. loc.* |
| 2 | अनुषज्जते | one is attached | fr. अनु + √सञ्ज् *ps. pr. 3rd sg.* (**2.101:** & *assimilation* [*back?*] *from Prākṛta*) |
| 5 | तदा | then | fr. तदा *in.* (**6.19:**) |
| 7 | सर्व-सङ्कल्प- | of all fancies | |
| 6 | -सन्न्यासी | [this] renunciate | fr. सर्व-सङ्कल्प-सन्न्यासिन् *a. m. sg. nom.* (**3.15:**) |
| 9 | योग-आरूढः | योगारूढ (one who has attained contemplation) | fr. योग-आरूढ *a. m. sg. nom.* |
| 8 | उच्यते | is said to be | fr. √वच् *ps. pr. 3rd sg.* (**5.37.6:** & **2.3.a:**) |

**उद्धरेदात्मनात्मानं नात्मानमवसादयेत्। आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः॥५॥**

(उद्धरेत् आत्मना आत्मानं, न आत्मानं अवसादयेत्। आत्मा एव हि आत्मनः बन्धुः, आत्मा एव रिपुः आत्मनः॥)

आत्मना आत्मानम् उद्धरेत्। आत्मानं न अवसादयेत्, आत्मा एव हि (=यस्मात्) आत्मनः बन्धुः, आत्मा एव आत्मनः रिपुः। (**6.5**)

[This is a solitary pursuit, because] one should lift oneself [i.e., body-sense-mind complex] up by oneself [the body-sense-mind complex]. One should not destroy oneself, because oneself alone [not anyone else] is the friend of oneself, and oneself alone [not anyone else] is the enemy of oneself.

| | | | |
|---|---|---|---|
| 3 | आत्मना | by oneself [the body-sense-mind complex] | fr. आत्मन् *m. sg. inst.* (**3.22:**) |
| 2 | आत्मानम् | oneself [i.e., body-sense-mind complex] | fr. आत्मन् *m. sg. acc.* (**3.22:**) |
| 1 | उद्धरेत् | one should lift up | fr. उद् + √धृ *1.P. pot. 3rd sg.* |
| 5 | आत्मानं | oneself | fr. आत्मन् *m. sg. acc.* (**3.22:**) |
| 4 | न अवसादयेत् | one should not destroy | fr. न *in.*; अव + √सद् *P. cs. pot. 3rd sg.* |
| 7 | आत्मा एव | oneself alone [not anyone else] | fr. आत्मन् *m. sg. nom.* (**3.22:**); एव *in.* |
| 6 | हि (=यस्मात्) | because | fr. हि *in.* |
| 8 | आत्मनः बन्धुः | [is] the friend of oneself | fr. आत्मन् *m. sg. gen.* (**3.22:**); बन्धु *m. sg. nom.* |
| 9 | आत्मा एव | [and] oneself alone [not anyone else] | fr. आत्मन् *m. sg. nom.* (**3.22:**); एव *in.* |
| 10 | आत्मनः रिपुः | [is] the enemy of oneself | fr. आत्मन् *m. sg. gen.* (**3.22:**); रिपु *m. sg. nom.* |

**बन्धुरात्मात्मनस्तस्य येनात्मैवात्मना जितः। अनात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत्॥६॥**

(बन्धुः आत्मा[1] आत्मनः[2] तस्य, येन आत्मा[3] एव आत्मना[4] जितः। अनात्मनः[5] तु शत्रुत्वे, वर्तेत आत्मा[6] एव शत्रुवत्॥)

येन आत्मना[4] एव आत्मा[3] जितः, तस्य आत्मा[1] आत्मनः[2] बन्धुः। अन्-आत्मनः[5] तु आत्मा[6] एव शत्रुवत् शत्रुत्वे वर्तेत। (**6.6**)

By whom oneself [the body-sense-mind complex] is mastered by oneself [the body-sense-mind complex]—for that one, oneself is the friend of oneself; whereas, for the one who has not [mastered] oneself, oneself alone remains as an enemy, like an [external] enemy.

| | | | |
|---|---|---|---|
| 1 | येन | by whom | fr. यद् *prn. m. sg. inst.* |
| 4 | आत्मना एव | by oneself [the body-sense- mind complex] | fr. आत्मन् *m. sg. inst.* (**3.22:**); एव *in.* |
| 2 | आत्मा | oneself [the body-sense-mind complex] | fr. आत्मन् *m. sg. nom.* (**3.22:**) |
| 3 | जितः | is mastered | fr. जित *pp. of* √जि *pt. m. sg. nom.* |
| 5 | तस्य | for that one | fr. तद् *prn. m. sg. gen.* |
| 6 | आत्मा | oneself | fr. आत्मन् *m. sg. nom.* (**3.22:**) |
| 7 | आत्मनः बन्धुः | [is] the friend of oneself | fr. आत्मन् *m. sg. gen.* (**3.22:**); बन्धु *m. sg. nom.* |

| | | | |
|---|---|---|---|
| 8 | अन्-आत्मनः तु | whereas for the one who has not [mastered] oneself | fr. अनात्मन् *m. sg. gen.* (**3.22:**); तु *in.* |
| 9 | आत्मा एव | oneself alone | fr. आत्मन् *m. sg. nom.* (**3.22:**); एव *in.* |
| 11 | शत्रुवत् | like an [external] enemy | fr. शत्रुवत् *in.* |
| 10 | शत्रुत्वे वर्तेत | would remain as an enemy | fr. शत्रुत्व *n. sg. loc.* (**7.13.1.c:**); √वृत् *1.Ā. pot. 3rd sg.* |

**जितात्मनः प्रशान्तस्य परमात्मा समाहितः। शीतोष्णसुखदुःखेषु तथा मानापमानयोः॥७॥**

(जितात्मनः प्रशान्तस्य, परम् आत्मा समाहितः। शीतोष्णसुखदुःखेषु, तथा मानापमानयोः॥)

शीत-उष्ण-सुख-दुःखेषु तथा मान-अपमानयोः जित-आत्मनः प्रशान्तस्य आत्मा परं (=अधिकं) समाहितः। (**6.7**)

In the [natural situations of] cold/hot, pleasure/pain, and in respect and disrespect—for the one whose body-sense-mind complex is mastered and who is clear, the mind is completely composed.

| | | | |
|---|---|---|---|
| 1 | शीत-उष्ण- | in the [natural situations of] cold/hot | |
| 2 | -सुख-दुःखेषु | pleasure/pain | fr. शीत-उष्ण-सुख-दुःख *n. pl. loc.* |
| 3 | तथा | and | fr. तथा *in.* (**6.19:**) |
| 4 | मान- | in respect | |
| 5 | -अपमानयोः | and disrespect | fr. मान-अपमान *m. or n. du. loc.* |
| 7 | जित- | is mastered | |
| 6 | -आत्मनः | for the one whose body-sense-mind complex | fr. जित-आत्मन् *m. sg. gen.* (**3.22:**) |
| 8 | प्रशान्तस्य | [and] who is clear | fr. प्रशान्त *pp. of* प्र + √शम् *a. m. sg. gen.* (**6.6:**) |
| 9 | आत्मा | the mind | fr. आत्मन् *m. sg. nom.* (**3.22:**) |
| 11 | परं (=अधिकं) | completely | fr. परम् *in.* (**6.20:**) |
| 10 | समाहितः | is composed | fr. समाहित *pp. of* सम् + आ + √धा *a. m. sg. nom.* (**6.6:**) |

**ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेन्द्रियः। युक्त इत्युच्यते योगी समलोष्टाश्मकाञ्चनः॥८॥**

(ज्ञानविज्ञानतृप्तात्मा, कूटस्थः विजितेन्द्रियः। युक्तः इति उच्यते योगी, समलोष्टाश्मकाञ्चनः॥)

ज्ञान-विज्ञान-तृप्त-आत्मा कूट-स्थः विजित-इन्द्रियः सम-लोष्ट-अश्म-काञ्चनः योगी युक्तः इति उच्यते। (**6.8**)

Whose mind is content with [one's] knowledge and its assimilation; who remains unchanged; whose senses are mastered; for whom a lump of clay, a stone, and gold are [transcended as the reality, सत्, that is] the same (सम)—[that] योगिन् is called युक्त (composed).

| | | | |
|---|---|---|---|
| 2 | ज्ञान- | with [one's] knowledge | |
| 3 | -विज्ञान- | and its assimilation | |
| 1 | -तृप्त-आत्मा | whose mind is content | fr. ज्ञान-विज्ञान-तृप्त-आत्मन् *m. sg. nom.* (**3.22:**) |
| 4 | कूट-स्थः | who remains unchanged | fr. कूट-स्थ *a. m. sg. nom.* (**6.24.1:**) |
| 5 | विजित-इन्द्रियः | whose senses are mastered | fr. विजित-इन्द्रिय *a. m. sg. nom.* |
| 7 | सम- | are [transcended as being] the same | |
| 6 | -लोष्ट-अश्म-काञ्चनः | for whom a lump of clay, a stone and gold | fr. सम-लोष्ट-अश्म-काञ्चन *a. m. sg. nom.* |
| 8 | योगी | [that] योगिन् | fr. योगिन् *m. sg. nom.* (**3.15:**) |
| 10 | युक्तः इति | युक्त (composed) | fr. युक्त *pp. of* √युज् *a. m. sg. nom.* (**2.81:**); इति *in.* |
| 9 | उच्यते | is called | fr. √वच् *ps. pr. 3rd sg.* (**5.37.6:** & **2.3.a:**) |

**सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु। साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते॥९॥**

(सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु। साधुषु अपि च पापेषु, समबुद्धिः विशिष्यते॥)

सु-हृन्-मित्र-अरि-उदासीन-मध्य-स्थ-द्वेष्य-बन्धुषु साधुषु पापेषु अपि च सम-बुद्धिः विशिष्यते। (**6.9**)

That one is exalted whose vision is the same toward the kind-hearted, friends, enemies, acquaintances, mediators, the hateful, kin, the virtuous, and even sinners.

| | | | |
|---|---|---|---|
| 3 | सु-हृन्-मित्र- | towards the kind-hearted and friends | |
| 4 | -अरि-उदासीन- | and enemies and acquaintances | |
| 5 | -मध्य-स्थ-द्वेष्य- | and mediators and the hateful | |
| 6 | -बन्धुषु | and kin | fr. सुहृद्-मित्र-अरि-उदासीन-मध्यस्थ-द्वेष्य-बन्धु *m. pl. loc.* (**2.44:**) |
| 7 | साधुषु | the virtuous | fr. साधु *m. pl. loc.* |
| 8 | पापेषु अपि च | and even sinners | fr. पाप *m. pl. loc.*; अपि *in.*; च *in.* |
| 2 | सम-बुद्धिः | whose vision is the same | fr. सम-बुद्धि *a. m. sg. nom.* |
| 1 | विशिष्यते | that one is exalted | fr. वि + √शिष् *ps. pr. 3rd sg.* |

**योगी युञ्जीत सततमात्मानं रहसि स्थितः। एकाकी यतचित्तात्मा निराशीरपरिग्रहः॥१०॥**

(योगी युञ्जीत सततम्, आत्मानं रहसि स्थितः। एकाकी यतचित्तात्मा, निराशीः अपरिग्रहः॥)

रहसि स्थितः एकाकी यत-चित्त-आत्मा निर्-आशीः अ-परिग्रहः योगी आत्मानं (=बुद्धिं) स-ततं युञ्जीत। (**6.10**)

Remaining in seclusion, alone, with a mind and body that is mastered, without fancies [of the future], without possessions, may the योगिन् [i.e., सन्न्यासिन्] constantly unite the mind [i.e., contemplate].

| | | | |
|---|---|---|---|
| 1 | रहसि स्थितः | remaining in seclusion | fr. रहस् *n. sg. loc.* (**3.6:**); स्थित *pp. of* √स्था *a. m. sg. nom.* (**6.6:**) |
| 2 | एकाकी | alone | fr. एकाकिन् *a. m. sg. nom.* (**3.15:**) |
| 4 | यत- | that is mastered | |
| 3 | -चित्त-आत्मा | with a mind and body | fr. यत-चित्त-आत्मन् *a. m. sg. nom.* (**3.22:**) |
| 5 | निर्-आशीः | without fancies [of the future] | fr. निस्-आशिस् *a. m. sg. nom.* (**2.24:** & **2.29:** & **3.6.1:**) |
| 6 | अ-परिग्रहः | without possessions | fr. अपरिग्रह *a. m. sg. nom.* |
| 7 | योगी | the योगिन् [i.e., सन्न्यासिन्] | fr. योगिन् *m. sg. nom.* (**3.15:**) |
| 10 | आत्मानं (=बुद्धिं) | the mind | fr. आत्मन् *m. sg. acc.* |
| 9 | स-ततं | constantly | fr. स-ततम् *in.* (**7.8.8:**) |
| 8 | युञ्जीत | may unite | fr. √युज् *7.Ā. pot. 3rd sg.* (**5.3:**) |

**शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः। नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम्॥११॥**
**तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः। उपविश्यासने युञ्ज्याद्योगमात्मविशुद्धये॥१२॥**

(शुचौ देशे प्रतिष्ठाप्य, स्थिरम् आसनम् आत्मनः। न अत्युच्छ्रितं न अतिनीचं, चैलाजिनकुशोत्तरम्॥
तत्र एकाग्रं मनः कृत्वा, यतचित्तेन्द्रियक्रियः। उपविश्य आसने युञ्ज्यात्, योगम् आत्मविशुद्धये॥)

शुचौ देशे स्थिरं न अत्युच्छ्रितं न अतिनीचं चैल-अजिन-कुश-उत्तरम् आत्मनः आसनं प्रतिष्ठाप्य, तत्र आसने उपविश्य, मनः एक-अग्रं कृत्वा, यत-चित्त-इन्द्रिय-क्रियः आत्म-विशुद्धये योगं युञ्ज्यात्। (**6.11-12**)

Arranging one's seat in a clean place, firm, not too high nor too low, on which the cover is [from top to bottom:] a [soft] cloth, a hide [for padding] and कुश grass [for insulation from cold and dampness] [or whatever else provides the same]. [Then] sitting upon that seat [or its equivalent]—making the mind single-pointed [i.e., having just one object]—may the one whose activities of the mind and senses are mastered contemplate (योगं युञ्ज्यात्) [the teaching] for clarity of mind [i.e., for removing obstacles to abiding in this knowledge].

| | | | |
|---|---|---|---|
| 4 | शुचौ देशे | in a clean place | fr. शुचि *a. m. sg. loc.* (**3.29.c:**); देश *m. sg. loc.* |
| 5 | स्थिरं | firm | fr. स्थिर *a. n. sg. acc.* |
| 6 | न अत्युच्छ्रितं | not too high | fr. न *in.*; अत्युच्छ्रित *pp. of* अति + उद् + √श्रि *a. n. sg.acc.* (**2.24:** & **.45:** & **.56:**) |
| 7 | न अतिनीचं | nor too low | fr. न *in.*; अतिनीच *a. n. sg. acc.* |
| 9 | चैल- | a [soft] cloth | |
| 10 | -अजिन- | a hide [for padding] | |
| 11 | -कुश- | and कुश grass | |
| 8 | -उत्तरम् | on which the cover is [top-down] | fr. चैल-अजिन-कुश-उत्तर *a. n. sg. acc.* |
| 2 | आत्मनः | one's | fr. आत्मन् *reflex. prn. a. m. sg. gen.* (**3.22:**) |
| 3 | आसनं | seat | fr. आसन *n. sg. acc.* |
| 1 | प्रतिष्ठाप्य | arranging | fr. प्रतिष्ठाप्य *in. pt. of* प्रति + *cs.* √स्था (**6.9:** & **5.40:** & **2.101:**) |
| 13 | तत्र आसने | upon that seat | fr. तत्र *in.* (**6.19:**); आसन *n. sg. loc.* |
| 12 | उपविश्य | sitting | fr. उपविश्य *in. pt. of* उप + √विश् (**6.9:**) |
| 15 | मनः | the mind | fr. मनस् *n. sg. acc.* (**3.6:**) |
| 14 | एक-अग्रं कृत्वा | making single-pointed | fr. एक-अग्र *a. n. sg. acc.*; कृत्वा *in. pt. of* √कृ |
| 18 | यत- | are mastered | |
| 17 | -चित्त-इन्द्रिय- | of the mind and senses | |
| 16 | -क्रियः | [may] the one whose activities | fr. यत-चित्त-इन्द्रिय-क्रिय *a. n. sg. nom.* |
| 21 | आत्म- | of mind | |
| 20 | -विशुद्धये | for clarity | fr. आत्म-विशुद्धि *f. sg. dat.* (**7.10.B:**) |
| <u>19</u> | योगं युञ्ज्यात् | may [one] contemplate [the teaching] | fr. योग *m. sg. acc.*; √युज् *7.P. pot. 3rd sg.* (**5.3:**) |

**समं कायशिरोग्रीवं धारयन्नचलं स्थिरः। सम्प्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन्॥१३॥**
**प्रशान्तात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः। मनः संयम्य मच्चित्तो युक्त आसीत मत्परः॥१४॥**

(समं कायशिरोग्रीवं, धारयन् अचलं स्थिरः। सम्प्रेक्ष्य नासिकाग्रं स्वं, दिशः च अनवलोकयन्।
प्रशान्तात्मा विगतभीः, ब्रह्मचारिव्रते स्थितः। मनः संयम्य मच्चित्तः, युक्तः आसीत मत्परः॥)

काय-शिरस्-ग्रीवं समम् अ-चलं धारयन्, स्थिरः [सन्], स्वं नासिका-अग्रं सम्प्रेक्ष्य, दिशः च अन्-अवलोकयन्, प्रशान्त-आत्मा विगत-भीः ब्रह्म-चारि-व्रते स्थितः [सन्], मनः संयम्य, मच्-चित्तः मत्-परः युक्तः [योगी इत्यर्थः] आसीत। (**6.13-14**)

Holding the body, head, and neck in line and still, being steady [i.e., having a wide base], [as though] looking at the tip of one's nose [i.e., relaxing the shut eyes, whose open gaze otherwise would be along the tip of the nose], not looking [listening, etc.] in all directions, being of clear mind, without fear, and firm in [one's] vow of seeking ब्रह्मन् (ब्रह्म-चर्य; i.e., listening to the teacher, then continually contemplating and teaching others), mastering the mind—may the योगिन् sit, thinking of Me [through My teaching], having Me as the ultimate.

| | | | |
|---|---|---|---|
| 2 | काय-शिरस्-ग्रीवं | the body and head and neck | fr. काय-शिरस्-ग्रीव *n. sg. acc.* (**2.4: & .24: & .33:**) |
| 3 | समम् | in-line | fr. सम *a. n. sg. acc.* |
| 4 | अ-चलं | [and] still | fr. अचल *a. n. sg. acc.* |
| 1 | धारयन् | holding | fr. धारयत् *pr. pt. of cs.* √धृ *pt. m. sg. nom.* |
| 5 | स्थिरः [सन्] | being steady | fr. स्थिर *a. m. sg. nom.* |
| 8 | स्वं | of one's | fr. स्व *reflex. prn. a. n. sg. acc.* (**4.14:**) |
| 9 | नासिका- | [of] nose [i.e., relaxing the shut eyes] | |
| 7 | -अग्रं | at the tip | fr. नासिका-अग्र *n. sg. acc.* |
| 6 | सम्प्रेक्ष्य | [as though] looking | fr. सम्प्रेक्ष्य *in. pt. of* सम् + प्र + √ईक्ष् (**6.9:**) |
| 11 | दिशः च | [in] all directions | fr. दिश् *f. pl. acc.*; च *in.* |
| 10 | अन्-अवलोकयन् | not looking [i.e., listening, etc.] | fr. अनवलोकयत् *pr. pt. of* अव + *cs.* √लोक् *pt. m. sg. nom.* |
| 12 | प्रशान्त-आत्मा | being of clear mind | fr. प्रशान्त-आत्मन् *a. m. sg. nom.* (**3.22:**) |
| 13 | विगत-भीः | without fear | fr. विगत-भी *a. m. sg. nom.* (**3.36:**) |
| 16 | ब्रह्म-चारि- | of seeking ब्रह्मन् (=ब्रह्मचर्य) | |
| 15 | -व्रते | in [one's] vow | fr. ब्रह्म-चारि-व्रत *n. sg. loc.* |
| 14 | स्थितः [सन्] | [and] firm | fr. स्थित *pp. of* √स्था *a. m. sg. nom.* (**6.6:**) |
| 17 | मनः संयम्य | mastering the mind | fr. मनस् *n. sg. acc.*; संयम्य *in. pt. of* सम् + √यम् (**2.54:**) |
| 20 | मच्-चित्तः | thinking of Me [through My teaching] | fr. मद्-चित्त *a. m. sg. nom.* (**2.24:** & **.45:**) |
| 21 | मत्-परः | having Me as the ultimate | fr. मद्-पर *a. m. sg. nom.* (**2.24:**) |
| 18 | युक्तः | युक्त [i.e., the योगिन्] | fr. युक्त *pp. of* √युज् *a. m. sg. nom.* (**2.81:**) |
| 19 | आसीत | may sit | fr. √आस् *2.Ā. pot. 3rd sg.* |

**युञ्जन्नेवं सदात्मानं योगी नियतमानसः। शान्तिं निर्वाणपरमां मत्संस्थामधिगच्छति॥१५॥**
(युञ्जन् एवं सदा आत्मानं, योगी नियतमानसः। शान्तिं निर्वाणपरमां, मत्संस्थाम् अधिगच्छति॥)
एवं सदा आत्मानं (=बुद्धिं) युञ्जन्, नियत-मानसः योगी निर्वाण-परमां मत्-संस्थां शान्तिम् अधिगच्छति। (**6.15**)
Always uniting the mind [i.e., contemplating] in this way, having mastered the mind, the योगिन् attains the शान्ति (clarity) whose culmination is complete freedom, centered on Me [the Lord, परमेश्वर].

| | | | |
|---|---|---|---|
| 3 | एवं | in this way | fr. एवम् *in.* (**6.19:**) |
| 1 | सदा | always | fr. सदा *in.* (**6.19:**) |
| 2 | आत्मानं (=बुद्धिं) युञ्जन् | uniting the mind [i.e., contemplating] | fr. आत्मन् *m. sg. acc.*; युञ्जत् *pr. pt. of* √युज् *pt. m. sg. nom.* |
| 4 | नियत-मानसः | having mastered the mind | fr. नियत-मानस *a. m. sg. nom.* |
| 5 | योगी | the योगिन् | fr. योगिन् *m. sg. nom.* (**3.15:**) |
| 9 | निर्वाण- | is complete freedom | |
| 8 | -परमां | whose culmination | fr. निर्वाण-परमा *a. f. sg. acc.* |
| 10 | मत्-संस्थां | centered on Me | fr. मद्-संस्था *a. f. sg. acc.* (**2.24:**) |
| 7 | शान्तिम् | the शान्ति (clarity) | fr. शान्ति *f. sg. acc.* |
| 6 | अधिगच्छति | attains | fr. अधि + √गम् *1.P. pr. 3rd sg.* (**5.15.6:**) |

**नात्यश्नतस्तु योगोऽस्ति न चैकान्तमनश्नतः। न चातिस्वप्नशीलस्य जाग्रतो नैव चार्जुन॥१६॥**
(न अत्यश्नतः तु योगः अस्ति, न च एकान्तम् अनश्नतः। न च अतिस्वप्नशीलस्य, जाग्रतः न एव च अर्जुन॥)
अत्यश्नतः तु योगः न अस्ति, न च एक-अन्तम् अन्-अश्नतः, न च अतिस्वप्न-शीलस्य, न एव च जाग्रतः, अर्जुन। (**6.16**)
—Whereas [ज्ञान-] योग (contemplation of the teaching) is not there for one who eats too much, nor for one who does not eat adequately, nor for one who habitually sleeps too much, nor for one who is [habitually always] awake, O अर्जुन.

| | | | |
|---|---|---|---|
| 4 | अत्यश्नतः | for one who eats too much | fr. अत्यश्नत् *pr. pt. of* अति + √अश् *a. m. sg. gen.* |
| 1 | तु | whereas | fr. तु *in.* |
| 2 | योगः | [ज्ञान-] योग (contemplation of the teaching) | fr. योग *n. sg. nom.* |
| 3 | न अस्ति | is not there | fr. न *in.*; √अस् *2.P. pr. 3rd sg.* |
| 5 | न च | nor | fr. न *in.*; च *in.* |
| 7 | एक-अन्तम् | adequately | fr. एक-अन्तम् *in.* (**7.8.8:**) |
| 6 | अन्-अश्नतः | for one who does not eat | fr. अनश्नत् *pr. pt. of* √अश् *a. m. sg. gen.* (**3.12:**) |

| | | | |
|---|---|---|---|
| 8 | न च | nor | fr. न *in.*; च *in.* |
| 10 | अतिस्वप्न- | sleeps too much | |
| 9 | -शीलस्य | for one who habitually | fr. अतिस्वप्न-शील *a. m. sg. gen.* |
| 11 | न एव च | nor | fr. न *in.*; एव *in.*; च *in.* |
| 12 | जाग्रतः | for one who is [habitually always] awake | fr. जाग्रत् *pr. pt. of* √जागृ *a. m. sg. gen.* (**3.12:**) |
| 13 | अर्जुन | O अर्जुन | fr. अर्जुन *m. sg. voc.* |

**युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु। युक्तस्वप्नावबोधस्य योगो भवति दुःखहा॥१७॥**

(युक्ताहारविहारस्य, युक्तचेष्टस्य कर्मसु। युक्तस्वप्नावबोधस्य, योगः भवति दुःखहा॥)

युक्त-आहार-विहारस्य कर्मसु युक्त-चेष्टस्य युक्त-स्वप्न-अवबोधस्य योगः दुःख-हा भवति। (**6.17**)

For one whose food and activity are moderated—whose bodily movement is regulated during activities [i.e., without meaningless, wasted bodily movement], whose sleeping and waking [hours] are moderated—[ज्ञान-] योग is the destroyer of [all] sorrows.

| | | | |
|---|---|---|---|
| 2 | युक्त- | are moderated | |
| 1 | -आहार-विहारस्य | for one whose food and activity | fr. युक्त-आहार-विहार *a. m. sg. gen.* |
| 4 | कर्मसु | during activities | fr. कर्मन् *n. pl. loc.* (**3.22:**) |
| 3 | युक्त-चेष्टस्य | whose bodily movement is regulated | fr. युक्त-चेष्ट *a. m. sg. gen.* |
| 6 | युक्त- | are moderated | |
| 5 | -स्वप्न-अवबोधस्य | whose sleeping and waking [hours] | fr. युक्त-स्वप्न-अवबोध *a. m. sg. gen.* |
| 7 | योगः | [ज्ञान-] योग | fr. योग *m. sg. nom.* |
| 9 | दुःख-हा | the destroyer of [all] sorrows | fr. दुःख-हन् *a. m. sg. nom.* (**3.21:**) |
| 8 | भवति | is | fr. √भू *1.P. pr. 3rd sg.* (**5.3:** & **2.3:** & **2.71:**) |

**यदा विनियतं चित्तमात्मन्येवावतिष्ठते। निःस्पृहः सर्वकामेभ्यो युक्त इत्युच्यते तदा॥१८॥**

(यदा विनियतं चित्तम्, आत्मनि एव अवतिष्ठते। निःस्पृहः सर्वकामेभ्यः, युक्तः इति उच्यते तदा॥)

यदा विनियतं चित्तम् आत्मनि एव अवतिष्ठते, तदा सर्व-कामेभ्यः निः-स्पृहः युक्तः इति उच्यते। (**6.18**)

When the mind that is mastered abides in आत्मन् alone, then—being free from attraction toward all [objects of] desire—one is said to be युक्त (composed).

| | | | |
|---|---|---|---|
| 1 | यदा | when | fr. यदा *in.* (**6.19:**) |
| 3 | विनियतं | that is mastered | fr. विनियत *pp. of* वि + नि + √यम् *a. n. sg. nom.* (**6.6:**) |
| 2 | चित्तम् | the mind | fr. चित्त *pp. of* √चित् *n. sg. nom.* |
| 5 | आत्मनि एव | in आत्मन् alone | fr. आत्मन् *m. sg. loc.* (**3.22:**); एव *in.* (**6.19:**) |
| 4 | अवतिष्ठते | abides | fr. अव + √स्था *1.Ā. pr. 3rd pl.* (**5.15.4:**) |
| 6 | तदा | then | fr. तदा *in.* (**6.19:**) |
| 8 | सर्व-कामेभ्यः | towards all [objects of] desire | fr. सर्व-काम *m. pl. abl.* (**3.22:**) |
| 7 | निः-स्पृहः | being free from attraction | fr. निस्-स्पृह *a. m. sg. nom.* (**2.24:** & **6.36:**) |
| 10 | युक्तः इति | युक्त (composed) | fr. युक्त *pp. of* √युज् *a. m. sg. nom.* (**2.81:**); इति *in.* |
| 9 | उच्यते | one is said to be | fr. √वच् *ps. pr. 3rd sg.* (**5.37.6:** & **2.3.a:**) |

**यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता। योगिनो यतचित्तस्य युञ्जतो योगमात्मनः॥१९॥**

(यथा दीपः निवातस्थः, न इङ्गते सा उपमा स्मृता। योगिनः यतचित्तस्य, युञ्जतः योगम् आत्मनः॥)

यथा निवात-स्थः दीपः न इङ्गते — आत्मनः योगं युञ्जतः योगिनः यत-चित्तस्य सा उपमा स्मृता। (**6.19**)

"Like the [flame of an] oil lamp in a windless place does not flicker." This is the example cited for the mastered mind of the योगिन् who is uniting in योग [i.e., who is in contemplation] of आत्मन्.

| | | | |
|---|---|---|---|
| 1 | यथा | like | fr. यदा *in.* (**6.19:**) |
| 3 | निवात-स्थः | in a wind-less place | fr. निवान-स्थ *a. m. sg. nom.* (**6.24.1:**) |
| 2 | दीपः | the [flame of an] oil lamp | fr. दीप *m. sg. nom.* |
| 4 | न इङ्गते | does not flicker | fr. न *in.*; √इङ्ग् *1.Ā. pr. 3rd sg.* |

| | | | |
|---|---|---|---|
| 10 | आत्मनः | of आत्मन् | fr. आत्मन् *m. sg. gen.* (**3.22:**) |
| 9 | योगं युञ्जतः | who is uniting in योग (contemplating) | fr. योग *m. sg. acc.*; युञ्जत् *pr. pt. of* √युज् *a. m. sg. gen.* |
| 8 | योगिनः | of the योगिन् | fr. योगिन् *m. sg. gen.* |
| 7 | यत-चित्तस्य | for the mind that is mastered | fr. यत-चित्त *a. m. sg. gen.* |
| 5 | सा उपमा | that is the example | fr. तद् *prn. f. sg. nom.*; उपमा *f. sg. nom.* |
| 6 | स्मृता | cited | fr. स्मृत *pp. of* √स्मृ *pt f. sg. nom.* |

**यत्रोपरमते चित्तं निरुद्धं योगसेवया। यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति॥ २०॥**

(यत्र उपरमते चित्तं, निरुद्धं योगसेवया। यत्र च एव आत्मना आत्मानं, पश्यन् आत्मनि तुष्यति॥)

यत्र (=यस्मिन् काले) योग-सेवया निरुद्धं चित्तम् उपरमते, यत्र च आत्मना (=मनसा) आत्मानं पश्यन्, आत्मनि एव तुष्यति। (**6.20**)

When the mind—mastered by following योग (contemplation)—abides [in आत्मन्], and when one sees the आत्मन् by the आत्मन् (mind) [i.e., by a non-obstructing mind], [then] one is satisfied in oneself alone.

| | | | |
|---|---|---|---|
| 1 | यत्र (=यस्मिन् काले) | when | fr. यत्र *in.* (**6.19:**) |
| 5 | योग- | योग (contemplation) | |
| 4 | -सेवया | by following | fr. योग-सेवा *f. sg. inst.* (**3.28.c:**) |
| 3 | निरुद्धं | mastered | fr. निरुद्ध *pp. of* नि + √रुध् *a. n. sg. nom.* (**2.88:**) |
| 2 | चित्तम् | the mind | fr. चित्त *pp. of* √चित् *n. sg. nom.* |
| 6 | उपरमते | abides [in आत्मन्] | fr. उप + √रम् *1.Ā. pr. 3rd sg.* |
| 7 | यत्र च | and when | fr. यत्र *in.* (**6.19:**); च *in.* |
| 10 | आत्मना (=मनसा) | by the आत्मन् (mind) | fr. आत्मन् *m. sg. inst.* (**3.22:**) |
| 9 | आत्मानं | the आत्मन् | fr. आत्मन् *m. sg. acc.* (**3.22:**) |
| 8 | पश्यन् | one sees | fr. पश्यत् *pr. pt. of* √दृश् *m. sg. nom.* (**5.15.6:**) |
| 12 | आत्मनि एव | in oneself alone | fr. आत्मन् *m. sg. loc.* (**3.22:**); एव *in.* |
| 11 | तुष्यति | [then] one is satisfied | fr. √तुष् *4.P. pr. 3rd sg.* |

**सुखमात्यन्तिकं यत्तद्बुद्धिग्राह्यमतीन्द्रियम्। वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः॥२१॥**
**यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः। यस्मिन्स्थितो न दुःखेन गुरुणापि विचाल्यते॥२२॥**
**तं विद्याद्दुःखसंयोगवियोगं योगसञ्ज्ञितम्। स निश्चयेन योक्तव्यो योगोऽनिर्विण्णचेतसा॥२३॥**

(सुखम् आत्यन्तिकं यद् तद्, बुद्धिग्राह्यम् अतीन्द्रियम्। वेत्ति यत्र न च एव अयं, स्थितः चलति तत्त्वतः॥
यं लब्ध्वा च अपरं लाभं, मन्यते न अधिकं ततः। यस्मिन् स्थितः न दुःखेन, गुरुणा अपि विचाल्यते॥
तं विद्यात् दुःखसंयोगवियोगं योगसञ्ज्ञितम्। सः निश्चयेन योक्तव्यः, योगः अनिर्विण्णचेतसा॥)

यत्र (=यस्मिन् काले) अयं यद् तद् आत्यन्तिकं बुद्धि-ग्राह्यम् अतीन्द्रियं सुखं वेत्ति, स्थितः च तत्त्वतः न एव चलति, यम् [आत्मलाभम्] च लब्ध्वा ततः अधिकम् अपरं लाभं न मन्यते, यस्मिन् [आत्मतत्त्वे] स्थितः गुरुणा दुःखेन अपि न विचाल्यते, तं दुःख-संयोग-वियोगं योग-सञ्ज्ञितं विद्यात्। सः योगः अ-निर्विण्ण-चेतसा निश्चयेन योक्तव्यः। (**6.21-23**)

When one knows that same limitless सुख (fulfillment that is the nature of आत्मन्)—which is to be grasped by the intellect, [yet] is not within the scope of the senses—and, abiding [there in the सुख], never moving away from [this] truth [i.e., reality], having gained which one knows there is no other gain better than that, and abiding in which [reality] one would not be affected—even by great pain—one knows that disassociation from association with sorrow to be what is called योग (essentially an undoing of one's natural, but unanalyzed, attachment to/identity with the body-mind complex through inquiry into reality and continued contemplation). That [ज्ञान-] योग should be pursued with firm resolve by a mind that is not indifferent [since the natural identifications are very strong].

| | | | |
|---|---|---|---|
| 1 | यत्र | when | fr. यत्र *in.* (**6.19:**) |
| 2 | अयं | one | fr. इदम् *prn. m. sg. nom.* (**4.8:**) |
| 4 | यद् तद् | that same | fr. यद् *prn. n. sg. acc.*; तद् *prn. n. sg. acc.* (**7.6.B.2.f:**) |
| 5 | आत्यन्तिकं | limitless | fr. आत्यन्तिक *a. n. sg. acc.* |
| 8 | बुद्धि- | by the intellect | |
| 7 | -ग्राह्यम् | which is to be grasped | fr. बुद्धि-ग्राह्य *a. n. sg. acc.* |
| 9 | अतीन्द्रियं | [yet] [is] not within the scope of the senses | fr. अतीन्द्रिय *a. n. sg. acc.* |
| 6 | सुखं | सुख (fulfillment) | fr. सुख *n. sg. acc.* |
| 3 | वेत्ति | knows | fr. √विद् *2.P. pr. 3rd sg.* (**5.3:** & **2.42:**) |
| 10 | स्थितः च | and abiding [there in the सुख that is the nature of आत्मन्] | fr. स्थित *pp. of* √स्था *pt. m. sg. nom.* (**6.6:**); च *in.* |
| 12 | तत्त्वतः | from [this] truth [i.e., reality] | fr. तत्त्व *n. sg. abl.* |
| 11 | न एव चलति | one never moves away | fr. न *in.*; एव *in.*; √चल् *1.P. pr. 3rd sg.* |

| | | | |
|---|---|---|---|
| 14 | यम् च | [and] which [आत्मलाभम्] | fr. यद् *prn. m. sg. acc.*; च *in.* |
| 13 | लब्ध्वा | having gained | fr. लब्ध्वा *in. pt. of* √लभ् (**6.9:** & **2.76:** & **2.78:**) |
| 17 | ततः अधिकम् | better than that | fr. ततस् *in.* (**6.19:**) (**7.11.2.a:**); अधिक *a. m. sg. acc.* |
| 16 | अपरं लाभं | other gain | fr. अपर *prn. a. m. sg. acc.* (**4.16.3:**); लाभ *m. sg. acc.* |
| 15 | न मन्यते | one knows there is no | fr. न *in.*; √मन् *4.Ā. pr. 3rd sg.* |
| 19 | यस्मिन् | in which [आत्मतत्त्वे] | fr. यद् *prn. n. sg. loc.* |
| 18 | स्थितः | [and] abiding | fr. स्थित *pp. of* √स्था *pt. m. sg. nom.* (**6.6:**) |
| 22 | गुरुणा दुःखेन | by great pain | fr. गुरु *a. n. sg. inst.*; दुःख *n. sg. inst.* |
| 21 | अपि | even | fr. अपि *in.* |
| 20 | न विचाल्यते | one would not be affected | fr. न *in.*; वि + √चल् *cs. ps. pr. 3rd sg.* |
| 24 | तं | that | fr. तद् *prn. m. sg. acc.* |
| 26 | दुःख-संयोग- | from association with sorrow | |
| 25 | -वियोगं | disassociation | fr. दुःख-संयोग-वियोग *m. sg. acc.* |
| 28 | योग- | योग | |
| 27 | -सञ्ज्ञितं | [to be] what is called | fr. योग-सञ्ज्ञित *a. m. sg. acc.* |
| 23 | विद्यात् | one knows | fr. √विद् *2.P. pot. 3rd sg.* |
| 29 | सः योगः | that [ज्ञान-] योग | fr. तद् *prn. m. sg. nom.*; योग *m. sg. nom.* |
| 33 | अ-निर्विण्ण- | that is not indifferent | |
| 32 | -चेतसा | by a mind | fr. अनिर्विण्ण-चेतस् *n. sg. inst.* |
| 31 | निश्चयेन | with firm resolve | fr. निश्चय *m. sg. inst.* |
| 30 | योक्तव्यः | should be pursued | fr. योक्तव्य *pot. ps. pt. of* √युज् *pt. m. sg. nom.* (**6.8:** & **2.81:**) |

**सङ्कल्पप्रभवान्कामांस्त्यक्त्वा सर्वानशेषतः। मनसैवेन्द्रियग्रामं विनियम्य समन्ततः॥२४॥**
**शनैः शनैरुपरमेद्बुद्ध्या धृतिगृहीतया। आत्मसंस्थं मनः कृत्वा न किञ्चिदपि चिन्तयेत्॥२५॥**
(सङ्कल्पप्रभवान् कामान्, त्यक्त्वा सर्वान् अशेषतः। मनसा एव इन्द्रियग्रामं, विनियम्य समन्ततः॥
शनैः शनैः उपरमेत्, बुद्ध्या धृतिगृहीतया। आत्मसंस्थं मनः कृत्वा, न किञ्चिद् अपि चिन्तयेत्॥)

सर्वान् सङ्कल्प-प्रभवान् कामान् अ-शेषतः त्यक्त्वा, मनसा एव इन्द्रिय-ग्रामं समन्ततः विनियम्य, धृति-गृहीतया बुद्ध्या शनैः शनैः उपरमेत्। आत्म-संस्थं मनः कृत्वा, न किञ्-चिद् अपि चिन्तयेत्। (**6.24-25**)

Totally giving up all anticipations born of सङ्कल्प (scheming) [about one's goals in meditation], exercising complete authority by the mind alone [in meditation] over all the organs [of sense and action], one should slowly [and gently]—with the intellect endowed with resolve [prior to sitting in meditation]—bring [the mind] to abide [in आत्मन्]. Making the mind abide in आत्मन् (परमात्मन्, the Lord as one's self), may one contemplate nothing else.

| | | | |
|---|---|---|---|
| 3 | सर्वान् | all | fr. सर्व *prn. a. m. pl. acc.* (**4.16.2:**) |
| 6 | सङ्कल्प- | of सङ्कल्प (scheming) [about one's goals in meditation] | |
| 5 | -प्रभवान् | born | fr. सङ्कल्प-प्रभव *a. m. pl. acc.* |
| 4 | कामान् (**2.50:**) | anticipations | fr. काम *m. pl. acc.* |
| 1 | अ-शेषतः | totally | fr. अशेषतस् *in.* (**6.19:**) |
| 2 | त्यक्त्वा | giving up | fr. त्यक्त्वा *in. pt. of* √त्यज् (**2.81:**) |
| 8 | मनसा एव | by the mind alone [in meditation] | fr. मनस् *n. sg. inst.* (**3.6:**); एव *in.* |
| 10 | इन्द्रिय- | the organs [of sense and action] | |
| 9 | -ग्रामं | over all | fr. इन्द्रिय-ग्राम *m. sg. acc.* |
| 7 | समन्ततः विनियम्य | exercising complete authority | fr. समन्ततस् *in.*; विनियम्य *in. pt. of* वि + नि + √यम् |
| 14 | धृति- | with resolve [prior to sitting in meditation] | |
| 13 | -गृहीतया | endowed | fr. धृति-गृहीता *a. f. sg. inst.* |
| 12 | बुद्ध्या | with the intellect | fr. बुद्धि *f. sg. inst.* |
| 11 | शनैः शनैः | slowly [and gently] | fr. शनैस् *in.* (**7.6.B.2.e:**) |
| 15 | उपरमेत् | one should bring [the mind] to abide [in आत्मन्] | fr. उप + √रम् *1.P. pot. 3rd sg.* |
| 18 | आत्म- | in आत्मन् (परमात्मन्, the Lord as one's self) | |
| 17 | -संस्थं | abide | fr. आत्म-संस्थ *a. n. sg. acc.* |
| 16 | मनः कृत्वा | making the mind | fr. मनस् *n. sg. acc.* (**3.6:**); कृत्वा *in. pt. of* √कृ |
| 20 | न किञ्-चिद् अपि | nothing else | fr. न *in.*; क-चिद् *prn. cmpd. n. sg. acc.*; अपि *in.* |
| 19 | चिन्तयेत् | may one contemplate | fr. √चिन्त् *10.P. pot. 3rd sg.* |

**यतो यतो निश्चरति मनश्चञ्चलमस्थिरम्। ततस्ततो नियम्यैतदात्मन्येव वशं नयेत्॥२६॥**

(यतः यतः निश्चरति, मनः चञ्चलम् अस्थिरम्। ततः ततः नियम्य एतद्, आत्मनि एव वशं नयेत्॥)

यतः यतः चञ्चलम् अ-स्थिरं मनः निश्चरति, ततः ततः एतद् [मनः] आत्मनि एव नियम्य, वशं नयेत्। (**6.26**)

Bringing it [i.e., the mind] back from whichever [distracting object] the [naturally] mobile, unsteady mind goes to—[by understanding that object also as] within [पर/limitless] आत्मन् alone—may one bring [the mind] under control.

| | | | |
|---|---|---|---|
| 4 | यतः यतः | from whichever [distracting object] | fr. यतस् *in.* (**6.19:**) (**7.6.B.2.e:**) |
| 5 | चञ्चलम् | the [naturally] mobile | fr. चञ्चल *a. n. sg. nom.* |
| 6 | अ-स्थिरं | unsteady | fr. अस्थिर *a. n. sg. nom.* |
| 7 | मनः | mind | fr. मनस् *n. sg. nom.* (**3.6:**) |
| 8 | निश्चरति | goes | fr. निस् + √चर् *1.P. pr. 3rd sg.* (**2.24:** & **.27:**) |
| 3 | ततः ततः | [from that] | fr. ततस् *in.* (**6.19:**) (**7.6.B.2.e:**) |
| 2 | एतद् [मनः] | it [the mind] | fr. एतद् *prn. n. sg. acc.* |
| 9 | आत्मनि एव | [by understanding that object also as] within [पर/limitless] आत्मन् alone | fr. आत्मन् *m. sg. loc.* (**3.22:**); एव *in.* |
| 1 | नियम्य | bringing back | fr. नियम्य *in. pt. of* नि + √यम् (**5.3:**) |
| 11 | वशं | under control | fr. वशम् *in.* (**7.8.8:**) |
| 10 | नयेत् | may one bring [the mind] | fr. √नी *1.P. pot. 3rd sg.* (**5.3:**) |

**प्रशान्तमनसं ह्येनं योगिनं सुखमुत्तमम्। उपैति शान्तरजसं ब्रह्मभूतमकल्मषम्॥ २७॥**
(प्रशान्तमनसं हि एनं, योगिनं सुखम् उत्तमम्। उपैति शान्तरजसं, ब्रह्मभूतम् अकल्मषम्॥)
उत्तमं सुखम् उपैति [इव] एनं हि प्रशान्त-मनसं शान्त-रजसम् अ-कल्मषं ब्रह्म-भूतं योगिनम्। (**6.27**)
Limitless fulfillment [as though] reaches [since it is already the nature of] this [ज्ञान-] योगिन् who has a mind that is clear, [i.e.,] whose cloud [of delusion] has subsided, who [recognizes one's self as] free from impurities, and who has attained ब्रह्मन्.

| | | | |
|---|---|---|---|
| 1 | उत्तमं सुखम् | limitless fulfillment | fr. उत्तम *spv. a. n. sg. nom.* (**6.25:**); सुख *n. sg. nom.* |
| 2 | उपैति [इव] | [as though] reaches | fr. उप + √इ *2.P. pr. 3rd sg.* (**5.3:** & **2.9:**) |
| 3 | एनं हि | this | fr. एनद् *prn. m. sg. acc.* (**4.10:**); हि *in.* |
| 5 | प्रशान्त-मनसं | who has a mind that is clear | fr. प्रशान्त-मनस् *a. m. sg. acc.* (**3.6:**) |
| 7 | शान्त- | has subsided | |
| 6 | -रजसम् | [i.e.,] whose cloud [of delusion] | fr. शान्त-रजस् *a. m. sg. acc.* (**3.6:**) |
| 8 | अ-कल्मषं | who [recognizes one's self as] free from impurities | fr. अकल्मष *a. m. sg. acc.* |
| 9 | ब्रह्म-भूतम् | [and] who has attained ब्रह्मन् | fr. ब्रह्म-भूत *a. m. sg. acc.* |
| 4 | योगिनम् | [ज्ञान-] योगिन् | fr. योगिन् *m. sg. acc.* (**3.15:**) |

**युञ्जन्नेवं सदात्मानं योगी विगतकल्मषः। सुखेन ब्रह्मसंस्पर्शमत्यन्तं सुखमश्नुते॥ २८॥**
(युञ्जन् एवं सदा आत्मानं, योगी विगतकल्मषः। सुखेन ब्रह्मसंस्पर्शम्, अत्यन्तं सुखम् अश्नुते॥)
एवं सदा आत्मानं (=बुद्धिं) युञ्जन्, विगत-कल्मषः योगी सुखेन ब्रह्म-संस्पर्शम् अत्यन्तं सुखम् अश्नुते। (**6.28**)
Always uniting the mind [i.e., contemplating] in this way, free from impurities, the [ज्ञान-] योगिन् easily gains limitless fulfillment that is [revealed by] the contact with [the knowledge of] ब्रह्मन् [i.e., revealed as one's nature, upon removal of ignorance].

| | | | |
|---|---|---|---|
| 4 | एवं | in this way | fr. एवम् *in.* (**6.19:**) |
| 1 | सदा | always | fr. सदा *in.* (**6.19:**) |
| 3 | आत्मानं (=बुद्धिं) | the mind [i.e., contemplating] | fr. आत्मन् *m. sg. acc.* (**3.22:**) |
| 2 | युञ्जन् (**2.62:**) | uniting | fr. युञ्जत् *pr. pt. of* √युज् *pt. m. sg. nom.* (**3.12:**) |

| | | | |
|---|---|---|---|
| 5 | विगत-कल्मषः | free from impurities | fr. विगत-कल्मष *a. m. sg. nom.* |
| 6 | योगी | the [ज्ञान-] योगिन् | fr. योगिन् *m. sg. nom.* (**3.15:**) |
| 7 | सुखेन | easily | fr. सुखेन *in.* (**7.9.14:**) |
| 11 | ब्रह्म- | with [the knowledge of] ब्रह्मन् [i.e., revealed as one's nature, upon removal of ignorance] | |
| 10 | -संस्पर्शम् | that is [revealed by] the contact | fr. ब्रह्म-संस्पर्श *a. n. sg. acc.* |
| 9 | अत्यन्तं सुखम् | limitless fulfillment | fr. अत्यन्त *a. n. sg. acc.*; सुख *n. sg. acc.* |
| 8 | अश्नुते | gains | fr. √अश् *5.Ā. pr. 3rd sg.* (**5.3:**) |

**सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि। ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः॥ २९॥**

(सर्वभूतस्थम् आत्मानं, सर्वभूतानि च आत्मनि। ईक्षते योगयुक्तात्मा, सर्वत्र समदर्शनः॥)

योग-युक्त-आत्मा सर्वत्र सम-दर्शनः आत्मानं सर्व-भूत-स्थं [ईक्षते], सर्व-भूतानि च आत्मनि ईक्षते। (**6.29**)

—Whose mind is absorbed in [this] contemplation, who sees सम (the same; i.e., ब्रह्मन्) everywhere—sees [one's] self abiding in all beings and all beings in [one's] self [i.e., assimilates the knowledge of oneself as being परमात्मन्].

| | | | |
|---|---|---|---|
| 3 | योग- | in [this] contemplation | |
| 2 | -युक्त- | is absorbed | |
| 1 | -आत्मा | whose mind | fr. योग-युक्त-आत्मन् *a. m. sg. nom.* (**3.22:**) |
| 5 | सर्वत्र | everywhere | fr. सर्वत्र *in.* (**6.19:**) |
| 4 | सम-दर्शनः | who sees सम (the same, i.e., ब्रह्मन्) | fr. सम-दर्शन *a. m. sg. nom.* |
| 7 | आत्मानं | [one's] self | fr. आत्मन् *m. sg. acc.* (**3.22:**) |
| 8 | सर्व-भूत-स्थं | abiding in all beings | fr. सर्व-भूत-स्थ *a. m. sg. acc.* (**6.24.1:**) |
| 9 | सर्व-भूतानि च | and all beings | fr. सर्व-भूत *n. pl. acc.*; च *in.* |
| 10 | आत्मनि | in [one's] self | fr. आत्मन् *m. sg. loc.* (**3.22:**) |
| 6 | ईक्षते | sees | fr. √ईक्ष् *1.Ā. pr. 3rd sg.* |

**यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति। तस्याहं न प्रणश्यामि स च मे न प्रणश्यति॥३०॥**

(यः मां पश्यति सर्वत्र, सर्वं च मयि पश्यति। तस्य अहं न प्रणश्यामि, सः च मे न प्रणश्यति॥)

यः मां सर्वत्र पश्यति, मयि च सर्वं पश्यति, तस्य अहं न प्रणश्यामि, सः च मे न प्रणश्यति। (**6.30**)

The one who sees Me everywhere and sees everything in Me—I am not lost [i.e., remote] to that one, nor is that one lost [i.e., remote] to Me.

| | | | |
|---|---|---|---|
| 1 | यः | the one who | fr. यद् *prn. m. sg. nom.* |
| 3 | मां | Me | fr. अहम् *prn. sg. acc.* |
| 4 | सर्वत्र | everywhere | fr. सर्वत्र *in.* (**6.19:**) |
| 2 | पश्यति | sees | fr. √दृश् *1.P. pr. 3rd sg.* (**5.15.6:**) |
| 5 | मयि च | and in Me | fr. अहम् *prn. sg. loc.*; च *in.* |
| 7 | सर्वं | everything | fr. सर्व *prn. a. n. sg. acc.* (**4.16.2:**) |
| 6 | पश्यति | sees | fr. √दृश् *1.P. pr. 3rd sg.* (**5.15.6:**) |
| 10 | तस्य | to that one | fr. तद् *prn. m. sg. gen.* (**7.12.1.b:**) |
| 8 | अहं | I | fr. अहम् *prn. sg. nom.* (**4.2:**) |
| 9 | न प्रणश्यामि | am not lost [i.e., remote] | fr. न *in.;* प्र + √नश् *4.P. pr. 1st sg.* (**5.5.a: & 2.92:**) |
| 12 | सः च | [and] that one | fr. तद् *prn. m. sg. nom.*; च *in.* |
| 13 | मे | to Me | fr. अहम् *prn. sg. gen.* (**7.12.1.b:**) |
| 11 | न प्रणश्यति | nor is lost [i.e., remote] | fr. न *in.;* प्र + √नश् *4.P. pr. 3rd sg.* (**2.92:**) |

**सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः। सर्वथा वर्तमानोऽपि स योगी मयि वर्तते॥३१॥**

(सर्वभूतस्थितं यः मां, भजति एकत्वम् आस्थितः। सर्वथा वर्तमानः अपि, सः योगी मयि वर्तते॥)

यः एकत्वम् आस्थितः [सन्] सर्व-भूत-स्थितं मां भजति, सः योगी सर्वथा वर्तमानः अपि मयि वर्तते। (**6.31**)

Having attained [this vision/knowledge of] oneness, the one who [thus] gains Me as abiding in all beings, that [ज्ञान-] योगिन्, though engaging in all types [of action], abides in Me [i.e., abides not just when in the seat of meditation—because knowledge is continuous, in and out of meditation].

| | | | |
|---|---|---|---|
| 3 | यः | the one who [thus] | fr. यद् *prn. m. sg. nom.* |
| 2 | एकत्वम् | oneness | fr. एकत्व *n. sg. acc.* |
| 1 | आस्थितः [सन्] | having attained [this vision/knowledge of] | fr. आस्थित *pp. of* आ + √स्था *pt. m. sg. nom.* (**6.6:**) |

| | | | |
|---|---|---|---|
| 6 | सर्व-भूत-स्थितं | as abiding in all beings | fr. सर्व-भूत-स्थित *a. m. sg. acc.* |
| 5 | मां | Me | fr. अहम् *prn. sg. acc.* |
| 4 | भजति | gains | fr. √भज् *1.P. pr. 3rd sg.* |
| 7 | सः योगी | that [ज्ञान-] योगिन् | fr. तद् *prn. m. sg. nom.*; योगिन् *m. sg. nom.* (**3.15:**) |
| 9 | सर्वथा | in all types [of action] | fr. सर्वथा *in.* (**6.19:**) |
| 8 | वर्तमानः अपि | though engaging | fr. वर्तमान *pr. mid. pt. of* √वृत् *pt. m. sg. nom.* (**6.5:**); अपि *in.* |
| 10 | मयि वर्तते | abides in Me | fr. अहम् *prn. sg. loc.*; √वृत् *1.Ā. pr. 3rd sg.* |

**आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन। सुखं वा यदि वा दुःखं स योगी परमो मतः॥३२॥**

(आत्मैपम्येन सर्वत्र, समं पश्यति यः अर्जुन। सुखं वा यदि वा दुःखं, सः योगी परमः मतः॥)

अर्जुन, यः सर्वत्र यदि सुखं वा दुःखं वा आत्म-औपम्येन समं पश्यति, सः योगी परमः मतः। (**6.32**)

O अर्जुन, the one who sees [that life is] the same everywhere, whether pleasant or unpleasant, with oneself as the basis of comparison [since आत्मन् is one]—that [ज्ञान-] योगिन् is regarded as the most exalted.

| | | | |
|---|---|---|---|
| 1 | अर्जुन | O अर्जुन | fr. अर्जुन *m. sg. voc.* |
| 2 | यः | the one who | fr. यद् *prn. m. sg. nom.* |
| 5 | सर्वत्र | everywhere | fr. सर्वत्र *in.* (**6.19:**) |
| 6 | यदि सुखं वा | whether pleasant | fr. यदि *in.* (**6.20:**); सुख *a. n. sg. acc.*; वा *in.* |
| 7 | दुःखं वा | or unpleasant | fr. दुःख *a. n. sg. acc.*; वा *in.* |
| 8 | आत्म- | with oneself | |
| 9 | -औपम्येन | as the basis of comparison | fr. आत्म-औपम्य *n. sg. inst.* (**7.9.2:**) |
| 4 | समं | [that life is] the same | fr. सम *a. n. sg. acc.* |
| 3 | पश्यति | sees | fr. √दृश् *1.P. pr. 3rd sg.* (**5.15.6:**) |
| 10 | सः योगी | that [ज्ञान-] योगिन् | fr. तद् *prn. m. sg. nom.*; योगिन् *m. sg. nom.* (**3.15:**) |
| 12 | परमः | the most exalted | fr. परम *spv. a. m. sg. nom.* (**6.25: & .27:** ०म) |
| 11 | मतः | is regarded as | fr. मत *pp. of* √मन् *pt. m. sg. nom.* (**6.6:**) |

**अर्जुन उवाच।**

**योऽयं योगस्त्वया प्रोक्तः साम्येन मधुसूदन। एतस्याहं न पश्यामि चञ्चलत्वात्स्थितिं स्थिराम्॥३३॥**

(अर्जुनः उवाच। यः अयं योगः त्वया प्रोक्तः, साम्येन मधुसूदन। एतस्य अहं न पश्यामि, चञ्चलत्वात् स्थितिं स्थिराम्॥)

अर्जुनः उवाच। मधु-सूदन, त्वया अयं योगः यः साम्येन प्रोक्तः, एतस्य [योगस्य] स्थिरां स्थितिं चञ्चलत्वात् अहं न पश्यामि। (**6.33**)

अर्जुन said: O कृष्ण, this [ज्ञान-] योग that you have talked about as [the vision of] sameness, I do not see its steady continuance due to the very fleeting nature [of the mind].

| | | | |
|---|---|---|---|
| 1 | अर्जुनः उवाच | अर्जुन said | fr. अर्जुन *m. sg. nom.*; √वच् *P. perf. 3rd sg.* (**5.10.3:**) |
| 2 | मधु-सूदन | (कृष्ण) O Destroyer of the Demon मधु | fr. मधु-सूदन *m. sg. voc.* |
| 4 | त्वया | you | fr. त्वम् *prn. sg. inst.* (**7.7:**) |
| 3 | अयं योगः यः | this [ज्ञान-] योग which | fr. इदम् *prn. m. sg. nom.*; योग *m. sg. nom.*; यद् *prn. m. sg. nom.* |
| 6 | साम्येन | as [the vision of] sameness | fr. साम्य *n. sg. inst.* (**7.9.2:**) |
| 5 | प्रोक्तः | have talked about | fr. प्रोक्त *pp. of* प्र + √वच् *pt. m. sg. nom.* (**6.6:** & **2.3.a:** & **2.80:**) |
| 9 | एतस्य [योगस्य] | its | fr. एतद् *prn. m. sg. gen.* |
| 10 | स्थिरां | steady | fr. स्थिरा *a. f. sg. acc.* |
| 11 | स्थितिं | continuance | fr. स्थिति *f. sg. acc.* |
| 12 | चञ्चलत्वात् | due to the very fleeting nature [of the mind] | fr. चञ्चलत्व *n. sg. abl.* (**7.11.1:**) |
| 7 | अहं | I | fr. अहम् *prn. sg. nom.* |
| 8 | न पश्यामि | do not see | fr. न *in.*; √दृश् *1.P. 1st sg.* (**5.15.6:** & **5.5.a:**) |

**चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम्। तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्॥३४॥**

(चञ्चलं हि मनः कृष्ण, प्रमाथि बलवत् दृढम्। तस्य अहं निग्रहं मन्ये, वायोः इव सुदुष्करम्॥)

कृष्ण, चञ्चलं हि (=यस्मात्) प्रमाथि बलवत् दृढम् [च] मनः, अहं तस्य निग्रहं वायोः इव सु-दुष्-करं मन्ये। (**6.34**)

O कृष्ण, since the mind is very fleeting, distracting, strong, and well rooted, I think that its control is quite as difficult as that of the wind.

| | | | |
|---|---|---|---|
| 1 | कृष्ण | O कृष्ण | fr. कृष्ण *m. sg. voc.* |
| 4 | चञ्चलं | very fleeting | fr. चञ्चल *a. n. nom.* |
| 2 | हि (=यस्मात्) | since | fr. हि *in.* |
| 5 | प्रमाथि | distracting | fr. प्रमाथिन् *a. n. sg. nom.* (**3.15:**) |
| 6 | बलवत् | strong | fr. बलवत् *a. n. sg. nom.* (**3.13:**) |
| 7 | दृढम् [च] | [and] well-rooted | fr. दृढ *pp. of* √दृह् *a. n. sg. nom.* (**2.111:**) |
| 3 | मनः | the mind [is] | fr. मनस् *n. sg. nom.* (**3.6:**) |

| | | | |
|---|---|---|---|
| 8 | अहं | I | fr. अहम् *prn. sg. nom.* |
| 10 | तस्य निग्रहं | its control | fr. तद् *prn. n. sg. gen.*; निग्रह *m. sg. acc.* |
| 12 | वायोः इव | as [that] of the wind | fr. वायु *m. sg. gen.*; इव *in.* (**6.19:**) |
| 11 | सु-दुष्-करं | [is] quite as difficult | fr. सु-दुस्-कर *a. n. sg. acc.* (दुष्◦ *before* क् प्) |
| 9 | मन्ये | think that | fr. √मन् *4.Ā. pr.* $1^{st}$ *sg.* |

**श्रीभगवानुवाच।**

**असंशयं महाबाहो मनो दुर्निग्रहं चलम्। अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते॥३५॥**

(श्रीभगवान् उवाच। असंशयं महाबाहो, मनः दुर्निग्रहं चलम्। अभ्यासेन तु कौन्तेय, वैराग्येण च गृह्यते॥)

श्री-भगवान् उवाच। महा-बाहो, अ-संशयं मनः चलं दुर्-निग्रहम्। कौन्तेय, अभ्यासेन तु वैराग्येण च गृह्यते। (**6.35**)

The Lord said: O अर्जुन, without a doubt, the mind is fleeting and difficult to master. But, O अर्जुन, with repetition [in prayerful meditation and eventually in contemplation] and with dispassion [by objective inquiry into the distracting objects and their valuation], it is mastered.

| | | | |
|---|---|---|---|
| 1 | श्री-भगवान् उवाच | the Lord said | fr. श्री-भगवत् *m. sg. nom.*; √वच् *P. perf.* $3^{rd}$ *sg.* (**5.10.3:**) |
| 2 | महा-बाहो | (अर्जुन) O Mighty Armed One | fr. महा-बाहु *m. sg. voc.* |
| 3 | अ-संशयं | without a doubt | fr. असंशयम् *in.* (**7.8.8:**) |
| 4 | मनः | the mind | fr. महस् *n. sg. nom.* (**3.6:**) |
| 5 | चलं | [is] fleeting | fr. चल *a. n. sg. nom.* |
| 6 | दुर्-निग्रहम् | [and] difficult to master | fr. दुस्-निग्रह *a. n. sg. nom.* (**2.24:** & **.29:**) |
| 8 | कौन्तेय | (अर्जुन) O Son of कुन्ती | fr. कौन्तेय *m. sg. voc.* |
| 7 | अभ्यासेन तु | but with repetition [in prayerful meditation and eventually in contemplation] | fr. अभ्यास *m. sg. inst.*; तु *in.* |
| 9 | वैराग्येण च | and with dispassion [by objective inquiry into the distracting objects and their valuation] | fr. वैराग्य *n. sg. inst.*; च *in.* |
| 10 | गृह्यते | it is mastered | fr. √ग्रह् *ps. pr.* $3^{rd}$ *sg.* (**5.37.6:** & **2.3.a:**) |

**असंयतात्मना योगो दुष्प्राप इति मे मतिः। वश्यात्मना तु यतता शक्योऽवाप्तुमुपायतः॥ ३६॥**

(असंयतात्मना योगः, दुष्प्रापः इति मे मतिः। वश्यात्मना तु यतता, शक्यः अवाप्तुम् उपायतः॥)

अ-संयत-आत्मना योगः दुष्-प्रापः। वश्य-आत्मना तु उपायतः यतता [च] अवाप्तुं शक्यः — इति मे मतिः। (**6.36**)

By one whose mind is not mastered, [this] [ज्ञान-] योग is difficult to gain, whereas by one whose mind is mastered and who makes effort through [proper] means [i.e., through the contemplation presented in this chapter], it is possible to gain. This is my vision.

| | | | |
|---|---|---|---|
| 1 | अ-संयत-आत्मना | by one whose mind is not mastered | fr. असंयत-आत्मन् *a. m. sg. inst.* (**3.22:**) |
| 2 | योगः | [this] [ज्ञान-] योग | fr. योग *m. sg. nom.* |
| 3 | दुष्-प्रापः | is difficult to gain | fr. दुस्-प्राप *a. m. sg. nom.* (दुष्° *before* क् प्) |
| 4 | वश्य-आत्मना तु | whereas by one whose mind is mastered | fr. वश्य-आत्मन् *a. m. sg. inst.*; तु *in.* |
| 6 | उपायतः | through [proper] means | fr. उपायतस् *in.* (**6.19:**) |
| 5 | यतता [च] | [and] who makes effort | fr. यतत् *pr. pt. of* √यत् *a. m. sg. inst.* (**3.12:**) |
| 8 | अवाप्तुं | to gain | fr. अवाप्तुम् *inf. of* अव + √आप् *in.* (**7.20.3:**) |
| 7 | शक्यः | it is possible | fr. शक्य *pot. ps. pt. of* √शक् *pt. m. sg. nom.* |
| 9 | इति मे मतिः | this is my vision | fr. इति *in.*; अहम् *prn. sg. gen.*; मति *f. sg. nom.* |

**अर्जुन उवाच।**

**अयतिः श्रद्धयोपेतो योगाच्चलितमानसः। अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति॥ ३७॥**

(अर्जुनः उवाच। अयतिः श्रद्धया उपेतः, योगात् चलितमानसः। अप्राप्य योगसंसिद्धिं, कां गतिं कृष्ण गच्छति॥)

अर्जुनः उवाच। कृष्ण, श्रद्धया उपेतः अ-यतिः योगात् चलित-मानसः योग-संसिद्धिम् अ-प्राप्य कां गतिं गच्छति। (**6.37**)

अर्जुन said: O कृष्ण, [the सन्न्यासिन् talked about in this chapter] endowed with trust [in this Your teaching], [but] who does not make [adequate] effort, whose mind wanders away from योग, not gaining success in योग—what is [that one's] lot?

| | | | |
|---|---|---|---|
| 1 | अर्जुनः उवाच | अर्जुन said | fr. अर्जुन *m. sg. nom.*; √वच् *P. perf. 3rd sg.* (**5.10.3:**) |
| 2 | कृष्ण | O कृष्ण | fr. कृष्ण *m. sg. voc.* |
| 4 | श्रद्धया | with trust [in this Your teaching] | fr. श्रद्धा *f. sg. inst.* (**6.13:** & **3.28.c:**) |
| 3 | उपेतः | endowed | fr. उपेत *pp. of* उप + √इ *a. m. sg. nom.* |
| 5 | अ-यतिः | [but] who does not make [adequate] effort | fr. अयति *m. sg. nom.* |

| | | | |
|---|---|---|---|
| 7 | योगात् | from योग | fr. योग *m. sg. abl.* (**7.11:**) |
| 6 | चलित-मानसः | whose mind wanders away | fr. चलित-मानस *a. m. sg. nom.* |
| 9 | योग-संसिद्धिम् | success in योग | fr. योग-संसिद्धि *f. sg. acc.* |
| 8 | अ-प्राप्य | not gaining | fr. अप्राप्य *in. pt. of* प्र + √आप् |
| 10 | कां | what? | fr. किम् *prn. f. sg. acc.* |
| 11 | गतिं | lot | fr. गति *f. sg. acc.* |
| 12 | गच्छति | does [that one] go to | fr. √गम् *1.P. pr. 3rd sg.* (**5.15.6:**) |

**कच्चिन्नोभयविभ्रष्टश्छिन्नाभ्रमिव नश्यति। अप्रतिष्ठो महाबाहो विमूढो ब्रह्मणः पथि॥ ३८॥**
(कच्चिद् न उभयविभ्रष्टः, छिन्नाभ्रम् इव नश्यति। अप्रतिष्ठः महाबाहो, विमूढः ब्रह्मणः पथि॥ )
महा-बाहो, ब्रह्मणः पथि विमूढः उभय-विभ्रष्टः अ-प्रतिष्ठः छिन्न-अभ्रम् इव कच्-चिद् न नश्यति। (**6.38**)
O कृष्ण, deluded in the path [i.e., in the means for the knowledge] of ब्रह्मन्, fallen from both [कर्म-योग and ज्ञान-योग] [and thus] without a basis, I hope that that one does not fizzle out, like a cloudlet [split off from a cloud bank]?

| | | | |
|---|---|---|---|
| 1 | महा-बाहो | (कृष्ण) O Mighty Armed One | fr. महा-बाहु *m. sg. voc.* |
| 4 | ब्रह्मणः | of ब्रह्मन् | fr. ब्रह्मन् *n. sg. gen.* (**3.22:** & **2.92:**) |
| 3 | पथि | in the path | fr. पन्थन् *m. sg. loc.* (**3.21:**) |
| 2 | विमूढः | deluded | fr. विमूढ *pp. of* वि + √मुह् *a. m. sg. nom.* (**2.107:**) |
| 5 | उभय-विभ्रष्टः | fallen from both [कर्म-योग and ज्ञान-योग] | fr. उभय-विभ्रष्ट *a. m. sg. nom.* |
| 6 | अ-प्रतिष्ठः | [and thus] without a basis | fr. अप्रतिष्ठ *a. m. sg. nom.* |
| 9 | छिन्न-अभ्रम् इव | like a cloudlet | fr. छिन्न-अभ्र *n. sg. nom.*; इव *in.* (**6.19:**) |
| 7 | कच्-चिद् | I hope that | fr. कद्-चिद् *in.* (**6.20:** & **2.24:** & **2.45:**) |
| 8 | न नश्यति | that one does not fizzle out | fr. न *in.*; √नश् *4.P. pr. 3rd sg.* |

**एतन्मे संशयं कृष्ण छेत्तुमर्हस्यशेषतः। त्वदन्यः संशयस्यास्य छेत्ता न ह्युपपद्यते॥ ३९॥**

(एतद् मे संशयं कृष्ण, छेत्तुम् अर्हसि अशेषतः। त्वदन्यः संशयस्य अस्य, छेत्ता न हि उपपद्यते॥)

कृष्ण, एतद् मे संशयम् अ-शेषतः छेत्तुम् अर्हसि, त्वद्-अन्यः हि (=यस्मात्) अस्य संशयस्य छेत्ता न उपपद्यते। (**6.39**)

Now, O कृष्ण, You ought to completely remove my doubt, since—other than You [ईश्वर]—there is no remover of this [particular] doubt.

| | | | |
|---|---|---|---|
| 2 | कृष्ण | O कृष्ण | fr. कृष्ण *m. sg. voc.* |
| 1 | एतद् (**2.24:** & **.44:**) | now | fr. एतद् *in.* |
| 5 | मे | my | fr. अहम् *prn. sg. gen.* |
| 6 | संशयम् | doubt | fr. संशय *m. sg. acc.* |
| 4 | अ-शेषतः | completely | fr. अशेषतस् *in.* (**6.19:**) |
| 3 | छेत्तुम् अर्हसि | you ought to remove | fr. छेत्तुम् *inf. of* √छिद् (**6.10:** & **5.34:**); √अर्ह् *1P. pr. 2nd sg.* |
| 8 | त्वद्-अन्यः | other than You [ईश्वर] | fr. त्वद्-अन्य *prn. a. m. sg. nom.* (**2.24:** & **2.43:** & **4.16.1:**) |
| 7 | हि (=यस्मात्) | since | fr. हि *in.* |
| 11 | अस्य संशयस्य | of this [particular] doubt | fr. इदम् *prn. m. sg. gen.*; संशय *m. sg. gen.* |
| 10 | छेत्ता | remover | fr. छेत्तृ *a. m. sg. nom.* (**3.38:**) |
| 9 | न उपपद्यते | there is no | fr. न *in.*; उप + √पद् *4.Ā. pr. 3rd sg.* |

**श्रीभगवानुवाच।**

**पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते। न हि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छति॥ ४०॥**

(श्रीभगवान् उवाच। पार्थ न एव इह न अमुत्र, विनाशः तस्य विद्यते। न हि कल्याणकृत् कश्चिद्, दुर्गतिं तात गच्छति॥)

श्री-भगवान् उवाच। पार्थ, न एव इह न अमुत्र तस्य विनाशः विद्यते। तात, कश्-चिद् हि (=यस्मात्) कल्याण-कृत् दुर्-गतिं न गच्छति। (**6.40**) The Lord said: O अर्जुन, neither here itself [due to the positive attitude of श्रद्धा] nor hereafter [according to कर्मन्] is there loss for that one. Because, O Dear One, [to the extent] anyone performs adaptive action [in keeping with धर्म], [to that extent] that one does not get a bad lot.

| | | | |
|---|---|---|---|
| 1 | श्री-भगवान् उवाच | the Lord said | fr. श्री-भगवत् *m. sg. nom.*; √वच् *P. perf. 3rd sg.* (**5.10.3:**) |
| 2 | पार्थ | (अर्जुन) O Son of पृथा | fr. पार्थ *m. sg. voc.* |
| 3 | न एव इह | neither here itself | fr. न *in.*; एव *in.*; इह *in.* (**6.19:**) |
| 4 | न अमुत्र | nor hereafter | fr. न *in.*; अमुत्र *in.* (**6.19:**) |
| 6 | तस्य | for that one | fr. तद् *prn. m. sg. gen.* |
| 5 | विनाशः विद्यते | is there loss | fr. विनाश *m. sg. nom.*; √विद् *ps. pr. 3rd sg.* |

| | | | |
|---|---|---|---|
| 8 | तात | O Dear One | fr. तात *m. sg. voc.* |
| 9 | कश्-चिद् | [to the extent] anyone | fr. क-चिद् *prn. cmpd. m. sg. nom.* (**4.20:** & **2.24:** & **2.27:**) |
| 7 | हि (=यस्मात्) | because | fr. हि *in.* |
| 10 | कल्याण-कृत् | performs adaptive action [in keeping with धर्म] | fr. कल्याण-कृत् *a. m. sg. nom.* (**6.24.2:** & **3.5:**) |
| 12 | दुर्-गतिं | a bad lot | fr. दुस्-गति *f. sg. acc.* (**2.24: & .29:**) |
| 11 | न गच्छति | that one does not get | fr. न *in.*; √गम् *1.P. pr. 3rd sg.* (**5.15.6:**) |

**प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीः समाः। शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते॥ ४१॥**

(प्राप्य पुण्यकृतां लोकान्, उषित्वा शाश्वतीः समाः। शुचीनां श्रीमतां गेहे, योगभ्रष्टः अभिजायते॥)

योग-भ्रष्टः पुण्य-कृतां लोकान् प्राप्य, शाश्वतीः समाः उषित्वा, शुचीनां श्रीमतां गेहे अभिजायते। (**6.41**)

The one who has "fallen" from [this] योग gains the [same] worlds [i.e., heavens] of those who do adaptive actions, lives there for countless years, [then] is [re-]born in the home of a virtuous [i.e., following धर्म] and fortunate [family].

| | | | |
|---|---|---|---|
| 1 | योग-भ्रष्टः | the one who has "fallen" from [this] योग | fr. योग-भ्रष्ट *a. m. sg. nom.* |
| 4 | पुण्य-कृतां | of those who do adaptive actions | fr. पुण्य-कृत् *a. m. pl. gen.* (**6.24.2:** & **3.5:**) |
| 3 | लोकान् | the [same] worlds [i.e., heavens] | fr. लोक *m. pl. acc.* |
| 2 | प्राप्य | gains | fr. प्राप्य *in. pt. of* प्र + √आप् (**6.9:**) |
| 6 | शाश्वतीः | for countless | fr. शाश्वती *a. f. pl. acc.* (**3.36:**) |
| 7 | समाः | years | fr. समा *f. pl. acc.* (**3.28.c:**) |
| 5 | उषित्वा | lives there | fr. उषित्वा *in. pt. of* √वस् (**6.9:** & **2.3.a:** & **2.101:**) |
| 10 | शुचीनां | of a virtuous [i.e., following धर्म] | fr. शुचि *a. m. pl. gen.* |
| 11 | श्रीमतां | [and] fortunate [family] | fr. श्रिमत् *a. m. pl. gen.* |
| 9 | गेहे | in the home | fr. गेह *n. sg. loc.* |
| 8 | अभिजायते | [then] is [re-]born | fr. अभि + √जन् *4.Ā. pr. 3rd sg.* (**5.16.4:**) |

**अथवा योगिनामेव कुले भवति धीमताम्। एतद्धि दुर्लभतरं लोके जन्म यदीदृशम्॥ ४२॥**

(अथवा योगिनाम् एव, कुले भवति धीमताम्। एतद् हि दुर्लभतरं, लोके जन्म यद् ईदृशम्॥ )

अथवा धीमतां योगिनाम् एव कुले भवति। यद् एतद् ईदृशं जन्म हि लोके दुर्-लभतरम्। (**6.42**)

—Or [even better] that one is born in the family of wise योगिन्-s. Such a birth as this is indeed more difficult to attain in [this] world.

| | | | |
|---|---|---|---|
| 1 | अथवा | or [even better] | fr. अथवा *in.* |
| 4 | धीमतां | of wise | fr. धीमत् *a. m. pl. gen.* (**3.13:**) |
| 5 | योगिनाम् एव | योगिन्-s | fr. योगिन् *m. pl. gen.* (**3.15:**); एव *in.* |
| 3 | कुले | in the family | fr. कुल *n. sg. loc.* |
| 2 | भवति | that one is born | fr. √भू *1.P. pr. 3rd sg.* (**5.3:** & **2.3:** & **2.71:**) |
| 8 | यद् एतद् | [as] this | fr. यद् *prn. n. sg. nom.*; एतद् *prn. n. sg. nom.* (**7.6.B.2.f:**) |
| 6 | ईदृशं | such | fr. ईदृश *a. n. sg. nom.* (**4.17.2:**) |
| 7 | जन्म हि | a birth indeed | fr. जन्मन् *n. sg. nom.* (**3.22:**); हि *in.* |
| 10 | लोके | in [this] world | fr. लोक *m. sg. loc.* |
| 9 | दुर्-लभतरम् | [is] more difficult to attain | fr. दुस्-लभतर *cpv. a. n. sg. nom.* (**2.24:** & **2.29:** & **6.25:**) |

**तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकम्। यतते च ततो भूयः संसिद्धौ कुरुनन्दन॥ ४३॥**

(तत्र तं बुद्धिसंयोगं, लभते पौर्वदेहिकम्। यतते च ततः भूयः, संसिद्धौ कुरुनन्दन॥ )

तत्र तं पौर्व-देहिकं बुद्धि-संयोगं लभते, ततः च संसिद्धौ भूयः यतते, कुरु-नन्दन। (**6.43**)

There, one gains connection with [i.e., quickly matures to] an intellect [like the one] that existed while in the previous body and [then] strives further than that [before], toward success [i.e., complete freedom], O अर्जुन.

| | | | |
|---|---|---|---|
| 1 | तत्र | there | fr. तत्र *in.* (**6.19:**) |
| 5 | तं | [like] that | fr. तद् *prn. m. sg. acc.* |
| 6 | पौर्व-देहिकं | which existed while in the previous body | fr. पौर्व-देहिक *a. m. sg. acc.* |
| 4 | बुद्धि- | with [i.e., quickly matures to] an intellect | |
| 3 | -संयोगं | connection | fr. बुद्धि-संयोग *m. sg. acc.* |
| 2 | लभते | one gains | fr. √लभ् *1.Ā. pr. 3rd sg.* |

| | | | |
|---|---|---|---|
| 9 | ततः च | and than that [before] | fr. ततस् *in.* (**6.19:**); च *in.* |
| 10 | संसिद्धौ | towards success [i.e., complete freedom] | fr. संसिद्धि *f. sg. loc.* (**7.13.2.a:**) |
| 8 | भूयः | further | fr. भूयस् *in.* |
| 7 | यतते | [and] strives | fr. √यत् *1.Ā. pr. 3rd sg.* |
| 11 | कुरु-नन्दन | (अर्जुन) O Joy of the कुरु People | fr. कुरु-नन्दन *m. sg. voc.* |

**पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः। जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्तते॥४४॥**
(पूर्वाभ्यासेन तेन एव, ह्रियते हि अवशः अपि सः। जिज्ञासुः अपि योगस्य, शब्दब्रह्म अतिवर्तते॥)
तेन पूर्व-अभ्यासेन एव अ-वशः अपि सः ह्रियते हि। योगस्य जिज्ञासुः अपि शब्द-ब्रह्म अतिवर्तते। (**6.44**)
By that previous [life's] practice [i.e., its कर्म-फल, the result of its कर्मन्] alone, even without will, one is indeed swept along. Just desiring to know about [this] [ज्ञान-] योग [one quickly] goes beyond the वेद text [i.e., its bulky heaven-going section].

| | | | |
|---|---|---|---|
| 1 | तेन | by that | fr. तद् *prn. m. sg. inst.* |
| 2 | पूर्व-अभ्यासेन एव | previous [life's] practice [i.e., its कर्म-फल] alone | fr. पूर्व-अभ्यास *m. sg. inst.*; एव *in.* |
| 3 | अ-वशः अपि | even without will | fr. अवश *a. m. sg. nom.*; अपि *in.* |
| 4 | सः | one | fr. तद् *prn. m. sg. nom.* |
| 5 | ह्रियते हि | is indeed swept along | fr. √हृ *ps. pr. 3rd sg.* (**5.15.6:**); हि *in.* |
| 7 | योगस्य | about [this] [ज्ञान-] योग | fr. योग *m. sg. gen.* (**7.12.2.b:**) |
| 6 | जिज्ञासुः अपि | just desiring to know | fr. जिज्ञासु *des. a. m. sg. acc.* (**5.41:** & **5.8.4:**); अपि *in.* |
| 9 | शब्द-ब्रह्म | the Veda text [i.e., its bulky heaven-going section] | fr. शब्द-ब्रह्मन् *n. sg. acc.* (**3.22:**) |
| 8 | अतिवर्तते | [one quickly] goes beyond | fr. अति + √वृत् *1.Ā. pr. 3rd sg.* |

**प्रयत्नाद्यतमानस्तु योगी संशुद्धकिल्बिषः। अनेकजन्मसंसिद्धस्ततो याति परां गतिम्॥ ४५॥**

(प्रयत्नात् यतमानः तु, योगी संशुद्धकिल्बिषः। अनेकजन्मसंसिद्धः, ततः याति परां गतिम्॥)

प्रयत्नात् यतमानः तु (=एव) योगी संशुद्ध-किल्बिषः अनेक-जन्म-संसिद्धः ततः परां गतिं याति। (**6.45**)

The [ज्ञान-] योगिन् who indeed strives with resolve [until] free from faults, accomplished [by accumulated effort] after many [prior] births [wherein all obstacles to knowledge are overcome]—that one thereupon gains the limitless end.

| | | | |
|---|---|---|---|
| 3 | प्रयत्नात् | with resolve | fr. प्रयत्न *m. sg. abl.* (**7.11.1:**) |
| 2 | यतमानः तु (=एव) | who indeed strives | fr. यतमान *pr. mid. pt. of* √यत् *a. m. sg. nom.*; तु *in.* |
| 1 | योगी | the [ज्ञान-] योगिन् | fr. योगिन् *m. sg. nom.* (**3.15:**) |
| 4 | संशुद्ध-किल्बिषः | [until] free from faults | fr. संशुद्ध-किल्बिष *a. m. sg. nom.* |
| 6 | अनेक-जन्म- | after many [prior] births | |
| 5 | -संसिद्धः | accomplished [by accumulated effort] | fr. अनेक-जन्म-संसिद्ध *a. m. sg. nom.* |
| 8 | ततः | thereupon | fr. ततस् *in.* (**6.19:**) |
| 9 | परां गतिं | the limitless end | fr. परा *prn. a. f. sg. acc.* (**4.16.3:**); गति *f. sg. acc.* |
| 7 | याति | that one gains | fr. √या *2.P. pr. 3rd sg.* |

**तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः। कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन॥ ४६॥**

(तपस्विभ्यः अधिकः योगी, ज्ञानिभ्यः अपि मतः अधिकः। कर्मिभ्यः च अधिकः योगी, तस्मात् योगी भव अर्जुन॥)

योगी तपस्विभ्यः अधिकः ज्ञानिभ्यः (=पण्डितेभ्यः) अपि अधिकः मतः। योगी कर्मिभ्यः च अधिकः। तस्मात् योगी भव, अर्जुन। (**6.46**) [This] योगिन् is superior to तपस्विन्-s (who perform prayerful disciplines) and is also considered superior to ज्ञानिन्-s [i.e., scholars who treat this teaching as just theory rather than about themselves]. [This] योगिन् is also superior to those who perform rituals. Therefore, be a योगिन् [i.e., through कर्म-योग become a ज्ञान-योगिन्], O अर्जुन.

| | | | |
|---|---|---|---|
| 1 | योगी | [this] योगिन् | fr. योगिन् *m. sg. nom.* (**3.15:**) |
| 3 | तपस्विभ्यः | to तपस्विन्-s (who perform prayerful disciplines) | fr. तपस्विन् *a. m. pl. abl.* (**3.15:**) (**7.11.2.a:**) |
| 2 | अधिकः | [is] superior | fr. अधिक *a. m. sg. nom.* |
| 6 | ज्ञानिभ्यः (=पण्डितेभ्यः) | to ज्ञानिन्-s [i.e., scholars who treat this teaching as just theory rather than about themselves] | fr. ज्ञानिन् *a. m. pl. abl.* (**3.15:**) |
| 5 | अपि अधिकः | also superior | fr. अपि *in.*; अधिक *a. m. sg. nom.* |
| 4 | मतः | [and] is considered | fr. मत *pp. of* √मन् *pt. m. sg. nom.* (**6.6:**) |

| | | | |
|---|---|---|---|
| 7 | योगी | [this] योगिन् | fr. योगिन् *m. sg. nom.* (**3.15:**) |
| 9 | कर्मिभ्यः | to those who perform rituals | fr. कर्मिन् *a. m. sg. abl.* (**3.15:**) (**7.11.2.a:**) |
| 8 | च अधिकः | is also superior | fr. च *in.*; अधिक *a. m. sg. nom.* |
| 10 | तस्मात् | therefore | fr. तस्मात् *in.* |
| 11 | योगी भव | be a योगिन् | fr. योगिन् *m. sg. nom.*; √भू *1.P. impv. 2nd sg.* (**2.71:**) |
| 12 | अर्जुन | O अर्जुन | fr. अर्जुन *m. sg. voc.* |

**योगिनामपि सर्वेषां मद्गतेनान्तरात्मना। श्रद्धावान्भजते यो मां स मे युक्ततमो मतः॥ ४७॥**
(योगिनाम् अपि सर्वेषां, मद्गतेन अन्तरात्मना। श्रद्धावान् भजते यः मां, सः मे युक्ततमः मतः॥)
यः श्रद्धावान् मद्-गतेन अन्तर्-आत्मना मां भजते, सः सर्वेषां योगिनाम् अपि युक्ततमः मे मतः। (**6.47**)
One who has श्रद्धा—with the mind absorbed in Me—seeks Me [through this contemplation], that one is considered by Me the most exalted among all योगिन्-s.

| | | | |
|---|---|---|---|
| 1 | यः श्रद्धावान् | one who has श्रद्धा | fr. यद् *prn. m. sg. nom.*; श्रद्धावत् *a. m. sg. nom.* (**3.13.a:**) |
| 3 | मद्-गतेन | absorbed in Me | fr. मद्-गत *a. m. sg. inst.* (**2.24:** & **.43:**) |
| 2 | अन्तर्-आत्मना | with the mind | fr. अन्तर्-आत्मन् *m. sg. inst.* (**2.24:** & **2.34:** & **3.22:**) |
| 4 | मां भजते | seeks Me [through this contemplation] | fr. अहम् *prn. sg. acc.*; √भज् *1.Ā. pr. 3rd sg.* |
| 5 | सः | that one | fr. तद् *prn. m. sg. nom.* |
| 8 | सर्वेषां | among all | fr. सर्व *prn. a. m. pl. gen.* (**4.16.2:**) (**7.12:**) |
| 9 | योगिनाम् अपि | योगिन्-s | fr. योगिन् *m. pl. gen.* (**3.15:**) (**7.12:**); अपि *in.* |
| 7 | युक्ततमः | the most exalted | fr. युक्ततम *spv. a. m. sg. nom.* (**6.25:**) |
| 6 | मे मतः | is considered by Me | fr. अहम् *prn. sg. gen.* (**7.12.3.a:**); मत *pp. of* √मन् *pt. m. sg. nom.* (**6.6:**) |

**ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे ध्यानयोगो नाम षष्ठोऽध्यायः॥६॥**

(ओं तद् सत्। इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे ध्यानयोगः नाम षष्ठः अध्यायः॥)

ओं तद् सत्। इति श्रीमद्-भगवद्-गीतासु उपनिषत्सु ब्रह्म-विद्यायां योग-शास्त्रे श्री-कृष्ण-अर्जुन-संवादे ध्यान-योगः नाम षष्ठः अध्यायः। (6)

ओं (ब्रह्मन्, the witness of all) is that [only] reality. Thus ends the sixth chapter, called "The Topic of Contemplation," of the [eighteen chapters of] *Songs of the Glorious Lord*, which is [looked upon as] उपनिषद् [and whose teaching is] in [the form of] a dialogue between श्री कृष्ण and अर्जुन, [the subject matter being] a knowledge of ब्रह्मन् and योग.

| | | | |
|---|---|---|---|
| 1 | ओं | ओम् (ब्रह्मन्, the witness of all,) | fr. ओम् *in.* |
| 2 | तद् सत् | [is] that [only] reality | fr. तद् *prn. n. sg. nom.*; सत् *n. sg. nom.* |
| 3 | इति | (quote-end quote), thus ends | fr. इति *in.* |
| 10 | श्रीमद्- | of the venerable, the glorious | |
| 11 | -भगवद्- | one having [limitless] glories, Lord | |
| 9 | -गीतासु | in [i.e., of] songs | fr. श्रीमत्-भगवत्-गीता *f. pl. loc.* (**2.43:**) |
| 12 | उपनिषत्सु | [which are/is looked upon as] उपनिषद्, sacred scripture | fr. उपनिषद् *f. pl. loc.* (**6.24:**) |
| 17 | ब्रह्म- | of ब्रह्मन् (reality/सत्) | |
| 16 | -विद्यायां | [and] a knowledge | fr. ब्रह्म-विद्या *f. sg. loc.* |
| 18 | योग-शास्त्रे | [and instruction of] योग (means, discipline, etc.) | fr. योग-शास्त्र *n. sg. loc.* |
| 14 | श्री-कृष्ण- | between Lord कृष्ण | |
| 15 | -अर्जुन- | and अर्जुन | |
| 13 | -संवादे | in [the form of] a dialogue | fr. श्री-कृष्ण-अर्जुन-संवाद *n. sg. loc.* |
| 8 | ध्यान- | of contemplation | |
| 7 | -योगः | the topic | fr. ध्यान-योग *a. m. sg. nom.* |
| 6 | नाम | by the name, called | fr. नाम *in.* |
| 4 | षष्ठः | the sixth | fr. षष्ठ *ordinal a. m. sg. nom.* |
| 5 | अध्यायः | chapter | fr. अध्याय *m. sg. nom.* |

# अथ सप्तमोऽध्यायः

**श्रीभगवानुवाच।**

**मय्यासक्तमनाः पार्थ योगं युञ्जन्मदाश्रयः। असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृणु॥१॥**

(श्रीभगवान् उवाच। मयि आसक्तमनाः पार्थ, योगं युञ्जन् मदाश्रयः। असंशयं समग्रं मां, यथा ज्ञास्यसि तद् शृणु॥ )

श्री-भगवान् उवाच। पार्थ, मयि आसक्त-मनाः मद्-आश्रयः योगं युञ्जन्, यथा समग्रं माम् अ-संशयं ज्ञास्यसि, तद् शृणु। (7.1)

The Lord said: O अर्जुन, please listen to that [ज्ञानं स-विज्ञामम्] by which—having [your] mind committed to Me, having Me as [your] foundation, and taking to [My two-fold] योग—you will know Me [परमेश्वर, परं ब्रह्म] complete, without doubt.

| | | | |
|---|---|---|---|
| 1 | श्री-भगवान् उवाच | the Lord said | fr. श्री-भगवत् *m. sg. nom.*; √वच् *P. perf. 3rd sg.* (**5.10.3:**) |
| 2 | पार्थ | (अर्जुन) O Son of पृथा | fr. पार्थ *m. sg. voc.* |
| 6 | मयि | to Me | fr. अहम् *prn. sg. loc.* |
| 5 | आसक्त-मनाः | having [your] mind committed | fr. आसक्त-मनस् *a. m. sg. nom.* (**3.6.i:**) |
| 7 | मद्-आश्रयः | having Me as [your] foundation | fr. मद्-आश्रय *a. m. sg. nom.* (**2.24: & .43:**) |
| 9 | योगं | to [My two-fold] योग | fr. योग *m. sg. acc.* |
| 8 | युञ्जन् | [and] taking | fr. युञ्जत् *pr. pt. of* √युज् *pt. m. sg. nom.* (**3.12:**) |
| 4 | यथा | by which | fr. यथा *in.* (**6.19:**) |
| 11 | समग्रं माम् | Me complete | fr. समग्रम् *a. m. sg. acc.*; अहम् *prn. sg. acc.* |
| 12 | अ-संशयं | without doubt | fr. असंशयम् *in.* (**7.8.8:**) |
| 10 | ज्ञास्यसि | you will know | fr. √ज्ञा *P. fut. 2nd sg.* |
| 3 | तद् शृणु | please listen to that [ज्ञानं सविज्ञामम्] | fr. तद् *prn. n. sg. acc.*; √श्रु *5.P. impv. 2nd sg.* (**5.21.3:**) |

**ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः। यज्ज्ञात्वा नेह भूयोऽन्यज्ज्ञातव्यमवशिष्यते॥२॥**

(ज्ञानं ते अहं सविज्ञानम्, इदं वक्षामि अशेषतः। यद् ज्ञात्वा न इह भूयः अन्यद्, ज्ञातव्यम् अवशिष्यते॥)

अहं ते (=तुभ्यं) इदं ज्ञानं स-विज्ञानं वक्षामि अ-शेषतः, यद् ज्ञात्वा इह न अन्यद् भूयः ज्ञातव्यम् अवशिष्यते। (7.2)

This knowledge (ज्ञान), along with its assimilation (विज्ञाम), I will tell you completely, knowing which nothing more remains here to be known.

| | | | |
|---|---|---|---|
| 3 | अहं | I | fr. अहम् *prn. sg. nom.* |
| 5 | ते (=तुभ्यं) | you | fr. त्वम् *prn. sg. dat.* (**4.3:**) (**7.10.A.1:**) |
| 1 | इदं ज्ञानं | this knowledge | fr. इदम् *prn. n. sg. acc.*; ज्ञान *n. sg. acc.* |
| 2 | स-विज्ञानं | along with [its] assimilation | fr. स-विज्ञान *a. n. sg. acc.* (**6.39:**) |
| 4 | वक्षामि | will tell | fr. √वच् *P. fut.* $1^{st}$ *sg.* (**2.80: & .101:**) |
| 6 | अ-शेषतः | completely | fr. अशेषतस् *in.* (**6.19:**) |
| 7 | यद् ज्ञात्वा | knowing which | fr. यद् *prn. n. sg. acc.*; ज्ञात्वा *in. pt. of* √ज्ञा |
| 11 | इह | here | fr. इह *in.* (**6.19:**) |
| 8 | न अन्यद् | nothing | fr. न *in.*; अन्य *prn. a. n. sg. nom.* (**4.16.1:**) |
| 9 | भूयः ज्ञातव्यं | more to be known | fr. भूयस् *cpv. a. n. sg. nom.* (**3.14:**); ज्ञातव्य *pot. ps. pt. of* √ज्ञा *pt. n. sg. nom.* |
| 10 | अवशिष्यते | remains | fr. अव + √शिष् *ps. pr.* $3^{rd}$ *sg.* |

**मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये। यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः॥३॥**

(मनुष्याणां सहस्रेषु, कश्चिद् यतति सिद्धये। यतताम् अपि सिद्धानां, कश्चिद् मां वेत्ति तत्त्वतः॥)

मनुष्याणां सहस्रेषु कश्-चिद् सिद्धये यतति। यतताम् अपि सिद्धानां कश्-चिद् मां वेत्ति तत्त्वतः। (7.3)

Among thousands of people, [a rare] one makes an effort for [this] accomplishment. Even of those who make an effort and are prepared, [a rare] one knows Me in reality.

| | | | |
|---|---|---|---|
| 2 | मनुष्याणां | of people | fr. मनुष्य *m. pl. gen.* (**2.92:**) |
| 1 | सहस्रेषु | among thousands | fr. सहस्र *n. pl. loc.* (**2.101:**) (**7.13.1.a:**) |
| 3 | कश्-चिद् | [a rare] one | fr. क-चिद् *prn. cmpd. m. sg. nom.* (**2.24: & .27:**) |
| 5 | सिद्धये | for [this] accomplishment | fr. सिद्धि *f. sg. dat.* (**3.29.b:**) (**7.10.B:**) |
| 4 | यतति | makes an effort | fr. √यत् *1.P.* $3^{rd}$ *sg.* |

| | | | |
|---|---|---|---|
| 6 | यतताम् अपि | even of those who make an effort | fr. यतत् *pr. pt. of* √यत् *pt. m. pl. gen.*; अपि *in.* |
| 7 | सिद्धानां | [and] are prepared | fr. सिद्ध *pp. of* √सिध् *a. m. pl. gen.* (**2.76:** & **.78:**) |
| 8 | कश्-चिद् | [a rare] one | fr. क-चिद् *prn. cmpd. m. sg. nom.* (**2.24:** & **.27:**) |
| 10 | मां | Me | fr. अहम् *prn. sg. acc.* |
| 9 | वेत्ति | knows | fr. √विद् *2.P. pr. sg. 3rd sg.* (**5.3:** & **2.42:**) |
| 11 | तत्त्वतः | in reality | fr. तत्त्वतस् *in.* (**6.19:**) |

**भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च। अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा।।४।।**
(भूमिः आपः अनलः वायुः, खं मनः बुद्धिः एव च। अहङ्कारः इति इयं मे, भिन्ना प्रकृतिः अष्टधा।।)
भूमिः आपः अन्-अलः वायुः खं मनः बुद्धिः अहङ्-कारः एव च इति इयं मे प्रकृतिः अष्टधा भिन्ना। (**7.4**)
Earth [i.e., solidity], water [i.e., liquidity], fire [i.e., heat/light], wind [i.e., movement], space [i.e., dimension], mind, intellect, and the "I" notion [i.e., the universe divided into five sensible elements and the means to sense them]—this is My nature [प्रकृति], divided in eight ways.

| | | | |
|---|---|---|---|
| 1 | भूमिः | earth [i.e., solidity] | fr. भूमि *f. sg. nom.* |
| 2 | आपः | water [i.e., liquidity] | fr. अप् *f. pl. nom.* (**3.16:**) |
| 3 | अन्-अलः | fire [i.e., heat/light] | fr. अनल *m. sg. nom.* |
| 4 | वायुः | wind [i.e., movement] | fr. वायु *m. sg. nom.* |
| 5 | खं | space [i.e., dimension] | fr. ख *n. sg. nom.* |
| 6 | मनः | mind | fr. मनस् *n. sg. nom.* (**3.6:**) |
| 7 | बुद्धिः | intellect | fr. बुद्धि *f. sg. nom.* |
| 8 | अहङ्-कारः एव च | and the "I" notion | fr. अहम्-कार *m. sg. nom.* (**2.55:** & **1.9:**); एव *in.* (**6.19:**); च *in.* |
| 9 | इति इयं | this [is] | fr. इति *in.*; इदम् *prn. f. sg. nom.* |
| 10 | मे प्रकृतिः | My nature | fr. अहम् *prn. sg. gen.*; प्रकृति *f. sg. nom.* |
| 12 | अष्टधा | in eight ways | fr. अष्टधा *in.* (**4.28:**) |
| 11 | भिन्ना | divided | fr. भिन्ना *pp. of* √भिद् *pt. f. sg. nom.* (**6.6:**) |

**अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम्। जीवभूतां महाबाहो ययेदं धार्यते जगत्॥५॥**

(अपरा इयम् इतः तु अन्यां, प्रकृतिं विद्धि मे पराम्। जीवभूतां महाबाहो, यया इदं धार्यते जगत्॥)

इयम् अ-परा। महा-बाहो, इतः तु अन्यां मे परां प्रकृतिं विद्धि — जीव-भूतां यया इदं जगत् धार्यते। (7.5)

This is not [My] ultimate [nature] [i.e., it is a lower level of reality within Me, as असत् is to सत्]. Whereas, O अर्जुन, different from this, please know My ultimate nature [प्रकृति]—being [the basis of] the जीव (individual) and by which this universe is sustained.

| | | | |
|---|---|---|---|
| 1 | इयम् | this [is] | fr. इदम् *prn. f. sg. nom.* |
| 2 | अ-परा | not [My] ultimate [nature] | fr. अपरा *prn. a. f. sg. nom.* (**4.16.3:**) |
| 4 | महा-बाहो | (अर्जुन) O Mighty Armed One | fr. महा-बाहु *m. sg. voc.* |
| 6 | इतः | from this | fr. इतस् *in.* (**6.19:**) |
| 3 | तु | whereas | fr. तु *in.* |
| 5 | अन्यां | different | fr. अन्य *prn. a. f. sg. acc.* (**4.16.1:**) |
| 8 | मे | My | fr. अहम् *prn. sg. gen.* |
| 9 | परां प्रकृतिं | ultimate nature | fr. परा *prn. a. f. sg. acc.* (**4.16.3:**); प्रकृति *f. sg. acc.* |
| 7 | विद्धि | please know | fr. √विद् *2.P. impv.* $2^{nd}$ *sg.* (**5.6.a:**) |
| 10 | जीव-भूतां | being [the basis of] the जीव (individual) | fr. जीव-भूता *a. f. sg. acc..* |
| 11 | यया | [and] by which | fr. यद् *prn. f. sg. inst.* |
| 12 | इदं जगत् | this universe | fr. इदम् *prn. n. sg. nom.*; जगत् *n. sg. nom.* (**3.5.a:**) |
| 13 | धार्यते | is sustained | fr. √धृ *cs. ps. pr.* $3^{rd}$ *sg.* (**5.37.7:**) |

**एतद्योनीनि भूतानि सर्वाणीत्युपधारय। अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा॥६॥**

(एतद्योनीनि भूतानि, सर्वाणि इति उपधारय। अहं कृत्स्नस्य जगतः, प्रभवः प्रलयः तथा॥)

सर्वाणि भूतानि एतद्-योनीनि इति उपधारय। अहं कृत्स्नस्य जगतः प्रभवः, तथा प्रलयः। (7.6)

Please bear in mind that all beings have these two [प्रकृति-s—the universe of forms and its reality] as their source. I am the source of the entire universe, as well as [its] resolution.

| | | | |
|---|---|---|---|
| 2 | सर्वाणि | all | fr. सर्व *prn. a. n. pl. nom.* (**4.16.2:** & **2.92:**) (**7.7.2:**) |
| 3 | भूतानि | beings | fr. भूत *pp. of* √भू *n. pl. nom.* |
| 4 | एतद्-योनीनि | have these two [प्रकृति-s] as their source | fr. एतद्-योनि *a. n. pl. nom.* (**2.24:** & **.43:**) |
| 1 | इति उपधारय | please bear in mind that | fr. इति *in.*; उप + *cs.* √धृ *P. cs. impv.* $2^{nd}$ *sg.* (**5.40:**) |

| | | | |
|---|---|---|---|
| 5 | अहं | I [am] | fr. अहम् *prn. sg. nom.* |
| 7 | कृत्स्नस्य जगतः | of the entire universe | fr. कृत्स्न *a. n. sg. gen.*; जगत् *n. sg. gen.* (**3.5:**) |
| 6 | प्रभवः | the source | fr. प्रभव *m. sg. nom.* |
| 8 | तथा प्रलयः | as well as [its] resolution | fr. तथा *in.* (**6.19:**); प्रलय *m. sg. nom.* |

**मत्तः परतरं नान्यत्किञ्चिदस्ति धनञ्जय। मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव॥७॥**

(मत्तः परतरं न अन्यद्, किञ्चिद् अस्ति धनञ्जय। मयि सर्वम् इदं प्रोतं, सूत्रे मणिगणाः इव॥)

मत्तः परतरम् अन्यद् न किञ्-चिद् अस्ति, धनञ्-जय। सूत्रे मणि-गणाः इव मयि इदं सर्वं प्रोतम्। (7.7)

There is no other [cause] superior to Me, O अर्जुन. Like collections of gems [i.e., so many glories] on a thread, all this is strung in Me.

| | | | |
|---|---|---|---|
| 4 | मत्तः | to Me | fr. मत्तस् *in.* (**6.19:** & **2.24:**) |
| 3 | परतरम् | superior | fr. परतर *cpv. a. n. sg. nom.* (**6.25:**) |
| 2 | अन्यद् न किञ्-चिद् | no other [cause] | fr. अन्य *prn. a. n. sg. nom.* (**4.16.1:**); न *in.*; क-चिद् *prn. cmpd. n. sg. nom.* (**4.20:** & **2.55:**) |
| 1 | अस्ति | there is | fr. √अस् *2.P. pr.* $3^{rd}$ *sg.* |
| 5 | धनञ्-जय | (अर्जुन) O Winner of Laurels | fr. धन-म्-जय *m. sg. voc.* (**2.55:**) |
| 9 | सूत्रे | on a thread | fr. सूत्र *n. sg. loc.* |
| 8 | मणि- | of gems | |
| 7 | -गणाः | collections | fr. मणि-गुण *m. pl. nom.* |
| 6 | इव | like | fr. इव *in.* (**6.19:**) |
| 12 | मयि | in Me | fr. अहम् *prn. sg. loc.* |
| 10 | इदं सर्वं | all this | fr. इदम् *prn. n. sg. nom.*; सर्व *prn. a. n. sg. nom.* (**4.16.2:**) |
| 11 | प्रोतम् | is strung | fr. प्रोत *pp. of* प्र + √वे *pt. n. sg. nom.* (**6.6:** *weakened by samprasāraṇa to* उ) |

**रसोऽहमप्सु कौन्तेय प्रभास्मि शशिसूर्ययोः। प्रणवः सर्ववेदेषु शब्दः खे पौरुषं नृषु॥८॥**
(रसः अहम् अप्सु कौन्तेय, प्रभा अस्मि शशिसूर्ययोः। प्रणवः सर्ववेदेषु, शब्दः खे पौरुषं नृषु॥)
कौन्तेय, अहम् अस्मि — अप्सु रसः, शशि-सूर्ययोः प्रभा, सर्व-वेदेषु प्रणवः, खे शब्दः, नृषु पौरुषम्। (7.8)
O अर्जुन, I am [to name a few] the taste in [i.e., the essence of] water, the light of the moon and sun, the sound symbol ओम् in all the वेद-s, the sound in [i.e., the essence of] space, and the humanness [i.e., the unique capacity of self-judgment] in humans.

| | | | |
|---|---|---|---|
| 1 | कौन्तेय | (अर्जुन) O Son of कुन्ती | fr. कौन्तेय *m. sg. voc.* |
| 2 | अहम् अस्मि | I am | fr. अहम् *prn. sg. nom.*; √अस् *2.P. pr. 1st sg.* |
| 3 | अप्सु रसः | the taste in [i.e., the essence of] water | fr. अप् *f. pl loc.* (**3.16:**); रस *m. sg. nom.* |
| 5 | शशि-सूर्ययोः | of the moon and sun | fr. शशि-सूर्य *m. du. gen.* (**6.40:**) |
| 4 | प्रभा | the light | fr. प्रभा *f. sg. nom.* |
| 7 | सर्व-वेदेषु | in all the वेद-s | fr. सर्व-वेद *m. pl. loc.* |
| 6 | प्रणवः | the sound symbol ओम् | fr. प्रणव *m. sg. nom.* |
| 8 | खे शब्दः | the sound in [i.e., the essence of] space | fr. ख *n. sg. loc.*; शब्द *m. sg. nom.* |
| 9 | नृषु पौरुषम् | [and] the human-ness [i.e., the unique capacity of self-judgment] in humans | fr. नृ *m. sg. loc.* (**3.38:**); पौरुष *n. sg. nom.* |

**पुण्यो गन्धः पृथिव्यां च तेजश्चास्मि विभावसौ। जीवनं सर्वभूतेषु तपश्चास्मि तपस्विषु॥९॥**
(पुण्यः गन्धः पृथिव्यां च, तेजस् च अस्मि विभावसौ। जीवनं सर्वभूतेषु, तपस् च अस्मि तपस्विषु॥)
पृथिव्यां च पुण्यः गन्धः, विभावसौ च तेजस् अस्मि। सर्व-भूतेषु जीवनं, तपस्विषु च तपस् अस्मि। (7.9)
I am sweet fragrance in earth and the तेजस् (heat and light) in [i.e., the essence of] fire. I am the life in living beings, and the prayerful discipline in ascetics.

| | | | |
|---|---|---|---|
| 3 | पृथिव्यां च | in earth | fr. पृथिवी *f. sg. loc.* (**3.36:**); च *in.* |
| 2 | पुण्यः गन्धः | sweet fragrance | fr. पुण्य *a. m. sg. nom.*; गन्ध *m. sg. nom.* |
| 5 | विभावसौ | in [i.e., the essence of] fire | fr. विभावसु *m. sg. loc.* (**3.30:**) |
| 4 | च तेजस् | and the तेजस् (heat and light) | fr. च *in.*; तेजस् *n. sg. nom.* (**3.6:**) |
| 1 | अस्मि | I am | fr. √अस् *2.P. pr. 1st sg.* |

| | | | |
|---|---|---|---|
| 8 | सर्व-भूतेषु | in living beings | fr. सर्व-भूत *n. pl. loc.* |
| 7 | जीवनं | the life | fr. जीवन *n. sg. nom.* |
| 10 | तपस्विषु | in ascetics | fr. तपस्विन् *a. m. pl. loc.* (**3.15:**) |
| 9 | च तपस् | and the prayerful discipline | fr. च *in.*; तपस् *n. sg. nom.* (**3.6:**) |
| 6 | अस्मि | I am | fr. √अस् *2.P. pr. 1st sg.* |

**बीजं मां सर्वभूतानां विद्धि पार्थ सनातनम्। बुद्धिर्बुद्धिमतामस्मि तेजस्तेजस्विनामहम्॥१०॥**

(बीजं मां सर्वभूतानां, विद्धि पार्थ सनातनम्। बुद्धिः बुद्धिमताम् अस्मि, तेजस् तेजस्विनाम् अहम्॥)

पार्थ, सना-तनं मां सर्व-भूतानां बीजं विद्धि। बुद्धिमतां बुद्धिः, तेजस्विनां तेजस् अहम् अस्मि। (**7.10**)

O अर्जुन, please understand the ever-existing Me as the seed of all beings. I am the intellect of all who have an intellect, and the brilliance of all that have brilliance.

| | | | |
|---|---|---|---|
| 1 | पार्थ | (अर्जुन) O Son of पृथा | fr. पार्थ *m. sg. voc.* |
| 3 | सना-तनं | the ever existing | fr. सनातन *a. m. sg. acc.* |
| 4 | मां | Me | fr. अहम् *prn. sg. acc.* (**7.8.A.1:**) |
| 6 | सर्व-भूतानां | of all beings | fr. सर्व-भूत *n. pl. gen.* |
| 5 | बीजं | [as] the seed | fr. बीज *n. sg. acc.* |
| 2 | विद्धि | please understand | fr. √विद् *2.P. impv. 2nd sg.* (**5.6.a:**) |
| 9 | बुद्धिमतां | of all who have an intellect | fr. बुद्धिमत् *a. m. pl. gen.* (**3.13:**) |
| 8 | बुद्धिः | the intellect | fr. बुद्धि *f. sg. nom.* |
| 11 | तेजस्विनां | of all that have brilliance | fr. तेजस्विन् *a. m. pl. gen.* (**3.15:**) |
| 10 | तेजस् | [and] the brilliance | fr. तेजस् *n. sg. nom.* (**3.6:**) |
| 7 | अहम् अस्मि | I am | fr. अहम् *prn. sg. nom.*; √अस् *2.P. pr. 1st sg.* |

**बलं बलवतां चाहं कामरागविवर्जितम्। धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ॥११॥**

(बलं बलवतां च अहं, कामरागविवर्जितम्। धर्माविरुद्धः भूतेषु, कामः अस्मि भरतर्षभ॥)

बलवतां च काम-राग-विवर्जितं बलं, भूतेषु धर्म-अ-विरुद्धः कामः अहम् अस्मि, भरत-ऋषभ। (7.11)

In all that have strength, I am the strength that is free from काम (requirement/anticipation— toward the unattained) and राग (attachment—toward the attained), and in all beings [I am] [nonbinding] desire not opposed to धर्म ([My] universal order), O अर्जुन.

| | | | |
|---|---|---|---|
| 1 | बलवतां च | in all that have strength | fr. बलवत् *a. m. pl gen.* (**3.13:**); च *in.* |
| 5 | काम- | from काम (requirement/anticipation—towards the unattained) | |
| 6 | -राग- | and राग (attachment—towards the attained) | |
| 4 | -विवर्जितं | that is free | fr. काम-राग-विवर्जित *a. n. sg. nom.* |
| 3 | बलं | the strength | fr. बल *n. sg. nom.* |
| 7 | भूतेषु | [and] in all beings | fr. भूत *pp. of* √भू *n. pl loc.* |
| 9 | धर्म-अ-विरुद्धः | not opposed to धर्म ([My] universal order) | fr. धर्म-अविरुद्ध *a. m. sg. nom.* |
| 8 | कामः | [non-binding] desire | fr. काम *m. sg. nom.* |
| 2 | अहम् अस्मि | I am | fr. अहम् *prn. sg. nom.*; √अस् *2.P. pr. 1st sg.* |
| 10 | भरत-ऋषभ | (अर्जुन) O Prominent Among the Descendants of भरत | fr. भरत-ऋषभ *m. sg. voc.* |

**ये चैव सात्त्विका भावा राजसास्तामसाश्च ये। मत्त एवेति तान्विद्धि न त्वहं तेषु ते मयि॥१२॥**

(ये च एव सात्त्विकाः भावाः, राजसाः तामसाः च ये। मत्तः एव इति तान् विद्धि, न तु अहं तेषु ते मयि ॥)

ये च एव सात्त्विकाः भावाः, ये च राजसाः तामसाः [च], तान् मत्तः एव इति विद्धि। ते मयि, न तु अहं तेषु। (7.12)

Those things born from सत्त्व and those from रजस् and तमस् [गुण-s], know them to be from Me only. They [the असत्—all impermanent things] are in Me [सत्—permanent existence] [i.e., their existence depends on Me], but I am not in them [i.e., My existence does not depend on them].

| | | | |
|---|---|---|---|
| 1 | ये च एव | [and] those | fr. यद् *prn. m. pl. nom.*; च *in.*; एव *in.* (**6.19:**) |
| 3 | सात्त्विकाः | born from सत्त्व | fr. सात्त्विक *a. m. pl. nom.* |
| 2 | भावाः | things | fr. भाव *m. pl. nom.* |
| 4 | ये च | and those | fr. यद् *prn. m. pl. nom.*; च *in.* |
| 5 | राजसाः | from रजस् | fr. राजस *a. m. pl. nom.* |
| 6 | तामसाः [च] | and तमस् [गुण-s] | fr. तामस *a. m. pl. nom.* |

| | | | |
|---|---|---|---|
| 8 | तान् | them [to be] | fr. तद् *prn. m. pl. acc.* |
| 9 | मत्तः एव इति | from Me only | fr. मतस् *in.* (**6.19:** & **2.24:**); एव *in.* (**6.19:**); इति *in.* |
| 7 | विद्धि | know | fr. √विद् *2.P. impv. 2nd sg.* (**5.6.a:**) |
| 10 | ते मयि | they [are] in Me | fr. तद् *prn. m. pl. nom.*; अहम् *prn. sg. loc.* |
| 11 | न तु अहं | but I am not | fr. न *in.*; तु *in.*; अहम् *prn. sg. nom.* |
| 12 | तेषु | in them | fr. तद् *prn. m. pl. loc.* |

**त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत्। मोहितं नाभिजानाति मामेभ्यः परमव्ययम्॥१३॥**

(त्रिभिः गुणमयैः भावैः, एभिः सर्वम् इदं जगत्। मोहितं न अभिजानाति, माम् एभ्यः परम् अव्ययम्॥)

एभिः त्रिभिः गुणमयैः भावैः सर्वम् इदं जगत् मोहितम्। माम् एभ्यः परम् अव्ययं [च] [लोकः] न अभिजानाति। (**7.13**)

This entire world [of humans] is deluded by these things that are modifications of the three गुण-s. This [populace] does not know Me, who is distinct [i.e., a separate order of reality, as सत् from असत्] from them [i.e., from what they think they are] and is changeless [i.e., not modified into them].

| | | | |
|---|---|---|---|
| 4 | एभिः | by these | fr. इदम् *prn. m. pl. inst.* (**4.8:**) |
| 6 | त्रिभिः गुणमयैः | that are modifications of the three गुण-s | fr. त्रि *num.a. m. pl. inst.* (**4.25:**); गुणमय *a. m. pl. inst.* |
| 5 | भावैः | things | fr. भाव *m. pl. inst.* |
| 1 | सर्वम् इदं | this entire | fr. सर्व *prn. a. n. sg. nom.*; इदम् *prn. n. sg. nom.* |
| 2 | जगत् | world [of humans] | fr. जगत् *n. sg. nom.* (**3.5.a:**) |
| 3 | मोहितम् | is deluded | fr. मोहित *pp. of cs.* √मुह् *pt. n. sg. nom.* (**6.6:**) |
| 8 | माम् | Me | fr. अहम् *prn. sg. acc.* |
| 10 | एभ्यः | from them [i.e., from what they think they are] | fr. इदम् *prn. m. pl. abl.* (**4.8:**) |
| 9 | परम् | who is distinct [i.e., a separate order of reality] | fr. पर *prn. a. m. sg. acc.* (**4.16.3:**) |
| 11 | अव्ययं [च] | [and] is changeless [i.e., not modified into them] | fr. अव्यय *a. m. sg. acc.* |
| 7 | न अभिजानाति | this [populace] does not know | fr. न *in.*; अभि + √ज्ञा *9.P. pr. 3rd sg.* (**5.23.2:** & **5.3:**) |

**दैवी ह्येषा गुणमयी मम माया दुरत्यया। मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते॥१४॥**

(दैवी हि एषा गुणमयी, मम माया दुरत्यया। माम् एव ये प्रपद्यन्ते, मायाम् एतां तरन्ति ते॥)

मम हि (=यस्मात्) एषा माया गुणमयी दैवी दुर्-अत्यया, ये माम् एव प्रपद्यन्ते ते एतां मायां तरन्ति। (**7.14**)

—Because, this, My माया (प्रकृति, this captivating world of appearances—mere names and forms)—in the form of the [three] गुण-s and coming from [Me] the Lord—is difficult to cross. [Therefore, giving up all else in माया,] those who seek only Me [as themselves] cross this माया.

| | | | |
|---|---|---|---|
| 3 | मम | My | fr. अहम् *prn. sg. gen.* |
| 1 | हि (=यस्मात्) | because | fr. हि *in.* |
| 2 | एषा | this | fr. एतद् *prn. f. sg. nom.* |
| 4 | माया | माया (प्रकृति, this captivating world of appearances—mere names and forms) | fr. माया *f. sg. nom.* |
| 5 | गुणमयी | in the form of the [three] गुण-s | fr. गुणमयी *a. f. sg. nom.* |
| 6 | दैवी | [and] coming from [Me] the Lord | fr. दैवी *a. f. sg. nom.* |
| 7 | दुर्-अत्यया | is difficult to cross | fr. दुस्-अत्यया *a. f. sg. nom.* (**2.24:** & **.29:**) |
| 9 | ये | who | fr. यद् *prn. m. pl. nom.* |
| 11 | माम् एव | only Me [as themselves] | fr. अहम् *prn. sg. acc.*; एव *in.* (**6.19:**) |
| 10 | प्रपद्यन्ते | seek | fr. प्र + √पद् *4.Ā. pr. 3rd pl.* |
| 8 | ते | [therefore] those | fr. तद् *prn. m. pl. nom.* |
| 13 | एतां मायां | this माया | fr. एतद् *prn. f. sg. acc.*; माया *f. sg. acc.* |
| 12 | तरन्ति | cross | fr. √तॄ *1.P. pr. 3rd pl.* (**5.3:** & **2.3:**) |

**न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः। माययापहृतज्ञाना आसुरं भावमाश्रिताः॥१५॥**

(न मां दुष्कृतिनः मूढाः, प्रपद्यन्ते नराधमाः। मायया अपहृतज्ञानाः, आसुरं भावम् आश्रिताः॥)

दुष्-कृतिनः मूढाः नर-अधमाः न मां प्रपद्यन्ते। मायया अपहृत-ज्ञानाः आसुरं भावम् आश्रिताः। (**7.15**)

Those who do maladaptive action, who are deluded and the lowest among people, do not seek [the ultimate] Me. Robbed of discerning capacity by [this enchanting] माया, they have resorted to the condition of an असुर (one who fights against the Lord's order, against the cosmic cycle).

| | | | |
|---|---|---|---|
| 1 | दुष्-कृतिनः | those who do mal-adaptive action | fr. दुस्-कृतिन् *a. m. pl. nom.* (दुष्॰ *before* क् प्) (**3.15:**) |
| 2 | मूढाः | who are deluded | fr. मूढ *pp. of* √मुह् *a. m. pl. nom.* (**2.107:**) |
| 4 | नर- | among people | |
| 3 | -अधमाः | [and] the lowest | fr. नर-अधम *cpv. a. m. pl. nom.* (**6.25:** & **.27:**) |
| 5 | न मां प्रपद्यन्ते | do not seek [the ultimate] Me | fr. न *in.*; अहम् *prn. sg. acc.*; प्र + √पद् *4.Ā. pr. 3rd pl.* |

| | | | |
|---|---|---|---|
| 8 | मायया | by [this enchanting] माया | fr. माया *f. sg. inst.* |
| 6 | अपहृत- | robbed | |
| 7 | -ज्ञानाः | of discerning capacity | fr. अपहृत-ज्ञान *a. m. pl. nom.* |
| 11 | आसुरं | of an असुर (those who fight against the Lord's order, the cosmic cycle) | fr. आसुर *a. m. sg. acc.* |
| 10 | भावम् | the condition | fr. भाव *m. sg. acc.* |
| 9 | आश्रिताः | they have resorted to | fr. आश्रित *pp. of* आ + √श्रि *pt. m. pl. nom.* |

**चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन। आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ॥१६॥**

(चतुर्विधाः भजन्ते मां, जनाः सुकृतिनः अर्जुन। आर्तः जिज्ञासुः अर्थार्थी, ज्ञानी च भरतर्षभ॥)

चतुर्-विधाः जनाः सु-कृतिनः मां भजन्ते, अर्जुन। आर्तः अर्थ-अर्थी जिज्ञासुः ज्ञानी च, भरत-ऋषभ। (**7.16**)

Fourfold are the people who do adaptive action and who seek Me, O अर्जुन. [These four kinds of भक्त-s, devotees, are] the one who is seized by trouble, the one who requires security, the one who wants to know [Me], and the ज्ञानिन् (one who knows) [Me], O अर्जुन.

| | | | |
|---|---|---|---|
| 1 | चतुर्-विधाः | fourfold [are] | fr. चतुर्-विध *a. m. pl. nom.* (**2.24: & .29:**) |
| 2 | जनाः | the people | fr. जन *m. pl. nom.* |
| 3 | सु-कृतिनः | who do adaptive action | fr. सु-कृतिन् *a. m. pl. nom.* (**3.15:**) |
| 4 | मां भजन्ते | [and] who seek Me | fr. अहम् *prn. sg. acc.*; √भज् *1.Ā. pr. 3rd pl.* |
| 5 | अर्जुन | O अर्जुन | fr. अर्जुन *m. sg. voc.* |
| 6 | आर्तः | the one who is seized by trouble | fr. आर्त *pp. of* आ + √ऋ *a. m. sg. nom.* (**2.18:**) |
| 7 | अर्थ-अर्थी | the one who requires security | fr. अर्थ-अर्थिन् *a. m. sg. nom.* (**3.15:**) |
| 8 | जिज्ञासुः | the one who wants to know [Me] | fr. जिज्ञासु *a. m. sg. nom.* (**5.41: & 5.8.4:**) |
| 9 | ज्ञानी च | and the ज्ञानिन् (one who knows) [Me] | fr. ज्ञानिन् *a. m. sg. nom.*; च *in.* |
| 10 | भरत-ऋषभ | (अर्जुन) O Prominent Among the Descendants of भरत | fr. भरत-ऋषभ *m. sg. voc.* |

**तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते। प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः॥१७॥**

(तेषां ज्ञानी नित्ययुक्तः, एकभक्तिः विशिष्यते। प्रियः हि ज्ञानिनः अत्यर्थम्, अहं सः च मम प्रियः॥)

तेषां ज्ञानी नित्य-युक्तः एक-भक्तिः विशिष्यते, अत्यर्थं हि (=यस्मात्) अहं ज्ञानिनः प्रियः, सः च मम प्रियः। (7.17)

Among them, the ज्ञानिन्—who is always united [in Me] and whose worship is of the one [Lord as everything]—is distinguished, because I [आत्मन्] am totally beloved to that ज्ञानिन् and that one is [totally] beloved to Me [as आत्मन् alone is प्रिय—*see Bṛhadāraṇyaka Upaniṣad* 2.4.5].

| | | | |
|---|---|---|---|
| 1 | तेषां | among them | fr. तद् *prn. m. pl. gen.* (**7.12:**) |
| 2 | ज्ञानी | the ज्ञानिन् | fr. ज्ञानिन् *a. m. sg. nom.* |
| 3 | नित्य-युक्तः | who is always united [in Me] | fr. नित्य-युक्त *a. m. sg. nom* |
| 4 | एक-भक्तिः | and whose worship is of the one [Lord as everything] | fr. एक-भक्ति *a. m. sg. nom.* |
| 5 | विशिष्यते | is distinguished | fr. वि + √शिष् *ps. pr. 3rd sg.* |
| 8 | अत्यर्थं | totally | fr. अत्यर्थम् *in.* |
| 6 | हि (=यस्मात्) | because | fr. हि *in.* |
| 7 | अहं | I (आत्मा) [am] | fr. अहम् *prn. sg. nom.* |
| 9 | ज्ञानिनः प्रियः | beloved to that ज्ञानिन् | fr. ज्ञानिन् *a. m. sg. gen.* (**7.12.2.b:**); प्रिय *a. m. sg. nom.* |
| 10 | सः च | and that one [is] [totally] | fr. तद् *prn. m. sg. nom.*; च *in.* |
| 11 | मम प्रियः | beloved to Me | fr. अहम् *prn. sg. gen.*; प्रिय *a. m. sg. nom.* (**7.12.2.b:**) |

**उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतम्। आस्थितः स हि युक्तात्मा मामेवानुत्तमां गतिम्॥१८॥**

(उदाराः सर्वे एव एते, ज्ञानी तु आत्मा एव मे मतम्। आस्थितः सः हि युक्तात्मा, माम् एव अनुत्तमां गतिम्॥)

सर्वे एव एते उदाराः, ज्ञानी तु आत्मा एव — [इति] मे मतम्। सः हि (=यस्मात्) युक्त-आत्मा माम् एव अन्-उत्तमां गतिम् आस्थितः। (**7.18**)

All [four] indeed are exalted, but the ज्ञानिन् is आत्मन् (My self) alone. That is My vision. —Because that one, whose mind is absorbed [in Me], has attained the goal that is but Me, beyond which there is none.

| | | | |
|---|---|---|---|
| 1 | सर्वे एव एते | all [four] indeed | fr. सर्व *prn. a. m. pl. nom.*; एव *in.*; एतद् *prn. m. pl. nom.* |
| 2 | उदाराः | [are] exalted | fr. उदार *a. m. pl. nom.* |
| 3 | ज्ञानी तु | but the ज्ञानिन् [is] | fr. ज्ञानिन् *a. m. sg. nom.* (**3.15:**); तु *in.* |
| 4 | आत्मा एव | आत्मा (My self) alone | fr. आत्मन् *m. sg. nom.* (**3.22:**); एव *in.* (**6.19:**) |
| 5 | [इति] मे मतम् | [that] [is] My vision | fr. अहम् *prn. sg. gen.*; मत *pp. of* √मन् *n. sg. nom.* |

| | | | |
|---|---|---|---|
| 6 | सः हि (=यस्मात्) | because that one | fr. तद् *prn. m. sg. nom.*; हि *in.* |
| 7 | युक्त-आत्मा | whose mind is absorbed [in Me] | fr. युक्त-आत्मन् *a. m. sg. nom.* (**3.22:**) |
| 10 | माम् एव | [that is] but Me | fr. अहम् *prn. sg. acc.*; एव *in.* (**6.19:**) |
| 11 | अन्-उत्तमां | beyond which there is none | fr. अनुत्तमा *spv. a. f. sg. acc.* (**6.25:**) |
| 9 | गतिम् | the goal | fr. गति *f. sg. acc.* (**7.8.5:**) |
| 8 | आस्थितः | has attained | fr. आस्थित *pp. of* आ + √स्था *pt. m. sg. nom.* (**6.6:**) |

**बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते। वासुदेवः सर्वमिति स महात्मा सुदुर्लभः॥१९॥**

(बहूनां जन्मनाम् अन्ते, ज्ञानवान् मां प्रपद्यते। वासुदेवः सर्वम् इति, सः महात्मा सुदुर्लभः॥)

बहूनां जन्मनाम् अन्ते ज्ञानवान् "वासु-देवः सर्वम्" इति मां प्रपद्यते। सः महा-आत्मा सु-दुर्-लभः। (**7.19**)

At the end of many births, the one who [finally] has the knowledge that "the Lord (वासु-देव, the conscious being in which everything exists) is all" [i.e., the Lord is all this, including oneself] attains Me. That wise person is very rare.

| | | | |
|---|---|---|---|
| 2 | बहूनां जन्मनाम् | of many births | fr. बहु *a. n. pl. gen.*; जन्मन् *n. pl. gen.* (**3.22:**) |
| 1 | अन्ते | at the end | fr. अन्त *m. sg. loc.* |
| 3 | ज्ञानवान् | the one who [finally] has the knowledge | fr. ज्ञानवत् *a. m. sg. nom.* (**3.13.a:**) |
| 5 | वासु-देवः सर्वम् | "the Lord (वासुदेव – the conscious being in which everything exists) is all [this] [including oneself]" | fr. वासु-देव *m. sg. nom.*; सर्व *prn. a. n. sg. nom.* |
| 4 | इति | that | fr. इति *in.* |
| 6 | मां प्रपद्यते | attains Me | fr. अहम् *prn. sg. acc.*; प्र +√पद् *4.Ā. pr. 3rd sg.* |
| 7 | सः महा-आत्मा | that wise person | fr. तद् *prn. m. sg. nom.*; महा-आत्मन् *a. m. sg. nom.* (**3.22:**) |
| 8 | सु-दुर्-लभः | [is] very rare | fr. सु-दुस्-लभ *a. m. sg. nom.* (**2.24: & .29:**) |

**कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यन्तेऽन्यदेवताः। तं तं नियममास्थाय प्रकृत्या नियताः स्वया॥ २०॥**

(कामैः तैः तैः हृतज्ञानाः, प्रपद्यन्ते अन्यदेवताः। तं तं नियमम् आस्थाय, प्रकृत्या नियताः स्वया॥)

तैः तैः कामैः हृत-ज्ञानाः स्वया प्रकृत्या नियताः तं तं नियमम् आस्थाय अन्य-देवताः प्रपद्यन्ते। (7.20)

Those whose discrimination has been robbed by various requirements and are ruled by their own disposition worship various deities, following various stipulations [per the appropriate deity to fulfill each particular requirement].

| | | | |
|---|---|---|---|
| 3 | तैः तैः कामैः | by various requirements | fr. तद् *prn. m. pl. inst.* (**7.6.B.2.e:**); काम *m. pl. inst.* |
| 2 | हृत- | has been robbed away | |
| 1 | -ज्ञानाः | those whose discrimination | fr. हृत-ज्ञान *a. m. pl. nom.* |
| 5 | स्वया प्रकृत्या | by their own disposition | fr. स्वा *prn. a. f. sg. inst.* (**4.15: & 4.16.3:**); प्रकृति *f. sg. inst.* |
| 4 | नियताः | [and] are ruled | fr. नियत *pp. of* नि + √यम् *pt. m. pl. nom.* (**6.6:**) |
| 9 | तं तं नियमम् | various stipulation(s) | fr. तद् *prn. m. sg. acc.* (**7.6.B.2.e:**); नियम *m. sg. acc.* |
| 8 | आस्थाय | following | fr. आस्थाय *in. pt. of* आ + √स्था (**6.9:**) |
| 7 | अन्य-देवताः | [various] different deities | fr. अन्य-देवता *f. pl. acc.* (**3.28.c:**) |
| 6 | प्रपद्यन्ते | worship | fr. प्र + √पद् *4.Ā. pr. 3rd pl.* |

**यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति। तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम्॥ २१॥**

(यः यः यां यां तनुं भक्तः, श्रद्धया अर्चितुम् इच्छति। तस्य तस्य अचलां श्रद्धां, ताम् एव विदधामि अहम्॥)

यः यः भक्तः यां यां तनुं श्रद्धया अर्चितुम् इच्छति, तस्य तस्य ताम् एव श्रद्धाम् अहम् अ-चलां विदधामि। (7.21)

Whoever be the devotee and to whichever [limited] form [of Mine] one wishes to worship with faith—for that one, the very same faith I make firm [by giving the result of the devotee's action].

| | | | |
|---|---|---|---|
| 1 | यः यः भक्तः | whoever be the devotee | fr. यद् *prn. m. sg. nom.* (**7.6.B.2.e:**); भक्त *pp. of* √भज् *m. sg. nom.* (**2.81:**) |
| 2 | यां यां तनुं | [and] to whichever [limited] form [of Mine] | fr. यद् *prn. f. sg. acc.* (**7.6.B.2.e:**); तनु *m. sg. acc.* (**7.20:**) |
| 4 | श्रद्धया | with faith | fr. श्रद्धा *f. sg. inst.* |
| 3 | अर्चितुम् इच्छति | one wishes to worship | fr. अर्चितुम् *inf. of* √अर्च् *in.*; √इष् *6.P. pr. 3rd sg.* (**5.17.3:**) |
| 5 | तस्य तस्य | for that one | fr. तद् *prn. m. sg. gen.* (**7.6.B.2.e:**) |
| 6 | ताम् एव श्रद्धाम् | the very same faith | fr. तद् *prn. f. sg. acc.*; एव *in.*; श्रद्धा *f. sg. acc.* |
| 7 | अहम् | I | fr. अहम् *prn. sg. nom.* |
| 9 | अ-चलां | firm | fr. अचला *a. f. sg. acc.* |
| 8 | विदधामि | make | fr. वि + √धा *3.P. pr. 1st sg.* (**5.8.2:**) |

**स तया श्रद्धया युक्तस्तस्या राधनमीहते। लभते च ततः कामान्मयैव विहितान्हि तान्॥ २२॥**

(सः तया श्रद्धया युक्तः, तस्याः राधनम् ईहते। लभते च ततः कामान्, मया एव विहितान् हि तान्॥)

सः तया श्रद्धया युक्तः तस्याः राधनम् ईहते, ततः च कामान् लभते, तान् हि (=यस्मात्) मया एव विहितान्। (**7.22**)

That one, endowed with that faith, engages in the worship of that [deity, that limited form of Me] and obtains from that [deity] those desired objects—because those are ordained by Me alone [in the form of the laws of कर्मन्].

| | | | |
|---|---|---|---|
| 1 | सः | that one | fr. तद् *prn. m. sg. nom.* |
| 3 | तया श्रद्धया | with that faith | fr. तद् *prn. f. sg. inst.*; श्रद्धा *f. sg. inst.* |
| 2 | युक्तः | endowed | fr. युक्त *pp. of* √युज् *a. m. sg. nom.* (**2.81:**) |
| 6 | तस्याः | of that [deity, limited form of Me] | fr. तद् *prn. f. sg. gen.* (**4.6:**) |
| 5 | राधनम् | the worship | fr. राधन *n. sg. acc.* |
| 4 | ईहते | engages in | fr. √ईह् *1.Ā. pr. 3rd sg.* |
| 7 | ततः च | and from that [deity] | fr. ततस् *in.* (**6.19:**); च *in.* |
| 8 | कामान् लभते | obtains those desired objects | fr. काम *m. pl. acc.*; √लभ् *1.Ā. pr. 3rd sg.* |
| 10 | तान् | those | fr. तद् *prn.m. pl. acc.* |
| 9 | हि (=यस्मात्) | because | fr. हि *in.* |
| 12 | मया एव | by Me alone [in the form of the laws of कर्मन्] | fr. अहम् *prn. sg. inst.*; एव *in.* (**6.19:**) |
| 11 | विहितान् | are ordained | fr. विहित *pp. of* वि + √धा *pt. m. sg. acc.* (**6.6:**) |

**अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसाम्। देवान्देवयजो यान्ति मद्भक्ता यान्ति मामपि॥ २३॥**

(अन्तवत् तु फलं तेषां, तद् भवति अल्पमेधसाम्। देवान् देवयजः यान्ति, मद्भक्ताः यान्ति माम् अपि॥)

तेषां तु अल्प-मेधसां तद् फलम् अन्तवत् भवति। देव-यजः देवान् यान्ति, मद्-भक्ताः अपि मां यान्ति। (**7.23**)

But for those of limited discernment [hence, of limited goals and of limited capacity for appreciation], that result is limited [in time, in value, etc.]. Those who worship the deities go to the [limited world of the] deities, and those who worship [the limitless] Me go to Me [as their self].

| | | | |
|---|---|---|---|
| 1 | तेषां तु | but for those | fr. तद् *prn. m. pl. gen.*; तु *in.* |
| 2 | अल्प- | of limited | |
| 3 | -मेधसां | discernment | fr. अल्प-मेधस् *a. m. pl. gen.* (**3.6:**) |
| 4 | तद् फलम् | that result | fr. तद् *prn. n. sg. nom.*; फल *n. sg. nom.* |
| 6 | अन्तवत् | limited [in time, in value, etc.] | fr. अन्तवत् *a. n. sg. nom.* (**3.13:**) |
| 5 | भवति | is | fr. √भू *1.P. pr. 3rd sg.* (**5.3:** & **2.3:** & **2.71:**) |

| | | | |
|---|---|---|---|
| 7 | देव-यजः | those who worship the deities | fr. देवयज् *a. m. pl. nom.* (**6.24:** & **3.6:**) |
| 8 | देवान् यान्ति | go to the [limited world of the] deities | fr. देव *m. pl. acc.*; √या *2.P. pr. 3rd pl.* |
| 9 | मद्-भक्ताः अपि | and those who worship [the limitless] Me | fr. मद्-भक्त *a. m. pl. nom.*(**2.24:** & **.43:**); अपि *in.* |
| 10 | मां यान्ति | go to Me [as their self] | fr. अहम् *prn. sg. acc.*; √या *2.P. pr. 3rd pl.* |

**अव्यक्तं व्यक्तिमापन्नं मन्यन्ते मामबुद्धयः। परं भावमजानन्तो ममाव्ययमनुत्तमम्॥२४॥**

(अव्यक्तं व्यक्तिम् आपन्नं, मन्यन्ते माम् अबुद्धयः। परं भावम् अजानन्तः, मम अव्ययम् अनुत्तमम्॥)

अ-बुद्धयः अ-व्ययम् अन्-उत्तमं मम परं भावम् अ-जानन्तः माम् अ-व्यक्तं व्यक्तिम् आपन्नं मन्यन्ते। (7.24)

Those who lack discernment, not knowing My limitless nature—changeless and beyond which there is none—think of Me, who is formless, as having attained a form.

| | | | |
|---|---|---|---|
| 1 | अ-बुद्धयः | those who lack discernment | fr. अबुद्धि *a. m. pl. nom.* |
| 5 | अ-व्ययम् | changeless | fr. अव्यत *a. m. sg. acc.* |
| 6 | अन्-उत्तमं | [and] beyond which there is none | fr. अनुत्तम *spv. a. m. sg. acc.* (**6.25:**) |
| 3 | मम | My | fr. अहम् *prn. sg. gen.* |
| 4 | परं भावम् | limitless nature | fr. पर *prn. a. m. sg. acc.* (**4.16.3:**); भाव *m. sg. acc.* |
| 2 | अ-जानन्तः | not knowing | fr. अजानत् *pr. pt. of* √ज्ञा *pt. m. pl. nom.* (**5.23.2:**) |
| 8 | माम् | Me | fr. अहम् *prn. sg. acc.* |
| 9 | अ-व्यक्तं | who is formless | fr. अव्यक्त *pp. of* वि + √अञ्ज् *a. m. sg. acc.* (**6.6:** & **2.81:**) |
| 11 | व्यक्तिम् | a form | fr. व्यक्त *pp. of* वि + √अञ्ज् *a. m. sg. acc.* (**6.6:** & **2.81:**) |
| 10 | आपन्नं | [as] having attained | fr. आपन्न *pp. of* आ + √पद् *pt. m. sg. acc.* (**6.6:**) |
| 7 | मन्यन्ते | think of | fr. √मन् *4.Ā. pr. 3rd pl.* |

**नाहं प्रकाशः सर्वस्य योगमायासमावृतः। मूढोऽयं नाभिजानाति लोको मामजमव्ययम्॥ २५॥**

(न अहं प्रकाशः सर्वस्य, योगमायासमावृतः। मूढः अयं न अभिजानाति, लोकः माम् अजम् अव्ययम्॥)

योग-माया-समावृतः अहं न सर्वस्य प्रकाशः। अयं लोकः मूढः माम् अ-जम् अ-व्ययं न अभिजानाति। (**7.25**)

Veiled [i.e., seemingly embodied in names and forms] by माया, which is the union [of the three गुण-s], I am not evident to everyone. This person [i.e., the general populace] who is deluded does not [properly] know Me, the unborn and changeless [आत्मन्].

| | | | |
|---|---|---|---|
| 3 | योग- | which is the union [of the three गुण-s] | |
| 2 | -माया- | by माया | |
| 1 | -समावृतः | veiled [i.e., seemingly embodied in names and forms] | fr. योग-माया-समावृत *a. m. sg. nom.* |
| 4 | अहं | I | fr. अहम् *prn. sg. nom.* |
| 5 | न | [am] not | fr. न *in.* |
| 7 | सर्वस्य | to everyone | fr. सर्व *in.* (**4.16.2:**) |
| 6 | प्रकाशः | evident | fr. प्रकाश *a. m. sg. nom.* |
| 8 | अयं लोकः | this person [i.e., the general populace] | fr. इदम् *prn. m. sg. nom.*; लोक *m. sg. nom.* |
| 9 | मूढः | who is deluded | fr. मूढ *pp. of* √मुह् *a. m. sg. nom.* (**2.107:**) |
| 11 | माम् | Me | fr. अहम् *prn. sg. acc.* |
| 12 | अ-जम् | the unborn | fr. अज *a. m. sg. acc.* (**6.24.3:**) |
| 13 | अ-व्ययं | [and] changeless [आत्मन्] | fr. अव्यय *a. m. sg. acc.* |
| 10 | न अभिजानाति | does not [properly] know | fr. न *in.*; अभि + √ज्ञा *9.P. pr. 3rd sg.* (**5.23.2:** & **5.3:**) |

**वेदाहं समतीतानि वर्तमानानि चार्जुन। भविष्याणि च भूतानि मां तु वेद न कश्चन॥ २६॥**

(वेद अहं समतीतानि, वर्तमानानि च अर्जुन। भविष्याणि च भूतानि, मां तु वेद न कश्चन॥)

अर्जुन, अहं समतीतानि वर्तमानानि च भविष्याणि च भूतानि वेद। न तु कश्-चन मां वेद। (**7.26**) O अर्जुन, I know [all] things past, present, and future. But no one [except the ज्ञानिन् who knows himself or herself as Me] knows Me.

| | | | |
|---|---|---|---|
| 1 | अर्जुन | O अर्जुन | fr. अर्जुन *m. sg. voc.* |
| 2 | अहं | I | fr. अहम् *prn. sg. nom.* |
| 5 | समतीतानि | past | fr. समतीत *pp. of* सम् + अति + √इ *a. n. pl. acc.* |
| 6 | वर्तमानानि च | present | fr. वर्तमान *pr. mid. pt. of* √वृत् *a. n. pl. acc.*; च *in.* |
| 7 | भविष्याणि च | and future | fr. भविष्य *a. n. pl. acc.*; च *in.* |
| 4 | भूतानि | [all] things | fr. भूत *pp. of* √भू *n. pl. acc.* |
| 3 | वेद | know | fr. √विद् *P. perf. 1st sg.* (**5.27:** & **.28:**) |

| | | | |
|---|---|---|---|
| 8 | न तु कश्-चन | but no one [except the ज्ञानिन् who knows himself or herself as Me] | fr. न *in.*; तु *in.*; क-चन *prn. cmpd. m. sg. nom.* (**4.20:**, **2.24:** & **2.27:**) |
| 9 | मां वेद | knows Me | fr. अहम् *prn. sg. acc.*; √विद् *P. perf.* 3rd *sg.* (**5.27:** & **.28:**) |

**इच्छाद्वेषसमुत्थेन द्वन्द्वमोहेन भारत। सर्वभूतानि सम्मोहं सर्गे यान्ति परन्तप॥ २७॥**

(इच्छाद्वेषसमुत्थेन, द्वन्द्वमोहेन भारत। सर्वभूतानि सम्मोहं, सर्गे यान्ति परन्तप॥)

भारत, परन्-तप, सर्गे इच्छा-द्वेष-समुत्थेन द्वन्-द्व-मोहेन सर्व-भूतानि सम्मोहं यान्ति। (7.27)

O अर्जुन, Scorcher of Foes, all beings at birth—because of the delusion occasioned by the [natural] pairs of opposites, [which delusion is] born of requiring and aversion—become completely deluded.

| | | | |
|---|---|---|---|
| 1 | भारत | (अर्जुन) O Descendant of Emperor भरत, (Brilliant) Son of India | fr. भारत *m. sg. voc.* |
| 2 | परन्-तप | (अर्जुन) O Scorcher of Foes | fr. पर-म्-तप *m. sg. voc.* (**2.55:**) |
| 4 | सर्गे | at birth | fr. सर्ग *m. sg. loc.* |
| 8 | इच्छा- | of requiring | |
| 9 | -द्वेष- | and aversion | |
| 7 | -समुत्थेन | [which delusion is] born | fr. इच्छा-द्वेष-समुत्थ *a. m. sg. inst.* |
| 6 | द्वन्-द्व- | occasioned by the [natural] pairs of opposites | |
| 5 | -मोहेन | because of the delusion | fr. द्वन्द्व-मोह *m. sg. inst.* |
| 3 | सर्व-भूतानि | all beings | fr. सर्व-भूत *n. pl. nom.* |
| 10 | सम्मोहं यान्ति | become completely deluded | fr. सम्मोह *m. sg. acc.*; √या *2.P. pr.* 3rd *pl.* |

**येषां त्वन्तगतं पापं जनानां पुण्यकर्मणाम्। ते द्वन्द्वमोहनिर्मुक्ता भजन्ते मां दृढव्रताः॥ २८॥**

(येषां तु अन्तगतं पापं, जनानां पुण्यकर्मणाम्। ते द्वन्द्वमोहनिर्मुक्ताः, भजन्ते मां दृढव्रताः॥)

येषां तु पुण्य-कर्मणां जनानां पापम् अन्त-गतं, ते द्वन्-द्व-मोह-निर्मुक्ताः दृढ-व्रताः मां भजन्ते। (7.28)

But those people of adaptive action whose karmic demerit [and merit] has come to an end—being freed from the delusion occasioned by the [natural] pairs of opposites—and whose commitment is firm, they worship Me [as themselves].

| | | | |
|---|---|---|---|
| 1 | येषां तु | but those | fr. यद् *prn. m. pl. gen.*; तु *in.* |
| 3 | पुण्य-कर्मणां | of adaptive action [whose] | fr. पुण्य-कर्मन् *a. m. pl. gen.* (**3.22:**) |
| 2 | जनानां | people | fr. जन *m. pl. gen.* (**7.12.1.a:**) |
| 4 | पापम् | karmic demerit [and merit] | fr. पाप *n. sg. nom.* |
| 5 | अन्त-गतं | has come to an end | fr. अन्त-गत *a. m. sg. nom.* |

| | | | |
|---|---|---|---|
| 9 | ते | they | fr. तद् *prn. m. pl. nom.* |
| 7 | द्वन्-द्व-मोह- | from the delusion occasioned by the [natural] pairs of opposites | |
| 6 | -निर्मुक्ताः | being freed | fr. द्वन्द्व-मोह-निर्मुक्त *a. m. pl. nom.* |
| 8 | दृढ-व्रताः | and whose commitment is firm | fr. दृढ-व्रत *a. m. pl. nom.* |
| 10 | मां भजन्ते | worship Me [as themselves] | fr. अहम् *prn. sg. acc.*; √भज् *1.Ā. pr. 3rd pl.* |

**जरामरणमोक्षाय मामाश्रित्य यतन्ति ये। ते ब्रह्म तद्विदुः कृत्स्नमध्यात्मं कर्म चाखिलम्॥ २९॥**

(जरामरणमोक्षाय, माम् आश्रित्य यतन्ति ये। ते ब्रह्म तद् विदुः कृत्स्नम्, अध्यात्मं कर्म च अखिलम्॥)

ये माम् आश्रित्य जरा-मरण-मोक्षाय यतन्ति, ते तद् ब्रह्म कृत्स्नम् अध्यात्मं [विदुः], कर्म च अ-खिलं विदुः। (**7.29**)

Those who make effort for freedom from old age and death—taking refuge in Me—they know that ब्रह्मन् (reality; i.e., Me) in entirety [as] अध्यात्म (centered on/existing in the body; i.e., as प्रत्यग्-आत्मन्, themselves) and [they know] all about कर्मन्.

| | | | |
|---|---|---|---|
| 1 | ये | those who | fr. यद् *prn. m. pl. nom.* |
| 7 | माम् | Me | fr. अहम् *prn. sg. acc.* |
| 6 | आश्रित्य | taking refuge in | fr. आश्रित्य *in. pt. of* आ + √श्रि (**6.9:**) |
| 4 | जरा- | from old age | |
| 5 | -मरण- | and death | |
| 3 | -मोक्षाय | for freedom | fr. जरा-मरण-मोक्ष *m. sg. dat.* (**7.10.B:**) |
| 2 | यतन्ति | make effort | fr. √यत् *1.P. pr. 3rd pl.* |
| 8 | ते | they | fr. तद् *prn. m. pl. nom.* |
| 10 | तद् ब्रह्म | that ब्रह्मन् (reality, i.e., Me) | fr. तद् *prn. n. sg. acc.*; ब्रह्मन् *n. sg. acc.* (**3.22:**) |
| 11 | कृत्स्नम् | in entirety | fr. कृत्स्न *a. n. sg. acc.* |
| 12 | अध्यात्मं | [as] अध्यात्म (centered on/existing in the body, i.e., प्रत्यगात्मन्/themselves) | fr. अध्यात्म *n. sg. acc.* (**6.36:**) |
| 14 | कर्म | about कर्मन् | fr. कर्मन् *n. sg. acc.* (**3.22:**) |
| 13 | च अ-खिलं | and all | fr. च *in.*; अखिल *a. n. sg. acc.* |
| 9 | विदुः | know | fr. √विद् *P. perf. 3rd pl.* (**5.28:**) |

**साधिभूताधिदैवं मां साधियज्ञं च ये विदुः। प्रयाणकालेऽपि च मां ते विदुर्युक्तचेतसः॥३०॥**

(साधिभूताधिदैवं मां, साधियज्ञं च ये विदुः। प्रयाणकाले अपि च मां, ते विदुः युक्तचेतसः॥)

ये मां स-अधिभूत-अधिदैवं स-अधियज्ञं च विदुः, युक्त-चेतसः प्रयाण-काले अपि च — ते मां विदुः। **(7.30)**

Those who know Me as अधिभूत (centered on/existing in beings) and अधिदैव (centered on/existing in deities) and as अधियज्ञ (centered on/existing in rituals), whose minds are absorbed in Me even at the moment of death—they know Me.

| | | | |
|---|---|---|---|
| 1 | ये | those who | fr. यद् *prn. m. pl. nom.* |
| 3 | मां | Me | fr. अहम् *prn. sg. acc.* |
| 4 | स-अधिभूत- | as अधिभूत (centered on/existing in beings) | |
| 5 | -अधिदैवं | and अधिदैव (centered on/existing in deities) | fr. स-अधिभूत-अधिदैवम् *in.* (**6.39:**) |
| 6 | स-अधियज्ञं च | and as अधियज्ञ (centered on/existing in rituals) | fr. स-अभियज्ञम् *in.* (**6.39:**); च *in.* |
| 2 | विदुः | know | fr. √विद् *P. perf. 3rd pl.* (**5.28:**) |
| 7 | युक्त-चेतसः | whose minds are absorbed in Me | fr. युक्त-चेतस् *a. m. pl. nom.* (**3.6:**) |
| 10 | प्रयाण- | of death | |
| 9 | -काले | at the moment | fr. प्रयाण-काल *m. sg. loc.* |
| 8 | अपि च | [and] even | fr. अपि *in.*; च *in.* |
| 11 | ते | they | fr. तद् *prn. m. pl. nom.* |
| 12 | मां विदुः | know Me | fr. अहम् *prn. sg. acc.*; √विद् *P. perf. 3rd pl.* (**5.28:**) |

**ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे ज्ञानविज्ञानयोगो नाम सप्तमोऽध्यायः॥७॥**

(ओं तद् सत्। इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे ज्ञानविज्ञानयोगः नाम सप्तमः अध्यायः॥)

ओं तद् सत्। इति श्रीमद्-भगवद्-गीतासु उपनिषत्सु ब्रह्म-विद्यायां योग-शास्त्रे श्री-कृष्ण-अर्जुन-संवादे ज्ञान-विज्ञान-योगः नाम सप्तमः अध्यायः। (7)

ओं (ब्रह्मन्, the witness of all) is that [only] reality. Thus ends the seventh chapter, called "The Topic of Knowledge and Its Assimilation," of the [eighteen chapters of] *Songs of the Glorious Lord*, which is [looked upon as] उपनिषद् [and whose teaching is] in [the form of] a dialogue between श्री कृष्ण and अर्जुन, [the subject matter being] a knowledge of ब्रह्मन् and योग.

| | | | |
|---|---|---|---|
| 1 | ओं | ओम् (ब्रह्मन्, the witness of all,) | fr. ओम् *in.* |
| 2 | तद् सत् | [is] that [only] reality | fr. तद् *prn. n. sg. nom.*; सत् *n. sg. nom.* |
| 3 | इति | (quote-end quote), thus ends | fr. इति *in.* |

| | | | |
|---|---|---|---|
| 11 | श्रीमद्- | of the venerable, the glorious | |
| 12 | -भगवद्- | one having [limitless] glories, Lord | |
| 10 | -गीतासु | in [i.e., of] songs | fr. श्रीमत्-भगवत्-गीता *f. pl. loc.* (**2.43:**) |
| 13 | उपनिषत्सु | [which are/is looked upon as] उपनिषद्, sacred scripture | fr. उपनिषद् *f. pl. loc.* (**6.24:**) |
| 18 | ब्रह्म- | of ब्रह्मन् (reality/सत्) | |
| 17 | -विद्यायां | [and] a knowledge | fr. ब्रह्म-विद्या *f. sg. loc.* |
| 19 | योग-शास्त्रे | [and instruction of] योग (means, discipline, etc.) | fr. योग-शास्त्र *n. sg. loc.* |
| 15 | श्री-कृष्ण- | between Lord कृष्ण | |
| 16 | -अर्जुन- | and अर्जुन | |
| 14 | -संवादे | in [the form of] a dialogue | fr. श्री-कृष्ण-अर्जुन-संवाद *n. sg. loc.* |
| 8 | ज्ञान- | of knowledge | |
| 9 | -विज्ञान- | and [its] assimilation | |
| 7 | -योगः | the topic | fr. ज्ञान-विज्ञान-योग *a. m. sg. nom.* |
| 6 | नाम | by the name, called | fr. नाम *in.* |
| 4 | सप्तमः | the seventh | fr. सप्तम *ordinal a. m. sg. nom.* |
| 5 | अध्यायः | chapter | fr. अध्याय *m. sg. nom.* |

# अथाष्टमोऽध्यायः

**अर्जुन उवाच।**

**किं तद् ब्रह्म किमध्यात्मं किं कर्म पुरुषोत्तम। अधिभूतं च किं प्रोक्तमधिदैवं किमुच्यते॥१॥**

(अर्जुनः उवाच। किं तद् ब्रह्म किम् अध्यात्मं, किं कर्म पुरुषोत्तम। अधिभूतं च किं प्रोक्तम्, अधिदैवं किम् उच्यते॥)

अर्जुनः उवाच। पुरुष-उत्तम, किं तद् ब्रह्म, किम् अध्यात्मं, किं कर्म, अधिभूतं किं प्रोक्तम्, अधिदैवं च किम् उच्यते। (**8.1**)

अर्जुन said: O कृष्ण, what is that ब्रह्मन्? What is अध्यात्म? What is कर्मन्? What is called अधिभूत? And what is called अधिदैव?

| | | | |
|---|---|---|---|
| 1 | अर्जुनः उवाच | अर्जुन said | fr. अर्जुन *m. sg. nom.*; √वच् *P. perf. 3rd sg.* (**5.10.3:**) |
| 2 | पुरुष-उत्तम | (कृष्ण) O Being Who Transcends (the perishable and the imperishable) | fr. पुरुष-उत्तम *m. sg. voc.* |
| 3 | किं तद् ब्रह्म | what is that ब्रह्मन्? | fr. किम् *prn. n. sg. nom.*; तद् *prn. n. sg. nom.*; ब्रह्मन् *n. sg. nom.* |
| 4 | किम् अध्यात्मं | what is अध्यात्म? | fr. किम् *prn. n. sg. nom.*; अधि-आत्म *n. sg. nom.* (**6.36:**) |
| 5 | किं कर्म | what is कर्मन्? | fr. किम् *prn. n. sg. nom.*; कर्मन् *n. sg. nom.* (**3.22:**) |
| 7 | अधिभूतं | अधिभूत | fr. अधि-भूत *n. sg. nom.* (**6.36:**) |
| 6 | किं प्रोक्तम् | what is called? | fr. किम् *prn. n. sg. nom.*; प्रोक्त *pp. of* प्र + √वच् *pt. n. sg. nom.* (**6.6:** & **2.80:**) |
| 9 | अधिदैवं च | and अधिदैव | fr. अधि-दैव *n. sg. nom.* (**6.36:**); च *in.* |
| 8 | किम् उच्यते | what is called? | fr. किम् *prn. n. sg. nom.*; √वच् *ps. pr. 3rd sg.* (**5.37.6:** & **2.3.a:**) |

**अधियज्ञः कथं कोऽत्र देहेऽस्मिन्मधुसूदन। प्रयाणकाले च कथं ज्ञेयोऽसि नियतात्मभिः॥२॥**

(अधियज्ञः कथं कः अत्र, देहे अस्मिन् मधुसूदन। प्रयाणकाले च कथं, ज्ञेयः असि नियतात्मभिः॥)

अत्र अस्मिन् देहे कः कथम् अधियज्ञः, मधु-सूदन। प्रयाण-काले च नियत-आत्मभिः कथं ज्ञेयः असि। (**8.2**)

Here, in this body, what and how [attained] is अधियज्ञ, O कृष्ण? And, at the moment of death, how are those who have mastered their mind to know You?

| | | | |
|---|---|---|---|
| 1 | अत्र | here | fr. अत्र *in.* (**6.19:**) |
| 2 | अस्मिन् देहे | in this body | fr. इदम् *prn. sg. loc.*; देह *m. sg. loc.* |
| 3 | कः | what? | fr. किम् *prn. m. sg. nom.* |
| 4 | कथम् | [and] how [attained]? | fr. कथम् *in.* (**6.19:**) |
| 5 | अधियज्ञः | [is] अधियज्ञ | fr. अधियज्ञ *m. sg. nom.* (**6.36:**) |
| 6 | मधु-सूदन | (कृष्ण) O Destroyer of the Demon मधु | fr. मधु-सूदन *m. sg. voc.* |

| | | | |
|---|---|---|---|
| 9 | प्रयाण- | of death | |
| 8 | -काले | at the moment | fr. प्रयाण-काल *m. sg. loc.* |
| 7 | च | and | fr. च *in.* |
| 11 | नियत-आत्मभिः | [are] those who have mastered their mind | fr. नित्य-आत्मन् *a. m. pl. inst.* (**7.7:**) |
| 10 | कथं | how? | fr. कथम् *in.* (**6.19:**) |
| 12 | ज्ञेयः असि | to know You | fr. ज्ञेय *pot. ps. pt. of* √ज्ञा *pt. m. sg. nom.* (**6.8:**); √अस् *2.P. pr. 2nd sg.* (**5.19.4:**) |

**श्रीभगवानुवाच।**

**अक्षरं ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते। भूतभावोद्भवकरो विसर्गः कर्मसञ्ज्ञितः॥३॥**

(श्रीभगवान् उवाच। अक्षरं ब्रह्म परमं, स्वभावः अध्यात्मम् उच्यते। भूतभावोद्भवकरः, विसर्गः कर्मसञ्ज्ञितः॥)

श्री-भगवान् उवाच। अ-क्षरं परमं ब्रह्म। स्व-भावः अध्यात्मम् उच्यते। भूत-भाव-उद्भव-करः विसर्गः कर्म-सञ्ज्ञितः। (**8.3**)

The Lord said: ब्रह्मन् (reality) is changeless and limitless. अध्यात्म (the self—centered on the body) is said to be of its [ब्रह्मन्-'s] nature. What is called कर्मन् is [an act of] offering [in what should be a यज्ञ] [and its फल/result] that causes the arising of existence [i.e., embodiment] of beings.

| | | | |
|---|---|---|---|
| 1 | श्री-भगवान् उवाच | the Lord said | fr. श्री-भगवत् *m. sg. nom.*; √वच् *P. perf. 3rd sg.* (**5.10.3:**) |
| 3 | अ-क्षरं | changeless | fr. अक्षर *a. n. sg. nom.* |
| 4 | परमं | [and] limitless | fr. परम *spv. a. n. sg. nom.* (**6.25: & .27:**) |
| 2 | ब्रह्म | ब्रह्मन् (reality) [is] | fr. ब्रहम् *n. sg. nom.* (**3.22:**) |
| 7 | स्व-भावः | [of] its [ब्रह्मन्-'s] nature | fr. स्व-भाव *m. sg. nom.* |
| 5 | अध्यात्मम् | अध्यात्म (the self – centered on the body) | fr. अधि-आत्म *n. sg. nom.* (**6.36:**) (**7.7.1:**) |
| 6 | उच्यते | is said to be | fr. √वच् *ps. pr. 3rd sg.* (**5.37.6: & 2.3.a:**) |
| 11 | भूत-भाव- | of existence [i.e., embodiment] of beings | |
| 10 | -उद्भव-करः | [and its फल] that causes the arising | fr. भूत-भाव-उद्भव-कर *a. m. sg. nom.* |
| 9 | विसर्गः | [an act of] offering [in what should be a यज्ञ] | fr. विसर्ग *m. sg. nom.* |
| 8 | कर्म-सञ्ज्ञितः | what is called कर्मन् [is] | fr. कर्म-सञ्ज्ञित *a. m. sg. nom.* |

**अधिभूतं क्षरो भावः पुरुषश्चाधिदैवतम्। अधियज्ञोऽहमेवात्र देहे देहभृतां वर॥ ४॥**

(अधिभूतं क्षरः भावः, पुरुषः च अधिदैवतम्। अधियज्ञः अहम् एव अत्र, देहे देहभृतां वर॥)

क्षरः भावः अधिभूतम्। पुरुषः [हिरण्यगर्भः इत्यर्थः] च अधिदैवतम्। अत्र देहे अधियज्ञः अहम् एव, देह-भृतां वर। (**8.4**)

अधिभूत (the world—centered on beings/things) is perishable existence. And अधिदैवत (अधिदैव, the chief deity—centered on deities) is पुरुष (the cosmic person, हिरण्य-गर्भ). अधियज्ञ (centered on यज्ञ) here, in the body, is Me alone, O Exalted among the Embodied Ones.

| | | | |
|---|---|---|---|
| 2 | क्षरः भावः | [is] perishable existence | fr. क्षर *a. m. sg. nom.*; भाव *m. sg. nom.* |
| 1 | अधिभूतम् | अधिभूत (the world—centered on beings/things) | fr. अधि-भूत *n. sg. nom.* (**6.36:**) |
| 4 | पुरुषः | [is] पुरुष (the cosmic person, called हिरण्यगर्भ) | fr. पुरुष *m. sg. nom.* |
| 3 | च अधिदैवतम् | and अधिदैवत (अधिदैव the chief deity—centered on deities) | fr. च *in.*; अधिदैवत *n. sg. nom.* (**6.36:**) |
| 6 | अत्र देहे | here in the body | fr. अत्र *in.* (**6.19:**); देह *m. sg. loc.* |
| 5 | अधियज्ञः | अधियज्ञ (centered on यज्ञ) | fr. अधि-यज्ञ *m. sg. nom.* (**6.36:**) |
| 7 | अहम् एव | [is] Me alone | fr. अहम् *prn. sg. nom.*; एव *in.* (**6.19:**) |
| 9 | देह-भृतां | among the Embodied Ones | fr. देह-भृत् *m. pl. loc.* |
| 8 | वर | O Exalted | fr. वर *m. sg. voc.* |

**अन्तकाले च मामेव स्मरन्मुक्त्वा कलेवरम्। यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः॥ ५॥**

(अन्तकाले च माम् एव, स्मरन् मुक्त्वा कलेवरम्। यः प्रयाति सः मद्भावं, याति न अस्ति अत्र संशयः॥)

अन्त-काले च माम् एव स्मरन्, कलेवरं मुक्त्वा, यः प्रयाति, सः मद्-भावं याति। अत्र संशयः न अस्ति। (**8.5**)

Remembering Me alone at the moment of death, having given up the body, the one who [as though] departs [i.e., from the standpoint of the ज्ञानिन्-'s subtle mind dissipating upon leaving the physical body]—that one attains My nature [i.e., complete freedom, called मोक्ष]. In this there is no doubt.

| | | | |
|---|---|---|---|
| 3 | अन्त-काले च | at the moment of death | fr. अन्त-काल *m. sg. loc.*; च *in.* |
| 2 | माम् एव | Me alone | fr. अहम् *prn. sg. acc.*; एव *in.* (**6.19:**) |
| 1 | स्मरन् | remembering | fr. स्मरत् *pr. pt. of* √स्मृ *pt. m. sg. nom.* |
| 4 | कलेवरं मुक्त्वा | having given up the body | fr. कलेवर *n. sg. acc.*; मुक्त्वा *in. pt. of* √मुच् (**2.80:**) |
| 5 | यः प्रयाति | the one who [as though] departs | fr. यद् *prn. m. sg. nom.*; प्र + √या *2.P. pr. 3rd sg.* |

| | | | |
|---|---|---|---|
| 6 | सः | that one | fr. तद् *prn. m. sg. nom.* |
| 8 | मद्-भावं | My nature [i.e., complete freedom, called मोक्ष] | fr. मद्-भाव *m. sg. acc.* (**2.24:** & **.43:**) |
| 7 | याति | attains | fr. √या *2.P. pr. 3rd sg.* |
| 9 | अत्र | in this | fr. अत्र *in.* (**6.19:**) |
| 10 | संशयः न अस्ति | there is no doubt | fr. संशय *m. sg. nom.*; न *in.*; √अस् *2.P. pr. 3rd sg.* |

**यं यं वापि स्मरन्भावं त्यजत्यन्ते कलेवरम्। तं तमेवैति कौन्तेय सदा तद्भावभावितः॥६॥**

(यं यं वा अपि स्मरन् भावं, त्यजति अन्ते कलेवरम्। तं तम् एव एति कौन्तेय, सदा तद्भावभावितः॥)

कौन्तेय, अन्ते कलेवरं त्यजति, यं यं वा अपि भावं स्मरन्, सदा तद्-भाव-भावितः [सन्] तं तम् एव एति। (**8.6**)

O अर्जुन, [when] in the end one gives up the body, whatever thing one [naturally] remembers—always having been made in that state [of obsession through constant contemplation of whatever is ultimate to one]—that alone one reaches [as a positive or negative result concerning these obsessions, depending on whether one acted upon these obsessions in keeping with धर्म or not].

| | | | |
|---|---|---|---|
| 1 | कौन्तेय | (अर्जुन) O Son of कुन्ती | fr. कौन्तेय *m. sg. voc.* |
| 2 | अन्ते | [when] in the end | fr. अन्त *n. sg. loc.* |
| 3 | कलेवरं त्यजति | one gives up the body | fr. कलेवर *n. sg. acc.*; √त्यज् *1.P. pr. 3rd sg.* |
| 4 | यं यं वा अपि | whatever | fr. यद् *prn. m. sg. acc.* (**7.6.B.2.e:**); वा *in.*; अपि *in.* |
| 5 | भावं स्मरन् | thing one [naturally] remembers | fr. भाव *m. sg. acc.*; स्मरत् *pr. pt. of* √स्मृ *pt. m. sg. nom.* |
| 6 | सदा | always | fr. सदा *in.* (**6.19:**) |
| 8 | तद्-भाव- | in that state [of obsession through constant contemplation of whatever is ultimate to one] | |
| 7 | -भावितः | having been made | fr. तद्-भाव-भावित *a. m. sg. nom.* |
| 9 | तं तम् एव | that alone | fr. तद् *prn m. sg. acc.* (**7.6.B.2.e:**); एव *in.* (**6.19:**) |
| 10 | एति | one reaches | fr. √इ *2.P. pr. 3rd sg.* (**5.3:**) |

**तस्मात्सर्वेषु कालेषु मामनुस्मर युध्य च। मय्यर्पितमनोबुद्धिर्मामेवैष्यस्यसंशयम्॥ ७॥**

(तस्मात् सर्वेषु कालेषु, माम् अनुस्मर युध्य च। मयि अर्पितमनोबुद्धिः, माम् एव एष्यसि असंशयम्॥)

तस्मात् सर्वेषु कालेषु माम् अनुस्मर युध्य च। मयि अर्पित-मनस्-बुद्धिः माम् एव अ-संशयम् एष्यसि। (8.7)

Therefore, please remember Me [as presented in this teaching] at all times and fight [O अर्जुन]. [Being] one whose mind and intellect are both offered unto Me [the Lord—as प्रकृति/nature, the cosmic order], without a doubt you will reach Me [as ब्रह्मन्/reality] alone.

| | | | |
|---|---|---|---|
| 1 | तस्मात् | therefore | fr. तस्मात् *in.* |
| 3 | सर्वेषु कालेषु | at all times | fr. सर्व *prn. a. m. pl. loc.* (**4.16.2:**); काल *m. pl. loc.* |
| 2 | माम् अनुस्मर | please remember Me [as presented in this teaching] | fr. अहम् *prn. sg. acc.*; अनु + √स्मृ *1.P. impv. 2nd sg.* |
| 4 | युध्य च | and fight [O अर्जुन] | fr. √युध् *4.P. impv. 2nd sg.*; च *in.* |
| 7 | मयि | unto Me [the Lord—as प्रकृति/nature, the cosmic order] | fr. अहम् *prn. sg. loc.* |
| 6 | अर्पित- | are both offered | |
| 5 | -मनस्-बुद्धिः | [being] one whose mind and intellect | fr. अर्पित-मनस्-बुद्धि *a. f. sg. nom.* (**2.24:** & **.33:**) |
| 9 | माम् एव | Me [as ब्रह्मन्/reality] alone | fr. अहम् *prn. sg. acc.*; एव *in.* (**6.19:**) |
| 8 | अ-संशयम् एष्यसि | without a doubt you will reach | fr. असंशय *in.* (**7.8.8:**); √इ *P. fut. 2nd sg.* (**5.33:**) |

**अभ्यासयोगयुक्तेन चेतसा नान्यगामिना। परमं पुरुषं दिव्यं याति पार्थानुचिन्तयन्॥८॥**
**कविं पुराणमनुशासितारमणोरणीयांसमनुस्मरेद्यः।**
**सर्वस्य धातारमचिन्त्यरूपमादित्यवर्णं तमसः परस्तात्॥९॥**

(अभ्यासयोगयुक्तेन, चेतसा नान्यगामिना। परमं पुरुषं दिव्यं, याति पार्थ अनुचिन्तयन्॥
कविं पुराणम् अनुशासितारम्, अणोः अणीयांसम् अनुस्मरेत् यः। सर्वस्य धातारम् अचिन्त्यरूपम्, आदित्यवर्णं तमसः परस्तात्॥)

पार्थ, अभ्यास-योग-युक्तेन न-अन्य-गामिना [च] चेतसा अनुचिन्तयन्, यः कविं, पुराणम्, अनुशासितारम्, अणोः अणीयांसं, सर्वस्य धातारम्, अ-चिन्त्य-रूपम्, आदित्य-वर्णं, तमसः परस्तात् अनुस्मरेत् — परमं दिव्यं पुरुषं याति। (**8.8-9**)

O अर्जुन, accordingly [i.e., with My teaching] reflecting with a mind endowed with the योग consisting of continued practice [study and contemplation] and not inclined to go elsewhere [to anything as not-Me], the one who would contemplate [continuously and at the moment of death] the कवि (the all-knowing Lord)—the one who is always there, the one who accordingly [through धर्म] rules, subtler than the subtle [i.e., dimensionless], the dispenser of all [results of action], whose form cannot be comprehended, whose appearance is [illuminating] like the sun and beyond darkness [i.e., ignorance]—that one attains the limitless, effulgent पुरुष [Me].

| | | | |
|---|---|---|---|
| 1 | पार्थ | (अर्जुन) O Son of पृथा | fr. पार्थ *m. sg. voc.* |
| 5 | अभ्यास- | consisting of continued practice [–study and contemplation] | |
| 4 | -योग-युक्तेन | endowed with the योग | fr. अभ्यास-योग-युक्त *a. n. sg. inst.* |
| 6 | न-अन्य-गामिना [च] | [and] not inclined to go elsewhere [to anything as not-Me] | fr. न-अन्य-गामिन् *a. n. sg. inst.* (**6.33:** & **3.15:**) |
| 3 | चेतसा | with a mind | fr. चेतस् *n. sg. inst.* (**3.6:**) (**7.9:**) |
| 2 | अनुचिन्तयन् | accordingly [to My teaching] reflecting | fr. अनुचिन्तयत् *pr. pt. of* अनु + √चिन्त् *a. m. sg. nom.* |
| 7 | यः | the one who | fr. यद् *prn. m. sg. nom.* |
| 9 | कविं | the कवि (the all-knowing Lord) | fr. कवि *m. sg. acc.* |
| 10 | पुराणम् | the one who is always there | fr. पुराण *a. m. sg. acc.* |
| 11 | अनुशासितारम् | the one who accordingly [through धर्म] rules | fr. अनुशासितृ *a. m. sg. acc.* (**3.38:**) |
| 13 | अणोः | than the subtle | fr. अणु *n. sg. abl.* (**7.11.2.a:**) |
| 12 | अणीयांसं | subtler [i.e., dimension-less] | fr. अणीयस् *cpv. a. m. sg. acc.* (**6.25:** & **3.14:**) |
| 14 | सर्वस्य धातारम् | the dispenser of all [results of action] | fr. सर्व *prn. a. n. sg. gen.*; धातृ *m. sg. acc.* (**3.38:**) |

| | | | |
|---|---|---|---|
| 16 | अ-चिन्त्य- | cannot be comprehended | |
| 15 | -रूपम् | whose form | fr. अचिन्त्य-रूप *a. m. sg. acc.* |
| 18 | आदित्य- | is [illuminating] like the sun | |
| 17 | -वर्णं | whose appearance | fr. आदित्य-वर्ण *a. m. sg. acc.* |
| 20 | तमसः | darkness [i.e., ignorance] | fr. तपस् *n. sg. gen.* |
| 19 | परस्तात् | [and] beyond | fr. परस्तात् *in.* (**6.19:** & **.16:**) |
| 8 | अनुस्मरेत् | would contemplate [continuously and at the moment of death] | fr. अनु +√स्मृ *1.P. pot. 3rd sg.* |
| 22 | परमं दिव्यं | the limitless effulgent | fr. परम *spv. a. m. sg. acc.*; दिव्य *a. m. sg. acc.* |
| 23 | पुरुषं | पुरुष [Me] | fr. पुरुष *m. sg. acc.* |
| 21 | याति | that one attains | fr. √या *2.P. pr. 3rd sg.* |

**प्रयाणकाले मनसाचलेन भक्त्या युक्तो योगबलेन चैव।**
**भ्रुवोर्मध्ये प्राणमावेश्य सम्यक्स तं परं पुरुषमुपैति दिव्यम्॥१०॥**

(प्रयाणकाले मनसा अचलेन, भक्त्या युक्तः योगबलेन च एव। भ्रुवोः मध्ये प्राणम् आवेश्य सम्यक्, सः तं परं पुरुषम् उपैति दिव्यम्॥)

प्रयाण-काले अ-चलेन मनसा भक्त्या युक्तः योग-बलेन च एव, भ्रुवोः मध्ये प्राणं सम्यक् आवेश्य सः तं परं दिव्यं पुरुषम् उपैति। (**8.10**)

At the moment of death, with a steady mind endowed with devotion and, indeed, with [mental] strength through योग (continued practice of contemplation), properly placing [as a visualization] the [last] breath between the [eye-]brows, one attains [by being, not by movement] that limitless, effulgent पुरुष [Me].

| | | | |
|---|---|---|---|
| 1 | प्रयाण-काले | at the moment of death | fr. प्रयाण-काल *m. sg. loc.* |
| 2 | अ-चलेन मनसा | with a steady mind | fr. अचल *a. n. sg. inst.*; मनस् *n. sg. inst.* (**3.6:**) |
| 3 | भक्त्या युक्तः | endowed with devotion | fr. भक्ति *f. sg. inst.*; युक्त *pp. of* √युज् *a. m. sg. nom.* (**2.81:**) |
| 5 | योग-बलेन | with [mental] strength through योग (continued practice of contemplation) | fr. योग-बल *n. sg. inst.* |
| 4 | च एव | and indeed | fr. च *in.*; एव *in.* (**6.19:**) |
| 8 | भ्रुवोः मध्ये | between the [eye] brows | fr. भ्रू *f. du. gen.* (**3.36:**); मध्य *n. sg. loc.* |
| 7 | प्राणं | the [last] breath | fr. प्राण *m. sg. acc.* |
| 6 | सम्यक् आवेश्य | properly placing [as a visualization] | fr. सम्यक् *in.*; आवेश्य *in. pt. of* आ + √विश् |

| | | | |
|---|---|---|---|
| 9 | सः | one | fr. तद् *prn. m. sg. nom.* |
| 11 | तं परं | that limitless | fr. तद् *prn. m. sg. acc.*; पर *prn. a. m. sg. acc.* |
| 12 | दिव्यं पुरुषम् | effulgent पुरुष [Me] | fr. दिव्य *a. m. sg. acc.*; पुरुष *m. sg. acc.* |
| 10 | उपैति | attains [by being, not by movement] | fr. उप +√इ *2.P. pr.* $3^{rd}$ *sg.* (**5.3:**) |

**यदक्षरं वेदविदो वदन्ति विशन्ति यद्यतयो वीतरागाः।**
**यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं सङ्ग्रहेण प्रवक्ष्ये॥११॥**

(यद् अक्षरं वेदविदः वदन्ति, विशन्ति यद् यतयः वीतरागाः। यद् इच्छन्तः ब्रह्मचर्यं चरन्ति, तद् ते पदं सङ्ग्रहेण प्रवक्ष्ये॥ )

यद् अ-क्षरं, वेद-विदः वदन्ति, यद् वीत-रागाः यतयः विशन्ति, यद् इच्छन्तः ब्रह्म-चर्यं चरन्ति — तद् पदं ते (=तुभ्यं) सङ्ग्रहेण प्रवक्ष्ये।

(**8.11**) I will briefly tell you about that end—which is imperishable, which the knowers of the वेद declare, which यति-s (renunciates) who are free from longing enter, and desiring which they take to ब्रह्म-चर्य (living for only attaining ब्रह्मन्).

| | | | |
|---|---|---|---|
| 5 | यद् अ-क्षरं | which is imperishable | fr. यद् *prn. n. sg. acc.*; अक्षर *a. n. sg. acc.* |
| 6 | वेद-विदः | [which] the knowers of the वेद | fr. वेद-विद् *a. m. pl. nom.* (**6.24:** & **3.6:**) |
| 7 | वदन्ति | declare | fr. √वद् *1.P. pr.* $3^{rd}$ *pl.* |
| 8 | यद् | which | fr. यद् *prn. n. sg. acc.* |
| 10 | वीत-रागाः | who are free from longing | fr. वीत-राग *a. m. pl. nom.* |
| 9 | यतयः | यति-s (renunciates) | fr. यति *m. pl. nom.* |
| 11 | विशन्ति | enter | fr. √विश् *6.P. pr.* $3^{rd}$ *pl.* |
| 12 | यद् इच्छन्तः | [and] desiring which | fr. यद् *prn. n. sg. acc.*; इच्छत् *pr. pt. of* √इष् *pt. m. pl. nom.* (**5.17.3:**) |
| 14 | ब्रह्म-चर्यं | ब्रह्मचर्य (living for only attaining ब्रह्मन्) | fr. ब्रह्म-चर्य *n. sg. acc.* |
| 13 | चरन्ति | they take to | fr. √चर् *1.P. pr.* $3^{rd}$ *pl.* |
| 4 | तद् पदं | about that end | fr. तद् *prn. n. sg. acc.*; पद *n. sg. acc.* |
| 3 | ते (=तुभ्यं) | [to] you | fr. त्वम् *prn. sg. dat.* (**7.10.A.1:**) |
| 1 | सङ्ग्रहेण | briefly | fr. सङ्ग्रहेण *in.* (**2.92:**) (**7.9.14:**) |
| 2 | प्रवक्ष्ये | I will tell | fr. प्र + √वच् *Ā. fut.* $1^{st}$ *sg.* (**2.80:** & **.101:**) |

**सर्वद्वाराणि संयम्य मनो हृदि निरुध्य च। मूर्ध्न्याधायात्मनः प्राणमास्थितो योगधारणाम्॥१२॥**
**ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन्। यः प्रयाति त्यजन्देहं स याति परमां गतिम्॥१३॥**
(सर्वद्वाराणि संयम्य, मनः हृदि निरुध्य च। मूर्ध्नि आधाय आत्मनः प्राणम्, आस्थितः योगधारणाम्॥
ओम् इति एकाक्षरं ब्रह्म, व्याहरन् माम् अनुस्मरन्। यः प्रयाति त्यजन् देहं, सः याति परमां गतिम्॥ )
सर्व-द्वाराणि संयम्य, मनः हृदि निरुध्य च, आत्मनः प्राणं मूर्ध्नि आधाय, योग-धारणाम् आस्थितः [सन्], ओम् इति एक-अक्षरं ब्रह्म व्याहरन्, माम् अनुस्मरन्, देहं त्यजन्, यः प्रयाति, सः परमां गतिं [संसारे] याति। (**8.12-13**)
Closing all the gates [i.e., the sense organs] and [as a visualization] withdrawing the mind into the heart; placing one's breath at [the top of] the head and remaining [there] holding [the last breath] by [the strength of] योग; chanting the single syllable "ओम्," which is ब्रह्मन्; remembering Me accordingly [through My teaching], [while] giving up the body—the one [योगिन् who is not yet a स्थित-प्रज्ञ] who departs [by movement, as it were]—that one reaches the most exalted end [within संसार; i.e., ब्रह्म-लोक, the seventh heaven, where one may be taught ब्रह्म-विद्या and thus freed].

| | | | |
|---|---|---|---|
| 2 | सर्व-द्वाराणि | all the gates [i.e., the sense organs] | fr. सर्व-द्वार *n. pl. acc.* |
| 1 | संयम्य | closing | fr. संयम्य *in. pt. of* सम् + √यम् (**6.9:** & **2.54:**) |
| 4 | मनः | the mind | fr. मनस् *n. sg. acc.* (**3.6:**) |
| 5 | हृदि | into the heart | fr. हृद् *n. sg. loc.* (**3.6:**) |
| 3 | निरुध्य च | and [as a visualization] withdrawing | fr. निरुध्य *in. pt. of* नि + √रुध् (**6.9:**); च *in.* |
| 7 | आत्मनः प्राणं | one's breath | fr. आत्मन् *m. sg. gen.* (**4.14:**); प्राण *m. sg. acc.* |
| 8 | मूर्ध्नि | at [the top of] the head | fr. मूर्धन् *m. sg. loc.* (**3.20:**) |
| 6 | आधाय | placing | fr. आधाय *in. pt. of* आ + √धा (**6.9:**) |
| 10 | योग-धारणाम् | holding [the last breath] by [the strength of] योग | fr. योग-धारणा *f. sg. acc.* |
| 9 | आस्थितः [सन्] | [and] remaining [there] | fr. आस्थित *pp. of* आ + √स्था *pt. m. sg. nom.* (**6.6:**) |
| 13 | ओम् इति | "ओम्" | fr. ओम् *in.*; इति *in.* |
| 12 | एक-अक्षरं | the single syllable | fr. एक-अक्षर *n. sg. acc.* |
| 14 | ब्रह्म | which is ब्रह्मन् | fr. ब्रह्मन् *n. sg. acc.* (**3.22:**) |
| 11 | व्याहरन् | chanting | fr. व्याहरत् *pr. pt. of* वि + आ + √हृ *pt. m. sg. nom.* (**3.12:**) |
| 15 | माम् अनुस्मरन् | remembering Me accordingly [to My teaching] | fr. अहम् *prn. sg. acc.*; अनुस्मरत् *pr. pt. of* अनु + √स्मृ *pt. m. sg. nom.* (**3.12:**) |
| 16 | देहं त्यजन् | (while) giving up the body | fr. देह *m. sg. acc.*; त्यजत् *pr. pt. of* √त्यज् *pt. m. sg. nom.* (**3.12:**) |

| | | | |
|---|---|---|---|
| 17 | यः प्रयाति | the one [योगिन् who is not yet a स्थितप्रज्ञ] who departs [by movement as it were] | fr. यद् *prn. m. sg. nom.*; प्र +√या *2.P. pr. 3rd sg.* |
| 18 | सः | that one | fr. तद् *m. sg. nom.* |
| 20 | परमां गतिं | the most exalted end [within संसार, i.e., ब्रह्म-लोक where one may be taught ब्रह्म-विद्या and thus freed] | fr. परमा *prn. a. f. sg. acc.*; गति *f. sg. acc.* |
| 19 | याति | reaches | fr. √या *2.P. pr. 3rd sg.* |

**अनन्यचेताः सततं यो मां स्मरति नित्यशः। तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः॥१४॥**

(अनन्यचेताः सततं, यः मां स्मरति नित्यशः। तस्य अहं सुलभः पार्थ, नित्ययुक्तस्य योगिनः॥)

पार्थ, यः अन्-अन्य-चेताः मां स-ततं नित्यशः स्मरति, तस्य नित्य-युक्तस्य योगिनः अहं सु-लभः। (**8.14**)

[—Whereas, the स्थित-प्रज्ञ] O अर्जुन, the one whose mind [sees] no other [than Me everywhere], remembering Me continually and for a long time—for that योगिन् who is always [even while living] united [in Me], I am easily gained.

| | | | |
|---|---|---|---|
| 1 | पार्थ | (अर्जुन) O Son of पृथा | fr. पार्थ *m. sg. voc.* |
| 2 | यः | the one | fr. यद् *prn. m. sg. nom.* |
| 3 | अन्-अन्य-चेताः | whose mind [sees] no other [than Me everywhere] | fr. अनन्य-चेतस् *a. m. sg. nom.* (**3.6.i:**) |
| 5 | मां | Me | fr. अहम् *prn. sg. acc.* |
| 6 | स-ततं | continually | fr. स-ततम् *in.* |
| 7 | नित्यशः | and for a long time | fr. नित्यशस् *in.* (**6.19:**) |
| 4 | स्मरति | remembering | fr. √स्मृ *1.P. pr. 3rd sg.* |
| 8 | तस्य | for that | fr. तद् *prn. m. sg. gen.* |
| 10 | नित्य-युक्तस्य | who is always [even while living] united [in Me] | fr. नित्य-युक्त *a. m. sg. gen.* |
| 9 | योगिनः | योगिन् | fr. योगिन् *m. sg. gen.* (**3.15:**) |
| 11 | अहं | I | fr. अहम् *prn. sg. nom.* |
| 12 | सु-लभः | [am] easily gained | fr. सु-लभ *a. m. sg. nom.* |

**मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम्। नाप्नुवन्ति महात्मानः संसिद्धिं परमां गताः॥१५॥**
(माम् उपेत्य पुनर्जन्म, दुःखालयम् अशाश्वतम्। न आप्नुवन्ति महात्मानः, संसिद्धिं परमां गताः॥)
महा-आत्मानः माम् उपेत्य, दुःख-आलयम् अ-शाश्वतं पुनर्-जन्म न आप्नुवन्ति। [ते] परमां संसिद्धिं गताः। (**8.15**)
The महात्मन्-s (people who are wise), attaining Me, do not gain another birth [i.e., do not go to another लोक], which is the abode of misery and is ever changing [and therefore finite]. They have gained [while living] the limitless success [called मोक्ष].

| | | | |
|---|---|---|---|
| 1 | महा-आत्मानः | the महात्मन्-s (people who are wise) | fr. महा-आत्मन् *a. m. pl. nom.* (**3.22:**) |
| 2 | माम् उपेत्य | attaining Me | fr. अहम् *prn. sg. acc.*; उपेत्य *in pt. of* उप + √इ (**6.9:**) |
| 5 | दुःख-आलयम् | which is the abode of misery | fr. दुःख-आलय *m. sg. acc.* |
| 6 | अ-शाश्वतं | [and] is ever changing [and therefore finite] | fr. अशाश्वत *a. n. sg. acc.* |
| 4 | पुनर्-जन्म | another birth [i.e., there is no going to another लोक] | fr. पुरर्-जन्मन् *n. sg. acc.* (**3.22:**) |
| 3 | न आप्नुवन्ति | do not gain | fr. न *in.*; √आप् *5.P. pr. 3rd pl.* (**5.21.2:**) |
| 8 | परमां संसिद्धिं | the limitless success [called मोक्ष] | fr. परमा *spv. a. f. sg. acc.*; संसिद्धि *f. sg. acc.* (**7.8.1:**) |
| 7 | गताः | [they] have gained [while living] | fr. गत *pp. of* √गम् *pt. m. pl. nom.* |

**आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन। मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते॥१६॥**
(आ ब्रह्मभुवनात् लोकाः, पुनरावर्तिनः अर्जुन। माम् उपेत्य तु कौन्तेय, पुनर्जन्म न विद्यते॥)
अर्जुन, आ ब्रह्म-भुवनात् लोकाः पुनर्-आवर्तिनः । कौन्तेय, मां तु उपेत्य पुनर्-जन्म न विद्यते। (**8.16**)
O अर्जुन, [all] worlds, including Lord ब्रह्मा-'s world (the highest abode in संसार, called ब्रह्म-लोक), are that from which there is a return [a rebirth] [unless taught ब्रह्म-विद्या in ब्रह्म-लोक by Lord ब्रह्मा]; whereas, O अर्जुन, attaining Me, there is no rebirth.

| | | | |
|---|---|---|---|
| 1 | अर्जुन | O अर्जुन | fr. अर्जुन *m. sg. voc.* |
| 3 | आ ब्रह्म-भुवनात् | including Lord ब्रह्मा-'s world (the highest abode in संसार, called ब्रह्मलोक) | fr. आ *in.* (**6.15:**); ब्रह्म-भुवन *n. sg. abl.* |
| 2 | लोकाः | [all] worlds | fr. लोक *m. pl. nom.* |
| 4 | पुनर्-आवर्तिनः | [are] that from which there is a return [re-birth] | fr. पुनर्-आवर्तिन् *a. m. pl. nom.* |

| | | | |
|---|---|---|---|
| 6 | कौन्तेय | (अर्जुन) O Son of कुन्ती | fr. कौन्तेय *m. sg. voc.* |
| 8 | मां | Me | fr. अहम् *prn. sg. acc.* |
| 5 | तु | whereas | fr. तु *in.* |
| 7 | उपेत्य | attaining | fr. उपेत्य *in pt. of* उप + √इ (**6.9:**) |
| 10 | पुनर्-जन्म | re-birth | fr. पुरर्-जन्मन् *n. sg. nom.* (**3.22:**) |
| 9 | न विद्यते | there is no | fr. न *in.*; √विद् *ps. pr. 3rd sg.* |

**सहस्रयुगपर्यन्तमहर्यद् ब्रह्मणो विदुः। रात्रिं युगसहस्रान्तां तेऽहोरात्रविदो जनाः॥१७॥**

(सहस्रयुगपर्यन्तम्, अहः यद् ब्रह्मणः विदुः। रात्रिं युगसहस्रान्तां, ते अहोरात्रविदः जनाः॥)

ते जनाः अहः-रात्र-विदः यद् ब्रह्मणः अहः सहस्र-युग-पर्यन्तं रात्रिं [च] युग-सहस्र-अन्तां विदुः। (**8.17**)

Those people who are knowers of day and night know that a day of Lord ब्रह्मा is that lasting thousands of युग-s [i.e., four thousand युग-s; a thousand महा-युग-s = 4.32 billion human years] and [His] night is that [also] lasting thousands of युग-s [i.e., four thousand युग-s].

| | | | |
|---|---|---|---|
| 1 | ते जनाः | those people | fr. तद् *prn. m. pl. nom.*; जन *m. pl. nom.* |
| 3 | अहः- | of day | |
| 4 | -रात्र- | and night | |
| 2 | -विदः | who are knowers | fr. अहन्-रात्र-विद् *a. m. pl. nom.* (**3.21:** & **2.24:** & **2.33:** & **6.24:**) |
| 7 | यद् | [is] that | fr. यद् *prn. n. sg. acc.* |
| 6 | ब्रह्मणः अहः | a day of Lord ब्रह्मा | fr. ब्रह्मन् *m. sg. gen.* (**3.22:** & **2.92:**); अहन् *n. sg. acc.* (**3.21.a:**) |
| 9 | सहस्र-युग- | [four] thousands of युग-s [i.e., a thousand महायुग-s = 4.32 billion human years] | |
| 8 | -पर्यन्तं | lasting | fr. सहस्र-युग-पर्यन्त *a. n. sg. acc.* |
| 10 | रात्रिं [च] | [and] [His] night [is that] | fr. रात्रि *f. sg. acc.* |
| 12 | युग-सहस्र- | [four] thousands of युग-s | |
| 11 | -अन्तां | lasting | fr. युग-सहस्र-अन्ता *a. f. sg. acc.* |
| 5 | विदुः | know [that] | fr. √विद् *P. perf. 3rd pl.* (**5.28:**) |

**अव्यक्ताद्व्यक्तयः सर्वाः प्रभवन्त्यहरागमे। रात्र्यागमे प्रलीयन्ते तत्रैवाव्यक्तसञ्ज्ञके॥१८॥**

(अव्यक्तात् व्यक्तयः सर्वाः, प्रभवन्ति अहरागमे। रात्र्यागमे प्रलीयन्ते, तत्र एव अव्यक्तसञ्ज्ञके॥)

अहर्-आगमे अ-व्यक्तात् सर्वाः व्यक्तयः प्रभवन्ति। रात्रि-आगमे तत्र एव अ-व्यक्त-सञ्ज्ञके [ताः] प्रलीयन्ते। (**8.18**)

At the coming of the day [for Lord ब्रह्मा], all व्यक्ति-s (individuals/things) [by force of past कर्मन्] manifest [in due time] from the unmanifest. At the coming of the night [they, unless freed by knowledge,] [will have] resolve[d] [back] into that called the अव्यक्त (unmanifest) itself.

| | | | |
|---|---|---|---|
| 1 | अहर्-आगमे | at the coming of the day [for Lord ब्रह्मा, i.e., हिरण्यगर्भ] | fr. अहन्-आगम *m. sg. loc.* (**3.21.a:** & **2.24:** & **2.34:**) |
| 4 | अ-व्यक्तात् | from the unmanifest | fr. अव्यक्त *pp. of* वि + √अञ्ज् *n. sg. abl.* (**6.6:** & **2.81:**) |
| 2 | सर्वाः व्यक्तयः | all व्यक्ति-s (individuals/things) | fr. सर्व *prn. a. f. pl. nom.* (**4.16.2:**); व्यक्ति *f. pl. nom.* |
| 3 | प्रभवन्ति | [by force of past कर्मन्] manifest [in due time] | fr. प्र +√भू *1.P. pr. $3^{rd}$ pl.* (**5.3:** & **2.3:** & **2.71:**) |
| 5 | रात्रि-आगमे | at the coming of the night [they, unless freed by knowledge,] | fr. रात्रि-आगमे *m. sg. loc.* |
| 7 | तत्र एव | into that itself | fr. तत्र *in.* (**6.19:**); एव *in.* (**6.19:**) |
| 9 | अ-व्यक्त- | the अव्यक्त (unmanifest) | |
| 8 | -सञ्ज्ञके | called | fr. अव्यक्त-सञ्ज्ञक *a. m. sg. loc.* |
| <u>6</u> | [ताः] प्रलीयन्ते | [will have] resolve[d] [back] | fr. प्र +√ली *ps. pr. $3^{rd}$ pl.* |

**भूतग्रामः स एवायं भूत्वा भूत्वा प्रलीयते। रात्र्यागमेऽवशः पार्थ प्रभवत्यहरागमे॥१९॥**

(भूतग्रामः सः एव अयं, भूत्वा भूत्वा प्रलीयते। रात्र्यागमे अवशः पार्थ, प्रभवति अहरागमे॥)

पार्थ, सः एव अयं भूत-ग्रामः अ-वशः भूत्वा भूत्वा रात्रि-आगमे प्रलीयते अहर्-आगमे प्रभवति। (**8.19**) O अर्जुन, that very same group of beings [i.e., the same जीव-s]—born again and again [within countless cosmic cycles] without [their or My] will [due to their कर्मन्]—resolves at the coming of the night and manifests at the coming of the day.

| | | | |
|---|---|---|---|
| 1 | पार्थ | (अर्जुन) O Son of पृथा | fr. पार्थ *m. sg. voc.* |
| 2 | सः एव अयं | that very same | fr. तद् *prn. m. sg. nom.*; एव *in.*; इदम् *prn. m. sg. nom.* |
| 3 | भूत-ग्रामः | group of beings [i.e., the same जीव-s] | fr. भूत-ग्राम *m. sg. nom.* |
| 5 | अ-वशः | without [their or My] will [due to their कर्मन्] | fr. अवश *a. m. sg. nom.* |
| 4 | भूत्वा भूत्वा | born again and again [within countless cosmic cycles] | fr. भूत्वा *in. pt. of* √भू (**6.9:**) (**7.6.B.2.e:**) |
| 7 | रात्रि-आगमे | at the coming of the night | fr. रात्रि-आगमे *m. sg. loc.* |
| 6 | प्रलीयते | resolves | fr. प्र +√ली *ps. pr. $3^{rd}$ pl.* |

| | | | |
|---|---|---|---|
| 9 | अहर्-आगमे | at the coming of the day | fr. अहन्-आगम *m. sg. loc.* (**3.21.a:** & **2.24:** & **2.34:**) |
| 8 | प्रभवति | [and] manifests | fr. प्र +√भू *1.P. pr. 3rd sg.* (**5.3:** & **2.3:** & **2.71:**) |

**परस्तस्मात्तु भावोऽन्योऽव्यक्तोऽव्यक्तात्सनातनः। यः स सर्वेषु भूतेषु नश्यत्सु न विनश्यति॥ २०॥**

(परः तस्मात् तु भावः अन्यः, अव्यक्तः अव्यक्तात् सनातनः। यः सः सर्वेषु भूतेषु, नश्यत्सु न विनश्यति॥ )

तस्मात् तु अ-व्यक्तात् परः अन्यः अ-व्यक्तः, यः भावः सना-तनः। सः सर्वेषु भूतेषु नश्यत्सु न विनश्यति। (**8.20**)

—Whereas, different from that unmanifest [Lord ब्रह्मा-'s nighttime within संसार] is another unmanifest [i.e., अक्षरः पुरुषः—not manifest to the senses, being one's self], which always exists. That is not destroyed when all things are destroyed.

| | | | |
|---|---|---|---|
| 3 | तस्मात् | from that | fr. तस्मात् *in.* |
| 1 | तु | whereas | fr. तु *in.* |
| 4 | अ-व्यक्तात् | unmanifest (Lord ब्रह्मा-'s night-time within संसार) | fr. अव्यक्त *pp. of* वि + √अञ्ज् *n. sg. abl.* (**6.6:** & **2.81:**) |
| 2 | परः | different | fr. पर *prn. a. m. sg. nom.* (**4.16.3:**) |
| 5 | अन्यः | [is] another | fr. अन्य *prn. a. m. sg. nom.* (**4.16.1:**) |
| 6 | अ-व्यक्तः | unmanifest [i.e., अक्षरः पुरुषः – not manifest to the senses, being one's self] | fr. अव्यक्त *pp. of* वि + √अञ्ज् *a. m. sg. nom.* (**6.6:** & **2.81:**) |
| 7 | यः भावः | which existence | fr. यद् *prn. m. sg. nom.*; भाव *m. sg. nom.* |
| 8 | सना-तनः | always exists | fr. सनातन *a. m. sg. nom.* |
| 9 | सः | that | fr. तद् *prn. m. sg. nom.* |
| 11 | सर्वेषु भूतेषु | when all things | fr. सर्व *prn. a. n. pl. loc.*; भूत *pp. of* √भू *n. pl. loc.* |
| 12 | नश्यत्सु | are destroyed | fr. नश्यत् *pr. pt. of* √नश् *pt. n. pl. loc.* (**3.12:**) (**7.14.1:**) |
| 10 | न विनश्यति | is not destroyed | fr. न *in.*; वि + √नश् *4.P. pr. 3rd sg.* |

**अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिम्। यं प्राप्य न निवर्तन्ते तद्धाम परमं मम॥ २१॥**

(अव्यक्तः अक्षरः इति उक्तः, तम् आहुः परमां गतिम्। यं प्राप्य न निवर्तन्ते, तद् धाम परमं मम॥ )

अ-व्यक्तः अ-क्षरः इति उक्तः। तं परमां गतिम् आहुः। यं प्राप्य न निवर्तन्ते, तद् मम परमं धाम। (**8.21**)

[This] unmanifest [Me] is said to be अक्षर (imperishable). That [and not ब्रह्म-लोक], they say, is the ultimate end. Gaining which, [they] do not return—that is My limitless abode.

| | | | |
|---|---|---|---|
| 1 | अ-व्यक्तः | [this] unmanifest [Me] | fr. अव्यक्त *pp. of* वि + √अञ्ज् *a. m. sg. nom.* (**6.6:** & **2.81:**) |
| 3 | अ-क्षरः इति | अक्षर (imperishable) | fr. अक्षर *a. m. sg. nom.*; इति *in.* |
| 2 | उक्तः | is said to be | fr. उक्त *pp. of* √वच् *pt. m. sg. nom.* (**6.6:** & **2.3.a:** & **2.80:**) |

| | | | |
|---|---|---|---|
| 4 | तं | that [and not ब्रह्मलोक] | fr. तद् *prn. m. sg. acc.* |
| 6 | परमां गतिम् | [is] the ultimate end | fr. परमा *spv. a. f. sg. acc.* (**6.25:** & **.27:**); गति *f. sg. acc.* |
| 5 | आहुः | they say | fr. √अह् *P. perf. 3rd pl.* (**5.8.5:**) |
| 7 | यं प्राप्य | gaining which | fr. यद् *prn. m. sg. acc.*; प्राप्य *in. pt. of* प्र + √आप् (**6.9:**) |
| 8 | न निवर्तन्ते | (they) do not return | fr. न *in.*; नि + √वृत् *1.Ā. pr. 3rd pl.* |
| 9 | तद् | that [is] | fr. तद् *prn. n. sg. nom.* |
| 10 | मम | My | fr. अहम् *prn. sg. gen.* |
| 11 | परमं धाम | limitless abode | fr. परम *spv. a. n. sg. nom.* (**6.25:** & **.27:**); धामन् *n. sg. nom.* (**3.22:**) |

**पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया। यस्यान्तःस्थानि भूतानि येन सर्वमिदं ततम्॥२२॥**

(पुरुषः सः परः पार्थ, भक्त्या लभ्यः तु अनन्यया। यस्य अन्तःस्थानि भूतानि, येन सर्वम् इदं ततम्॥)

पार्थ, यस्य भूतानि अन्तः-स्थानि येन इदं सर्वं ततं, सः पुरुषः परः, अन्-अन्यया तु भक्त्या लभ्यः। (8.22)

O अर्जुन, that which has all beings within [it] and by which all this is pervaded—that पुरुष (the one who fills this universe) is limitless, yet can be attained by devotion in which there is no other [considered apart from Me, the अक्षरः पुरुषः].

| | | | |
|---|---|---|---|
| 1 | पार्थ | (अर्जुन) O Son of पृथा | fr. पार्थ *m. sg. voc.* |
| 2 | यस्य | that which has | fr. यद् *prn. m. sg. gen.* (**7.12.1.a:**) |
| 3 | भूतानि | [all] beings | fr. भूत *pp. of* √भू *n. pl. nom.* |
| 4 | अन्तः-स्थानि | within [it] | fr. अन्तर्-स्थ *a. n. pl. nom.* (**6.24.1:** & **2.24:** & **2.28:**) |
| 5 | येन | [and] by which | fr. यद् *prn. m. sg. inst.* |
| 6 | इदं सर्वं | all this | fr. इदम् *prn. n. sg. nom.*; सर्व *prn. a. n. sg. nom.* |
| 7 | ततं | is pervaded | fr. तत *pp. of* √तन् *pt. n. sg. nom.* (**6.6:**) |
| 8 | सः पुरुषः | that पुरुष (the one who fills this universe) | fr. तद् *prn. m. sg. nom.*; पुरुष *m. sg. nom.* |
| 9 | परः | [is] limitless | fr. पर *prn.a. m. sg. nom.* (**4.16.3:**) |
| 13 | अन्-अन्यया | in which there is no other [considered apart from Me, the अक्षरः पुरुषः] | fr. अनन्या *prn. a. f. sg. inst.* (**4.16.1:**) |
| 10 | तु | yet | fr. तु *in.* |
| 12 | भक्त्या | by devotion | fr. भक्ति *f. sg. inst.* |
| 11 | लभ्यः | can be attained | fr. लभ्य *pot. ps. pt. of* √लभ् *pt. m. sg. nom.* |

**यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः। प्रयाता यान्ति तं कालं वक्ष्यामि भरतर्षभ॥२३॥**

(यत्र काले तु अनावृत्तिम्, आवृत्तिं च एव योगिनः। प्रयाताः यान्ति तं कालं, वक्ष्यामि भरतर्षभ॥)

यत्र काले [गत्याम् इत्यर्थः] तु योगिनः प्रयाताः अन्-आवृत्तिम् आवृत्तिं च एव यान्ति, तं कालं [गतिम् इत्यर्थः] वक्ष्यामि, भरत-ऋषभ। (**8.23**) Now, on which time [i.e., route] the योगिन्-s depart—[where] they attain either no return [at least in this कल्प/cycle of manifestation] or a return [i.e., rebirth]—that time [i.e., route] I will tell [to you], O अर्जुन.

| | | | |
|---|---|---|---|
| 2 | यत्र काले [गत्याम् इत्यर्थः] | on which time [i.e., route] | fr. यत्र *in.* (**6.19:**); काल *m. sg. loc.* |
| 1 | तु | now | fr. तु *in.* |
| 3 | योगिनः | the योगिन्-s | fr. योगिन् *m. pl. nom.* |
| 4 | प्रयाताः | depart [where] | fr. प्रयात *pp. of* प्र + √या *pt. m. pl. nom.* |
| 6 | अन्-आवृत्तिम् | no return [at least in this कल्प/cycle of manifestation] | fr. अनावृत्ति *f. sg. acc.* |
| 7 | आवृत्तिं च एव | or a return [i.e., re-birth] | fr. आवृत्ति *f. sg. acc.*; च *in.*; एव *in.* (**6.19:**) |
| 5 | यान्ति | they attain [either] | fr. √या *2.P. pr. 3rd pl.* |
| 8 | तं कालं [गतिम् इत्यर्थः] | that time [i.e., route] | fr. तद् *prn. m. sg. acc.*; काल *m. sg. acc.* |
| 9 | वक्ष्यामि | I will tell [to you] | fr. √वच् *P. fut. 1st sg.* (**2.80:** & **2.101:** & **5.5.a:**) |
| <u>10</u> | भरत-ऋषभ | (अर्जुन) O Prominent Among the Descendants of भरत | fr. भरत-ऋषभ *m. sg. voc.* |

**अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम्। तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः॥२४॥**

(अग्निः ज्योतिः अहः शुक्लः, षण्मासाः उत्तरायणम्। तत्र प्रयाताः गच्छन्ति, ब्रह्म ब्रह्मविदः जनाः॥)

[यत्र गत्याम्] अग्निः, ज्योतिः, अहः, शुक्लः [पक्षः], षण्-मासाः उत्तर-अयणं [देवताः सन्ति], तत्र प्रयाताः ब्रह्म-विदः [ब्रह्म-उपासकाः इत्यर्थः] जनाः ब्रह्म [क्रमेण] गच्छन्ति। (**8.24**) [Where] there are [the deities] Fire, Light, Day, the Bright [fortnight of the moon], and the Six-Month Northern Coursing [of the sun] [to guide]—there, the people who meditate on [the qualified] ब्रह्मन् [i.e., on a manifestation of ब्रह्मन् in the world], having departed, [eventually] attain ब्रह्मन् [via being taught this विद्या in ब्रह्म-लोक].

| | | | |
|---|---|---|---|
| 1 | [यत्र गत्याम्] | [where] | |
| 3 | अग्निः | Fire | fr. अग्नि *m. sg. nom.* |
| 4 | ज्योतिः | Light | fr. ज्योतिस् *m. sg. nom.* (**3.6:**) |
| 5 | अहः | Day | fr. अहन् *n. sg. nom.* (**3.21.a:**) |
| 6 | शुक्लः [पक्षः] | the Bright [fortnight of the moon] | fr. शुक्ल *m. sg. nom.* |
| 7 | षण्-मासाः | [and] the Six-month | fr. षष्-मास *m. pl. nom.* (**2.24:** & **.44:**) |
| 8 | उत्तर-अयणं | Northern Coursing [of the sun] | fr. उत्तर-अयण *n. sg. nom.* |
| 2 | [देवताः सन्ति] | [there are the deities to guide] | |

| | | | |
|---|---|---|---|
| 9 | तत्र | there | fr. तत्र *in.* (**6.19:**) |
| 12 | प्रयाताः | having departed | fr. प्रयात *pp. of* प्र + √या *pt. m. pl. nom.* |
| 11 | ब्रह्म-विदः | who meditate upon [the qualified] ब्रह्मन् [i.e., upon a manifestation of ब्रह्मन् in the world] | fr. ब्रह्म-विद् *a. m. pl. nom.* (**6.24:** & **3.6:**) |
| 10 | जनाः | the people | fr. जन *m. pl. nom.* |
| 14 | ब्रह्म | ब्रह्मन् [via being taught this विद्या in ब्रह्मलोक] | fr. ब्रह्मन् *n. sg. acc.* (**3.22:**) |
| 13 | [क्रमेण] गच्छन्ति | [eventually] attain | fr. √गम् *1.P. pr. 3rd pl.* (**5.15.6:**) |

**धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम्। तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्तते॥ २५॥**

(धूमः रात्रिः तथा कृष्णः, षण्मासाः दक्षिणायनम्। तत्र चान्द्रमसं ज्योतिः, योगी प्राप्य निवर्तते॥)

[यत्र गत्याम्] धूमः, रात्रिः, तथा कृष्णः [पक्षः], षण्-मासाः दक्षिण-अयनं [देवताः सन्ति], तत्र चान्द्रमसं ज्योतिः [दिवम् इत्यर्थः] प्राप्य, योगी निवर्तते। (**8.25**) [Where] there are [the deities] Smoke, Night, the Dark [fortnight of the moon], and the Six-month Southern Coursing [of the sun] [to guide]—there, gaining [a stay in] a lunar [i.e., a lesser] heaven, the योगिन् returns [i.e., is reborn].

| | | | |
|---|---|---|---|
| 1 | [यत्र गत्याम्] | [where] [the following deities to guide] | |
| 3 | धूमः | Smoke | fr. धूम *m. sg. nom.* |
| 4 | रात्रिः | Night | fr. रात्रि *f. sg. nom.* |
| 5 | तथा कृष्णः [पक्षः] | the Dark [fortnight of the moon] | fr. तथा *in.*; कृष्ण *a. m. sg. nom.* |
| 6 | षण्-मासाः | [and] the Six-month | fr. षष्-मास *m. pl. nom.* (**2.24:** & **.44:**) |
| 7 | दक्षिण-अयनं | Southern Coursing [of the sun] | fr. दक्षिण-अयन *n. sg. nom.* |
| 2 | [देवताः सन्ति] | [there are the deities to guide] | |
| 8 | तत्र | there | fr. तत्र *in.* (**6.19:**) |
| 10 | चान्द्रमसं | a lunar [i.e., a lesser] | fr. चान्द्रमस *a. f. sg. acc.* |
| 12 | ज्योतिः [दिवम् इत्यर्थः] | heaven | fr. ज्योतिस् *n. sg. acc.* (**3.6:**) |
| 9 | प्राप्य | gaining [a stay in] | fr. प्राप्य *in. pt. of* प्र + √आप् |
| 13 | योगी | the योगिन् | fr. योगिन् *m. sg. nom.* (**3.15:**) |
| 14 | निवर्तते | returns [i.e., is re-born] | fr. नि + √वृत् *1.Ā. pr. 3rd sg.* |

**शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते। एकया यात्यनावृत्तिमन्ययावर्तते पुनः॥ २६॥**

(शुक्लकृष्णे गती हि एते, जगतः शाश्वते मते। एकया याति अनावृत्तिम्, अन्यया आवर्तते पुनः॥)

जगतः हि एते गती शुक्ल-कृष्णे शाश्वते मते। एकया अन्-आवृत्तिं याति, अन्यया पुनः आवर्तते। (**8.26**)

These two paths of the world, the bright and the dark, indeed are considered eternal. By one [path] one gains no return [having lots of time to be taught this ब्रह्म-विद्या by Lord ब्रह्मा, or at least no return in this कल्प]. By the other [path], one returns again.

| | | | |
|---|---|---|---|
| 2 | जगतः | of the world | fr. जगत् *n. sg. gen.* (**3.5:**) |
| 1 | हि एते गती | indeed these two paths | fr. हि *in.*; एतद् *prn. f. du. nom.*; गति *f. du. nom.* |
| 3 | शुक्ल-कृष्णे | the bright and the dark | fr. शुक्ल-कृष्ण *a. f. du. nom.* |
| 5 | शाश्वते | eternal | fr. शाश्वता (*instead of usual fem.* ◦ती, *otherwise neuter predicate adj.* ◦त *not in agreement with fem. subject* गति*–either way, both are irreg.*) *a. f./n. du. nom.* |
| 4 | मते | are considered | fr. मता *pp. of* √मन् *a. f. du. nom.* (*or even neuter* ◦त) (**6.6:**) |
| 6 | एकया | by one [path] | fr. एका *prn. a. f. sg. inst.*. (**4.16.2:**) |
| 8 | अन्-आवृत्तिं | no return [having lots of time to be taught this ब्रह्मविद्या by Lord ब्रह्मा, or at least no return in this कल्प] | fr. अनावृत्ति *f. sg. acc.* |
| 7 | याति | one gains | fr. √या *2.P. pr. 3rd sg.* |
| 9 | अन्यया | by the other [path] | fr. अन्या *prn. a. f. sg. inst.* (**4.16.1:**) |
| <u>10</u> | पुनः आवर्तते | one returns again | fr. पुनर् *in.* ; आ + √वृत् *1.Ā. pr. 3rd sg.* |

**नैते सृती पार्थ जानन्योगी मुह्यति कश्चन। तस्मात्सर्वेषु कालेषु योगयुक्तो भवार्जुन॥ २७॥**

(न एते सृती पार्थ जानन्, योगी मुह्यति कश्चन। तस्मात् सर्वेषु कालेषु, योगयुक्तः भव अर्जुन॥)

पार्थ, एते सृती जानन् कश्-चन योगी न मुह्यति। तस्मात् सर्वेषु कालेषु योग-युक्तः भव, अर्जुन। (**8.27**)

O अर्जुन, knowing these two paths, a योगिन् is not deluded. Therefore, at all times, be committed to [a life of seeking Me through] [कर्म-] योग, O अर्जुन.

| | | | |
|---|---|---|---|
| 1 | पार्थ | (अर्जुन) O Son of पृथा | fr. पार्थ *m. sg. voc.* |
| 3 | एते सृती | these two paths | fr. एतद् *prn. f. du. acc.*; सृति *f. du. acc.* |
| 2 | जानन् | knowing | fr. जानत् *pr. pt. of* √ज्ञा *pt. m. sg. nom.* (**5.23.2:**) |
| 4 | कश्-चन योगी | a योगिन् | fr. क-चन *prn. cmpd. m. sg. nom.* (**4.20:** & **2.24:** & **2.27:**); योगिन् *m. sg. nom.* (**3.15:**) |
| 5 | न मुह्यति | is not deluded | fr. न *in.*; √मुह् *4.P. pr. 3rd sg.* |

| | | | |
|---|---|---|---|
| 6 | तस्मात् | therefore | fr. तस्मात् *in.* |
| 7 | सर्वेषु कालेषु | at all times | fr. सर्व *prn. a. m. pl. loc.* (**4.16.2:**); काल *m. pl. loc.* |
| 9 | योग-युक्तः | committed to [a life of seeking Me through] [कर्म-] योग | fr. योग-युक्त *a. m. sg. nom.* |
| 8 | भव | be | fr. √भू *1.P. impv. 2nd sg.* (**5.3:** & **2.3:** & **2.71:**) |
| 10 | अर्जुन | O अर्जुन | fr. अर्जुन *m. sg. voc.* |

**वेदेषु यज्ञेषु तपःसु चैव दानेषु यत्पुण्यफलं प्रदिष्टम्।**
**अत्येति तत्सर्वमिदं विदित्वा योगी परं स्थानमुपैति चाद्यम्।। २८।।**

(वेदेषु यज्ञेषु तपःसु च एव, दानेषु यद् पुण्यफलं प्रदिष्टम्। अत्येति तद् सर्वम् इदं विदित्वा, योगी परं स्थानम् उपैति च आद्यम्।। )

इदं विदित्वा यद् पुण्य-फलं वेदेषु यज्ञेषु तपःसु दानेषु च एव प्रदिष्टं, तद् सर्वम् योगी अत्येति, आद्यं च परं स्थानम् [अचिरेण] उपैति।

(**8.28**) Knowing this [My answers to your seven questions], a योगिन् goes beyond all that karmic merit [spent for heaven-going] that is revealed [to accrue] in [reciting] the वेद-s, in rituals, in prayerful disciplines, and in charity. And that one [immediately] attains the ultimate abode, [which is Me] the origin.

| | | | |
|---|---|---|---|
| 1 | इदं विदित्वा | knowing this [My answers to your seven questions] | fr. इदम् *prn. n. sg. acc.*; विदित्वा *in. pt. of* √विद् |
| 5 | यद् पुण्य-फलं | [which] karmic merit [spent for heaven-going] | fr. यद् *prn. n. sg. nom.*; पुण्य-फल *n. sg. nom.* |
| 7 | वेदेषु | in [reciting] the वेद-s | fr. वेद *m. pl. loc.* |
| 8 | यज्ञेषु | in rituals | fr. यज्ञ *m. pl. loc.* |
| 9 | तपःसु | in prayerful disciplines | fr. तपस् *n. pl. loc.* (**2.4:** & **.24:**) |
| 10 | दानेषु च एव | and in charity | fr. दान *n. pl. loc.*; च *in.*; एव *in.* (**6.19:**) |
| 6 | प्रदिष्टं | that is revealed [to accrue] | fr. प्रदिष्ट *pp. of* प्र + √दिश् *pt. n. sg. nom.* (**2.85:**) |
| 4 | तद् सर्वम् | all that | fr. तद् *prn. n. sg. acc.*; सर्व *prn. a. n. sg. acc.* |
| 2 | योगी | a योगिन् | fr. योगिन् *m. sg. nom.* (**3.15:**) |
| 3 | अत्येति | goes beyond | fr. अति + √इ *2.P. pr. 3rd sg.* (**5.3:** & **2.11:**) |
| 14 | आद्यं | [which is Me] the origin | fr. आद्य *n. sg. acc.* |
| 11 | च | and | fr. च *in.* |
| 13 | परं स्थानम् | the ultimate abode | fr. पर *prn. a. n. sg. acc.* (**4.16.3:**); स्थान *n. sg. acc.* |
| 12 | [अचिरेण] उपैति | that one [immediately] attains | fr. उप + √इ *2.P. pr. 3rd sg.* (**5.3:** & **2.9:**) |

**ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे अक्षरब्रह्मयोगो नामाष्टमोऽध्यायः॥८॥**

(ओं तद् सत्। इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे अक्षरब्रह्मयोगः नाम अष्टमः अध्यायः॥)

ओं तद् सत्। इति श्रीमद्-भगवद्-गीतासु उपनिषत्सु ब्रह्म-विद्यायां योग-शास्त्रे श्री-कृष्ण-अर्जुन-संवादे अक्षर-ब्रह्म-योगः नाम अष्टमः अध्यायः। (**8**)

ओं (ब्रह्मन्, the witness of all) is that [only] reality. Thus ends the eighth chapter, called "The Topic of the Imperishable Reality," of the [eighteen chapters of] *Songs of the Glorious Lord*, which is [looked upon as] उपनिषद् [and whose teaching is] in [the form of] a dialogue between श्री कृष्ण and अर्जुन, [the subject matter being] a knowledge of ब्रह्मन् and योग.

| | | | |
|---|---|---|---|
| 1 | ओं | ओम् (ब्रह्मन्, the witness of all,) | fr. ओम् *in.* |
| 2 | तद् सत् | [is] that [only] reality | fr. तद् *prn. n. sg. nom.*; सत् *n. sg. nom.* |
| 3 | इति | (quote-end quote), thus ends | fr. इति *in.* |
| 11 | श्रीमद्- | of the venerable, the glorious | |
| 12 | -भगवद्- | one having [limitless] glories, Lord | |
| 10 | -गीतासु | in [i.e., of] songs | fr. श्रीमत्-भगवत्-गीता *f. pl. loc.* (**2.43:**) |
| 13 | उपनिषत्सु | [which are/is looked upon as] उपनिषद्, sacred scripture | fr. उपनिषद् *f. pl. loc.* (**6.24:**) |
| 18 | ब्रह्म- | of ब्रह्मन् (reality/सत्) | |
| 17 | -विद्यायां | [and] a knowledge | fr. ब्रह्म-विद्या *f. sg. loc.* |
| 19 | योग-शास्त्रे | [and instruction of] योग (means, discipline, etc.) | fr. योग-शास्त्र *n. sg. loc.* |
| 15 | श्री-कृष्ण- | between Lord कृष्ण | |
| 16 | -अर्जुन- | and अर्जुन | |
| 14 | -संवादे (**2.22:**) | in [the form of] a dialogue | fr. श्री-कृष्ण-अर्जुन-संवाद *n. sg. loc.* |
| 8 | अक्षर- | of the imperishable | |
| 9 | -ब्रह्म- | reality | |
| 7 | -योगः | the topic | fr. अक्षर-ब्रह्म-योग *a. m. sg. nom.* |
| 6 | नाम | by the name, called | fr. नाम *in.* |
| 4 | अष्टमः | the eighth | fr. अष्टम *ordinal a. m. sg. nom.* |
| 5 | अध्यायः | chapter | fr. अध्याय *m. sg. nom.* |

# अथ नवमोऽध्यायः

**श्रीभगवानुवाच।**

**इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे। ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात्॥१॥**

(श्रीभगवान् उवाच। इदं तु ते गुह्यतमं, प्रवक्ष्यामि अनसूयवे। ज्ञानं विज्ञानसहितं, यद् ज्ञात्वा मोक्ष्यसे अशुभात्॥)

श्री-भगवान् उवाच। इदं तु गुह्यतमं ज्ञानं विज्ञान-सहितं ते (=तुभ्यम्) अन्-असूयवे प्रवक्ष्यामि, यद् ज्ञात्वा अ-शुभात् मोक्ष्यसे। **(9.1)**

The Lord said: —Whereas [apart from that traveling to heavens, such as ब्रह्म-लोक (8.16)] I will tell to you, who are not cynical, this most secret knowledge—along with its assimilation—knowing which [in this life], you will be freed from the unpleasant [life of becoming; i.e., from संसार].

| | | | |
|---|---|---|---|
| 1 | श्री-भगवान् उवाच | the Lord said | fr. श्री-भगवत् *m. sg. nom.*; √वच् *P. perf. 3rd sg.* (**5.10.3:**) |
| 6 | इदं | this | fr. इदम् *prn. n. sg. acc.* |
| 2 | तु | whereas [apart from that traveling to heavens, such as ब्रह्मलोक] | fr. तु *in.* |
| 7 | गुह्यतमं | most secret | fr. गुह्यतम *spv. a. n. sg. acc.* (**6.25:**) |
| 8 | ज्ञानं | knowledge | fr. ज्ञान *n. sg. acc.* |
| 9 | विज्ञान-सहितं | along with its assimilation | fr. विज्ञान-सहित *a. n. sg. acc.* |
| 4 | ते (=तुभ्यम्) | to you | fr. त्वम् *prn. sg. dat.* (**4.3:**) (**7.10.A.1:**) |
| 5 | अन्-असूयवे | who is not cynical | fr. अनसूयु *a. sg. dat.* (**3.30.b:**) |
| 3 | प्रवक्ष्यामि | I will tell | fr. प्र + √वच् *P. fut. 1st sg.* (**2.80:** & **2.101:** & **5.5.a:**) |
| 10 | यद् ज्ञात्वा | knowing which | fr. यद् *prn. sg. acc.*; ज्ञात्वा *in .pt. of* √ज्ञा |
| 12 | अ-शुभात् | from the unpleasant [life of becoming, i.e., from संसार] | fr. अशुभ *n. sg. abl.* |
| 11 | मोक्ष्यसे | [in this life] you will be freed | fr. √मुच् *Ā. ps. fut. 2nd sg.* (**5.33:** & **2.80:** & **2.101:** & **5.36.a:**) |

**राजविद्या राजगुह्यं पवित्रमिदमुत्तमम्। प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तुमव्ययम्॥२॥**

(राजविद्या राजगुह्यं, पवित्रम् इदम् उत्तमम्। प्रत्यक्षावगमं धर्म्यं, सुसुखं कर्तुम् अव्ययम्॥)

इदं [ज्ञानं] राज-विद्या, राज-गुह्यम्, उत्तमं पवित्रं, प्रत्यक्ष-अवगमं, धर्म्यं, सु-सुखं कर्तुम्, अव्ययं [च]। **(9.2)**

This [knowledge] is the king [i.e., final authority] of [all] knowledge, the king of [all] secrets, the greatest purifier, directly known [once ignorance is removed], in keeping with धर्म, very easy to attain, and imperishable [because it is one's self and so never lost].

| | | | |
|---|---|---|---|
| 1 | इदं [ज्ञानं] | this [knowledge] [is] | fr. इदम् *prn. n. sg. nom.* |
| 2 | राज-विद्या | the king [i.e., final authority] of [all] knowledge | fr. राज-विद्या *f. sg. nom.* |
| 3 | राज-गुह्यम् | the king of [all] secrets | fr. राज-गुह्य *n. sg. nom.* |

4 उत्तमं पवित्रं — the greatest purifier — fr. उत्तम *spv. a. n. sg. nom.* (**6.25:**); पवित्र *n. sg. nom.*

5 प्रत्यक्ष- — directly

6 -अवगमं — known [once ignorance is removed] — fr. प्रत्यक्ष-अवगम *a. n. sg. nom.*

7 धर्म्यं — in keeping with धर्म — fr. धर्म्य *a. n. sg. nom.*

8 सु-सुखं कर्तुम् — very easy to attain — fr. सु-सुख *a. n. sg. nom.* (**6.36:**); कर्तुम् *inf. of* √कृ *in.* (**6.10:** & **5.34:**)

9 अव्ययं [च] — [and] imperishable [because it's one's self, and so never lost] — fr. अव्यय *a. n. sg. nom.*

**अश्रद्दधानाः पुरुषा धर्मस्यास्य परन्तप। अप्राप्य मां निवर्तन्ते मृत्युसंसारवर्त्मनि॥३॥**

(अश्रद्दधानाः पुरुषाः, धर्मस्य अस्य परन्तप। अप्राप्य मां निवर्तन्ते, मृत्युसंसारवर्त्मनि॥)

परन्-तप, अस्य धर्मस्य अ-श्रद्-दधानाः पुरुषाः माम् अ-प्राप्य मृत्यु-संसार-वर्त्मनि निवर्तन्ते। (**9.3**)

O अर्जुन, people having no trust for this धर्म [i.e., ज्ञान, which is धर्म्य] do not attain Me and return [i.e., remain] on the path of संसार (life of becoming) [filled] with death.

1 परन्-तप — (अर्जुन) O Vexer of Foes — fr. पर-म्-तप *m. sg. voc.* (**2.55:**)

4 अस्य धर्मस्य — for this धर्म [i.e., ज्ञान which is धर्म्य] — fr. इदम् *prn. m. sg. gen.*; धर्म *m. sg. gen.*

3 अ-श्रद्-दधानाः — having no trust — fr. अश्रद्दधान *pr. mid. pt. of* √धा *a. m. pl. nom.* (**6.5:** & **5.8.2:** & **5.20.2:** & **6.13:**)

2 पुरुषाः — people — fr. पुरुष *m pl. nom.*

5 माम् अ-प्राप्य — do not attain Me — fr. अहम् *prn. sg. acc.*; अप्राप्य *in. pt. of* प्र + √आप्

9 मृत्यु- — [filled] with death

8 -संसार- — of संसार (life of becoming)

7 -वर्त्मनि — on the path — fr. मृत्यु-संसार-वर्त्मन् *n. sg. loc.* (**3.22:**)

6 निवर्तन्ते — [and] return [i.e., remain] — fr. नि + √वृत् *1.Ā. pr. 3rd pl.*

**मया ततमिदं सर्वं जगदव्यक्तमूर्तिना। मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः॥ ४॥**

(मया ततम् इदं सर्वं, जगत् अव्यक्तमूर्तिना। मत्स्थानि सर्वभूतानि, न च अहं तेषु अवस्थितः॥)

मया अ-व्यक्त-मूर्तिना इदं सर्वं जगत् ततम्। सर्व-भूतानि मत्-स्थानि, अहं च तेषु न अवस्थितः। (**9.4**)

This entire universe is pervaded by Me as a form not manifest [to the senses]. All beings exist in [i.e., are because of] Me, but I am not in [i.e., because of] them [like clay pots subsist in/are because of clay, but the world of clay does not subsist in/is not because of pots].

| | | | |
|---|---|---|---|
| 4 | मया | by Me | fr. अहम् *prn. sg. inst.* |
| 6 | अ-व्यक्त- | not manifest [to the senses] | |
| 5 | -मूर्तिना | [as] a form | fr. अव्यक्त-मूर्ति *a. m. sg. inst.* |
| 1 | इदं सर्वं | this entire | fr. इदम् *prn. n. sg. nom.*; सर्व *prn. a. n. sg. nom.* (**4.16.2:**) |
| 2 | जगत् | universe | fr. जगत् *n. sg. nom.* (**3.5.a:**) |
| 3 | ततम् | is pervaded | fr. तत *pp. of* √तन् *pt. n. sg. nom.* (**6.6:**) |
| 7 | सर्व-भूतानि | all beings | fr. सर्व-भूत *n. pl. nom.* |
| 8 | मत्-स्थानि | exist in [i.e., are because of] Me | fr. मद्-स्थ *n. pl. nom.* (**2.24:**) |
| 9 | अहं च | but I | fr. अहम् *prn. sg. nom.*; च *in.* |
| 11 | तेषु | in [i.e., because of] them | fr. तेषु *prn. n. pl. loc.* |
| 10 | न अवस्थितः | am not | fr. न *in.*; अवस्थित *pp. of* अव + √स्था *pt. m. sg. nom.* (**6.6:**) |

**न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम्। भूतभृन्न च भूतस्थो ममात्मा भूतभावनः॥ ५॥**

(न च मत्स्थानि भूतानि, पश्य मे योगम् ऐश्वरम्। भूतभृत् न च भूतस्थः, मम आत्मा भूतभावनः॥)

न च भूतानि मत्-स्थानि। मे ऐश्वरं योगं पश्य। मम आत्मा भूत-भावनः, भूत-भृत्, न च भूत-स्थः। (**9.5**)

[—Yet] [as separate] beings [they] do not exist in Me. Look at My, the Lord's, योग (connection to/attainment in) [the world]! My आत्मा (self, the self of all) produces [all] things [all names and forms], sustains [all] things, but does not exist in [i.e., is not dependent on] [these] things.

| | | | |
|---|---|---|---|
| 2 | न च | [they] [do] not | fr. न *in.*; च *in.* |
| 1 | भूतानि | [yet] [as separate] beings | fr. भूत *pp. of* √भू *n. pl. nom.* |
| 3 | मत्-स्थानि | exist in Me | fr. मद्-स्थ *a. n. pl. nom.* (**2.24:**) |

| | | | |
|---|---|---|---|
| 5 | मे ऐश्वरं | My the Lord's | fr. अहम् *prn. sg. gen.*; ऐश्वर *a. m. sg. acc.* |
| 6 | योगं | योग (connection to/attainment in) [the world] | fr. योग *m. sg. acc.* |
| 4 | पश्य | look at | fr. √दृश् *1.P. impv. 2nd sg.* (**5.15.6:**) |
| 7 | मम आत्मा | My आत्मा (self, the self of all) | fr. अहम् *prn. sg. gen.*; आत्मन् *m. sg. nom.* (**3.22:**) |
| 9 | भूत- | [all] things [all names and forms] | |
| 8 | -भावनः | produces | fr. भूत-भावन *a. m. sg. nom.* |
| 10 | भूत-भृत् | sustains [all] things | fr. भूत-भृत् *a. m. sg. nom.* (**6.24.2:** & **3.5.a:**) |
| 11 | न च | but [does] not | fr. न *in.*; च *in.* |
| 12 | भूत-स्थः | exist in [i.e., is not dependent upon] [these] things | fr. भूत-स्थ *a. m. sg. nom.* (**6.24.1:**) |

**यथाकाशस्थितो नित्यं वायुः सर्वत्रगो महान्। तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय॥६॥**

(यथा आकाशस्थितः नित्यं, वायुः सर्वत्रगः महान्। तथा सर्वाणि भूतानि, मत्स्थानि इति उपधारय॥)

यथा सर्वत्र-गः महान् वायुः नित्यम् आकाश-स्थितः, तथा सर्वाणि भूतानि मत्-स्थानि इति उपधारय। (**9.6**)

Just as the vast air, which moves everywhere, always exists within space; similarly, please understand that all beings [all names and forms] exist within Me [i.e., are always within—yet are not polluting, are not separate from, are not other than Me].

| | | | |
|---|---|---|---|
| 1 | यथा | just as | fr. यथा *in.* (**6.19:**) |
| 3 | सर्वत्र-गः | which moves everywhere | fr. सर्वत्र-ग *a. m. sg. nom.* (**6.24.3:**) |
| 2 | महान् वायुः | the vast air | fr. महत् *a. m. sg. nom.* (**3.12.a:**); वायु *m. sg. nom.* |
| 4 | नित्यम् | always | fr. नित्यम् *in.* (**7.8.8:**) |
| 5 | आकाश-स्थितः | exists within space | fr. आकाश्-स्थित *a. m. sg. nom.* |
| 6 | तथा | similarly | fr. तथा *in.* (**6.19:**) |
| 8 | सर्वाणि भूतानि | all beings | fr. सर्व *prn. a. n. pl. nom.*; भूत *pp. of* √भू *n. pl. nom.*(**7.7.2:**) |
| 9 | मत्-स्थानि | exist within Me [i.e., are always within—yet are not polluting, are not separate from, are not other than Me] | fr. मद्-स्थ *a. n. pl. nom.* (**2.24:**) |
| 7 | इति उपधारय | please understand that | fr. इति *in.*; उप + √धृ *P. cs. impv. 2nd sg.* (**5.40:**) |

**सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम्। कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम्॥७॥**
(सर्वभूतानि कौन्तेय, प्रकृतिं यान्ति मामिकाम्। कल्पक्षये पुनः तानि, कल्पादौ विसृजामि अहम्॥)
कौन्तेय, कल्प-क्षये सर्व-भूतानि मामिकां प्रकृतिं यान्ति। पुनः कल्प-आदौ अहं तानि विसृजामि। (**9.7**)
O अर्जुन, at the end of the कल्प (manifestation cycle, the start of night for Lord ब्रह्मा), all beings go [i.e., become unmanifest] into My प्रकृति (माया). Again, at the beginning of the manifestation cycle, I project [i.e., remanifest] them [i.e., their bodies and minds] [from My माया].

| | | | |
|---|---|---|---|
| 1 | कौन्तेय | (अर्जुन) O Son of कुन्ती | fr. कौन्तेय *m. sg. voc.* |
| 2 | कल्प-क्षये | at the end of the कल्प (manifestation cycle, the start of night for Lord ब्रह्मा) | fr. कल्प-क्षय *m. sg. loc.* |
| 3 | सर्व-भूतानि | all beings | fr. सर्व-भूत *n. pl. nom.* |
| 5 | मामिकां | My | fr. मामिका *a. f. sg. acc.* (**4.15:** & **6.27:**) |
| 6 | प्रकृतिं | प्रकृति (माया) | fr. प्रकृति *f. sg. acc.* |
| 4 | यान्ति | go [i.e., become unmanifest] into | fr. √या *2.P. pr. 3rd pl.* |
| 7 | पुनः | again | fr. पुनर् *in.* (**2.24:**) |
| 8 | कल्प-आदौ | at the beginning of the manifestation cycle | fr. कल्प-आदि *m. sg. loc.* |
| 9 | अहं | I | fr. अहम् *prn. sg. nom.* |
| 11 | तानि | them [i.e., their bodies and minds] [from My माया] | fr. तद् *prn.n. pl. acc.* |
| <u>10</u> | विसृजामि | project (i.e., remanifest) | fr. वि + √सृज् *6.P. pr. 1st sg.*. (**5.5.a:**) |

**प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः। भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात्॥८॥**
(प्रकृतिं स्वाम् अवष्टभ्य, विसृजामि पुनः पुनः। भूतग्रामम् इमं कृत्स्नम्, अवशं प्रकृतेः वशात्॥)
स्वां प्रकृतिम् अवष्टभ्य, इमं कृत्स्नं भूत-ग्रामम् अ-वशं प्रकृतेः वशात् पुनः पुनः विसृजामि। (**9.8**)
Having control over [i.e., not deluded by] My प्रकृति, again and again [each कल्प] I project this entire group of beings without [their or My] will, by the force [in the form of all the कर्मन्-s of all the जीव-s] of प्रकृति (of माया).

| | | | |
|---|---|---|---|
| 2 | स्वां प्रकृतिम् | My प्रकृति | fr. स्वा *prn. a. f. sg. acc.* (**4.14:**); प्रकृति *f. sg. acc.* |
| 1 | अवष्टभ्य | having control over [i.e., not deluded by] | fr. अवष्टभ्य *in. pt. of.* अव + √स्तभ् (*w/ irreg. application of* **2.101:**) |

| | | | |
|---|---|---|---|
| 5 | इमं कृत्स्नं | this entire | fr. इदम् *prn. m. sg. acc.*; कृत्स्न *a. m. sg. acc.* |
| 6 | भूत-ग्रामम् | group of beings | fr. भूत-ग्राम *m. sg. acc.* |
| 7 | अ-वशं | without [their or My] will | fr. अवश *a. m. sg. acc.* |
| 9 | प्रकृतेः | of प्रकृति (of माया) | fr. प्रकृति *f. sg. gen.* |
| 8 | वशात् | by the force [in the form of all the कर्मन्-s of all the जीव-s] | fr. वश *m. sg. abl.* (**7.11.1:**) |
| 3 | पुनः पुनः | again [and] again [each कल्प] | fr. पुनर् *in.* (**7.6.B.2.e:**) |
| 4 | विसृजामि | I project | fr. वि + √सृज् *6.P. pr. 1st sg.* (**5.5.a:**) |

**न च मां तानि कर्माणि निबध्नन्ति धनञ्जय। उदासीनवदासीनमसक्तं तेषु कर्मसु॥९॥**

(न च मां तानि कर्माणि, निबध्नन्ति धनञ्जय। उदासीनवत् आसीनम्, असक्तं तेषु कर्मसु॥)

धनञ्-जय, तानि च कर्माणि माम् उदासीनवत् आसीनं तेषु [च] कर्मसु अ-सक्तं न निबध्नन्ति। (**9.9**) O अर्जुन, these कर्मन्-s (actions and their results) do not bind Me, who is seated [here as the basis of प्रकृति], seemingly indifferent [being its mere conscious witness] and unattached toward these कर्मन्-s.

| | | | |
|---|---|---|---|
| 1 | धनञ्-जय | (अर्जुन) O Winner of Laurels | fr. धन-म्-जय *m. sg. voc.* (**2.55:**) |
| 2 | तानि च | these | fr. तद् *prn. n. pl. nom.*; च *in.* |
| 3 | कर्माणि | कर्मन्-s (actions and their results) | fr. कर्मन् *n. pl. nom.* |
| 5 | माम् | Me | fr. अहम् *prn. sg. acc.* |
| 7 | उदासीनवत् | seemingly indifferent [being its mere conscious witness] | fr. उदासीनवत् *in.* (**6.19:**) |
| 6 | आसीनं | who is seated [here as the basis of प्रकृति] | fr. आसीन *pr. mid. pt. of* √आस् *a. m. sg. acc.* (**6.5:** *irreg.* ◦ईन *for* ◦आन) |
| 9 | तेषु [च] कर्मसु | towards these कर्मन्-s | fr. तद् *prn. m. pl. loc.*; कर्मन् *n. pl. loc.* (**3.22:**) |
| 8 | अ-सक्तं | [and] unattached | fr. असक्त *pp. of* √सञ्ज् *a. m. sg. acc.* (**6.6:** & **2.81:**) |
| 4 | न निबध्नन्ति | do not bind | fr. न *in.*; नि + √बन्ध् *9.P. pr. 3rd pl.* (**5.23.3:**) |

**मयाध्यक्षेण प्रकृतिः सूयते सचराचरम्। हेतुनानेन कौन्तेय जगद्विपरिवर्तते॥१०॥**

(मया अध्यक्षेण प्रकृतिः, सूयते सचराचरम्। हेतुना अनेन कौन्तेय, जगत् विपरिवर्तते॥)

मया अध्यक्षेण प्रकृतिः स-चर-अ-चरं सूयते। कौन्तेय, अनेन हेतुना जगत् विपरिवर्तते। (**9.10**)

Because of Me, the overseer, प्रकृति begets [all] that moves and does not move [or is sentient and insentient]. For this reason [i.e., Me], O अर्जुन, the universe revolves [in and out of manifestation].

| | | | |
|---|---|---|---|
| 1 | मया | because of Me | fr. अहम् *prn. sg. inst.* |
| 2 | अध्यक्षेण | the overseer | fr. अध्यक्ष *m. sg. inst.* |
| 3 | प्रकृतिः | प्रकृति | fr. प्रकृति *f. sg. nom.* |
| 5 | स-चर-अ-चरं | [all] that moves and does not move [or is sentient and insentient] | fr. स-चर-अचरम् *in.* (**6.39:** & **7.8.8:**) |
| 4 | सूयते | begets | fr. √सू *4.Ā. pr. 3rd sg.* |
| 7 | कौन्तेय | (अर्जुन) O Son of कुन्ती | fr. कौन्तेय *m. sg. voc.* |
| 6 | अनेन हेतुना | for this reason [i.e., Me] | fr. इदम् *prn. m. sg. inst.* (**4.8:**); हेतु *m. sg. inst.* |
| 8 | जगत् | the universe | fr. जगत् *n. sg. nom.* (**3.5.a:**) |
| 9 | विपरिवर्तते | revolves [in and out of manifestation] | fr. वि + परि + √वृत् *1.Ā. pr. 3rd sg.* |

**अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम्। परं भावमजानन्तो मम भूतमहेश्वरम्॥११॥**

(अवजानन्ति मां मूढाः, मानुषीं तनुम् आश्रितम्। परं भावम् अजानन्तः, मम भूतमहेश्वरम्॥)

भूत-महा-ईश्वरं मम परं भावम् अ-जानन्तः, मूढाः मां मानुषीं तनुम् आश्रितम् अवजानन्ति। (**9.11**)

Not knowing My limitless nature, as the Lord of [all] beings, the deluded disregard Me, who obtains [as the self, as I] in [this and every] human body.

| | | | |
|---|---|---|---|
| 5 | भूत- | of [all] beings | |
| 4 | -महा-ईश्वरं | [as] the Lord | fr. भूत-महा-ईश्वर *m. sg. acc.* |
| 2 | मम | My | fr. अहम् *prn. sg. gen.* |
| 3 | परं भावम् | limitless nature | fr. पर *prn. a. m. sg. acc.* (**4.16.3:**); भाव *m. sg. acc.* |
| 1 | अ-जानन्तः | not knowing | fr. अजानत् *pr. pt. of* √ज्ञा *pt. m. pl. nom.* (**5.23.2:**) |
| 6 | मूढाः | the deluded | fr. मूढ *pp. of* √मुह् *a. m. pl. nom.* (**2.107:**) |
| 8 | मां | Me | fr. अहम् *prn. sg. acc.* |
| 10 | मानुषीं तनुम् | [this and every] human body | fr. मानुषी *a. f. sg. acc.*; तनु *f. sg. acc.* (**7.8.5:**) |
| 9 | आश्रितम् | who obtains [as the self, as I] in | fr. आश्रित *pp. of* आ + √श्रि *a. m. sg. acc.* |
| 7 | अवजानन्ति | disregard | fr. अव + √ज्ञा *9.P. pr. 3rd pl.* (**5.23.2:** & **5.3:**) |

**मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः। राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः॥१२॥**

(मोघाशाः मोघकर्माणः, मोघज्ञानाः विचेतसः। राक्षसीम् आसुरीं च एव, प्रकृतिं मोहिनीं श्रिताः॥)

मोघ-आशाः मोघ-कर्माणः मोघ-ज्ञानाः वि-चेतसः राक्षसीम् आसुरीं च (=वा) एव मोहिनीं प्रकृतिं श्रिताः। (**9.12**)

Those whose hopes are in vain [are still unhappy], whose actions are in vain [are still incomplete], whose knowledge is in vain [are still ignorant of Me/reality], and who lack discernment—they tend toward a deluding disposition that is राक्षसी (criminal) or आसुरी (barbaric).

| | | | |
|---|---|---|---|
| 2 | मोघ- | are in vain [are still unhappy] | |
| 1 | -आशाः | those whose hopes | fr. मोघ-आश *a. m. pl. nom.* |
| 3 | मोघ-कर्माणः | whose actions are in vain [are still incomplete] | fr. मोघ-कर्मन् *a. m. pl. nom.* (**3.22:** & **2.92:**) |
| 4 | मोघ-ज्ञानाः | whose knowledge is in vain [are still ignorant of Me/reality] | fr. मोघ-ज्ञान *a. m. pl. nom.* |
| 5 | वि-चेतसः | [and] who lack discernment | fr. वि-चेतस् *a. m. pl. nom.* |
| 9 | राक्षसीम् | that is राक्षसी (criminal) | fr. राक्षसी *a. f. sg. acc.* |
| 10 | आसुरीं च (=वा) एव | or आसुरी (barbaric) | fr. आसुरी *a. f. sg. acc.*; च *in.*; एव *in.* |
| 7 | मोहिनीं | a deluding | fr. मोहिनी *a. f. sg. acc.* (**3.11:** & **.9:**) |
| 8 | प्रकृतिं | disposition | fr. प्रकृति *f. sg. acc.* |
| 6 | श्रिताः | they tend towards | fr. श्रित *pp. of* √श्रि *pt. m. pl. nom.* |

**महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः। भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम्॥१३॥**

(महात्मानः तु मां पार्थ, दैवीं प्रकृतिम् आश्रिताः। भजन्ति अनन्यमनसः, ज्ञात्वा भूतादिम् अव्ययम्॥)

पार्थ, महा-आत्मानः तु दैवीं प्रकृतिम् आश्रिताः, अन्-अन्य-मनसः, माम् अ-व्ययं भूत-आदिं ज्ञात्वा, [मां] भजन्ति। (**9.13**)

—Whereas, O अर्जुन, the wise [i.e., the discerning]—who tend toward a disposition that is दैवी (uplifting), whose mind [seeks] no other [than Me], knowing [of] Me as the changeless source of beings—they seek [Me].

| | | | |
|---|---|---|---|
| 2 | पार्थ | (अर्जुन) O Son of पृथा | fr. पार्थ *m. sg. voc.* |
| 1 | महा-आत्मानः तु | whereas the wise [i.e., the discerning] | fr. महा-आत्मन् *a. m. pl. nom.* (**3.22:**); तु *in.* |
| 5 | दैवीं | that is दैवी (uplifting) | fr. दैवी *a. f. sg. acc.* |
| 4 | प्रकृतिम् | a disposition | fr. प्रकृति *f. sg. acc.* |
| 3 | आश्रिताः | who tend towards | fr. आश्रित *pp. of* आ + √श्रि *a. m. pl. nom.* |

| | | |
|---|---|---|
| 6 अन्-अन्य-मनसः | whose mind [seeks] no other [than Me] | fr. अनन्य-मनस् *a. m. pl. nom.* (**3.6:**) |
| 8 माम् | Me | fr. अहम् *prn. sg. acc.* |
| 9 अ-व्ययं | [as] the changeless | fr. अव्यय *a. m. sg. acc.* |
| 10 भूत-आदिं | source of beings | fr. भूत-आदि *m. sg. acc.* |
| 7 ज्ञात्वा | knowing [of] | fr. ज्ञात्वा *in. pt. of* √ज्ञा |
| 11 [मां] भजन्ति | they seek [Me] | fr. √भज् *1.P. pr. 3rd pl.* |

**सततं कीर्तयन्तो मां यतन्तश्च दृढव्रताः। नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते॥१४॥**

(सततं कीर्तयन्तः मां, यतन्तः च दृढव्रताः। नमस्यन्तः च मां भक्त्या, नित्ययुक्ताः उपासते॥)

मां स-ततं कीर्तयन्तः यतन्तः च दृढ-व्रताः मां च नमस्यन्तः भक्त्या नित्य-युक्ताः [माम्] उपासते। (**9.14**)

Always acknowledging Me and making [proper] effort [to gain Me], [those] whose commitment is firm, surrendering to Me, always united [to Me] with devotion—they [the कर्म-योगिन्-s] seek [Me].

| | | |
|---|---|---|
| 3 मां | Me | fr. अहम् *prn. sg. acc.* |
| 1 स-ततं | always | fr. स-ततम् *in.* (**6.39:** & **7.8.8:**) |
| 2 कीर्तयन्तः | acknowledging | fr. कीर्तयत् *pr. pt. of 10th class* √कीर्त् *pt. m. pl. nom.* |
| 4 यतन्तः च | and making [proper] effort [to gain Me] | fr. यतत् *pr. pt. of* √यत् *pt. m. pl. nom.* (**3.12:**); च *in.* |
| 5 दृढ-व्रताः | whose commitment is firm | fr. दृढ-व्रत *a. m. pl. nom.* |
| 7 मां च | to Me | fr. अहम् *prn. sg. acc.*; च *in.* |
| 6 नमस्यन्तः | surrendering | fr. नमस्यत् *pr. pt. of den.*√नमस्य *pt. m. pl. nom.* (**3.12:**) |
| 9 भक्त्या | with devotion | fr. भक्ति *f. sg. inst.* |
| 8 नित्य-युक्ताः | always united [to Me] | fr. नित्य-युक्त *a. m. pl. nom.* |
| 10 [माम्] उपासते | they [the कर्म-योगिन्-s] seek [Me] | fr. उप + √आस् *2.Ā. pr. 3rd pl.* (**5.6.b:**) |

**ज्ञानयज्ञेन चाप्यन्ये यजन्तो मामुपासते। एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम्॥१५॥**

(ज्ञानयज्ञेन च अपि अन्ये, यजन्तः माम् उपासते। एकत्वेन पृथक्त्वेन, बहुधा विश्वतोमुखम्॥)

अन्ये च अपि ज्ञान-यज्ञेन यजन्तः, मां विश्वतस्-मुखम् एकत्वेन पृथक्त्वेन [च] बहुधा उपासते। (**9.15**)

And still others [ज्ञान-योगिन्-s, सन्न्यासिन्-s], worshipping [Me] through the यज्ञ that is knowledge, seek Me—whose face is everywhere, in many ways—as being one [i.e., "(Separate) beings do not exist in Me"—*see* 9.5] and as being distinct [i.e., "(All) beings exist in Me"—*see* 9.4].

| | | | |
|---|---|---|---|
| 2 | अन्ये | others [ज्ञानयोगिन्-s, सन्न्यासिन्-s] | fr. अन्य *prn.a. m. pl. nom.* (**4.16.3:**) |
| 1 | च अपि | and still | fr. च *in.*; अपि *in.* |
| 4 | ज्ञान-यज्ञेन | through the यज्ञ that is knowledge | fr. ज्ञान-यज्ञ *m. sg. inst.* |
| 3 | यजन्तः | worshiping [Me] | fr. यजत् *pr. pt. of* √यज् *pt. m. pl. nom.* (**3.12:**) |
| 6 | मां | Me | fr. अहम् *prn. sg. acc.* |
| 8 | विश्वतस्- | is everywhere | |
| 7 | -मुखम् | whose face | fr. विश्वतस्-मुख *a. m. sg. acc.* (**2.24:** & **.33:**) |
| 10 | एकत्वेन | as being one [i.e., "(Separate) beings do not exist in Me"] | fr. एकत्व *n. sg. inst.* (**7.9.2:**) |
| 11 | पृथक्त्वेन [च] | and as being distinct [i.e., "(All) beings exist in Me"] | fr. पृथक्त्व *n. sg. inst.* (**7.9.2:**) |
| 9 | बहुधा | in many ways | fr. बहुधा *in.* (**6.19:**) |
| 5 | उपासते | seek | fr. उप + √आस् *2.Ā. pr. 3rd pl.* (**5.6.b:**) |

**अहं क्रतुरहं यज्ञः स्वधाहमहमौषधम्। मन्त्रोऽहमहमेवाज्यमहमग्निरहं हुतम्॥१६॥**

(अहं क्रतुः अहं यज्ञः, स्वधा अहम् अहम् औषधम्। मन्त्रः अहम् अहम् एव आज्यम्, अहम् अग्निः अहं हुतम्॥)

अहं क्रतुः, अहं यज्ञः, अहं स्वधा, अहम् औषधम्, अहं मन्त्रः, अहम् एव आज्यम्, अहम् अग्निः, अहं [च] हुतम्। (**9.16**)

The Vedic ritual is Me, the act of worship is Me, the food [offered to the ancestors] is Me, the food [offered to the Lord] is Me, the chant is Me, the clarified butter [warmed by the sun, offered into the fire] is Me, the [sacrificial] fire is Me, and the oblation is Me.

| | | | |
|---|---|---|---|
| 1 | अहं क्रतुः | the Vedic ritual is Me | fr. अहम् *prn. sg. nom.*; क्रतु *m. sg. nom.* (**7.2.c:**) |
| 2 | अहं यज्ञः | the act of worship is Me | fr. अहम् *prn. sg. nom.*; यज्ञ *m. sg. nom.* |
| 3 | अहं स्वधा | the food [offered to the ancestors] is Me | fr. अहम् *prn. sg. nom.*; स्वधा *f. sg. nom.* |
| 4 | अहम् औषधम् | the food [offered to the Lord] is Me | fr. अहम् *prn. sg. nom.*; औषध *n. sg. nom.* |

| | | | |
|---|---|---|---|
| 5 | अहं मन्त्रः | the chant is Me | fr. अहम् *prn. sg. nom.*; मन्त्र *m. sg. nom.* |
| 6 | अहम् एव आज्यम् | the clarified butter [warmed by the sun, offered into the fire] is [indeed] Me | fr. अहम् *prn. sg. nom.*; एव *in.*; आज्य *n. sg. nom.* |
| 7 | अहम् अग्निः | the [sacrificial] fire is Me | fr. अहम् *prn. sg. nom.*; अग्नि *m. sg. nom.* |
| 8 | अहं [च] हुतम् | [and] the oblation is Me | fr. अहम् *prn. sg. nom.*; हुत *pp. of* √हु *n. sg. nom.* |

**पिताहमस्य जगतो माता धाता पितामहः। वेद्यं पवित्रमोङ्कार ऋक्साम यजुरेव च॥१७॥**

(पिता अहम् अस्य जगतः, माता धाता पितामहः। वेद्यं पवित्रम् ओङ्कारः, ऋक् साम यजुः एव च॥)

अहम् अस्य जगतः पिता, माता, पिता-महः, धाता [च]। [अहं] वेद्यं, पवित्रम्, ओङ्-कारः, ऋक्, साम, यजुः एव च। (**9.17**)

The father [efficient cause], mother [material cause], [My own] grandfather [i.e., the uncaused cause], and the sustainer of this universe are Me. The [only] one to be known, the purifier, "ओम्" [My name], the ऋग्-वेद, the साम-वेद, and the यजुर्-वेद [are Me].

| | | | |
|---|---|---|---|
| 6 | अहं | [are] Me | fr. अहम् *prn. sg. nom.* |
| 5 | अस्य जगतः | of this universe | fr. इदम् *prn. n. sg. gen.*; जगत् *n. sg. gen.* (**3.5:**) |
| 1 | पिता | the father [efficient cause] | fr. पितृ *m. sg. nom.* (**3.38:**) |
| 2 | माता | mother [material cause] | fr. मातृ *f. sg. nom.* (**3.38:**) |
| 3 | पिता-महः | [My own] grandfather [i.e., the uncaused cause] | fr. पिता-मह *m. sg. nom.* (*see* **6.40:**) |
| 4 | धाता [च] | [and] the sustainer | fr. धातृ *m. sg. nom.* (**3.38:**) |
| 13 | [अहं] | [are Me] | |
| 7 | वेद्यं | the [only] one to be known | fr. वेद्य *pot. ps. pt. of* √विद् *a. n. sg. nom.* (**6.8:**) |
| 8 | पवित्रम | the purifier | fr. पवित्र *n. sg. nom.* |
| 9 | ओङ्-कारः | "ओम्" [My name] | fr. ओम्-कार *m. sg. nom.* (**2.55:**) |
| 10 | ऋक् | the ऋग्वेद | fr. ऋच् *f. sg. nom.* (**3.6.b:** & **2.23:** & **2.24:**) |
| 11 | साम | the सामवेद | fr. सामन् *n. sg. nom.* (**3.22:**) |
| 12 | यजुः एव च | and the यजुर्वेद | fr. यजुस् *n. sg. nom.* (**3.6:**); एव *in.* (**6.19:**); च *in.* |

**गतिर्भर्ता प्रभुः साक्षी निवासः शरणं सुहृत्। प्रभवः प्रलयः स्थानं निधानं बीजमव्ययम्॥१८॥**

(गतिः भर्ता प्रभुः साक्षी, निवासः शरणं सुहृद्। प्रभवः प्रलयः स्थानं, निधानं बीजम् अव्ययम्॥)

[अहं] गतिः, भर्ता, प्रभुः, साक्षी, निवासः, शरणं, सु-हृद् [च]। [अहं] प्रभवः, प्रलयः, स्थानं, निधानं, अ-व्ययं [च] बीजम्। (**9.18**)

The goal, the nourisher, the Lord, the [only] witness [of everything], the abode, the shelter, and the friend [are Me]. The origin, the dissolution, the continued existence, the receptacle, and the imperishable seed [i.e., continual cause of everything] [are Me].

| | | | |
|---|---|---|---|
| 8 | [अहं] | [are Me] | |
| 1 | गतिः | the goal | fr. गति *f. sg. nom.* |
| 2 | भर्ता | the nourisher | fr. भर्तृ *m. sg. nom.* (**3.38:**) |
| 3 | प्रभुः | the Lord | fr. प्रभु *m. sg. nom.* |
| 4 | साक्षी | the [only] witness [of everything] | fr. साक्षिन् *m. sg. nom.* (**3.15:**) |
| 5 | निवासः | the abode | fr. निवास *m. sg. nom.* |
| 6 | शरणं | the shelter | fr. शरण *n. sg. nom.* |
| 7 | सु-हृद् [च] | and the friend | fr. सुहृद् *m. sg. nom.* (**3.6:**) |
| 15 | [अहं] | [are Me] | |
| 9 | प्रभवः | the origin | fr. प्रभव *m. sg. nom.* |
| 10 | प्रलयः | the dissolution | fr. प्रलय *m. sg. nom.* |
| 11 | स्थानं | the continued existence | fr. स्थान *n. sg. nom.* |
| 12 | निधानं | the receptacle | fr. निधान *n. sg. nom.* |
| 13 | अ-व्ययं [च] | and the imperishable | fr. अव्यय *a. n. sg. nom.* |
| <u>14</u> | बीजम् | seed [i.e., continual cause of everything] | fr. बीज *n. sg. nom.* |

**तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च। अमृतं चैव मृत्युश्च सदसच्चाहमर्जुन॥१९॥**

(तपामि अहम् अहं वर्षं, निगृह्णामि उत्सृजामि च। अमृतं च एव मृत्युः च, सत् असत् च अहम् अर्जुन॥)

अहं तपामि। अहं वर्षं निगृह्णामि उत्सृजामि च। [अहं] अ-मृतं च एव मृत्युः च। अहं सत् अ-सत् च, अर्जुन। (**9.19**)

I heat. I hold back and give forth the rain. The immortality [of the gods] and also the death [of mortals] [are Me]. Both reality [i.e., the sustaining cause] and unreality [i.e., the time-bound effects] is Me, O अर्जुन.

| | | | |
|---|---|---|---|
| 1 | अहं तपामि | I heat | fr. अहम् *prn. sg. nom.*; √तप् *1.P. 1st sg.* (**5.5.a:**) |
| 2 | अहं | I | fr. अहम् *prn. sg. nom.* |
| 5 | वर्षं | the rain | fr. वर्ष *m. sg. acc.* |
| 3 | निगृह्णामि | hold back | fr. नि + √ग्रह् *9.P. 1st sg.* (**5.23.2:** & **5.5.a:**) |
| 4 | उत्सृजामि च | and give forth | fr. उद् + √सृज् *6.P. 1st sg.* (**5.23.2:** & **5.5.a:**) |
| 9 | [अहं] | [are Me] | |
| 7 | अ-मृतं | the immortality [of the gods] | fr. अमृत *pp. of* √मृ *n. sg. nom.* |
| 6 | च एव | [and] [indeed] | fr. च *in.*; एव *in.* |
| 8 | मृत्युः च | and also the death [of mortals] | fr. मृत्यु *m. sg. nom.*; च *in.* |
| 12 | अहं | [is] Me | fr. अहम् *prn. sg. nom.* |
| 10 | सत् | both reality [i.e., the sustaining cause] | fr. सत् *pr. pt. of* √अस् *n. sg. nom.* (**6.4:** & **5.19.4:** & **3.12:**) |
| 11 | अ-सत् च | and unreality [i.e., the time-bound effects] | fr. असत् *pr. pt. of* √अस् *n. sg. nom.* (**6.4:** & **5.19.4:** & **3.12:**) |
| 13 | अर्जुन | O अर्जुन | fr. अर्जुन *m. sg. voc.* |

**त्रैविद्या मां सोमपाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते।**
**ते पुण्यमासाद्य सुरेन्द्रलोकमश्नन्ति दिव्यान्दिवि देवभोगान्॥ २०॥**

(त्रैविद्याः मां सोमपाः पूतपापाः, यज्ञैः इष्ट्वा स्वर्गतिं प्रार्थयन्ते। ते पुण्यम् आसाद्य सुरेन्द्रलोकम्, अश्नन्ति दिव्यान् दिवि देवभोगान्॥ )

त्रै-विद्याः सोम-पाः पूत-पापाः, मां यज्ञैः इष्ट्वा, स्वर्-गतिं प्रार्थयन्ते। पुण्यं सुर-इन्द्र-लोकम् आसाद्य, ते दिवि दिव्यान् देव-भोगान् अश्नन्ति।

(**9.20**) Those versed in the three वेद-s, who drink [i.e., participate in] the सोम [ritual], [and thus are relatively] cleansed of karmic demerit, propitiating Me with rituals—they pray for going to heaven. Attaining the world of Lord इन्द्र as [a result of their] पुण्य, they enjoy heavenly experiences of the celestials in heaven.

| | | | |
|---|---|---|---|
| 1 | त्रै-विद्याः | those versed in the three वेद-s | fr. त्रै-विद्य *a. m. pl. nom.* |
| 2 | सोम-पाः | who drink [i.e., participate in] the सोम [ritual] | fr. सोम-प *a. m. pl. nom.* (**6.24.1:**) |
| 3 | पूत- | [and thus are relatively] cleansed | |
| 4 | -पापाः | of karmic demerit | fr. पूत-पाप *a. m. pl. nom.* |
| 6 | मां | Me | fr. अहम् *prn. sg. acc.* |
| 7 | यज्ञैः | with rituals | fr. यज्ञ *m. pl. inst.* |
| 5 | इष्ट्वा | propitiating | fr. इष्ट्वा *in. pt. of* √यज् (**6.9:** & **2.3.a:** & **2.81:** & **2.88:**) |
| 9 | स्वर्-गतिं | going to heaven | fr. स्वर्-गति *f. sg. acc.* (**2.24:** & **.34:**) |
| 8 | प्रार्थयन्ते | they pray for | fr. प्र + √अर्थ् *10.Ā. pr. 3rd pl.* |
| 13 | पुण्यं | as [a result of their] पुण्य | fr. पुण्य *n. sg. acc.* |
| 12 | सुर-इन्द्र- | of Lord इन्द्र | |
| 11 | -लोकम् | the world | fr. सुर-इन्द्र-लोक *m. sg. acc.* |
| 10 | आसाद्य | attaining | fr. आसाद्य *in. pt. of* आ + *cs.* √सद् |
| 14 | ते | they | fr. तद् *prn. m. pl. nom.* |
| 18 | दिवि | in heaven | fr. द्यु *m. sg. loc..* (**3.35:**) |
| 16 | दिव्यान् | heavenly | fr. दिव्य *a. m. pl. acc.* |
| 17 | देव-भोगान् | experiences of the celestials | fr. देव-भोग *m. pl. acc.* |
| 15 | अश्नन्ति | enjoy | fr. √अश् *5.P. pr. 3rd pl.* |

**ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति।**
**एवं त्रयीधर्ममनुप्रपन्ना गतागतं कामकामा लभन्ते॥ २१॥**

(ते तं भुक्त्वा स्वर्गलोकं विशालं, क्षीणे पुण्ये मर्त्यलोकं विशन्ति। एवं त्रयीधर्मम् अनुप्रपन्नाः, गतागतं कामकामाः लभन्ते॥ )

ते तं विशालं स्वर्-ग-लोकं भुक्त्वा, पुण्ये क्षीणे, मर्त्य-लोकं विशन्ति। एवं त्रयी-धर्मम् अनुप्रपन्नाः काम-कामाः गत-आगतं लभन्ते।

(**9.21**) Having enjoyed that vast [subtle] world [called] heaven, when [their] पुण्य is spent, they [re-] enter the world of mortals. In this manner, following ritual [enjoined] by the three [श्रुति-s, the three वेद-s], those who require objects of desire take to coming and going [i.e., remain in संसार].

| | | | |
|---|---|---|---|
| 6 | ते | they | fr. तद् *prn. m. pl. nom.* |
| 2 | तं विशालं | that vast [subtle] | fr. तद् *prn. m. sg. acc.*; विशाल *a. m. sg. acc.* |
| 4 | स्वर्-ग- | [called] heaven | |
| 3 | -लोकं | world | fr. स्वर्ग-लोक *m. sg. acc.* |
| 1 | भुक्त्वा | having enjoyed | fr. भुक्त्वा *in. pt. of* √भुज् (**2.81:**) |
| 5 | पुण्ये क्षीणे | when [their] पुण्य is spent | fr. पुण्य *n. sg. loc.*; क्षीण *pp. of* √क्षि *pt. n. sg. loc.* (**6.6:** *w/irreg. lengthening of* इ & **2.92:**) (**7.14.1:**) |
| 8 | मर्त्य-लोकं | the world of mortals | fr. मर्त्य-लोक *m. sg. acc.* |
| 7 | विशन्ति | [re-]enter | fr. √विश् *6.P. pr. 3rd pl.* |
| 9 | एवं | in this manner | fr. एवम् *in.* (**6.19:**) |
| 11 | त्रयी-धर्मम् | ritual [enjoined] by the three [श्रुति-s, the three वेद-s] | fr. त्रयी-धर्म *m. sg. acc.* |
| 10 | अनुप्रपन्नाः | following | fr. अनुप्रपन्न *pp. of* अनु + प्र + √पद् *pt. m. pl. nom.* (**6.6:**) |
| 13 | काम- | objects of desire | |
| 12 | -कामाः | those who require | fr. काम-काम *a. m. pl. nom.* |
| 16 | गत- | and going [i.e., remain in संसार] | |
| 15 | -आगतं | coming | fr. गत-आगत *n. sg. acc.* |
| 14 | लभन्ते | take to | fr. √लभ् *1.Ā. pr. 3rd pl.* |

**अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते। तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्॥ २२॥**

(अनन्याः चिन्तयन्तः मां, ये जनाः पर्युपासते। तेषां नित्याभियुक्तानां, योगक्षेमं वहामि अहम्॥)

ये जनाः अन्-अन्याः मां चिन्तयन्तः [मां] पर्युपासते, तेषां नित्य-अभियुक्तानाम् अहं योग-क्षेमं वहामि। (**9.22**)

[But] for those people who are not separate [from Me], who contemplate Me and gain [Me], being always one [with Me], I procure what [they] want to acquire and protect [i.e., I, the Lord, take care of the bodily and mental needs of these सन्न्यासिन्-s].

| | | | |
|---|---|---|---|
| 3 | ये | who [are] | fr. यद् *prn. m. pl. nom.* |
| 2 | जनाः | people | fr. जन *m. pl. nom.* |
| 4 | अन्-अन्याः | not-separate [from Me] | fr. अनन्य *prn. a. m. pl. nom.* |
| 5 | मां चिन्तयन्तः | who contemplate Me | fr. अहम् *prn. sg. acc.*; चिन्तयत् *pr. pt. of* √चिन्त् *a. m. pl. nom.* |
| 6 | [मां] पर्युपासते | and gain [Me] | fr. परि + उप + √आस् *2.Ā. pr. 3rd pl.* (**5.6.b:**) |
| 1 | तेषां | [but] for those | fr. तद् *prn. m. pl. gen.* |
| 7 | नित्य- | always | |
| 8 | -अभियुक्तानाम् | being one [with Me] | fr. नित्य-अभियुक्त *a. m. pl. gen.* |
| 9 | अहं | I | fr. अहम् *prn. sg. nom.* |
| 11 | योग- | what [they] want to acquire | |
| 12 | -क्षेमं | and protect | fr. योग-क्षेम *n. sg. acc.* |
| 10 | वहामि | procure | fr. √वह् *1.P. pr. 1st sg.* (**5.6.a:**) |

**येऽप्यन्यदेवताभक्ता यजन्ते श्रद्धयान्विताः। तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम्॥ २३॥**

(ये अपि अन्यदेवताभक्ताः, यजन्ते श्रद्धया अन्विताः। ते अपि माम् एव कौन्तेय, यजन्ति अविधिपूर्वकम्॥)

कौन्तेय, ये अपि अन्य-देवता-भक्ताः श्रद्धया अन्विताः यजन्ते, ते अपि माम् एव यजन्ति [परन्तु] अ-विधि-पूर्वकम्। (**9.23**) O अर्जुन, even those who are devoted to deities as different [from Me and themselves]—who, filled with faith, perform [various] acts of worship—they also worship only Me, [but] not in accordance to a [valid] means [of knowing Me, the Lord, who is each of these deities].

| | | | |
|---|---|---|---|
| 1 | कौन्तेय | (अर्जुन) O Son of कुन्ती | fr. कौन्तेय *m. sg. voc.* |
| 2 | ये अपि | even those who [are] | fr. यद् *prn. m. pl. nom.*; अपि *in.* |
| 4 | अन्य- | [as] different [from Me and themselves] | |
| 3 | -देवता-भक्ताः | devoted to deities | fr. अन्य-देवता-भक्त *a. m. pl. nom.* |

| | | | |
|---|---|---|---|
| 6 | श्रद्धया | with faith | fr. श्रद्धा *f. sg. inst.* |
| 5 | अन्विताः | who filled | fr. अन्वित *pp. of* अनु + √इ *a. m. pl. nom.* (**2.11:**) |
| 7 | यजन्ते | perform [various] acts of worship | fr. √यज् *1.Ā. pr. 3rd pl.* |
| 8 | ते अपि | they also | fr. तद् *prn. m. pl. nom.*; अपि *in.* |
| 10 | माम् एव | only Me | fr. अहम् *prn. sg. acc.*; एव *in.* (**6.19:**) |
| 9 | यजन्ति | worship | fr. √यज् *1.P. pr. 3rd pl.* |
| 11 | [परन्तु] | [but] | |
| 12 | अ-विधि-पूर्वकम् | not in accordance to a [valid] means [of knowing Me, the Lord who is each of these deities] | fr. अ-विधि-पूर्वकम् *in.* |

**अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च। न तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते॥२४॥**

(अहं हि सर्वयज्ञानां, भोक्ता च प्रभुः एव च। न तु माम् अभिजानन्ति, तत्त्वेन अतः च्यवन्ति ते॥)

अहं हि सर्व-यज्ञानां भोक्ता च प्रभुः एव च, मां तु तत्त्वेन न अभिजानन्ति। अतः ते च्यवन्ति। (**9.24**)

I am indeed the experiencer [i.e., recipient] of all यज्ञ-s (acts of worship) and the only Lord, but they do not know Me in reality. Therefore, they fall away [i.e., they lose Me out of ignorance].

| | | | |
|---|---|---|---|
| 1 | अहं हि | I [am] indeed | fr. अहम् *prn. sg. nom.*; हि *in.* |
| 3 | सर्व-यज्ञानां | of all यज्ञ-s (acts of worship) | fr. सर्व-यज्ञ *m. pl. gen.* |
| 2 | भोक्ता च | the experiencer [i.e., recipient] | fr. भोक्तृ *m. sg. nom.* (**3.38:**); च *in.* |
| 4 | प्रभुः एव च | and the only Lord | fr. प्रभु *m. sg. nom.*; एव *in.* (**6.19:**); च *in.* |
| 7 | मां | Me | fr. अहम् *prn. sg. acc.* |
| 5 | तु | but | fr. तु *in.* |
| 8 | तत्त्वेन | in reality | fr. तत्त्वेन *in.* (**7.9.14:**) |
| 6 | न अभिजानन्ति | they do not know | fr. न *in.*; अभि + √ज्ञा *9.P. pr. 3rd pl.* (**5.23.2:** & **5.3:**) |
| 9 | अतः | therefore | fr. अतस् *in.* (**6.19:**) |
| 10 | ते | they | fr. तद् *prn. m. pl. nom.* |
| 11 | च्यवन्ति | fall away [i.e., they lose Me out of ignorance] | fr. √च्यु *1.P. pr. 3rd pl.* (**5.3:** & **2.3:** & **2.71:**) |

**यान्ति देवव्रता देवान्पितॄन्यान्ति पितृव्रताः। भूतानि यान्ति भूतेज्या यान्ति मद्याजिनोऽपि माम्॥ २५॥**

(यान्ति देवव्रताः देवान्, पितॄन् यान्ति पितृव्रताः। भूतानि यान्ति भूतेज्याः, यान्ति मद्याजिनः अपि माम्॥ )

देव-व्रताः देवान् यान्ति। पितृ-व्रताः पितॄन् यान्ति। भूत-इज्याः भूतानि यान्ति। मद्-याजिनः अपि मां यान्ति। (**9.25**)

Those who have commitment to the deities reach the [world of] deities. Those who have commitment to the ancestors reach the [world of] ancestors. Those who worship spirits reach the [world of] spirits. And those who are disposed to worship Me reach Me.

| | | | |
|---|---|---|---|
| 1 | देव-व्रताः | those who have commitment to the deities | fr. देव-व्रत *a. m. pl. nom.* |
| 2 | देवान् यान्ति | reach the [world of] deities | fr. देव *m. pl. acc.*; √या *2.P. pr. 3rd pl.* |
| 3 | पितृ-व्रताः | those who have commitment to the ancestors | fr. पितृ-व्रत *a. m. pl. nom.* |
| 4 | पितॄन् यान्ति | reach the [world of] ancestors | fr. पितृ *m. pl. acc.* (**3.38:**); √या *2.P. pr. 3rd pl.* |
| 5 | भूत-इज्याः | those who worship spirits | fr. भूत-इज्य *a. m. pl. nom.* |
| 6 | भूतानि यान्ति | reach the [world of] spirits | fr. भूत *pp. of* √भू *n. pl. acc.*; √या *2.P. pr. 3rd pl.* |
| 7 | मद्-याजिनः अपि | and those who are disposed to worship Me | fr. मद्-याजिन् *a. m. pl. nom.* (**2.24:** & **2.43:** & **3.15:**); अपि *in.* |
| 8 | मां यान्ति | reach Me | fr. अहम् *prn. sg. acc.*; √या *2.P. pr. 3rd pl.* |

**पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति। तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः॥ २६॥**

(पत्रं पुष्पं फलं तोयं, यः मे भक्त्या प्रयच्छति। तद् अहं भक्त्युपहृतम्, अश्नामि प्रयतात्मनः॥ )

यः मे पत्रं पुष्पं फलं तोयं भक्त्या प्रयच्छति, अहं तद् प्रयत-आत्मनः भक्ति-उपहृतम् अश्नामि। (**9.26**)

The one who offers to Me with devotion a leaf, a flower, a fruit, water—I receive that as offered out of the devotion of one whose mind is mastered [to that extent—to the extent that one acknowledges Me, the Lord, and can act on that acknowledgment].

| | | | |
|---|---|---|---|
| 1 | यः | the one who | fr. यद् *prn. m. sg. nom.* |
| 3 | मे | to Me | fr. अहम् *prn. sg. dat.* (**4.3:**) (**7.10.A.1:**) |
| 5 | पत्रं | a leaf | fr. पत्र *n. sg. acc.* |
| 6 | पुष्पं | a flower | fr. पुष्प *n. sg. acc.* |
| 7 | फलं | a fruit | fr. फल *n. sg. acc.* |
| 8 | तोयं | water | fr. तोय *n. sg. acc.* |
| 4 | भक्त्या | with devotion | fr. भक्ति *f. sg. inst.* |
| 2 | प्रयच्छति | offers | fr. प्र + √यम् *1.P. pr. 3rd sg.* (**5.15.6:**) |

| | | | |
|---|---|---|---|
| 9 | अहं | I | fr. अहम् *prn. sg. nom.* |
| 11 | तद् | that | fr. तद् *prn. n. sg. acc.* |
| 15 | प्रयत- | is mastered | |
| 14 | -आत्मनः | of one whose mind | fr. प्रयत-आत्मन् *a. m. sg. gen.* (**3.22:**) |
| 13 | भक्ति- | out of the devotion | |
| 12 | -उपहृतम् | [as] offered | fr. भक्ति-उपहृत *a. n. sg. acc.* |
| 10 | अश्नामि | receive | fr. √अश् *9.P. pr. 1st sg.* (**5.3:** & **.5.a:**) |

**यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्। यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम्॥ २७॥**
| 8 | सिद्धानां | among सिद्ध-s (a class of sages born already wise from deities) | fr. सिद्ध *pp. of* √सिध् *m. pl. gen.* (**2.76: & .78:**) |
| 7 | कपिलः मुनिः | [and] the seer/sage कपिल | fr. कपिल *m. sg. nom.*; मुनि *m. sg. nom.* |

**उच्चैःश्रवसमश्वानां विद्धि माममृतोद्भवम्। ऐरावतं गजेन्द्राणां नराणां च नराधिपम्॥ २७॥**

(उच्चैःश्रवसम् अश्वानां, विद्धि माम् अमृतोद्भवम्। ऐरावतं गजेन्द्राणां, नराणां च नराधिपम्॥)

अश्वानाम् अ-मृत-उद्भवम् उच्चैः-श्रवसं, गज-इन्द्राणाम् ऐरावतं, नराणां च नर-अधिपं मां विद्धि। (**10.27**)

Know among horses [Lord इन्द्र-'s white steed called] उच्चैः-श्रवस्, born from [the gods and demons churning the primordial milky ocean for] the immortal nectar; [Lord इन्द्र-'s white] ऐरावत among noble elephants; and, among people, the king—[know all to be] Me.

| | | | |
|---|---|---|---|
| 2 | अश्वानाम् | among horses | fr. अश्व *m. pl. gen.* |
| 4 | अ-मृत-उद्भवम् | born from [the gods and demons churning the primordial milky ocean for] the immortal nectar | fr. अमृत-उद्भव *a. m. sg. acc.* |
| 3 | उच्चैः-श्रवसं | [Lord इन्द्र-'s white steed called] उच्चैःश्रवस् | fr. उच्चैस्-श्रवस् *m. sg. acc.* (**2.24: & 3.6:**) |
| 6 | गज-इन्द्राणाम् | among noble elephants | fr. गज-इन्द्र *m. pl. gen.* (**2.8: & .92:**) |
| 5 | ऐरावतं | [including Lord इन्द्र-'s white] ऐरावत | fr. ऐरावत *m. sg. acc.* |

| | | | |
|---|---|---|---|
| 7 | नराणां च | and among people | fr. नर *m. pl. gen.* (**2.92:**) |
| 8 | नर-अधिपं | the king | fr. नर-अधिप *m. sg. acc.* (**6.24.1:**) |
| 9 | माम् | [to be] Me | fr. अहम् *prn. sg. acc.* |
| 1 | विद्धि | know | fr. √विद् *2.P. impv.* $2^{nd}$ *sg.* (**5.6.a:**) |

**आयुधानामहं वज्रं धेनूनामस्मि कामधुक्। प्रजनश्चास्मि कन्दर्पः सर्पाणामस्मि वासुकिः॥ २८॥**

(आयुधानाम् अहं वज्रं, धेनूनाम् अस्मि कामधुक्। प्रजनः च अस्मि कन्दर्पः, सर्पाणाम् अस्मि वासुकिः॥)

अहम् आयुधानां वज्रं, धेनूनां काम-धुक् अस्मि। प्रजनः च कन्-दर्पः अस्मि। सर्पाणां वासुकिः अस्मि। (**10.28**)

I am [Lord इन्द्र-'s] lightning bolt among weapons and काम-धेनु (the wish-fulfilling cow) among cows. I am the deity that is desire [for immortality] who causes progeny. I am [the divine, poisonous king of snakes used to churn the primordial milky ocean] वासुकि among snakes.

| | | | |
|---|---|---|---|
| 1 | अहम् | I [am] | fr. अहम् *prn. sg. nom.* |
| 3 | आयुधानां | among weapons | fr. आयुध *n. pl. gen.* |
| 2 | वज्रं | [Lord इन्द्र-'s] lightning bolt | fr. वज्र *n. sg. nom.* |
| 6 | धेनूनां | among cows | fr. धेनु *f. pl. gen.* |
| 5 | काम-धुक् | कामधेनु (the wish-fulfilling cow) | fr. काम-दुह् *f. sg. nom.* (**6.24:** & **3.6.m:** & **2.77:** & **2.79:** & **2.24:**) |
| 4 | अस्मि | [and] [I am] | fr. √अस् *2.P. pr.* $1^{st}$ *sg.* |
| 9 | प्रजनः च | who causes progeny | fr. प्रजन *m. sg. nom.*; च *in.* |
| 8 | कन्-दर्पः | the deity that is desire [for immortality] | fr. कम्-दर्प *m. sg. nom.* (**2.55:**) |
| 7 | अस्मि | I am | fr. √अस् *2.P. pr.* $1^{st}$ *sg.* |
| 12 | सर्पाणां | among snakes | fr. सर्प *m. pl. gen.* (**2.92:**) |
| 11 | वासुकिः | [the divine poisonous king of snakes used to churn the primordial milky ocean] वासुकि | fr. वासुकि *m. sg. nom.* |
| 10 | अस्मि | I am | fr. √अस् *2.P. pr.* $1^{st}$ *sg.* |

**अनन्तश्चास्मि नागानां वरुणो यादसामहम्। पितॄणामर्यमा चास्मि यमः संयमतामहम्॥ २९॥**

(अनन्तः च अस्मि नागानां, वरुणः यादसाम् अहम्। पितॄणाम् अर्यमा च अस्मि, यमः संयमताम् अहम्॥)

नागानां च अन्-अन्तः अस्मि। यादसां वरुणः अहम्। पितॄणां च अर्यमा अस्मि। संयमतां यमः अहम्। (**10.29**)

And I am अनन्त [on whom Lord विष्णु reclines] among [many-headed] snakes. I am [the Lord of water] वरुण among creatures [and deities] of water. I am [the king of the ancestors called] अर्यमन् among the ancestors. I am [the feared] यम (Lord Death) among discipliners.

| | | | |
|---|---|---|---|
| 3 | नागानां च | [and] among [many-headed] snakes | fr. नाग *m. pl. gen.*; च *in.* |
| 2 | अन्-अन्तः | अनन्त [on whom Lord विष्णु reclines] | fr. अनन्त *m. sg. nom.* |
| 1 | अस्मि | I am | fr. √अस् *2.P. pr.* $1^{st}$ *sg.* |
| 6 | यादसां | among creatures [and deities] of water | fr. यादस् *n. pl nom.* (**3.6:**) |
| 5 | वरुणः | [the Lord of water] वरुण | fr. वरुण *m. sg. nom.* |
| 4 | अहं | I [am] | fr. अहम् *prn. sg. nom.* |
| 9 | पितॄणां च | among the ancestors | fr. पितृ *m. pl. nom.* (**3.38:**); च *in.* |
| 8 | अर्यमा | [the king of the ancestors called] अर्यमन् | fr. अर्यमन् *m. sg. nom.* (**3.22:**) |
| 7 | अस्मि | I am | fr. √अस् *2.P. pr.* $1^{st}$ *sg.* |
| 12 | संयमतां | among discipliners | fr. संयमत् *pr. pt. of* सम् + √यम् *a. n. pl. gen.* (**3.12:** & *irreg. in not taking the root substitute* यच्छ् **5.15.6:**) |
| 11 | यमः | [the feared] Lord Death | fr. यम *m. sg. nom.* |
| 10 | अहम् | I [am] | fr. अहम् *prn. sg. nom.* |

**प्रह्लादश्चास्मि दैत्यानां कालः कलयतामहम्। मृगाणां च मृगेन्द्रोऽहं वैनतेयश्च पक्षिणाम्॥ ३०॥**

(प्रह्लादः च अस्मि दैत्यानां, कालः कलयताम् अहम्। मृगाणां च मृगेन्द्रः अहं, वैनतेयः च पक्षिणाम्॥)

दैत्यानां च प्रह्लादः अस्मि। कलयतां कालः अहम्। अहं च मृगाणां मृग-इन्द्रः, पक्षिणां च वैनतेयः (=गरुडः)। (**10.30**)

And I am [the demon-yet-नारायण-devotee called] प्रह्लाद among the demons [born of दिति]. I am time [itself] among those who calculate [time]. I am [the fearless king of beasts] the lion among wild animals, and [विष्णु-'s high-flying devotee] गरुड among birds.

| | | | |
|---|---|---|---|
| 3 | दैत्यानां च | [and] among the demons [born of दिति] | fr. दैत्य *n. pl. gen.*; च *in.* |
| 2 | प्रह्लादः | [the demon-yet-नारायण-devotee called] प्रह्लाद | fr. प्रह्लाद *m. sg. nom.* |
| 1 | अस्मि | I am | fr. √अस् *2.P. pr.* $1^{st}$ *sg.* |

| | | | |
|---|---|---|---|
| 6 | कलयतां | among those who calculate [time] | fr. कलयत् *pr. pt. of* √कल् *a. m. pl. gen.* (**3.12:**) |
| 5 | कालः | time [itself] | fr. काल *m. sg. nom.* |
| 4 | अहं | I [am] | fr. अहम् *prn. sg. nom.* |
| 7 | अहं च | I [am] | fr. अहम् *prn. sg. nom.*; च *in.* |
| 9 | मृगाणां | among wild animals | fr. मृग *m. pl. nom.* (**2.92:**) |
| 8 | मृग-इन्द्रः | [the fearless king of beasts] the lion | fr. मृग-इन्द्र *m. sg. nom.* (**2.8:**) |
| 11 | पक्षिणां च | and among birds | fr. पक्षिन् *m. pl. gen.* (**3.15:** & **2.92:**) |
| 10 | वैनतेयः | [विष्णु-'s high-flying devotee] गरुड | fr. वैनतेय *m. sg. nom.* |

**पवनः पवतामस्मि रामः शस्त्रभृतामहम्। झषाणां मकरश्चास्मि स्रोतसामस्मि जाह्नवी॥३१॥**

(पवनः पवताम् अस्मि, रामः शस्त्रभृताम् अहम्। झषाणां मकरः च अस्मि, स्रोतसाम् अस्मि जाह्नवी॥)

पवतां पवनः अस्मि। शस्त्र-भृतां रामः अहम्। झषाणां च मकरः अस्मि। स्रोतसां जाह्नवी (=गङ्गा) अस्मि। (**10.31**)

I am the wind among those that purify. I am [one of My अवतार-s, the embodiment of धर्म] Lord राम among those who wield weapons. I am [a type of dangerous water beast] मकर among aquatic creatures. I am the [sacred] river गङ्गा among rivers.

| | | | |
|---|---|---|---|
| 2 | पवतां | among those that purify | fr. पवत् *pr. pt. of* √पू *a. n. pl. gen.* (**3.12:**) |
| 1 | पवनः अस्मि | I am the wind | fr. पवन *m. sg. nom.*; √अस् *2.P. pr. 1st sg.* |
| 5 | शस्त्र-भृतां | among those who wield weapons | fr. शस्त्र-भृत् *a. m. pl. gen.* (**6.24.2:** & **3.5:**) |
| 4 | रामः | [one of My अवतार-s, the embodiment of धर्म] Lord राम | fr. राम *m. sg. nom.* |
| 3 | अहं | I [am] | fr. अहम् *prn. sg. nom.* |
| 7 | झषाणां च | among aquatic creatures | fr. झष *m. pl. gen.* (**2.92:**); च *in.* |
| 6 | मकरः अस्मि | I am [a type of dangerous water beast] मकर | fr. मकर *m. sg. nom.*; √अस् *2.P. pr. 1st sg.* |
| 9 | स्रोतसां | among rivers | fr. स्रोतस् *n. pl. gen.* (**3.6:**) |
| 8 | जाह्नवी अस्मि | I am the [sacred] river गङ्गा | fr. जाह्नवी *f. sg. nom.*; √अस् *2.P. pr. 1st sg.* |

**सर्गाणामादिरन्तश्च मध्यं चैवाहमर्जुन। अध्यात्मविद्या विद्यानां वादः प्रवदतामहम्॥३२॥**

(सर्गाणाम् आदिः अन्तः च, मध्यं च एव अहम् अर्जुन। अध्यात्मविद्या विद्यानां, वादः प्रवदताम् अहम्॥)

सर्गाणाम् आदिः, मध्यं च, अन्तः एव च अहम्, अर्जुन। विद्यानाम् अध्यात्म-विद्या, प्रवदतां वादः अहम्। (**10.32**)

I am the source, the center, and the resolution of the cycles of manifestation [of the universe], O अर्जुन. I am knowledge centered on the self [amounting to मोक्ष] among [all forms of] knowledge, and the discussion [that leads to truth] among those who discuss.

| | | | |
|---|---|---|---|
| 5 | सर्गाणाम् | of the cycles of manifestation [of the universe] | fr. सर्ग *m. pl. gen.* (**2.92:**) |
| 2 | आदिः | the source | fr. आदि *m. sg. nom.* |
| 3 | मध्यं च | the center | fr. मध्य *n. sg. nom.*; च *in.* |
| 4 | अन्तः एव च | and the resolution | fr. अन्त *m. sg. nom.*; एव *in.* (**6.19:**); च *in.* |
| 1 | अहं | I [am] | fr. अहम् *prn. sg. nom.* |
| 6 | अर्जुन | O अर्जुन | fr. अर्जुन *m. sg. voc.* |
| 9 | विद्यानाम् | among [all forms of] knowledge | fr. विद्या *f. pl. gen.* |
| 8 | अध्यात्म-विद्या | knowledge centered on the self [amounting to मोक्ष] | fr. अध्यात्म-विद्या *f. sg. nom.* |
| 11 | प्रवदतां | among those who discuss | fr. प्रवदत् *pr. pt. of* प्र + √वद् *a. m. pl. gen.* (**3.12:**) |
| 10 | वादः | [and] the discussion [that leads to truth] | fr. वाद *m. sg. nom.* |
| 7 | अहं | I [am] | fr. अहम् *prn. sg. nom.* |

**अक्षराणामकारोऽस्मि द्वन्द्वः सामासिकस्य च। अहमेवाक्षयः कालो धाताहं विश्वतोमुखः॥३३॥**

(अक्षराणाम् अकारः अस्मि, द्वन्द्वः सामासिकस्य च। अहम् एव अक्षयः कालः, धाता अहं विश्वतोमुखः॥)

अक्षराणाम् अकारः, सामासिकस्य च द्वन्-द्वः अस्मि। अहम् एव अ-क्षयः कालः। अहं विश्वतस्-मुखः धाता। (**10.33**)

I am [the initial] letter [or simplest and most common sound] *a* among the letters [or sounds] of the alphabet, and the copulative compound [where importance is the same, सम, in each member] among compounds. Ceaseless time is Me. The all-pervasive giver [of कर्म-फल-s] is Me.

| | | | |
|---|---|---|---|
| 3 | अक्षराणाम् | among the letters [or sounds] of the alphabet | fr. अक्षर *n. pl. gen.* (**2.92:**) |
| 2 | अकारः | [the initial] letter [or simplist and most common sound] "a" | fr. अकार *m. sg. nom.* (**1.5.a:**) |
| 5 | सामासिकस्य च | and among compounds | fr. सामासिक *n. sg. gen.*; च *in.* |
| 4 | द्वन्-द्वः | the copulative compound [where importance is the same, सम, in each member] | fr. द्व-म्-द्व *m. sg. nom.* (**2.55:**) |
| 1 | अस्मि | I am | fr. √अस् *2.P. pr. 1st sg.* |

| | | | |
|---|---|---|---|
| 7 | अहम् एव | [is] Me [indeed] | fr. अहम् *prn. sg. nom.*; एव *in.* (**6.19:**) |
| 6 | अ-क्षयः कालः | [relatively] ceaseless time | fr. अक्षय *a. m. sg. nom.*; काल *m. sg. nom.* |
| 10 | अहं | [is] Me | fr. अहम् *prn. sg. nom.* |
| 8 | विश्वतस्-मुखः | the all-pervasive | fr. विश्वतस्-मुख *a. m. sg. nom.* (**2.24:** & **.33:**) |
| 9 | धाता | giver [of कर्म-फल-s] | fr. धातृ *m. sg. nom.* (**3.38:**) |

**मृत्युः सर्वहरश्चाहमुद्भवश्च भविष्यताम्। कीर्तिः श्रीर्वाक्च नारीणां स्मृतिर्मेधा धृतिः क्षमा॥ ३४॥**
(मृत्युः सर्वहरः च अहम्, उद्भवः च भविष्यताम्। कीर्तिः श्रीः वाक् च नारीणां, स्मृतिः मेधा धृतिः क्षमा॥ )
सर्व-हरः च मृत्युः, भविष्यतां च उद्भवः अहम्। नारीणां कीर्तिः श्रीः वाक् स्मृतिः मेधा धृतिः क्षमा च [अहम्]। (**10.34**)
And I am मृत्यु (Lord Death) [as] the one who takes away everything [i.e., your life], and prosperity among what will be. Among feminine [संस्कृत words], [I am] *fame*, *wealth*, *speech*, *memory*, *the capacity to retain [what is learned]*, *resolve*, and *accommodation*.

| | | | |
|---|---|---|---|
| 3 | सर्व-हरः च | [as] the one who takes away everything [i.e., your life] | fr. सर्व-हर *a. m. sg. nom.* |
| 2 | मृत्युः | Lord Death | fr. मृत्यु *m. sg. nom.* |
| 5 | भविष्यतां | among what will be | fr. भविष्यत् *fut. pt. of* √भू *a. n. pl. gen.* (**6.4:** & **3.12:**) |
| 4 | च उद्भवः | and prosperity | fr. च *in.*; उद्भव *m. sg. nom.* |
| 1 | अहं | I [am] | fr. अहम् *prn. sg. nom.* |
| 6 | नारीणां | among feminine [संस्कृत words] | fr. नारी *f. pl. gen.* (**2.92:**) |
| 8 | कीर्तिः | "fame" | fr. कीर्ति *f. sg. nom.* |
| 9 | श्रीः | "wealth" | fr. श्री *f. sg. nom.* |
| 10 | वाक् | "speech" | fr. वाच् *f. sg. nom.* (**2.24:** & **3.6:**) |
| 11 | स्मृतिः | "memory" | fr. स्मृति *f. sg. nom.* |
| 12 | मेधा | the "capacity to retain [what is learned]" | fr. मेधा *f. sg. nom.* |
| 13 | धृतिः | "resolve" | fr. धृति *f. sg. nom.* |
| 14 | क्षमा च | and "accommodation" | fr. क्षमा *f. sg. nom.*; च *in.* |
| 7 | [अहम्] | [I am] | |

**बृहत्साम तथा साम्नां गायत्री छन्दसामहम्। मासानां मार्गशीर्षोऽहमृतूनां कुसुमाकरः॥३५॥**

(बृहत्साम तथा साम्नां, गायत्री छन्दसाम् अहम्। मासानां मार्गशीर्षः अहम्, ऋतूनां कुसुमाकरः॥)

तथा साम्नां बृहत्-साम, छन्दसां गायत्री अहम्। मासानां मार्ग-शीर्षः, ऋतूनां कुसुम-आकरः अहम्। (**10.35**)

Similarly I am the [prominent] साम-वेद verses [sung] in the बृहती [meter] among साम-वेद verses, and the [most famous verse, called] गायत्री among [all] verses of the वेद. I am [the cool] November/December among lunar months and the flowering spring among seasons.

| | | | |
|---|---|---|---|
| 1 | तथा | similarly | fr. तथा *in.* (**6.19:**) |
| 4 | साम्नां | among साम-वेद verses | fr. सामन् *n. pl. gen.* (**3.22.c:**) |
| 3 | बृहत्-साम | the [prominent] सामवेद verses [sung] in the बृहती [meter] | fr. बृहत्-सामन् *n. sg. nom.* (**3.22:**) |
| 6 | छन्द्रसां | among [all] verses of the वेद | fr. छन्दस् *n. pl. gen.* (**3.6:**) |
| 5 | गायत्री | [and] the [most famous verse called] गायत्री | fr. गायत्री *f. sg. nom.* |
| 2 | अहम् | I [am] | fr. अहम् *prn. sg. nom.* |
| 9 | मासानां | among lunar months | fr. मास *m. pl. gen.* |
| 8 | मार्ग-शीर्षः | [the cool] November-December | fr. मार्ग-शीर्ष *m. sg. nom.* |
| 11 | ऋतूनां | among seasons | fr. ऋतु *m. pl. gen.* |
| 10 | कुसुम-आकरः | [and] the flowering spring | fr. कुसुम-आकर *m. sg. nom.* |
| 7 | अहम् | I [am] | fr. अहम् *prn. sg. nom.* |

**द्यूतं छलयतामस्मि तेजस्तेजस्विनामहम्। जयोऽस्मि व्यवसायोऽस्मि सत्त्वं सत्त्ववतामहम्॥३६॥**

(द्यूतं छलयताम् अस्मि, तेजः तेजस्विनाम् अहम्। जयः अस्मि व्यवसायः अस्मि, सत्त्वं सत्त्ववताम् अहम्॥)

छलयतां द्यूतम् अस्मि। तेजस्विनां तेजः अहम्। जयः अस्मि। व्यवसायः अस्मि। सत्त्ववतां सत्त्वम् अहम्। (**10.36**)

I am the [royal] game of dice among those that deceive. I am the brilliance of the brilliant. I am victory. I am clarity in thinking. I am the सत्त्व (contemplative disposition) among the contemplative.

| | | | |
|---|---|---|---|
| 2 | छलयतां | among those that deceive | fr. छलयत् *pr. pt. of den.* √छलय *a. n. pl. gen.* (**5.43: & 3.12:**) |
| 1 | द्यूतम् अस्मि | I am the [royal] game of dice | fr. द्यूत *n. sg. nom.*; √अस् *2.P. pr. 1st sg.* |
| 5 | तेजस्विनां | of the brilliant | fr. तेजस्विन् *a. m. pl. gen.* (**3.15:**) |
| 4 | तेजः | the brilliance | fr. तेजस् *n. sg. nom.* (**3.6:**) |
| 3 | अहं | I [am] | fr. अहम् *prn. sg. nom.* |
| 6 | जयः अस्मि | I am victory | fr. जय *m. sg. nom.*; √अस् *2.P. pr. 1st sg.* |
| 7 | व्यवसायः अस्मि | I am clarity in thinking | fr. व्यवसाय *m. sg. nom.*; √अस् *2.P. pr. 1st sg.* |

| | | | |
|---|---|---|---|
| 10 | सत्त्ववतां | among the contemplative | fr. सत्त्ववत् *a. m. pl. gen.* (**3.13:**) |
| 9 | सत्त्वम् | the सत्त्व (contemplative disposition) | fr. सत्त्व *n. sg. nom.* |
| 8 | अहं | I [am] | fr. अहम् *prn. sg. nom.* |

**वृष्णीनां वासुदेवोऽस्मि पाण्डवानां धनञ्जयः। मुनीनामप्यहं व्यासः कवीनामुशना कविः॥ ३७॥**

(वृष्णीनां वासुदेवः अस्मि, पाण्डवानां धनञ्जयः। मुनीनाम् अपि अहम् व्यासः, कवीनाम् उशना कविः॥ )

वृष्णीनां वासु-देवः, पाण्डवानां धनञ्-जयः अस्मि। अहम् अपि मुनीनां व्यासः, कवीनाम् उशना कविः (=शुक्राचार्य)। (**10.37**)

I am, among the वृष्णि clan, [Mr.] कृष्ण; among पाण्डु-'s sons, [you, the award-winning] अर्जुन. Among sages, also, वेद-व्यास [another name or title for व्यास, who is composing this epic] and, among seers, the seer शुक्राचार्य [the wise but unheeded counselor to the demons] are Me.

| | | | |
|---|---|---|---|
| 2 | वृष्णीनां | among the वृष्णि clan | fr. वृष्णि *m. pl. gen.* |
| 3 | वासु-देवः | [Mr.] कृष्ण | fr. वासु-देव *m. sg. nom.* |
| 4 | पाण्डवानां | [and] among the पाण्डु-'s sons | fr. पाण्डव *m. pl. gen.* |
| 5 | धनञ्-जयः | [you, the award-winning] अर्जुन | fr. धन-म्-जय *m. sg. nom.* (**6.32: & 2.55:**) |
| 1 | अस्मि | I am | fr. √अस् *2.P. pr. 1st sg.* |
| 10 | अहम् अपि | [are] Me also | fr. अहम् *prn. sg. nom.*; अपि *in.* |
| 6 | मुनीनां | among sages | fr. मुनि *m. pl. gen.* |
| 7 | व्यासः | वेद-व्यास [who is composing this epic] | fr. व्यास *m. sg. nom.* |
| 8 | कवीनाम् | [and] among seers | fr. कवि *m. pl. gen.* |
| 9 | उशना कविः | the seer शुक्राचार्य [the wise but unheeded counselor to the demons] | fr. उशनस् *m. sg. nom.* (**3.6.i:** *irreg.*); कवि *m. sg. nom.* |

**दण्डो दमयतामस्मि नीतिरस्मि जिगीषताम्। मौनं चैवास्मि गुह्यानां ज्ञानं ज्ञानवतामहम्॥ ३८॥**

(दण्डः दमयताम् अस्मि, नीतिः अस्मि जिगीषताम्। मौनं च एव अस्मि गुह्यानां, ज्ञानं ज्ञानवताम् अहम्॥ )

दमयतां दण्डः अस्मि। जिगीषतां नीतिः अस्मि। गुह्यानां च एव मौनम् अस्मि। ज्ञानवतां ज्ञानम् अहम्। (**10.38**)

I am the rod among those that tame. I am the process of justice among those who desire victory. I am silence among secrets. I am the knowledge among those who have knowledge.

| | | | |
|---|---|---|---|
| 2 | दमयतां | among those that tame | fr. दमयत् *pr. pt. of cs.* √दम् *a. m. pl. gen.* (**3.12:**) |
| 1 | दण्डः अस्मि | I am the rod | fr. दण्ड *m. sg. nom.*; √अस् *2.P. pr. 1st sg.* |
| 4 | जिगीषतां | among those who desire victory | fr. जिगीषत् *pr. pt. of des.* √जि *a. m. pl. gen.* (**5.41:** *irreg.*) |
| 3 | नीतिः अस्मि | I am the process of justice | fr. नीति *f. sg. nom.*; √अस् *2.P. pr. 1st sg.* |

| | | | |
|---|---|---|---|
| 6 | गुह्यानां च एव | among secrets | fr. गुह्य *pot. ps. pt. of* √गुह् *n. pl. gen.*; च *in.*; एव *in.* |
| 5 | मौनम् अस्मि | I am silence | fr. मौन *n. sg. nom.*; √अस् *2.P. pr.* $1^{st}$ *sg.* |
| 9 | ज्ञानवतां | among those who have knowledge | fr. ज्ञानवत् *a. m. pl. gen.* (**3.13:**) |
| 8 | ज्ञानम् | the knowledge | fr. ज्ञान *n. sg. nom.* |
| 7 | अहं | I [am] | fr. अहम् *prn. sg. nom.* |

**यच्चापि सर्वभूतानां बीजं तदहमर्जुन। न तदस्ति विना यत्स्यान्मया भूतं चराचरम्॥ ३९॥**
(यद् च अपि सर्वभूतानां, बीजं तद् अहम् अर्जुन। न तद् अस्ति विना यद् स्यात्, मया भूतं चराचरम्॥)
यद् च सर्व-भूतानां बीजं तद् अपि अहम्, अर्जुन। यद् मया विना स्यात्, तद् चर-अ-चरं भूतं न अस्ति। (**10.39**)
Moreover, what is the बीज (seed, or efficient cause—निमित्त-कारण intelligent cause) of all things, that also I am, O अर्जुन. There is no moveable or immovable [sentient or insentient] being that can exist without Me [as both the efficient cause and material cause of the universe].

| | | | |
|---|---|---|---|
| 1 | यद् च | moreover what [is] | fr. यद् *prn. n. sg. nom.*; च *in.* |
| 3 | सर्व-भूतानां | of all things | fr. सर्व-भूत *n. pl. gen.* |
| 2 | बीजं | the बीज (seed or efficient cause) | fr. बीज *n. sg. nom.* |
| 4 | तद् अपि | that also | fr. तद् *prn. n. sg. nom.*; अपि *in.* |
| 5 | अहम् | I [am] | fr. अहम् *prn. sg. nom.* |
| 6 | अर्जुन | O अर्जुन | fr. अर्जुन *m. sg. voc.* |
| 11 | यद् | [which] | fr. यद् *prn. n. sg. nom.* |
| 13 | मया विना | without Me [as both the efficient and material cause of the universe] | fr. अहम् *prn. sg. inst.* (**6.16:**); विना *in.* |
| 12 | स्यात् | can exist | fr. √अस् *2.P. pot.* $3^{rd}$ *sg.* (**5.19.4:**) |
| 10 | तद् | that | fr. तद् *prn. n. sg. nom.* |
| 8 | चर-अ-चरं | moveable or immovable [sentient or insentient] | fr. चर-अचर *a. n. sg. nom.* |
| 9 | भूतं | being | fr. भूत *pp. of* √भू *n. sg. nom.* |
| 7 | न अस्ति | there is no | fr. न *in.*; √अस् *2.P. pr.* $3^{rd}$ *sg.* |

**नान्तोऽस्ति मम दिव्यानां विभूतीनां परन्तप। एष तूद्देशतः प्रोक्तो विभूतेर्विस्तरो मया॥ ४०॥**

(न अन्तः अस्ति मम दिव्यानां, विभूतीनां परन्तप। एषः तु उद्देशतः प्रोक्तः, विभूतेः विस्तरः मया॥)

मम दिव्यानां विभूतीनाम् अन्तः न अस्ति, परन्-तप। मया तु एषः विभूतेः विस्तरः उद्देशतः प्रोक्तः। (**10.40**)

There is no end to My divine glories, O अर्जुन. Rather, I have told [only] in part this detailed description of [My] glory.

| | | | |
|---|---|---|---|
| 2 | मम | to My | fr. अहम् *prn. sg. gen.* |
| 3 | दिव्यानां | divine | fr. दिव्य *a. f. pl. gen.* |
| 4 | विभूतीनाम् | glories | fr. विभूति *f. pl. gen.* |
| 1 | अन्तः न अस्ति | there is no end | fr. अन्त *m. sg. nom.*; न *in.*; √अस् *2.P. pr. 3rd sg.* |
| 5 | परन्-तप | (अर्जुन) O Vexer of Foes | fr. पर-म्-तप *m. sg. voc.* (**2.55:**) |
| 6 | मया तु | rather I | fr. अहम् *prn. sg. inst.* (**7.7:**); तु *in.* |
| 9 | एषः | this | fr. एतद् *prn. m. sg. nom.* |
| 11 | विभूतेः | of [My] glory | fr. विभूति *f. sg. gen.* (**3.29.b:**) |
| 10 | विस्तरः | detailed description | fr. विस्तर *m. sg. nom.* |
| 8 | उद्देशतः | [only] in part | fr. उद्देशतस् *in.* (**6.19:**) |
| 7 | प्रोक्तः | have told | fr. प्रोक्त *pp. of* प्र + √वच् *pt. m. sg. nom.* (**6.6:** & **2.3.a:** & **2.80:**) |

**यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा। तत्तदेवावगच्छ त्वं मम तेजोंऽशसम्भवम्॥ ४१॥**

(यद् यद् विभूतिमत् सत्त्वं, श्रीमत् ऊर्जितम् एव वा। तद् तद् एव अवगच्छ त्वं, मम तेजोंऽशसम्भवम्॥)

यद् यद् विभूतिमत् श्रीमत् ऊर्जितम् एव वा सत्त्वं, तद् तद् एव मम तेजस्-अंश-सम्भवं त्वम् अवगच्छ। (**10.41**)

Whatever entity has glory, has wealth, or is indeed powerful—that itself, may you know, is born of a fraction of My power. [No one is the author of any glory, so arrogance or jealousy regarding these glories is baseless. Knowing this brings relative freedom.]

| | | | |
|---|---|---|---|
| 1 | यद् यद् | whatever | fr. यद् *prn. n. sg. nom.* (**7.6.B.2.e:**) |
| 3 | विभूतिमत् | has glory | fr. विभूतिमत् *a. n. sg. nom.* (**3.13:**) |
| 4 | श्रीमत् | has wealth | fr. श्रीमत् *a. n. sg. nom.* (**3.13:**) |
| 5 | ऊर्जितम् एव वा | or is indeed powerful | fr. ऊर्जित *pp. of den. of* ऊर्ज् *a. n. sg. nom.*; एव *in.* (**6.19:**); वा *in.* |
| 2 | सत्त्वं | entity | fr. सत्त्व *n. sg. nom.* |

| | | | |
|---|---|---|---|
| 6 | तद् तद् एव | that itself | fr. तद् *prn. n. sg. acc.* (**7.6.B.2.e:**); एव *in.* (**6.19:**) |
| 10 | मम | of Me, My | fr. अहम् *prn. sg. gen.* |
| 9 | तेजस्-अंश- | of a fraction of power | |
| 8 | -सभवं | is born | fr. तेजस्-अंश-स्म्भव *a. n. sg. acc.* |
| 7 | त्वम् अवगच्छ | may you know | fr. त्वम् *prn. sg. nom.*; अव + √गम् *1.P. impv. 2nd sg.* (**5.15.6:**) |

**अथवा बहुनैतेन किं ज्ञातेन तवार्जुन। विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्॥ ४२॥**

(अथवा बहुना एतेन, किं ज्ञातेन तव अर्जुन। विष्टभ्य अहम् इदं कृत्स्नम्, एकांशेन स्थितः जगत्॥ )

अथवा एतेन बहुना तव ज्ञातेन किम्, अर्जुन। अहम् इदं कृत्स्नं जगत् एक-अंशेन विष्टभ्य स्थितः। (**10.42**)

—But, rather, what [is gained] by your knowing [just] this much [about Me], O अर्जुन? I remain sustaining this entire universe with [just] a fraction [of My self]. [The whole, infinite Me includes everything, including you. Knowing this brings complete freedom.]

| | | | |
|---|---|---|---|
| 1 | अथवा | but rather | fr. अथवा *in.* |
| 4 | एतेन | [just] this | fr. एतद् *prn. n. sg. inst.* |
| 5 | बहुना | much [about Me] | fr. बहु *a. n. sg. inst.* |
| 3 | तव ज्ञातेन | by your knowing | fr. त्वम् *prn. sg. gen.* (**7.12.3.a:**); ज्ञात *pp. of* √ज्ञा *pt. n. sg. inst.* |
| 2 | किम् | what [is gained]? | fr. किम् *prn. n. sg. nom.* (**7.9.7:**) |
| 6 | अर्जुन | O अर्जुन | fr. अर्जुन *m. sg. voc.* |
| 7 | अहम् | I | fr. अहम् *prn. sg. nom.* |
| 10 | इदं कृत्स्नं | this entire | fr. इदम् *prn. n. sg. acc.*; कृत्स्न *a. n. sg. acc.* |
| 11 | जगत् | universe | fr. जगत् *n. sg. acc.* (**3.5:**) |
| 12 | एक-अंशेन | with [just] a fraction [of My self] | fr. एक-अंश *m. sg. inst.* |
| 9 | विष्टभ्य | sustaining | fr. विष्टभ्य *in. pt. of* वि + √स्तभ् (**2.101:**) |
| 8 | स्थितः | remain | fr. स्थित *pp. of* √स्था *pt. m. sg. nom.* (**6.6:**) |

**ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे विभूतियोगो नाम दशमोऽध्यायः॥१०॥**

(ओं तद् सत्। इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे विभूतियोगः नाम दशमः अध्यायः॥)

ओं तद् सत्। इति श्रीमद्-भगवद्-गीतासु उपनिषत्सु ब्रह्म-विद्यायां योग-शास्त्रे श्री-कृष्ण-अर्जुन-संवादे विभूति-योगः नाम दशमः अध्यायः। (**10**)

ओं (ब्रह्मन्, the witness of all) is that [only] reality. Thus ends the tenth chapter, called "The Topic of Glories," of the [eighteen chapters of] *Songs of the Glorious Lord,* which is [looked upon as] उपनिषद् [and whose teaching is] in [the form of] a dialogue between श्री कृष्ण and अर्जुन, [the subject matter being] a knowledge of ब्रह्मन् and योग.

| | | | |
|---|---|---|---|
| 1 | ओं | ओम् (ब्रह्मन्, the witness of all,) | fr. ओम् *in.* |
| 2 | तद् सत् | [is] that [only] reality | fr. तद् *prn. n. sg. nom.*; सत् *n. sg. nom.* |
| 3 | इति | (quote-end quote), thus ends | fr. इति *in.* |
| 10 | श्रीमद्- | of the venerable, the glorious | |
| 11 | -भगवद्- | one having [limitless] glories, Lord | |
| 9 | -गीतासु | in [i.e., of] songs | fr. श्रीमत्-भगवत्-गीता *f. pl. loc.* (**2.43:**) |
| 12 | उपनिषत्सु | [which are/is looked upon as] उपनिषद्, sacred scripture | fr. उपनिषद् *f. pl. loc.* (**6.24:**) |
| 17 | ब्रह्म- | of ब्रह्मन् (reality/सत्) | |
| 16 | -विद्यायां | [and] a knowledge | fr. ब्रह्म-विद्या *f. sg. loc.* |
| 18 | योग-शास्त्रे | [and instruction of] योग (means, discipline, etc.) | fr. योग-शास्त्र *n. sg. loc.* |
| 14 | श्री-कृष्ण- | between Lord कृष्ण | |
| 15 | -अर्जुन- | and अर्जुन | |
| 13 | -संवादे | in [the form of] a dialogue | fr. श्री-कृष्ण-अर्जुन-संवाद *n. sg. loc.* |
| 8 | विभूति- | of glories | |
| 7 | -योगः | the topic | fr. विभूति-योग *a. m. sg. nom.* |
| 6 | नाम | by the name, called | fr. नाम *in.* |
| 4 | दशमः | the tenth | fr. दशम *ordinal a. m. sg. nom.* |
| 5 | अध्यायः | chapter | fr. अध्याय *m. sg. nom.* |

# अथैकादशोऽध्यायः

**अर्जुन उवाच।**

**मदनुग्रहाय परमं गुह्यमध्यात्मसञ्ज्ञितम्। यत्त्वयोक्तं वचस्तेन मोहोऽयं विगतो मम॥१॥**

(अर्जुनः उवाच। मदनुग्रहाय परमं, गुह्यम् अध्यात्मसञ्ज्ञितम्। यद् त्वया उक्तं वचः तेन, मोहः अयं विगतः मम॥)

अर्जुनः उवाच। यद् परमं गुह्यम् अध्यात्म-सञ्ज्ञितं वचः त्वया मद्-अनुग्रहाय उक्तं, तेन अयं मम मोहः विगतः। (**11.1**)

अर्जुन said: This delusion of mine [i.e., lack of discernment about the nature of myself] is gone [i.e., more or less, as questions follow] because of those words, the greatest secret—called the [ज्ञान, knowledge] centered on the आत्मन् (self)—which You told for my blessing.

| | | | |
|---|---|---|---|
| 1 | अर्जुनः उवाच | अर्जुन said | fr. अर्जुन *m. sg. nom.*; √वच् *P. perf. 3rd sg.* (**5.10.3:**) |
| 6 | यद् | [which] | fr. यद् *prn. n. sg. nom.* |
| 8 | परमं गुह्यम् | the greatest secret | fr. परम *prn. a. n. sg. nom.*; गुह्य *pot. ps. pt. of* √गुह् *a. n. sg. nom.* |
| 11 | अध्यात्म- | the [ज्ञान/knowledge] centered on the आत्मन् (self) | |
| 10 | -सञ्ज्ञितं | called | fr. अध्यात्म-सञ्ज्ञित *a. n. sg. nom.* |
| 7 | वचः | word(s) | fr. वचस् *n. sg. nom.* (**7.4.1:**) |
| 12 | त्वया | [which] You | fr. त्वम् *prn sg. inst.* (**7.7:**) |
| 14 | मद्-अनुग्रहाय | for my blessing | fr. मद्-अनुग्रह *m. sg. dat.* (**2.24:** & **.43:**) |
| 13 | उक्तं | told | fr. उक्त *pp. of* √वच् *pt. n. sg. nom.* (**6.6:** & **2.3.a:** & **2.80:**) |
| 5 | तेन | because of this/those | fr. तद् *prn. n. sg. inst.* |
| 2 | अयं | this | fr. इदम् *prn. m. sg. nom.* |
| 3 | मम मोहः | delusion of mine | fr. अहम् *prn. sg. gen.*; मोह *m. sg. nom.* |
| 4 | विगतः | is gone | fr. विगत *pp. of* वि + √गम् *pt. m. sg. nom.* (**6.6:**) |

**भवाप्ययौ हि भूतानां श्रुतौ विस्तरशो मया। त्वत्तः कमलपत्राक्ष माहात्म्यमपि चाव्ययम्॥ २॥**

(भवाप्ययौ हि भूतानां, श्रुतौ विस्तरशः मया। त्वत्तः कमलपत्राक्ष, माहात्म्यम् अपि च अव्ययम्॥)

कमल-पत्र-अक्ष, मया भूतानां भव-अप्ययौ हि त्वत्तः विस्तरशः श्रुतौ, अ-व्ययम् अपि च माहात्म्यम् [श्रुतम्]। (**11.2**)

O Lotus-Petal Eyes, I have indeed heard from You in detail about the manifestation and dissolution of [all] beings, and also about [Your] imperishable glory.

| | | | |
|---|---|---|---|
| 1 | कमल- | O Lotus | |
| 2 | -पत्र- | Petal | |
| 3 | -अक्ष | Eyes | fr. कमल-पत्र-अक्ष *a. m. sg. voc.* |
| 4 | मया | I | fr. अहम् *prn. sg. inst.* (**7.7:**) |
| 11 | भूतानां | of [all] beings | fr. भूत *pp. of* √भू *n. pl. gen.* |
| 9 | भव- | about the manifestation | |
| 10 | -अप्ययौ | and dissolution | fr. भव-अप्यय *m. du. nom.* |
| 5 | हि | indeed | fr. हि *in.* |
| 7 | त्वत्तः | from You | fr. त्वतस् *in.* (**6.19:**) |
| 8 | विस्तरशः | in detail | fr. विस्तरशस् *in.* (**6.19:**) |
| 6 | श्रुतौ | have heard | fr. श्रुत *pp. of* √श्रु *pt. m. du. nom.* |
| 13 | अ-व्ययम् | about [Your] imperishable | fr. अव्यय *a. n. sg. nom.* |
| 12 | अपि च | and also | fr. अपि *in.*; च *in.* |
| 14 | माहात्म्यम् [श्रुतम्] | glory [I have heard] | fr. माहात्म्य *n. sg. nom.* |

**एवमेतद्यथात्थ त्वमात्मानं परमेश्वर। द्रष्टुमिच्छामि ते रूपमैश्वरं पुरुषोत्तम॥ ३॥**

(एवम् एतद् यथा आत्थ त्वम्, आत्मानं परमेश्वर। द्रष्टुम् इच्छामि ते रूपम्, ऐश्वरं पुरुषोत्तम॥)

यथा त्वम् आत्मानम् आत्थ, परम-ईश्वर, एवम् एतद् ते ऐश्वरं रूपं द्रष्टुम् इच्छामि, पुरुष-उत्तम। (**11.3**)

Just as You describe Yourself, O Lord—in that way I wish to see this, Your divine form, O Being Who Transcends.

| | | | |
|---|---|---|---|
| 1 | यथा | just as | fr. यथा *in.* (**6.19:**) |
| 2 | त्वम् | You | fr. त्वम् *prn. sg. nom.* |
| 4 | आत्मानम् | Yourself | fr. आत्मन् *reflex. prn. a. m. sg. acc.* |
| 3 | आत्थ | describe | fr. √अह् *P. perf. 2nd sg.* (**5.28:**) |
| 5 | परम-ईश्वर | O Lord | fr. परम-ईश्वर *m. sg. voc.* |

| | | | |
|---|---|---|---|
| 6 | एवम् | in that way | fr. एवम् *in.* (**6.19:**) |
| 9 | एतद् | this | fr. एतद् *prn. n. sg. acc.* |
| 10 | ते ऐश्वरं | Your divine | fr. त्वम् *prn. sg. gen.*; ऐश्वर *a. n. sg. acc.* |
| 11 | रूपं | form | fr. रूप *n. sg. acc.* (**7.20:**) |
| 8 | द्रष्टुम् | to see | fr. द्रष्टुम् *inf. of* √दृश् *in.* (**2.85:**) |
| 7 | इच्छामि | I wish | fr. √इष् *6.P. pr.* $1^{st}$ *sg.* (**5.17.3:** & **5.5.a:**) |
| 12 | पुरुष-उत्तम | (कृष्ण) O Being Who Transcends [the perishable and the imperishable] | fr. पुरुष-उत्तम *m. sg. voc.* |

**मन्यसे यदि तच्छक्यं मया द्रष्टुमिति प्रभो। योगेश्वर ततो मे त्वं दर्शयात्मानमव्ययम्॥ ४॥**

(मन्यसे यदि तद् शक्यं, मया द्रष्टुम् इति प्रभो। योगेश्वर ततः मे त्वं, दर्शय आत्मानम् अव्ययम्॥ )

यदि तद् मया द्रष्टुं शक्यम् इति मन्यसे, प्रभो, योग-ईश्वर, ततः त्वं मे अ-व्ययम् आत्मानं दर्शय। (**11.4**)

If You think that I am able to see that, O Lord, then—O Lord of the Pursuits of योगिन्-s—please show to me [Your] imperishable form.

| | | | |
|---|---|---|---|
| 1 | यदि | if | fr. यदि *in.* |
| 6 | तद् | that | fr. तद् *prn. n. sg. acc.* (**7.20:**) |
| 3 | मया | I | fr. अहम् *prn. sg. inst.* (**7.7:**) |
| 5 | द्रष्टुं | to see | fr. द्रष्टुम् *inf. of* √दृश् *in.* (**2.85:**) |
| 4 | शक्यम् | am able | fr. शक्य *pot. ps. pt. of* √शक् *pt. n. sg. nom.* |
| 2 | इति मन्यसे | (You) think that | fr. इति *in.*; √मन् *4.Ā. pr.* $2^{nd}$ *sg.* |
| 7 | प्रभो | O Lord | fr. प्रभु *m. sg. voc.* |
| 9 | योग-ईश्वर | O Lord of the Pursuits of योगिन्-s | fr. योग-ईश्वर *m. sg. voc.* |
| 8 | ततः | then | fr. ततस् *in.* (**6.19:**) |
| 10 | त्वं | [You] | fr. त्वम् *prn. sg. nom.* |
| 12 | मे | to me | fr. अहम् *prn. sg. dat.* |
| 13 | अ-व्ययम् | [Your] imperishable | fr. अव्यय *a. m. sg. acc.* |
| 14 | आत्मानं | form | fr. आत्मन् *m. sg. acc.* |
| 11 | दर्शय | please show | fr. √दृश् *P. cs. impv.* $2^{nd}$ *sg.* (**5.40:**) |

**श्रीभगवानुवाच।**

**पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः। नानाविधानि दिव्यानि नानावर्णाकृतीनि च॥५॥**

(श्रीभगवान् उवाच। पश्य मे पार्थ रूपाणि, शतशः अथ सहस्रशः। नानाविधानि दिव्यानि, नानावर्णाकृतीनि च॥)

श्री-भगवान् उवाच। पार्थ, पश्य शतशः अथ सहस्रशः मे रूपाणि दिव्यानि नाना-विधानि नाना-वर्ण-आकृतीनि च। (**11.5**)

The Lord said: Behold, O अर्जुन, My forms by the hundreds and by the thousands—effulgent, of many varieties, and of many colors and forms.

| | | | |
|---|---|---|---|
| 1 | श्री-भगवान् उवाच | the Lord said | fr. श्री-भगवत् *m. sg. nom.*; √वच् *P. perf. 3rd sg.* (**5.10.3:**) |
| 3 | पार्थ | (अर्जुन) O Son of पृथा | fr. पार्थ *m. sg. voc.* |
| 2 | पश्य | behold | fr. √दृश् *1.P. impv. 2nd sg.* (**5.15.6:**) |
| 5 | शतशः | by the hundreds | fr. शतशस् *in.* (**6.19:** & **4.29:**) |
| 6 | अथ सहस्रशः | and by the thousands | fr. अथ *in.* (**6.19:**); सहस्रशस् *in.* (**6.19:** & **4.29:**) |
| 4 | मे रूपाणि | My forms | fr. अहम् *prn. sg. gen.*; रूप *n. pl. acc.* (**2.92:**) |
| 7 | दिव्यानि | effulgent | fr. दिव्य *a. n. pl. acc.* |
| 8 | नाना- | of many | |
| 9 | -विधानि | varieties | fr. नाना-विध *a. n. pl. acc.* |
| 11 | नाना-वर्ण- | of many colors | |
| 12 | -आकृतीनि | and forms | fr. नाना-वर्ण-आकृति *a. n. pl. acc.* |
| 10 | च | and | fr. च *in.* |

**पश्यादित्यान्वसून्रुद्रानश्विनौ मरुतस्तथा। बहून्यदृष्टपूर्वाणि पश्याश्चर्याणि भारत॥६॥**

(पश्य आदित्यान् वसून् रुद्रान्, अश्विनौ मरुतः तथा। बहूनि अदृष्टपूर्वाणि, पश्य आश्चर्याणि भारत॥)

पश्य आदित्यान्, वसून्, रुद्रान्, अश्विनौ, तथा मरुतः। पश्य बहूनि अ-दृष्ट-पूर्वाणि आश्चर्याणि, भारत। (**11.6**)

Behold the [twelve] आदित्य-s (sun deities), the [eight] वसु-s (attendant deities to Lord इन्द्र), the [eleven] रुद्र-s (deities of destruction), the [two] अश्विन्-s (charioteers of the sun), and the मरुत्-s (storm deities). Behold [My] many unseen-before wonders, O अर्जुन.

| | | | |
|---|---|---|---|
| 1 | पश्य | behold | fr. √दृश् *1.P. impv. 2nd sg.* (**5.15.6:**) |
| 2 | आदित्यान् | the [twelve] आदित्य-s (sun deities) | fr. आदित्य *m. pl. acc.* |
| 3 | वसून् | the [eight] वसु (attendant deities to Lord इन्द्र) | fr. वसु *m. pl. acc.* |
| 4 | रुद्रान् | the [eleven] रुद्र-s (deities of destruction) | fr. रुद्र *m. pl. acc.* |
| 5 | अश्विनौ | the [two] अश्विन्-s (charioteers of the sun) | fr. अश्विन् *m. du. acc.* (**3.15:**) |
| 6 | तथा मरुतः | and the मरुत्-s (storm deities) | fr. तथा *in.* (**6.19:**); मरुत् *m. sg. acc.* (**3.5:**) |

| | | |
|---|---|---|
| 7 पश्य | behold | fr. √दृश् *1.P. impv.* $2^{nd}$ *sg.* (**5.15.6:**) |
| 8 बहूनि | [My] many | fr. बहु *a. n. pl. acc.* |
| 9 अ-दृष्ट-पूर्वाणि | unseen before | fr. अदृष्ट-पूर्व *a. n. pl. acc.* |
| 10 आश्चर्याणि | wonders | fr. आश्चर्य *n. pl. acc.* |
| 11 भारत | (अर्जुन) O (Brilliant) Son of India | fr. भारत *m. sg. voc.* |

**इहैकस्थं जगत्कृत्स्नं पश्याद्य सचराचरम्। मम देहे गुडाकेश यच्चान्यद्द्रष्टुमिच्छसि॥ ७॥**
(इह एकस्थं जगत् कृत्स्नं, पश्य अद्य सचराचरम्। मम देहे गुडाकेश, यद् च अन्यद् द्रष्टुम् इच्छसि॥)
गुडाका-ईश, पश्य अद्य इह मम देहे एक-स्थं कृत्स्नं स-चर-अचरं जगत्, अन्यद् च यद् द्रष्टुम् इच्छसि। (**11.7**)
Behold, O अर्जुन—now, here in My body, in one place—the entire universe consisting of both the moving and the nonmoving, and whatever else you wish to see.

| | | |
|---|---|---|
| 2 गुडाका-ईश | (कृष्ण) O Master Over Lethargy | fr. गुडाका-ईश *m. sg. voc.* |
| 1 पश्य | behold | fr. √दृश् *1.P. impv.* $2^{nd}$ *sg.* (**5.15.6:**) |
| 3 अद्य | now | fr. अद्य *in.* |
| 4 इह | here | fr. इह *in.* |
| 5 मम देहे | in My body | fr. अहम् *prn. sg. gen.*; देह *m. sg. loc.* |
| 6 एक-स्थं | in one place | fr. एक-स्थ *a. n. sg. acc.* |
| 7 कृत्स्नं | the entire | fr. कृत्स्न *a. n. sg. acc.* |
| 9 स-चर- | consisting of both the moving | |
| 10 -अचरं | and the non-moving | fr. स-चर-अचर *a. n. sg. acc.* (**6.39:**) |
| 8 जगत् | universe | fr. जगत् *n. sg. acc.* (**3.5:**) |
| 12 अन्यद् | else | fr. अन्य *prn. n. sg. acc.* (**4.16.1:**) |
| 11 च यद् | and whatever | fr. च *in.*; यद् *prn. n. sg. acc.* (**7.20:**) |
| 14 द्रष्टुम् | to see | fr. द्रष्टुम् *inf. of* √दृश् *in.* (**2.85:**) |
| 13 इच्छसि | you wish | fr. √इष् *6.P. pr.* $2^{nd}$ *sg.* (**5.17.3:**) |

**न तु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा। दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम्॥८॥**

(न तु मां शक्यसे द्रष्टुम्, अनेन एव स्वचक्षुषा। दिव्यं ददामि ते चक्षुः, पश्य मे योगम् ऐश्वरम्॥)

अनेन तु स्व-चक्षुषा एव मां द्रष्टुं न शक्यसे। दिव्यं चक्षुः ते (=तुभ्यं) ददामि। पश्य मे ऐश्वरं योगम्। (**11.8**)

But with just this, your own vision, you cannot see [all of] Me. I give to you an extraordinary [i.e., magical] vision [a capacity to see everything, including the entire subtle universe, and to see into the future]. Behold My Lordly power.

| | | | |
|---|---|---|---|
| 1 | अनेन तु | but with this | fr. इदम् *prn. n. sg. inst.*; तु *in.* |
| 2 | स्व-चक्षुषा एव | just your own vision | fr. स्व-चक्षुस् *n. sg. inst.* (**3.6:** & **2.101:**); एव *in.* (**6.19:**) |
| 4 | मां द्रष्टुं | see [all of] Me | fr. अहम् *prn. sg. acc.* (**7.20:**); द्रष्टुम् *inf. of* √दृश् *in.* (**2.85:**) |
| 3 | न शक्यसे | you cannot | fr. न *in.*; √शक् *ps. pr. 2nd sg.* |
| 7 | दिव्यं चक्षुः | an extraordinary [i.e., magical] vision | fr. दिव्य *a. n. sg. acc.*; चक्षुस् *n. sg. acc.* |
| 6 | ते (=तुभ्यं) | to you | fr. त्वम् *prn. sg. dat.* |
| 5 | ददामि | I give | fr. √दा *3.P. pr. 1st sg.* (**5.8.6:** & **5.5.a:**) |
| 8 | पश्य | behold | fr. √दृश् *1.P. impv. 2nd sg.* (**5.15.6:**) |
| 9 | मे ऐश्वरं | My Lordly | fr. अहम् *prn. sg. gen.*; ऐश्वर *a. m. sg. acc.* |
| <u>10</u> | योगम् | power | fr. भोग *m. sg. acc.* |

**सञ्जय उवाच।**

**एवमुक्त्वा ततो राजन्महायोगेश्वरो हरिः। दर्शयामास पार्थाय परमं रूपमैश्वरम्॥९॥**

(सञ्जयः उवाच। एवम् उक्त्वा ततः राजन्, महायोगेश्वरः हरिः। दर्शयामास पार्थाय, परमं रूपम् ऐश्वरम्॥)

सञ्जयः उवाच। राजन् [धृत-राष्ट्र], एवम् उक्त्वा, ततः महा-योग-ईश्वरः हरिः पार्थाय परमम् ऐश्वरं रूपं दर्शयामास। (**11.9**)

सञ्जय said: O King [धृत-राष्ट्र], having spoken thus, then Lord हरि (Lord कृष्ण as the destroyer of all पाप-s), the limitless Lord of pursuits of the योगिन्-s, showed to अर्जुन the limitless form of the Lord.

| | | | |
|---|---|---|---|
| 1 | सञ्जयः उवाच | सञ्जय said | fr. सञ्जय *m. sg. nom.*; √वच् *P. perf. 3rd sg.* (**5.10.3:**) |
| 2 | राजन् [धृत-राष्ट्र] | O King [धृतराष्ट्र] | fr. राजन् *m. sg. voc.* (**3.20:**) |
| 4 | एवम् | thus | fr. एवम् *in.* (**6.19:**) |
| 3 | उक्त्वा | having spoken | fr. उक्त्वा *in. pt. of* √वच् (**6.9:** & **2.80:**) |

| | | | |
|---|---|---|---|
| 5 | ततः | then | fr. ततस् *in.* (**6.19:**) |
| 7 | महा- | the limitless | |
| 9 | -योग- | of pursuits of the योगिन्-s | |
| 8 | -ईश्वरः | Lord | fr. महा-योग-ईश्वर *m. sg. nom.* |
| 6 | हरिः | Lord हरि (Lord कृष्ण as the destroyer of all पाप-s) | fr. हरि *m. sg. nom.* |
| 11 | पार्थाय | to अर्जुन (son of पृथा) | fr. पार्थ *m. sg. dat.* (**7.10.A.1:**) |
| 12 | परमम् | the limitless | fr. परम *prn. a. n. sg. acc.* |
| 13 | ऐश्वरं रूपं | form of the Lord | fr. ऐश्वर *a. n. sg. acc.*; रूप *n. sg. acc.* |
| 10 | दर्शयामास | showed | fr. √दृश् *cs. peri. perf. 3rd sg.* (**5.29:**) |

**अनेकवक्त्रनयनमनेकाद्भुतदर्शनम्। अनेकदिव्याभरणं दिव्यानेकोद्यतायुधम्॥१०॥**

(अनेकवक्त्रनयनम्, अनेकाद्भुतदर्शनम्। अनेकदिव्याभरणं, दिव्यानेकोद्यतायुधम्॥)

[तद् रूपम्] अन्-एक-वक्त्र-नयनम्, अन्-एक-अद्भुत-दर्शनम्, अन्-एक-दिव्य-आभरणं, दिव्य-अन्-एक-उद्यत-आयुधम्। (**11.10**)

[That form] consisted of countless mouths and eyes; countless amazing sights; countless celestial ornaments; and countless extraordinary, upraised weapons.

| | | | |
|---|---|---|---|
| 1 | [तद् रूपम्] | [that form] | |
| 2 | अन्-एक- | consisted of countless | |
| 3 | -वक्त्र- | mouths | |
| 4 | -नयनम् | and eyes | fr. अनेक-वक्त्र-नयन *a. n. sg. nom.* |
| 5 | अन्-एक-अद्भुत- | countless amazing | |
| 6 | -दर्शनम् | sights | fr. अनेक-अद्भुत-दर्शन *a. n. sg. nom.* |
| 7 | अन्-एक-दिव्य- | countless celestial | |
| 8 | -आभरणं | ornaments | fr. अनेक-दिव्य-आभरण *a. n. sg. nom.* |
| 10 | दिव्य- | extraordinary | |
| 9 | -अन्-एक- | and countless | |
| 11 | -उद्यत- | upraised | |
| 12 | -आयुधम् | weapons | fr. दिव्य-अनेक-उद्यत-आयुध *a. n. sg. nom.* |

**दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनम्। सर्वाश्चर्यमयं देवमनन्तं विश्वतोमुखम्॥११॥**

(दिव्यमाल्याम्बरधरं, दिव्यगन्धानुलेपनम्। सर्वाश्चर्यमयं देवम्, अनन्तं विश्वतोमुखम्॥)

[तद् रूपम्] दिव्य-माल्य-अम्बर-धरं, दिव्य-गन्ध-अनुलेपनं, सर्व-आश्चर्यमयं, देवम्, अन्-अन्तं, विश्वतस्-मुखम्। (**11.11**)

[That form also] wore celestial garlands and attire, [was anointed] with celestial, fragrant ointment, mostly all a wonder—effulgent, boundless, and in all directions.

| | | | |
|---|---|---|---|
| 1 | [तद् रूपम्] | [that form also] | |
| 3 | दिव्य-माल्य- | celestial garlands | |
| 4 | -अम्बर- | and attire | |
| 2 | -धरं | wore | fr. दिव्य-माल्य-अम्बर-धर *a. n. sg. nom.* |
| 5 | दिव्य-गन्ध- | [was anointed] with celestial fragrant | |
| 6 | -अनुलेपनं | ointment | fr. दिव्य-गन्ध-अनुलेपन *a. n. sg. nom.* |
| 7 | सर्व-आश्चर्यमयं | mostly all a wonder | fr. सर्व-आश्चर्यमय *a. n. sg. nom.* |
| 8 | देवम् | effulgent | fr. देव *a. n. sg. nom.* |
| 9 | अन्-अन्तं | boundless | fr. अनन्त *a. n. sg. nom.* |
| 10 | विश्वतस्-मुखम् | [and] in all directions | fr. विश्वतस्-मुख *a. n. sg. nom.* (**2.24:** & **.33:**) |

**दिवि सूर्यसहस्रस्य भवेद्युगपदुत्थिता। यदि भाः सदृशी सा स्याद्भासस्तस्य महात्मनः॥१२॥**

(दिवि सूर्यसहस्रस्य, भवेत् युगपद् उत्थिता। यदि भाः सदृशी सा स्यात्, भासः तस्य महात्मनः॥)

यदि दिवि सूर्य-सहस्रस्य भाः युग-पद् उत्थिता भवेत्, सा तस्य महा-आत्मनः भासः सदृशी स्यात्। (**11.12**)

If the brilliance of a thousand suns were to simultaneously arise in the sky, that would be akin to the brilliance of that magnificent form.

| | | | |
|---|---|---|---|
| 1 | यदि | if | fr. यदि *in.* |
| 7 | दिवि | in the sky | fr. द्यु *f. sg. loc.* (**3.35:**) |
| 3 | सूर्य-सहस्रस्य | of a thousand suns | fr. सूर्य-सहस्र *n. sg. gen.* |
| 2 | भाः | the brilliance | fr. भास् *f. sg. nom.* (**3.6:**) |
| 5 | युग-पद् | simultaneously | fr. युगपद् *in.* (**6.24:**) |
| 6 | उत्थिता | arise | fr. उत्थिता *pp. of* उद् + √स्था *pt. f. sg. nom.* (**6.6:** & **2.99:** & **2.24:**) |
| 4 | भवेत् | were to | fr. √भू *1.P. pot. 3rd sg.* (**5.3:** & **2.3:** & **2.71:**) |

| | | | |
|---|---|---|---|
| 8 | सा | that | fr. तद् *prn. f. sg. nom.* |
| 12 | तस्य | of that | fr. तद् *prn. m. sg. gen.* |
| 13 | महा-आत्मनः | magnificent form | fr. महा-आत्मन् *m. sg. gen.* (**3.22:**) |
| 11 | भासः | to the brilliance | fr. भास् *f. sg gen.* (**3.6:**) (**7.12.2.b:**) |
| 10 | सदृशी | similar, akin | fr. सदृशी *a. f. sg. nom.* (**4.17.2:**) |
| 9 | स्यात् | would be | fr. √अस् *2.P. pot. 3rd sg.* (**5.19.4:**) |

**तत्रैकस्थं जगत्कृत्स्नं प्रविभक्तमनेकधा। अपश्यद्देवदेवस्य शरीरे पाण्डवस्तदा॥१३॥**
(तत्र एकस्थं जगत् कृत्स्नं, प्रविभक्तम् अनेकधा। अपश्यत् देवदेवस्य, शरीरे पाण्डवः तदा॥)
तदा पाण्डवः तत्र देव-देवस्य शरीरे एक-स्थम् अन्-एकधा प्रविभक्तं कृत्स्नं जगत् अपश्यत्। (**11.13**)
Then अर्जुन saw in that body of the Lord of deities the entire universe in one place [but] distinctly divided in manifold ways.

| | | | |
|---|---|---|---|
| 1 | तदा | then | fr. तदा *in.* (**6.19:**) |
| 2 | पाण्डवः | अर्जुन (son of पाण्डु) | fr. पाण्डव *m. sg. nom.* |
| 4 | तत्र | in that | fr. तत्र *in.* (**6.19:**) |
| 6 | देव-देवस्य | of the Lord of deities | fr. देव-देव *m. sg. gen.* |
| 5 | शरीरे | body | fr. शरीर *n. sg. loc.* |
| 8 | एक-स्थम् | in one place | fr. एक-स्थ *a. n. sg. acc.* (**6.24.1:**) |
| 10 | अन्-एकधा | in manifold ways | fr. अनेकधा *in.* (**6.19:**) |
| 9 | प्रविभक्तं | [but] distinctly divided | fr. प्रविभक्त *pp. of* प्र + वि + √भज् *a. n. sg. acc.* (**2.81:**) |
| 7 | कृत्स्नं जगत् | the entire universe | fr. कृत्स्न *a. n. sg. acc.*; जगत् *n. sg. acc.* (**3.5:**) |
| 3 | अपश्यत् | saw | fr. √दृश् *1.P. impf. 3rd sg.* (**5.15.6:**) |

**ततः स विस्मयाविष्टो हृष्टरोमा धनञ्जयः। प्रणम्य शिरसा देवं कृताञ्जलिरभाषत॥१४॥**

(ततः सः विस्मयाविष्टः, हृष्टरोमा धनञ्जयः। प्रणम्य शिरसा देवं, कृताञ्जलिः अभाषत॥)

ततः सः विस्मय-आविष्टः हृष्ट-रोमा धनञ्-जयः देवं शिरसा प्रणम्य कृत-अञ्जलिः अभाषत। (**11.14**)

Thereupon, that अर्जुन—overwhelmed with awe and with body hairs on end, bowing [his] head to the Lord, with hands folded [in supplication]—spoke.

| | | | |
|---|---|---|---|
| 1 | ततः | thereupon | fr. ततस् *in.* (**6.19:**) |
| 2 | सः | that | fr. तद् *prn. m. sg. nom.* |
| 5 | विस्मय- | with awe | |
| 4 | -आविष्टः | overwhelmed | fr. विस्मय-आविष्ट *a. m. sg. nom.* |
| 6 | हृष्ट-रोमा | [and] with body hairs on end | fr. हृष्ट-रोमन् *a. m. sg. nom.* (**3.22:**) |
| 3 | धनञ्-जयः | अर्जुन (winner of laurels) | fr. धन-म्-जय *m. sg. nom.* (**6.32:** & **2.55:**) |
| 9 | देवं | to the Lord | fr. देव *m. sg. acc.* |
| 8 | शिरसा | [with] [his] head | fr. शिरस् *n. sg. inst.* (**3.6:**) |
| 7 | प्रणम्य | bowing | fr. प्रणम्य *in. pt. of* प्र + √नम् (**6.9:** & **2.92:**) |
| 10 | कृत-अञ्जलिः | with hands folded [in supplication] | fr. कृत-अञ्जलि *a. m. sg. nom.* |
| 11 | अभाषत | spoke | fr. √भाष् *1.Ā. impf. 3rd sg.* |

**अर्जुन उवाच।**
**पश्यामि देवांस्तव देव देहे सर्वांस्तथा भूतविशेषसङ्घान्।**
**ब्रह्माणमीशं कमलासनस्थमृषींश्च सर्वानुरगांश्च दिव्यान्॥१५॥**

(अर्जुनः उवाच। पश्यामि देवान् तव देव देहे, सर्वान् तथा भूतविशेषसङ्घान्। ब्रह्माणम् ईशं कमलासनस्थम्, ऋषीन् च सर्वान् उरगान् च दिव्यान्॥)

अर्जुनः उवाच। देव, पश्यामि तव देहे सर्वान् देवान्, तथा भूत-विशेष-सङ्घान्, ईशं कमल-आसन-स्थं ब्रह्माणं, सर्वान् ऋषीन् च दिव्यान् उर-गान् च। (**11.15**)

अर्जुन said: O Lord, I see in Your body all the deities and hosts of different types of beings, Lord ब्रह्मा seated in the lotus [i.e., in ब्रह्म-लोक within the lotus-like universe], [and] all the sages and celestial serpents.

| | | | |
|---|---|---|---|
| 1 | अर्जुनः उवाच | अर्जुन said | fr. अर्जुन *m. sg. nom.*; √वच् *P. perf. 3rd sg.* (**5.10.3:**) |
| 2 | देव | O Lord | fr. देव *m. sg. voc.* |
| 3 | पश्यामि | I see | fr. √दृश् *1.P. pr. 1st sg.* (**5.15.6:** & **5.5.a:**) |
| 4 | तव देहे | in Your body | fr. त्वम् *prn. sg. gen.*; देह *m. sg. loc.* |
| 5 | सर्वान् देवान् | all the deities | fr. सर्व *prn. a. m. pl. acc.* (**4.16.2:**); देव *m. pl. acc.* |
| 6 | तथा | and | fr. तथा *in.* (**6.19:**) |
| 9 | भूत- | of beings | |
| 8 | -विशेष- | of different types | |
| 7 | -सङ्घान् | hosts | fr. भूत-विशेष-सङ्घ *m. pl. acc.* |
| 10 | ईशं | Lord | fr. ईश *m. sg. acc.* |
| 13 | कमल- | in the lotus [i.e., in ब्रह्म-लोक within the lotus-like universe] | |
| 12 | -आसन-स्थं | seated | fr. कमल-आसन-स्थ *a. m. sg. acc.* (**6.24.1:**) |
| 11 | ब्रह्माणं | ब्रह्मा | fr. ब्रह्मन् *m. sg. acc.* (**3.22:**) |
| 15 | सर्वान् ऋषीन् | all the sages | fr. सर्व *prn. a. m. pl. acc.* (**4.16.2:**); ऋषि *m. pl. acc.* |
| 14 | च | [and] | fr. च *in.* |
| 17 | दिव्यान् | celestial | fr. दिव्य *a. m. pl. acc.* |
| 16 | उर-गान् च | and serpents | fr. उर-ग *m. pl. acc.* (**6.24.3:**);च *in.* |

**अनेकबाहूदरवक्त्रनेत्रं पश्यामि त्वां सर्वतोऽनन्तरूपम्।**
**नान्तं न मध्यं न पुनस्तवादिं पश्यामि विश्वेश्वर विश्वरूप॥१६॥**

(अनेकबाहूदरवक्त्रनेत्रं, पश्यामि त्वां सर्वतः अनन्तरूपम्। न अन्तं न मध्यं न पुनः तव आदिं, पश्यामि विश्वेश्वर विश्वरूप॥)

त्वाम् अन्-एक-बाहु-उदर-वक्त्र-नेत्रं, सर्वतः अन्-अन्त-रूपं पश्यामि। तव पुनः न अन्तं न मध्यं न आदिं पश्यामि, विश्व-ईश्वर विश्व-रूप। (**11.16**)

I see You as having countless [bodies with] arms, bellies, mouths, and eyes—whose forms are endless in all directions. And I see not Your end, nor middle, nor beginning, O Lord of the Universe whose form is the universe.

| | | | |
|---|---|---|---|
| 2 | त्वाम् | You | fr. त्वम् *prn. sg. acc.* |
| 3 | अन्-एक-बाहु- | as having countless [bodies with] arms | |
| 4 | -उदर-वक्त्र- | bellies mouths | |
| 5 | -नेत्रं | and eyes | fr. अनेक-बाहु-उदर-वक्त्र-नेत्र *a. m. sg. acc.* |
| 7 | सर्वतः | in all directions | fr. सर्वतस् *in.* (**6.19:**) |
| 6 | अन्-अन्त-रूपं | whose forms are endless | fr. अनन्त-रूप *a. m. sg. acc.* |
| 1 | पश्यामि | I see | fr. √दृश् *1.P. pr. 1st sg.* (**5.15.6:** & **5.5.a:**) |
| 13 | तव | of You, Your | fr. त्वम् *prn. sg. gen.* |
| 8 | पुनः | and | fr. पुनर् *in.* |
| 10 | न अन्तं | not the end | fr. न *in.*; अन्त *m. sg. acc.* |
| 11 | न मध्यं | nor middle | fr. न *in.*; मध्य *m. sg. acc.* |
| 12 | न आदिं | nor beginning | fr. न *in.*; आदि *m. sg. acc.* |
| 9 | पश्यामि | I see | fr. √दृश् *1.P. pr. 1st sg.* (**5.15.6:** & **5.5.a:**) |
| 13 | विश्व-ईश्वर | O Lord of the Universe | fr. विश्व-ईश्वर *m. sg. voc.* |
| 14 | विश्व-रूप | Whose Form is the Universe | fr. विश्व-रूप *a. m. sg. voc.* |

**किरीटिनं गदिनं चक्रिणं च तेजोराशिं सर्वतोदीप्तिमन्तम्।**
**पश्यामि त्वां दुर्निरीक्ष्यं समन्ताद्दीप्तानलार्कद्युतिमप्रमेयम्॥ १७॥**

(किरीटिनं गदिनं चक्रिणं च, तेजोराशिं सर्वतोदिप्तिमन्तम्। पश्यामि त्वां दुर्निरीक्ष्यं समन्तात्, दीप्तानलार्कद्युतिम् अप्रमेयम्॥ )

त्वां किरीटिनं गदिनं चक्रिणं च, सर्वतस्-दिप्तिमन्तं तेजस्-राशिं, दुर्-निरीक्ष्यं समन्तात् दीप्त-अन्-अल-अर्क-द्युतिम्, अ-प्रमेयं पश्यामि। (**11.17**)

I see You [i.e., अर्जुन sees the Lord as he would have imagined Him from reading the पुराण-s, and so it was shown by the Lord] with crown, mace, and discus [i.e., the popular Lord विष्णु form]—a mass of brilliance lit up on all sides, whose brilliance on all sides is like blazing fire or the sun, difficult to see and incomprehensible [to the senses].

| | | | |
|---|---|---|---|
| 2 | त्वां | You | fr. त्वम् *prn. sg. acc.* |
| 3 | किरीटिनं | with crown | fr. किरीटिन् *a. m. sg. acc.* (**3.15:**) |
| 4 | गदिनं | with mace | fr. गदिन् *a. m. sg. acc.* (**3.15:**) |
| 5 | चक्रिणं च | and with discus | fr. चक्रिन् *a. m. sg. acc.* (**3.15:** & **2.92:**); च *in.* |
| 9 | सर्वतस्- | on all sides | |
| 8 | -दिप्तिमन्तं | lit-up | fr. सर्वतस्-दिप्तिमत् *a. m. sg. acc.* (**2.24:** & **2.33:** & **3.13:**) |
| 7 | तेजस्- | of brilliance | |
| 6 | -राशिं | a mass | fr. तेजस्-राशि *m. sg. acc.* (**2.24:** & **.33:**) |
| 15 | दुर्-निरीक्ष्यं | difficult to see | fr. दुस्-निरीक्ष्य *a. m. sg. acc.* (**2.24:** & **.29:**) |
| 11 | समन्तात् | on all sides | fr. समन्तात् *in.* (**7.11.3:**) |
| 12 | दीप्त- | is [like] blazing | |
| 13 | -अन्-अल- | fire | |
| 14 | -अर्क- | or the sun | |
| 10 | -द्युतिम् | whose brilliance | fr. दीप्त-अनल-अर्क-द्युति *a. m. sg. acc.* |
| 16 | अ-प्रमेयं | [and] incomprehensible [to the senses] | fr. अप्रमेय *pot. ps. pt. of* प्र + √मा *a. m. sg. acc.* (**6.8:**) |
| 1 | पश्यामि | I see | fr. √दृश् *1.P. pr. 1st sg.* (**5.15.6:** & **5.5.a:**) |

**त्वमक्षरं परमं वेदितव्यं त्वमस्य विश्वस्य परं निधानम्।**
**त्वमव्ययः शाश्वतधर्मगोप्ता सनातनस्त्वं पुरुषो मतो मे॥१८॥**

(त्वम् अक्षरं परमं वेदितव्यं, त्वम् अस्य विश्वस्य परं निधानम्। त्वम् अव्ययः शाश्वतधर्मगोप्ता, सनातनः त्वं पुरुषः मतः मे॥)

त्वम् अ-क्षरं परमं वेदितव्यं, त्वम् अस्य विश्वस्य परं निधानं, त्वम् अ-व्ययः शाश्वत-धर्म-गोप्ता, त्वं सना-तनः पुरुषः मे मतः। (**11.18**)

You are thought by me to be the imperishable, limitless [ब्रह्मन्] [that is] to be known, the ultimate basis of this universe, the imperishable protector of the perennially eternal धर्म (laws) [remanifesting during each creation cycle], and the eternal पुरुष (being who fills everything).

| | | | |
|---|---|---|---|
| 1 | त्वम् | You | fr. त्वम् *prn. sg. nom.* |
| 3 | अ-क्षरं | the imperishable | fr. अक्षर *a. n. sg. nom.* |
| 4 | परमं | limitless being [ब्रह्मन्] | fr. परम *n. sg. nom.* |
| 5 | वेदितव्यं | [that is] to be known | fr. वेदितव्य *pot. ps. pt. of* √विद् *a. n. sg. nom.* (**6.8:**) |
| 1 | त्वम् | [You] | fr. त्वम् *prn. sg. nom.* |
| 7 | अस्य विश्वस्य | of this universe | fr. इदम् *prn. n. sg. gen.*; विश्व *n. sg. gen.* |
| 6 | परं निधानं | the ultimate basis | fr. पर *prn. a. n. sg. nom.* (**4.16.3:**); निधान *n. sg. nom.* |
| 1 | त्वम् | [You] | fr. त्वम् *prn. sg. nom.* |
| 8 | अ-व्ययः | the imperishable | fr. अव्यय *a. m. sg. nom.* |
| 10 | शाश्वत- | of the perennially eternal | |
| 11 | -धर्म- | धर्म (laws) | |
| 9 | -गोप्ता | protector | fr. शाश्वत-धर्म-गोप्तृ *a. m. sg. nom.* |
| 1 | त्वं | [You] | fr. त्वम् *prn. sg. nom.* |
| 12 | सना-तनः | [and] the eternal | fr. सनातन *a. m. sg. nom.* |
| 13 | पुरुषः | पुरुष (being who fills everything) | fr. पुरुष *m. sg. nom.* |
| 2 | मे मतः | are thought by me to be | fr. अहम् *prn. sg. gen.* (**7.12.3.a:**); मत *pp. of* √मन् *pt. m. sg. nom.* (**6.6:**) |

**अनादिमध्यान्तमनन्तवीर्यमनन्तबाहुं शशिसूर्यनेत्रम्।**
**पश्यामि त्वां दीप्तहुताशवक्त्रं स्वतेजसा विश्वमिदं तपन्तम्।। १९ ।।**

(अनादिमध्यान्तम् अनन्तवीर्यम्, अनन्तबाहुं शशिसूर्यनेत्रम्। पश्यामि त्वाम् दीप्तहुताशवक्त्रं, स्वतेजसा विश्वम् इदं तपन्तम्।।)

त्वाम् अन्-आदि-मध्य-अन्तम्, अन्-अन्त-वीर्यम्, अन्-अन्त-बाहुं, शशि-सूर्य-नेत्रं, दीप्त-हुत-आश-वक्त्रं, स्व-तेजसा इदं विश्वं तपन्तं पश्यामि। (**11.19**)

I see You as having no beginning, middle, or end, [as One] whose power is limitless, whose arms are countless, for whom the moon and the sun are eyes, whose mouths are like blazing हुताश-s (fires, literally “oblation eaters”), and heating this universe with Your radiance.

| | | | |
|---|---|---|---|
| 2 | त्वाम् | You | fr. त्वम् *prn. sg. acc.* |
| 3 | अन्- | as having no | |
| 4 | -आदि-मध्य- | beginning middle | |
| 5 | -अन्तम् | or end | fr. अन्-आदि-मध्य-अन्त *a. m. sg. acc.* |
| 7 | अन्-अन्त- | is limitless | |
| 6 | -वीर्यम् | whose power | fr. अनन्त-वीर्य *a. m. sg. acc.* |
| 9 | अन्-अन्त- | are countless | |
| 8 | -बाहुं | whose arms | fr. अनन्त-बाहु *a. m. sg. acc.* |
| 10 | शशि-सूर्य- | for whom the moon and the sun | |
| 11 | -नेत्रं | are eyes | fr. शशि-सूर्य-नेत्र *a. m. sg. acc.* |
| 13 | दीप्त- | are [like] blazing | |
| 14 | -हुत-आश- | हुताश-s (fires, literally “oblation eaters”) | |
| 12 | -वक्त्रं | whose mouths | fr. दीप्त-हुत-आश-वक्त्र *a. m. sg. acc.* |
| 17 | स्व-तेजसा | with Your radiance | fr. स्व-तेजस् *n. sg. inst.* |
| 16 | इदं विश्वं | this universe | fr. इदम् *prn. n. sg. acc.*; विश्व *n. sg. acc* |
| 15 | तपन्तं | [and] heating | fr. तपत् *pr. pt. of* √तप् *pt. m. sg. acc.* (**3.12:**) |
| 1 | पश्यामि | I see | fr. √दृश् *1.P. pr. 1st sg.* (**5.15.6:** & **5.5.a:**) |

द्यावापृथिव्योरिदमन्तरं हि व्याप्तं त्वयैकेन दिशश्च सर्वाः।
दृष्ट्वाद्भुतं रूपमुग्रं तवेदं लोकत्रयं प्रव्यथितं महात्मन्॥ २०॥

(द्यावापृथिव्योः इदम् अन्तरं हि, व्याप्तं त्वया एकेन दिशः च सर्वाः। दृष्ट्वा अद्भुतं रूपम् उग्रं तव इदं, लोकत्रयं प्रव्यथितं महात्मन्॥ )

त्वया एकेन हि इदं द्यावा-पृथिव्योः अन्तरं सर्वाः च दिशः व्याप्तम्। इदं तव रूपम् अद्भुतम् उग्रं [च] दृष्ट्वा लोक-त्रयं प्रव्यथितं, महा-आत्मन्। (**11.20**)

You alone indeed pervade this [space] between heaven and earth [i.e., the subtle to the physical universe] and all the directions. Seeing this, Your form [as separate from themselves]—wondrous and violent—the [beings of the] three worlds are shaken with fear, O Lord.

| | | | |
|---|---|---|---|
| 1 | त्वया | You | fr. त्वम् *prn. sg. inst.* (**7.7:**) |
| 2 | एकेन हि | alone indeed | fr. एक *prn. a. m. sg. inst.*; हि *in.* |
| 4 | इदं | this [space] | fr. इदम् *prn. n. sg. nom.* |
| 6 | द्यावा- | heaven | |
| 7 | -पृथिव्योः | and earth [i.e., the subtle to the physical universe] | fr. द्यावा-पृथिवी *f. du. gen.* (**6.40:**) |
| 5 | अन्तरं | between | fr. अन्तरम् *in.* |
| 8 | सर्वाः च | and all | fr. सर्व *prn. a. f. pl. acc.* (**4.16.2:**); च *in.* |
| 9 | दिशः | the directions | fr. दिश् *f. pl. acc.* (**3.6:**) |
| 3 | व्याप्तम् | pervade | fr. व्याप्त *pp. of* वि + √आप् *pt. n. sg. nom.* (**7.5.2.a:**) |
| 11 | इदं | this | fr. इदम् *prn. n. sg. acc.* |
| 12 | तव रूपम् | Your form [as separate from themselves] | fr. त्वम् *prn. sg. gen.*; रूप *n. sg. acc.* |
| 13 | अद्भुतम् | wondrous | fr. अद्भुत *a. n. sg. acc.* |
| 14 | उग्रं [च] | and violent | fr. उग्र *a. n. sg. acc.* |
| 10 | दृष्ट्वा | seeing | fr. दृष्ट्वा *in. pt. of* √दृश् (**2.85:**) |
| 15 | लोक-त्रयं | the [beings of the] three worlds | fr. लोक-त्रय *n. sg. nom.* (**7.4.1:**) |
| 16 | प्रव्यथितं | are shaken with fear | fr. प्रव्यथित *pp. of* प्र + √व्यथ् *pt. n. sg. nom.* (**6.6:**) |
| 17 | महा-आत्मन् | O Lord | fr. महा-आत्मन् *m. sg. voc.* |

**अमी हि त्वां सुरसङ्घा विशन्ति केचिद्भीताः प्राञ्जलयो गृणन्ति।**
**स्वस्तीत्युक्त्वा महर्षिसिद्धसङ्घाः स्तुवन्ति त्वां स्तुतिभिः पुष्कलाभिः॥ २१॥**

(अमी हि त्वां सुरसङ्घाः विशन्ति, केचिद् भीताः प्राञ्जलयः गृणन्ति। स्वस्ति इति उक्त्वा महार्षिसिद्धसङ्घाः, स्तुवन्ति त्वां स्तुतिभिः पुष्कलाभिः॥)

अमी सुर-सङ्घाः हि त्वां विशन्ति। के-चिद् भीताः प्राञ्जलयः गृणन्ति। महा-ऋषि-सिद्ध-सङ्घाः "सु-अस्ति" इति उक्त्वा, पुष्कलाभिः स्तुतिभिः त्वां स्तुवन्ति। (**11.21**)

Those hosts of deities [who have incarnated in the form of the good warriors about to do battle on the field] indeed enter into You [into Death]. Some, frightened, pray with hands folded [in supplication]. The hosts of great sages and divine sages, saying "let there be well-being," worship You with eloquent praise.

| | | | |
|---|---|---|---|
| 1 | अमी | those | fr. अदस् *prn. m. pl. nom.* (**4.9:**) |
| 2 | सुर-सङ्घाः हि | hosts of deities indeed | fr. सुर-सङ्घ *m. pl. nom.*; हि *in.* |
| 3 | त्वां विशन्ति | enter into You [into Death] | fr. त्वम् *prn. sg. acc.*; √विश् *6.P. pr.* $3^{rd}$ *pl.* |
| 4 | के-चिद् | some | fr. क-चिद् *prn. cmpd. m. pl. nom.* |
| 5 | भीताः | frightened | fr. भीत *pp. of* √भी *a. m. pl. nom.* |
| 7 | प्राञ्जलयः | with hands folded [in supplication] | fr. प्राञ्जलि *a. m. pl. nom.* |
| 6 | गृणन्ति | pray | fr. √गॄ *9.P. pr.* $3^{rd}$ *pl.* (**5.23.3:** & **5.3:** & **2.92:**) |
| 9 | महा-ऋषि- | of great sages | |
| 10 | -सिद्ध- | and divine sages | |
| 8 | -सङ्घाः | the hosts | fr. महा-ऋषि-सिद्ध-सङ्घ *m. pl. nom.* |
| 12 | सु-अस्ति | let there be well-being | fr. स्वस्ति *in.* |
| 11 | इति उक्त्वा | saying | fr. इति *in.*; उक्त्वा *in. pt. of* √वच् (**6.9:** & **6.6:** & **2.3.a:** & **2.80:**) |
| 14 | पुष्कलाभिः | with eloquent | fr. पुष्कला *a. f. pl. inst.* |
| 15 | स्तुतिभिः | praise(s) | fr. स्तुति *f. pl. inst.* |
| 13 | त्वां स्तुवन्ति | worship You | fr. त्वम् *prn. sg. acc.*; √स्तु *2.P. pr.* $3^{rd}$ *pl.* (**2.67:**) |

**रुद्रादित्या वसवो ये च साध्या विश्वेऽश्विनौ मरुतश्चोष्मपाश्च।**
**गन्धर्वयक्षासुरसिद्धसङ्घा वीक्षन्ते त्वां विस्मिताश्चैव सर्वे॥ २२॥**

(रुद्रादित्याः वसवः ये च साध्याः, विश्वे अश्विनौ मरुतः च ऊष्मपाः च। गन्धर्वयक्षासुरसिद्धसङ्घाः, वीक्षन्ते त्वां विस्मिताः च एव सर्वे॥ )

रुद्र-आदित्याः, वसवः, ये च साध्याः, विश्वे, अश्विनौ, मरुतः च, ऊष्मपाः च, गन्धर्व-यक्ष-असुर-सिद्ध-सङ्घाः — सर्वे विस्मिताः एव, त्वां च वीक्षन्ते। (**11.22**)

The [eleven] रुद्र-s and the [twelve] आदित्य-s, the [eight] वसु-s and these [twelve] साध्य-s [deities], the [ten] विश्व-s, the twin अश्विन् deities, the मरुत्-s, certain of the ancestors, and the hosts of celestial musicians, यक्ष-s, असुर-s, and सिद्ध-s—all are indeed struck with wonder and gaze upon You.

| | | | |
|---|---|---|---|
| 1 | रुद्र- | the [eleven] रुद्र-s | |
| 2 | -आदित्याः | and the [twelve] आदित्य-s | fr. रुद्र-आदित्य *m. pl. nom.* |
| 3 | वसवः | the [eight] वसु-s | fr. वसु *m. pl. nom.* |
| 4 | ये च साध्याः | and these [twelve] साध्य [deities] | fr. यद् *prn. m. pl. nom.*; च *in.*; साध्य *pot. ps. pt. of* √साध् *m. pl. nom.* |
| 5 | विश्वे | the [ten] विश्व-s | fr. विश्व *m. pl. nom.* (**4.16.2:**) |
| 6 | अश्विनौ | the twin अश्विन् deities | fr. अश्विन् *m. du. nom.* (**3.15:**) |
| 7 | मरुतः च | the मरुत्-s | fr. मरुत् *m. pl. nom.* (**3.5:**); च *in.* |
| 8 | ऊष्मपाः च | certain of the ancestors | fr. ऊष्म-प *m. pl. nom.* (**6.24.1:**); च *in.* |
| 10 | गन्धर्व- | of celestial musicians | |
| 11 | -यक्ष- | यक्ष-s | |
| 12 | -असुर- | असुर-s | |
| 13 | -सिद्ध- | and सिद्ध-s | |
| 9 | -सङ्घाः | [and] the hosts | fr. गन्धर्व-यक्ष-असुर-सिद्ध-सङ्घ *m. pl. nom.* |
| 14 | सर्वे | all [are] | fr. सर्व *prn. a. m. pl. nom.* |
| 15 | विस्मिताः एव | indeed struck with wonder | fr. विस्मित *pp. of* वि + √स्मि *a. m. pl. nom.*; एव *in.* (**6.19:**) |
| 16 | त्वां च वीक्षन्ते | and gaze upon You | fr. त्वम् *prn. sg. acc.*; च *in.*; वि + √ईक्ष् *1.Ā. pr. 3rd pl.* |

**रूपं महत्ते बहुवक्त्रनेत्रं महाबाहो बहुबाहूरुपादम्।**
**बहूदरं बहुदंष्ट्राकरालं दृष्ट्वा लोकाः प्रव्यथितास्तथाहम्॥ २३॥**

(रूपं महत् ते बहुवक्त्रनेत्रं, महाबाहो बहुबाहूरुपादम्। बहूदरं बहुदंष्ट्राकरालं, दृष्ट्वा लोकाः प्रव्यथिताः तथा अहम्॥ )

महा-बाहो, महत् ते रूपं बहु-वक्त्र-नेत्रं, बहु-बाहु-ऊरु-पादं, बहु-उदरं, बहु-दंष्ट्रा-करालं दृष्ट्वा लोकाः प्रव्यथिताः, तथा अहम्। (**11.23**)

O Mighty Armed, seeing Your immense form—with countless mouths and eyes; with countless arms, thighs, and feet; with countless bellies; and horrible with countless fangs—the people are shaken with fear, and so am I [not understanding my identity with You].

| | | | |
|---|---|---|---|
| 1 | महा-बाहो | (अर्जुन) O Mighty Armed One | fr. महा-बाहु *m. sg. voc.* |
| 4 | महत् | immense | fr. महत् *a. n. sg. acc.* (**3.12.a:**) |
| 3 | ते रूपं | Your form | fr. त्वम् *prn. sg. gen.* (**4.3:**); रूप *n. sg. acc.* |
| 5 | बहु-वक्त्र- | with countless mouths | |
| 6 | -नेत्रं | and eyes | fr. बहु-वक्त्र-नेत्र *a. n. sg. acc.* |
| 7 | बहु-बाहु- | with countless arms | |
| 8 | -ऊरु- | thighs | |
| 9 | -पादं | and feet | fr. बहु-बाहु-ऊरु-पाद *a. n. sg. acc.* |
| 10 | बहु-उदरं | with countless bellies | fr. बहु-उदर *a. n. sg. acc.* |
| 12 | बहु-दंष्ट्रा- | with countless fangs | |
| 11 | -करालं | and horrible | fr. बहु-दंष्ट्रा-कराल *a. n. sg. acc.* |
| 2 | दृष्ट्वा | seeing | fr. दृष्ट्वा *in. pt. of* √दृश् (**2.85:**) |
| 13 | लोकाः | the people | fr. लोक *m. pl. nom.* |
| 14 | प्रव्यथिताः | are shaken with fear | fr. प्रव्यथित *pp. of* प्र + √व्यथ् *a. m. pl. nom.* (**6.6:**) |
| 15 | तथा अहम् | [and] so [am] I | fr. तथा *in.* (**6.19:**); अहम् *prn. sg. nom.* |

**नभःस्पृशं दीप्तमनेकवर्णं व्यात्ताननं दीप्तविशालनेत्रम्।**
**दृष्ट्वा हि त्वां प्रव्यथितान्तरात्मा धृतिं न विन्दामि शमं च विष्णो॥ २४॥**

(नभःस्पृशं दीप्तम् अनेकवर्णं, व्यात्ताननं दीप्तविशालनेत्र। दृष्ट्वा हि त्वां प्रव्यथितान्तरात्मा, धृतिं न विन्दामि शमं च विष्णो॥ )

त्वां नभः-स्पृशं, दीप्तम् अन्-एक-वर्णं, व्यात्त-आननं, दीप्त-विशाल-नेत्रं दृष्ट्वा हि [अहं] प्रव्यथित-अन्तर्-आत्मा धृतिं शमं च न विन्दामि, विष्णो। (**11.24**)

Indeed, seeing You reaching the sky, blazing with countless appearances, with gaping mouths and brilliant, large eyes—[my] mind shaken with fear—I find no resolve or composure, O Lord विष्णु.

| | | | |
|---|---|---|---|
| 2 | त्वां | You | fr. त्वम् *prn. sg. acc.* (**4.8:**) |
| 4 | नभः- | the sky | |
| 3 | -स्पृशं | reaching | fr. नभस्-स्मृश *a. m. sg. acc.* (**2.24:**) |
| 5 | दीप्तम् | blazing | fr. दीप्त *pp. of* √दीप् *a. m. sg. acc.* |
| 6 | अन्-एक-वर्णं | with countless appearances | fr. अनेक-वर्ण *a. m. sg. acc.* |
| 7 | व्यात्त- | with gaping | |
| 8 | -आननं | mouths | fr. व्यात्त-आनन *a. m. sg. acc.* |
| 9 | दीप्त-विशाल-नेत्रं | [and] brilliant, large eyes | fr. दीप्त-विशाल-नेत्र *a. m. sg. acc.* |
| 1 | दृष्ट्वा हि | indeed seeing | fr. दृष्ट्वा *in. pt. of* √दृश् (**2.85:**); हि *in.* |
| 11 | प्रव्यथित- | shaken with fear | |
| 10 | -अन्तर्-आत्मा | [my] mind | fr. प्रव्यथित-अन्तर्-आत्मन् *a. m. sg. nom.* (**2.24:** & **.34:**) |
| 13 | धृतिं | resolve | fr. धृति *f. sg. acc.* |
| 14 | शमं च | or composure | fr. शम *m. sg. acc.*; च *in.* |
| 12 | न विन्दामि | I find no | fr. न *in.*; √विद् *6.P. 1st sg.* (**5.17.1:** & **5.5.a:**) |
| 15 | विष्णो | O Lord विष्णु (the one who pervades) | fr. विष्णु *m. sg. voc.* |

**दंष्ट्राकरालानि च ते मुखानि दृष्ट्वैव कालानलसन्निभानि।**
**दिशो न जाने न लभे च शर्म प्रसीद देवेश जगन्निवास।। २५ ।।**

(दंष्ट्राकरालानि च ते मुखानि, दृष्ट्वा एव कालानलसन्निभानि। दिशः न जाने न लभे च शर्म, प्रसीद देवेश जगन्निवास।। )

दंष्ट्रा-करालानि काल-अनल-सन्निभानि च ते मुखानि दृष्ट्वा एव, दिशः न जाने, शर्म न च लभे। प्रसीद, देव-ईश जगन्-निवास। (**11.25**)

Indeed, seeing Your mouths—horrible with fangs and like the fire [at the end] of time [itself] [i.e., at the end of each cycle of the universe]—I know not [i.e., have lost] [my] bearings and have no joy. Be gracious, O Lord of the Deities, Abode of the Universe.

| | | | |
|---|---|---|---|
| 4 | दंष्ट्रा- | with fangs | |
| 3 | -करालानि | horrible | fr. दंष्ट्रा-कराल *a. n. pl. acc.* |
| 7 | काल- | [at the end] of time [itself] [i.e., at the end of each cycle of the universe] | |
| 6 | -अनल- | the fire | |
| 5 | -सन्निभानि च | and like | fr. काल-अनल-सन्निभ *a. n. pl. acc.*; च *in.* |
| 2 | ते मुखानि | Your mouths | fr. त्वम् *prn. sg. gen.*; मुख *n. pl. acc.* |
| 1 | दृष्ट्वा एव | indeed seeing | fr. दृष्ट्वा *in. pt. of* √दृश् (**2.85:**); एव *in.* (**6.19:**) |
| 9 | दिशः | [my] bearings | fr. दिश् *f. pl. acc.* (**3.6:**) |
| 8 | न जाने | I know not [i.e., have lost] | fr. न *in.*; √ज्ञा *9.Ā. pr. 1st sg.* (**5.23.2:**) |
| 11 | शर्म | joy | fr. शर्मन् *n. sg. acc.* (**3.22:**) |
| 10 | न च लभे | and have no | fr. न *in.*; च *in.*; √लभ् *1.Ā. pr. 1st sg.* |
| 12 | प्रसीद | be gracious | fr. प्र + √सद् *1.P. impv. 2nd sg.* (**5.15.3:**) |
| 13 | देव-ईश | O Lord of the Deities | fr. देव-ईश *m. sg. voc.* |
| 14 | जगन्-निवास | Abode of the Universe | fr. जगत्-निवास *m. sg. voc.* (**2.44:**) |

**अमी च त्वां धृतराष्ट्रस्य पुत्राः सर्वे सहैवावनिपालसङ्घैः।**
**भीष्मो द्रोणः सूतपुत्रस्तथासौ सहास्मदीयैरपि योधमुख्यैः॥ २६॥**

(अमी च त्वां धृतराष्ट्रस्य पुत्राः, सर्वे सह एव अवनिपालसङ्घैः। भीष्मः द्रोणः सूतपुत्रः तथा असौ, सह अस्मदीयैः अपि योधमुख्यैः॥)

अवनि-पाल-सङ्घैः सह एव अमी च सर्वे धृत-राष्ट्रस्य पुत्राः, तथा भीष्मः द्रोणः, असौ सूत-पुत्रः, अस्मदीयैः अपि योध-मुख्यैः सह त्वां [विशन्ति]। (**11.26**)

Indeed, along with the host of world rulers, all those sons of धृत-राष्ट्र [enter into You]. Similarly, भीष्म, द्रोण, and the charioteer's son [कर्ण]—along with our prominent warriors also—[all] enter into You [into Death].

| | | | |
|---|---|---|---|
| 3 | अवनि- | of world | |
| 4 | -पाल- | rulers | |
| 2 | -सङ्घैः | with the host | fr. अवनि-पाल-सङ्घ *m. pl. inst.* |
| 1 | सह एव | indeed along | fr. सह *in.* (**6.19:**); एव *in.* (**6.19:**) |
| 6 | अमी च | those | fr. अदस् *prn. m. pl. nom.* (**4.9:**); च *in.* |
| 5 | सर्वे | all | fr. सर्व *prn. a. m. pl. nom.* (**4.16.2:**) |
| 8 | धृत-राष्ट्रस्य | of धृतराष्ट्र [enter into You] | fr. धृत-राष्ट्र *m. sg. gen.* |
| 7 | पुत्राः | sons | fr. पुत्र *m. pl. nom.* |
| 9 | तथा भीष्मः | similarly भीष्म | fr. तथा *in.*; भीष्म *m. sg. nom.* |
| 10 | द्रोणः | द्रोण | fr. द्रोण *m. sg. nom.* |
| 11 | असौ | [and] the | fr. अदस् *prn. m. sg. nom.* (**4.9:**) |
| 12 | सूत- | charioteer's | |
| 13 | -पुत्रः | son [कर्ण] | fr. सूत-पुत्र *m. sg. nom.* |
| 15 | अस्मदीयैः अपि | also with our | fr. अस्मदीय *poss. prn. m. pl. inst.* (**4.15:**); अपि *in.* |
| 17 | योध- | warriors | |
| 16 | -मुख्यैः | prominent | fr. योध-मुख्य *a. m. pl. inst.* |
| 14 | सह | along | fr. सह *in.* (**6.19:**) |
| 18 | त्वां [विशन्ति] | [all] enter into You [into Death] | fr. त्वम् *prn. sg. acc.* |

**वक्त्राणि ते त्वरमाणा विशन्ति दंष्ट्राकरालानि भयानकानि।**
**केचिद्विलग्ना दशनान्तरेषु सन्दृश्यन्ते चूर्णितैरुत्तमाङ्गैः॥ २७॥**

(वक्त्राणि ते त्वरमाणाः विशन्ति, दंष्ट्राकरालानि भयानकानि। केचिद् विलग्नाः दशनान्तरेषु, सन्दृश्यन्ते चूर्णितैः उत्तमाङ्गैः॥)

त्वरमाणाः ते (=तव) दंष्ट्रा-करालानि भयानकानि वक्त्राणि विशन्ति। के-चिद् चूर्णितैः उत्तम-अङ्गैः दशन-अन्तरेषु विलग्नाः सन्दृश्यन्ते। (**11.27**)

Hurrying, they enter into Your frightening mouths [that are] horrible with fangs. Some are clearly seen stuck between [Your] teeth, with [their] heads crushed.

| | | | |
|---|---|---|---|
| 1 | त्वरमाणाः | hurrying | fr. त्वरमाण *pr. mid. pt. of* √त्वर् *a. m. pl. nom.*( **6.5:** & **2.92:**) |
| 3 | ते (=तव) | Your | fr. त्वम् *prn. sg. gen.* |
| 6 | दंष्ट्रा-करालानि | horrible with fangs | fr. दंष्ट्रा-कराल *a. n. pl. acc.* |
| 4 | भयानकानि | frightening | fr. भयानक *a. n. pl. acc.* |
| 5 | वक्त्राणि | mouths | fr. वक्त्र *n. pl. acc.* (**2.92:**) (**7.8.1:**) |
| 2 | विशन्ति | they enter into | fr. √विश् *6.P. pr.*$3^{rd}$ *pl.* |
| 7 | के-चिद् | some | fr. क-चिद् *prn. cmpd. m. pl. nom.* (**4.20:**) |
| 13 | चूर्णितैः | crushed | fr. चूर्णित *pp. of* √चूर्ण् *a. n. pl. inst.* (**6.6:**) |
| 12 | उत्तम-अङ्गैः | with [their] heads | fr. उत्तम-अङ्ग *n. pl. inst.* |
| 11 | दशन- | [Your] teeth | |
| 10 | -अन्तरेषु | between | fr. दशन-अन्तर *a. m. pl. loc.* |
| 9 | विलग्नाः | stuck | fr. विलग्न *pp. of* वि + √लग् *a. m. pl. nom.* (**6.6:**) |
| 8 | सन्दृश्यन्ते | are clearly seen | fr. सम् + √दृश् *ps. pr.* $3^{rd}$ *pl.* (**2.55:**) |

**यथा नदीनां बहवोऽम्बुवेगाः समुद्रमेवाभिमुखा द्रवन्ति।**
**तथा तवामी नरलोकवीरा विशन्ति वक्त्राण्यभिविज्वलन्ति॥ २८॥**

(यथा नदीनां बहवः अम्बुवेगाः, समुद्रम् एव अभिमुखाः द्रवन्ति। तथा तव अमी नरलोकवीराः, विशन्ति वक्त्राणि अभिविज्वलन्ति॥ )

यथा नदीनां बहवः अभिमुखाः अम्बु-वेगाः समुद्रम् एव द्रवन्ति, तथा अमी नर-लोक-वीराः तव अभिविज्वलन्ति वक्त्राणि विशन्ति। (**11.28**)

Like the many, converging streams of rivers flow only to the ocean, so those heroes of the world of humans enter into Your flaming mouths.

| | | | |
|---|---|---|---|
| 1 | यथा | like | fr. यथा *in.* (**6.19:**) |
| 5 | नदीनां | of rivers | fr. नदी *f. pl. gen.* |
| 2 | बहवः | the many | fr. बहु *a. m. pl. nom.* |
| 3 | अभिमुखाः | converging | fr. अभिमुख *a. m. pl. nom.* |
| 4 | अम्बु-वेगाः | streams | fr. अम्बु-वेग *m. pl. nom.* |
| 7 | समुद्रम् एव | only to the ocean | fr. समुद्र *m. sg. acc.* (**7.8.1:**); एव *in.* (**6.19:**) |
| 6 | द्रवन्ति | flow | fr. √द्रु *1.P. pr. 3rd pl.* (**5.3:** & **2.3:** & **2.71:**) |
| 8 | तथा | so | fr. तथा *in.* (**6.19:**) |
| 9 | अमी | those | fr. अदस् *prn. m. pl. nom.* (**4.9:**) |
| 12 | नर- | of humans | |
| 11 | -लोक- | of the world | |
| 10 | -वीराः | heroes | fr. नर-लोक-वीर *m. pl. nom.* |
| 14 | तव | Your | fr. त्वम् *prn. sg. gen.* |
| 15 | अभिविज्वलन्ति | flaming | fr. अभिविज्वलत् *pr. pt. of* अभि + वि + √ज्वल् *a. n. pl. acc.* (**3.12:**) |
| 16 | वक्त्राणि | mouths | fr. वक्त्र *n. pl. acc.* (**2.92:**) (**7.8.1:**) |
| 13 | विशन्ति | enter into | fr. √विश् *6.P. pr.3rd pl.* |

यथा प्रदीप्तं ज्वलनं पतङ्गा विशन्ति नाशाय समृद्धवेगाः।
तथैव नाशाय विशन्ति लोकास्तवापि वक्त्राणि समृद्धवेगाः॥ २९॥

(यथा प्रदीप्तं ज्वलनं पतङ्गाः, विशन्ति नाशाय समृद्धवेगाः। तथा एव नाशाय विशन्ति लोकाः, तव अपि वक्त्राणि समृद्धवेगाः॥)

यथा समृद्ध-वेगाः पतङ्-गाः नाशाय प्रदीप्तं ज्वलनं विशन्ति, तथा एव समृद्ध-वेगाः लोकाः अपि नाशाय तव वक्त्राणि विशन्ति। (**11.29**)

Like moths at full speed enter a burning flame to [their] death, in the very same way [those] people also, at full speed, enter Your mouths to [their] death.

| | | | |
|---|---|---|---|
| 1 | यथा | like | fr. यथा *in.* (**6.19:**) |
| 3 | समृद्ध- | at full | |
| 4 | -वेगाः | speed | fr. समृद्ध-वेग *a. m. pl. nom.* |
| 2 | पतङ्-गाः | moths | fr. पतम्-ग *m. pl. nom.* (**6.24.3:** & **6.29:** & **2.55:**) |
| 8 | नाशाय | to [their] death | fr. नाश *m. sg. dat.* (**7.10.B:**) |
| 6 | प्रदीप्तं | a burning | fr. प्रदीप्त *pp. of* प्र + √दीप् *a. n. sg. acc.* |
| 7 | ज्वलनं | flame | fr. ज्वलन *n. sg. acc.* |
| 5 | विशन्ति | enter | fr. √विश् *6.P. pr.3rd pl.* |
| 9 | तथा एव | in the very same way | fr. तथा *in.* (**6.19:**); एव *in.* (**6.19:**) |
| 11 | समृद्ध-वेगाः | at full speed | fr. समृद्ध-वेग *a. m. pl. nom.* |
| 10 | लोकाः अपि | [those] people also | fr. लोक *m. pl. nom.*; अपि *in.* |
| 14 | नाशाय | to [their] death | fr. नाश *m. sg. dat.* (**7.10.B:**) |
| 13 | तव वक्त्राणि | Your mouths | fr. त्वम् *prn. sg. gen.*; वक्त्र *n. pl. acc.* (**2.92:**) (**7.8.1:**) |
| 12 | विशन्ति | enter | fr. √विश् *6.P. pr.3rd pl.* |

**लेलिह्यसे ग्रसमानः समन्ताल्लोकान्समग्रान्वदनैर्ज्वलद्भिः।**
**तेजोभिरापूर्य जगत्समग्रं भासस्तवोग्राः प्रतपन्ति विष्णो॥ ३०॥**

(लेलिह्यसे ग्रसमानः समन्तात्, लोकान् समग्रान् वदनैः ज्वलद्भिः। तेजोभिः आपूर्य जगत् समग्रं, भासः तव उग्राः प्रतपन्ति विष्णो॥)

ज्वलद्भिः वदनैः समग्रान् लोकान् समन्तात् ग्रसमानः लेलिह्यसे। तेजोभिः समग्रं जगत् आपूर्य, तव उग्राः भासः प्रतपन्ति, विष्णो। (**11.30**)

Completely swallowing all the people with [Your] burning mouths, You repeatedly lick [Your lips as if enjoying this]. Filling the entire universe with [Your] brilliance, Your violent flames burn, O Lord विष्णु.

| | | | |
|---|---|---|---|
| 5 | ज्वलद्भिः | with [Your] burning | fr. ज्वलत् *pr. pt. of* √ज्वल् *a. n. pl. inst.* (**3.12:**) |
| 6 | वदनैः | mouths | fr. वदन *n. pl. inst.* |
| 3 | समग्रान् | all | fr. समग्र *a. m. pl. acc.* |
| 4 | लोकान् | the people | fr. लोक *m. pl. acc.* |
| 1 | समन्तात् | completely | fr. समन्तात् *in.* (**7.11.3:**) |
| 2 | ग्रसमानः | swallowing | fr. ग्रसमान *pr. mid. pt. of* √ग्रस् *pt. m. sg. nom.* (**6.5:**) |
| 7 | लेलिह्यसे | You repeatedly lick [Your lips as if enjoying this] | fr. √लिह् *Ā. intens. 2nd form pr. 2nd sg.* (**5.42:** & **5.13.1:**) |
| 10 | तेजोभिः | with [Your] brilliance | fr. तेजस् *n. pl. inst.* (**3.6:**) |
| 9 | समग्रं जगत् | the entire universe | fr. समग्र *a. n. sg. acc.*; जगत् *n. sg. acc.* (**3.5:**) |
| 8 | आपूर्य | filling | fr. आपूर्य *in. pt. of* आ + √पृ (**6.9:** & **2.69:**) |
| 11 | तव उग्राः | Your violent | fr. त्वम् *prn. sg. gen.*; उग्रा *a. f. pl. nom.* |
| 12 | भासः | flames | fr. भास् *f. pl. nom.* (**3.6:**) |
| 13 | प्रतपन्ति | burn | fr. प्र + √तप् *1.P. pr. 3rd pl.* |
| 14 | विष्णो | O Lord विष्णु (One Who Pervades) | fr. विष्णु *m. sg. voc.* |

**आख्याहि मे को भवानुग्ररूपो नमोऽस्तु ते देववर प्रसीद।**
**विज्ञातुमिच्छामि भवन्तमाद्यं न हि प्रजानामि तव प्रवृत्तिम्॥ ३१॥**

(आख्याहि मे कः भवान् उग्ररूपः, नमः अस्तु ते देववर प्रसीद। विज्ञातुम् इच्छामि भवन्तम् आद्यं, न हि प्रजानामि तव प्रवृत्तिम्॥ )

कः भवान् उग्र-रूपः। मे आख्याहि। नमः ते अस्तु, देव-वर, प्रसीद। भवन्तम् आद्यं विज्ञातुम् इच्छामि, तव हि (=यस्मात्) प्रवृत्तिं न प्रजानामि। (**11.31**)

Who are You with [such] a violent form? Please tell me. Let [my] salutation be unto You, O Exalted Among Deities; please be gracious. I wish to clearly know You, the cause [of everything], because Your action I do not understand.

| | | | |
|---|---|---|---|
| 1 | कः | who? | fr. किम् *prn. m. sg. nom.* |
| 2 | भवान् | [are] You | fr. भवत् *prn. m. sg. nom.* (**3.13.b:**) |
| 3 | उग्र-रूपः | with [such] a violent form | fr. उग्र-रूप *a. m. sg. nom.* |
| 5 | मे | me | fr. अहम् *prn. sg. dat.* (**7.10.A.1:**) |
| 4 | आख्याहि | please tell | fr. आ + √ख्या *2.P. impv. 2nd sg.* (**5.6.a:**) |
| 7 | नमः | [my] salutation | fr. नमस् *n. sg. nom.* (**3.6:**) |
| 8 | ते | unto You | fr. त्वम् *prn. sg. dat.* (**7.10.A.3:**) |
| 6 | अस्तु | let be | fr. √अस् *2.P. impv. 3rd sg.* |
| 9 | देव-वर | O Exalted Among Deities | fr. देव-वर *a. m. sg. voc.* |
| 10 | प्रसीद | please be gracious | fr. प्र + √सद् *1.P. impv. 2nd sg.* (**5.15.3:**) |
| 13 | भवन्तम् | You | fr. भवत् *prn. m. sg. acc.* (**3.13.b:**) (**7.20:**) |
| 14 | आद्यं | the cause [of everything] | fr. आद्य *n. sg. acc.* |
| 12 | विज्ञातुम् | to clearly know | fr. विज्ञातुम् *inf. of* वि + √ज्ञा *in.* |
| 11 | इच्छामि | I wish | fr. √इष् *6.P. pr. 1st sg.* (**5.17.3:** & **5.5.a:**) |
| 16 | तव | Your | fr. त्वम् *prn. sg. gen.* |
| 15 | हि (=यस्मात्) | because | fr. हि *in.* |
| 17 | प्रवृत्तिं | action | fr. प्रवृत्ति *f. sg. acc.* |
| 18 | न प्रजानामि | I do not understand | fr. न *in.*; प्र + √ज्ञा *9.P. pr. 1st sg.* (**5.23.2:** & **5.3:**) |

**श्रीभगवानुवाच।**
**कालोऽस्मि लोकक्षयकृत्प्रवृद्धो लोकान्समाहर्तुमिह प्रवृत्तः।**
**ऋतेऽपि त्वां न भविष्यन्ति सर्वे येऽवस्थिताः प्रत्यनीकेषु योधाः॥३२॥**

(श्रीभगवान् उवाच। कालः अस्मि लोकक्षयकृत् प्रवृद्धः, लोकान् समाहर्तुम् इह प्रवृत्तः। ऋते अपि त्वां न भविष्यन्ति सर्वे, ये अवस्थिताः प्रत्यनीकेषु योधाः॥)

श्री-भगवान् उवाच। कालः अस्मि लोक-क्षय-कृत् प्रवृद्धः। इह लोकान् समाहर्तुं प्रवृत्तः। त्वाम् ऋते अपि, प्रति-अनीकेषु ये योधाः अवस्थिताः, सर्वे न भविष्यन्ति। (**11.32**)

The Lord said: I am time who destroys people, expanded [to fill this cosmic form]. Here [now, in this form] [I] undertake to destroy the people. Even without you, all these warriors stationed [here] in the opposing armies will not survive [it being their कर्म-फल to perish].

| | | | |
|---|---|---|---|
| 1 | श्री-भगवान् उवाच | the Lord said | fr. श्री-भगवत् *m. sg. nom.*; √वच् *P. perf. 3rd sg.* (**5.10.3:**) |
| 2 | कालः अस्मि | I am time | fr. काल *m. sg. nom.*; √अस् *2.P. pr. 1st sg.* |
| 4 | लोक- | people | |
| 3 | -क्षय-कृत् | who destroys | fr. लोक-क्षय-कृत् *a. m. sg. nom.* (**6.24.2:** & **3.5:**) |
| 5 | प्रवृद्धः | expanded [to fill this cosmic form] | fr. प्रवृद्ध *pp. of* प्र + √वृध् *a. m. sg. nom.* (**2.76:** & **.78:**) |
| 6 | इह | here [now, in this form] | fr. इह *in.* (**6.19:**) |
| 9 | लोकान् | the people | fr. लोक *m. pl. acc.* (**7.20:**) |
| 8 | समाहर्तुं | to destroy | fr. समाहर्तुम् *inf. of* सम् + आ + √हृ *in.* (**6.10:**) |
| 7 | प्रवृत्तः | [I] undertake | fr. प्रवृत्त *pp. of* प्र + √वृत् *pt. m. sg. nom.* |
| 11 | त्वाम् | you | fr. त्वम् *prn. sg. acc.* |
| 10 | ऋते अपि | even without | fr. ऋते *in.* (**6.16:**); अपि *in.* |
| 15 | प्रति-अनीकेषु | in the opposing armies | fr. प्रति-अनीक *n. pl. loc.* |
| 13 | ये योधाः | these warriors | fr. यद् *prn. pl. nom.*; योध *m. pl. nom.* |
| 14 | अवस्थिताः | stationed [here] | fr. अवस्थित *pp. of* अव + √स्था *a. m. pl. nom.* (**6.6:**) |
| 12 | सर्वे | all | fr. सर्व *prn. a. m. pl. nom.* (**4.16.2:**) |
| 16 | न भविष्यन्ति | will not survive | fr. न *in.*; √भू *P. fut. 3rd pl.* (**5.33:** & **2.3:** & **2.71:**) |

**तस्मात्त्वमुत्तिष्ठ यशो लभस्व जित्वा शत्रून्भुङ्क्ष्व राज्यं समृद्धम्।**
**मयैवैते निहताः पूर्वमेव निमित्तमात्रं भव सव्यसाचिन्॥ ३३॥**

(तस्मात् त्वम् उत्तिष्ठ यशः लभस्व, जित्वा शत्रून् भुङ्क्ष्व राज्यं समृद्धम्। मया एव एते निहताः पूर्वम् एव, निमित्तमात्रं भव सव्यसाचिन्॥ )

तस्मात् त्वम् उत्तिष्ठ, यशः लभस्व। शत्रून् जित्वा समृद्धं राज्यं भुङ्क्ष्व। मया एव एते पूर्वम् एव निहताः। निमित्तमात्रं भव, सव्य-साचिन्। (**11.33**)

Therefore, get up and gain fame. Conquering the enemies, may you enjoy the prosperous kingdom. By Me alone these [warriors] have already indeed been destroyed. May you [i.e., your actions] be merely [My] instrument, O अर्जुन (Skilled with the Left Hand).

| | | | |
|---|---|---|---|
| 1 | तस्मात् | therefore | fr. तस्मात् *in.* |
| 5 | त्वम् | you | fr. त्वम् *prn. sg. nom.* |
| 2 | उत्तिष्ठ | get up | fr. उद् + √स्था *1.P. impv. 2nd sg.* (**5.15.4:** & **2.24:**) |
| 3 | यशः लभस्व | [and] gain fame | fr. यशस् *n. sg. acc.* (**3.6:**); √लभ् *1.Ā. impv. 2nd sg.* |
| 4 | शत्रून् जित्वा | conquering the enemies | fr. शत्रु *m. pl. acc.*; जित्वा *in. pt. of* √जि |
| 7 | समृद्धं | the prosperous | fr. समृद्ध *pp. of* सम् + √ऋध् *a. n. sg. acc.* (**2.76:** & **.78:**) |
| 8 | राज्यं | kingdom | fr. राज्य *n. sg. acc.* |
| 6 | भुङ्क्ष्व | may [you] enjoy | fr. √भुज् *7.Ā. impv. 2nd sg.* (**5.3:** & **2.81:** & **2.101:**) |
| 9 | मया एव | by Me alone | fr. अहम् *prn. sg. inst.*; एव *in.* (**6.19:**) |
| 10 | एते | these [warriors] | fr. एतद् *prn. m. pl. nom.* |
| 11 | पूर्वम् एव | already indeed | fr. पूर्वम् *in.*; एव *in.* (**6.19:**) |
| 12 | निहताः | have been destroyed | fr. निहत *pp. of* नि + √हन् *pt. m. pl. nom.* (**6.6:**) |
| 14 | निमित्तमात्रं | merely [My] instrument | fr. निमित्तमात्रम् *in.* (**7.8.8:**) |
| 13 | भव | may you [i.e., your actions] be | fr. √भू *1.P. impv. 2nd sg.* (**5.3:** & **2.3:** & **2.71:**) |
| <u>15</u> | सव्य-साचिन् | (अर्जुन) O You Skilled with the Left Hand | fr. सव्य-साचिन् *a. m. sg. voc.* |

**द्रोणं च भीष्मं च जयद्रथं च कर्णं तथान्यानपि योधवीरान्।**
**मया हतांस्त्वं जहि मा व्यथिष्ठा युध्यस्व जेतासि रणे सपत्नान्॥ ३४॥**

(द्रोणं च भीष्मं च जयद्रथं च, कर्णं तथा अन्यान् अपि योधवीरान्। मया हतान् त्वं जहि मा व्यथिष्ठा, युध्यस्व जेतासि रणे सपत्नान्॥)

द्रोणं, भीष्मं च, जयद्-रथं च, कर्णं च, तथा अन्यान् योध-वीरान् अपि मया हतान् — त्वं जहि। मा व्यथिष्ठा। रणे सपत्नान् जेतासि। [अर्जुन,] युध्यस्व। (**11.34**)

Please kill द्रोण, भीष्म, जयद्-रथ, and कर्ण, [and] similarly [the] other leaders among [the] warriors also—who [already] have been destroyed by Me [as the giver of their कर्म-फल]. Do not be afraid [that what you are doing is अधर्म; it is not]. In battle you will conquer the enemies. [O अर्जुन] fight.

| | | | |
|---|---|---|---|
| 3 | द्रोणं | द्रोण | fr. द्रोण *m. sg. acc.* |
| 4 | भीष्मं च | भीष्म | fr. भीष्म *m. sg. acc.*; च *in.* |
| 5 | जयद्-रथं च | जयद्-रथ | fr. जयत्-रथ *m. sg. acc.* (**2.43:**); च *in.* |
| 6 | कर्णं च | and कर्ण | fr. कर्ण *m. sg. acc.*; च *in.* |
| 7 | तथा अन्यान् | similarly [these] other | fr. तथा *in.* (**6.19:**); अन्य *prn. a. m. pl. acc.* (**4.16.1:**) |
| 8 | योध-वीरान् | leaders among warriors | fr. योध-वीर *m. pl. acc.* |
| 9 | अपि | also | fr. अपि *in.* |
| 11 | मया | by Me [as the giver of their कर्म-फल] | fr. अहम् *prn. sg. inst.* |
| 10 | हतान् | who [already] have been destroyed | fr. हत *pp. of* √हन् *a. m. pl. acc.* (**6.6:**) |
| 1 | त्वं | you | fr. त्वम् *prn. sg. nom.* |
| 2 | जहि | please kill | fr. √हन् *2.P. impv. 2nd sg.* (**5.19.5:** & **5.6.a:**) |
| 12 | मा व्यथिष्ठा | do not be afraid [that what you are doing is अधर्म; it is not] | fr. मा *in.*; √व्यथ् *Ā.* इष्-*Aorist 2nd sg.* (**5.30.1.c: & 2.88:**) (**7.22.4:**) |
| 13 | रणे | in battle | fr. रण *m. sg. loc.* |
| 15 | सपत्नान् | the enemies | fr. सपत्न *m. pl. acc.* |
| 14 | जेतासि | you will conquer | fr. √जि *P. peri. fut. 2nd sg.* (**5.34:** & **5.19.4:**) |
| 16 | युध्यस्व | [O अर्जुन,] fight | fr. √युध् *4.Ā. impv. 2nd sg.* |

**सञ्जय उवाच।**
**एतच्छ्रुत्वा वचनं केशवस्य कृताञ्जलिर्वेपमानः किरीटी।**
**नमस्कृत्वा भूय एवाह कृष्णं सगद्गदं भीतभीतः प्रणम्य॥ ३५॥**

(सञ्जयः उवाच। एतद् श्रुत्वा वचनं केशवस्य, कृताञ्जलिः वेपमानः किरीटी। नमस्कृत्वा भूयः एव आह कृष्णं, सगद्गदं भीतभीतः प्रणम्य॥ )

सञ्जयः उवाच। केशवस्य एतद् वचनं श्रुत्वा वेपमानः किरीटी कृत-अञ्जलिः नमस्-कृत्वा भीत-भीतः प्रणम्य भूयः एव कृष्णं स-गद्गदम् आह। (**11.35**)

सञ्जय said: Hearing these words of कृष्ण, the trembling अर्जुन (the Crowned One)—with hands folded, bowing, and very frightened, bowing again—spoke with a faltering voice to कृष्ण.

| | | | |
|---|---|---|---|
| 1 | सञ्जयः उवाच | सञ्जय said | fr. सञ्जय *m. sg. nom.*; √वच् *P. perf. 3rd sg.* (**5.10.3:**) |
| 4 | केशवस्य | of कृष्ण (destroyer of the demon केशिन्) | fr. केशव *m. sg. gen.* |
| 3 | एतद् वचनं | these words | fr. एतद् *prn. n. sg. acc.*; वचन *n. sg. acc.* (**7.4.1:**) |
| 2 | श्रुत्वा | hearing | fr. श्रुत्वा *in. pt. of* √श्रु |
| 5 | वेपमानः | the trembling | fr. वेपमान *pr. mid. pt. of* √वेप् *a. m. sg. nom.* |
| 6 | किरीटी | अर्जुन (the crowned one) | fr. किरीटिन् *a. m. sg. nom.* (**3.15:**) |
| 7 | कृत-अञ्जलिः | with hands folded | fr. कृत-अञ्जलि *a. m. sg. nom.* |
| 8 | नमस्-कृत्वा | bowing | fr. नमस्-कृत्वा *in. pt. of* नमस् + √कृ (**6.13:**) |
| 9 | भीत-भीतः | [and] very frightened | fr. भीत-भीत *a. m. sg. nom.* |
| 10 | प्रणम्य | bowing | fr. प्रणम्य *in. pt. of* प्र + √नम् (**6.9: & 2.92:**) |
| 11 | भूयः एव | again | fr. भूयस् *in.*; एव *in.* (**6.19:**) |
| 14 | कृष्णं | to कृष्ण | fr. कृष्ण *m. sg. acc.* |
| 13 | स-गद्गदम् | with a faltering voice | fr. स-गद्गदम् *in.* (**6.39:** & **7.8.8:**) |
| 12 | आह | spoke | fr. √अह् *P. perf. 3rd sg.* (**5.8.5:**) |

**अर्जुन उवाच।**
**स्थाने हृषीकेश तव प्रकीर्त्या जगत्प्रहृष्यत्यनुरज्यते च।**
**रक्षांसि भीतानि दिशो द्रवन्ति सर्वे नमस्यन्ति च सिद्धसङ्घाः॥ ३६॥**

(अर्जुनः उवाच। स्थाने हृषीकेश तव प्रकीर्त्या, जगत् प्रहृष्यति अनुरज्यते च। रक्षांसि भीतानि दिशः द्रवन्ति, सर्वे नमस्यन्ति च सिद्धसङ्घाः॥)

अर्जुनः उवाच। हृषीक-ईश, स्थाने तव प्रकीर्त्या जगत् प्रहृष्यति अनुरज्यते च, भीतानि रक्षांसि दिशः द्रवन्ति, सर्वे च सिद्ध-सङ्घाः नमस्यन्ति। (**11.36**)

अर्जुन said: O कृष्ण, it is proper that by the praise of You the world rejoices and is attracted [to You], [while] the frightened demons run in [all] directions, and all the hosts of divine sages surrender [to You].

| | | | |
|---|---|---|---|
| 1 | अर्जुनः उवाच | अर्जुन said | fr. अर्जुन *m. sg. nom.*; √वच् *P. perf. 3rd sg.* (**5.10.3:**) |
| 2 | हृषीक-ईश | (कृष्ण) O Lord of the Senses | fr. हृषीक-ईश *m. sg. voc.* |
| 3 | स्थाने | it is proper that | fr. स्थाने *in.* (**7.13.3:**) |
| 5 | तव | of You | fr. त्वम् *prn. sg. gen.* |
| 4 | प्रकीर्त्या | by the praise | fr. प्रकीर्ति *f. sg. inst.* |
| 6 | जगत् प्रहृष्यति | the world rejoices | fr. जगत् *n. sg. nom.*; प्र + √हृष् *4.P. pr. 3rd sg.* |
| 7 | अनुरज्यते च | and is attracted [to You] | fr. अनु + √रञ्ज् *4.Ā. pr. 3rd sg.* (**5.16.2:**); च *in.* |
| 8 | भीतानि | [while] the frightened | fr. भीत *pp. of* √भी *a. n. pl. nom.* |
| 9 | रक्षांसि | demons | fr. रक्षस् *n. pl. nom.* (**3.6.i:**) |
| 11 | दिशः | in [all] directions | fr. दिश् *f. pl. acc.* (**3.6:**) |
| 10 | द्रवन्ति | run | fr. √द्रु *1.P. pr. 3rd pl.* (**2.71:**) |
| 12 | सर्वे च | and all | fr. सर्व *prn. m. pl. nom.* (**4.16.2:**); च *in.* |
| 13 | सिद्ध-सङ्घाः | the hosts of divine sages | fr. सिद्ध-सङ्घ *m. pl. nom.* |
| <u>14</u> | नमस्यन्ति | surrender [to You] | fr. *den.* √नमस्य *P. pr. 3rd pl.* |

**कस्माच्च ते न नमेरन्महात्मन् गरीयसे ब्रह्मणोऽप्यादिकर्त्रे।**
**अनन्त देवेश जगन्निवास त्वमक्षरं सदसत्तत्परं यत्॥ ३७॥**

(कस्मात् च ते न नमेरन् महात्मन्, गरीयसे ब्रह्मणः अपि आदिकर्त्रे। अनन्त देवेश जगन्निवास, त्वम् अक्षरं सदसत् तद् परं यद्॥)

महा-आत्मन्, कस्मात् च ब्रह्मणः अपि गरीयसे आदि-कर्त्रे [च] ते (=तुभ्यं) न नमेरन्। अन्-अन्त देव-ईश जगन्-निवास, त्वं तद् अ-क्षरं परं, यद् सद्-असत्। (**11.37**)

O Lord, why would they not surrender to You who are greater than Lord ब्रह्मा, and [who are] the primal cause? O Limitless, Lord of the Deities, and Abode of the Universe, You are that imperishable परं [ब्रह्मन्], which is both reality and unreality [i.e., both cause and effect, as well as सद्-असत्-परं— beyond both these concepts].

| | | | |
|---|---|---|---|
| 1 | महा-आत्मन् | O Lord | fr. महा-आत्मन् *m. sg. voc.* (**3.22:**) |
| 2 | कस्मात् च | [and] why? | fr. कस्मात् *in.*; च *in.* |
| 6 | ब्रह्मणः अपि | than Lord ब्रह्मा | fr. ब्रह्मन् *m. sg. abl.* (**3.22:** & **2.92:**); अपि *in.* |
| 5 | गरीयसे | who are greater | fr. गरीयस् *cpv. a. sg. dat.* (**6.25:** & **3.14:**) |
| 7 | आदि-कर्त्रे [च] | and [who are] the primal cause | fr. आदि-कर्तृ *m. sg. dat.* (**3.38:**) |
| 4 | ते (=तुभ्यं) | to You | fr. त्वम् *prn. sg. dat.* (**7.10.A.3:**) |
| 3 | न नमेरन् | would they not surrender | fr. न *in.*; √नम् *1.P. pot. 3rd pl.* |
| 8 | अन्-अन्त | O Limitless | fr. अनन्त *m. sg. voc.* |
| 9 | देव-ईश | Lord of the Deities | fr. देव-इश *m. sg. voc.* |
| 10 | जगन्-निवास | [and] Abode of the Universe | fr. जगत्-निवास *m. sg. voc.* (**2.44:**) |
| 11 | त्वं | You [are] | fr. त्वम् *prn. sg. nom.* |
| 12 | तद् अ-क्षरं | that imperishable | fr. तद् *prn. n. sg. nom.*; अक्षर *a. n. sg. nom.* |
| 13 | परं | परं [ब्रह्मन्] | fr. पर *n. sg. nom.* (**4.16.3:**) |
| 14 | यद् | which [is] | fr. यद् *prn. n. sg. nom.* |
| <u>15</u> | सद्-असत् | both reality and unreality [i.e., both cause and effect, as well as सद्-असत्-परं—beyond both these concepts] | fr. सत्-असत् *n. sg. nom.* (**2.43:** & **3.12:**) |

**त्वमादिदेवः पुरुषः पुराणस्त्वमस्य विश्वस्य परं निधानम्।**
**वेत्तासि वेद्यं च परं च धाम त्वया ततं विश्वमनन्तरूप॥३८॥**

(त्वम् आदिदेवः पुरुषः पुराणः, त्वम् अस्य विश्वस्य परं निधानम्। वेत्ता असि वेद्यं च परं च धाम, त्वया ततं विश्वम् अनन्तरूप॥)

त्वम् आदि-देवः, पुराणः पुरुषः। त्वम् अस्य विश्वस्य परं निधानम्। वेत्ता, वेद्यं च, परं च धाम असि। त्वया विश्वं ततम्, अन्-अन्त-रूप। (**11.38**)

You are [the one existing before] the beginning of the deities, the पुरुष (the being who fills this universe) that is always there. You are the ultimate place of resolution of this universe. You are both the [only] knower and what is to be known, and the ultimate abode. You pervade the universe, O You of Endless Forms.

| | | | |
|---|---|---|---|
| 1 | त्वम् | You [are] | fr. त्वम् *prn. sg. nom.* |
| 2 | आदि-देवः | [the one existing before] the beginning of the deities | fr. आदि-देव *m. sg. nom.* |
| 4 | पुराणः | that is always there | fr. पुराण *a. m. sg. nom.* |
| 3 | पुरुषः | the पुरुष (the being who fills this universe) | fr. पुरुष *m. sg. nom.* |
| 5 | त्वम् | You [are] | fr. त्वम् *prn. sg. nom.* |
| 7 | अस्य विश्वस्य | of this universe | fr. इदम् *prn. n. sg. gen.*; विश्व *n. sg. gen.* |
| 6 | परं निधानं | the ultimate place of resolution | fr. पर *prn. n. sg. nom.* (**4.16.3:**); निधान *n. sg. nom.* |
| 9 | वेत्ता | [both] the [only] knower | fr. वेत्तृ *m. sg. nom.* (**3.38:**) |
| 10 | वेद्यं च | and what is to be known | fr. वेद्य *pot. ps. pt. of* √विद् *a. n. sg. nom.* (**6.8:**); च *in.* |
| 11 | परं च | and the ultimate | fr. पर *prn. a. n. sg. nom.* (**4.16.3:**); च *in.* |
| 12 | धाम | abode | fr. धामन् *n. sg. nom.* (**3.22:**) |
| 8 | असि | You are | fr. √अस् *2.P. pr. 2nd sg.* (**5.19.4:**) |
| 13 | त्वया | You | fr. त्वम् *prn. sg. inst.* (**7.7:**) |
| 14 | विश्वं ततम् | pervade the universe | fr. विश्व *n. sg. nom.* (**4.16.2:**); तत *pp. of* √तन् *pt. n. sg. nom.* (**6.6:**) |
| 15 | अन्-अन्त-रूप | O You of Endless Forms | fr. अनन्त-रूप *a. m. sg. voc.* |

**वायुर्यमोऽग्निर्वरुणः शशाङ्कः प्रजापतिस्त्वं प्रपितामहश्च।**
**नमो नमस्तेऽस्तु सहस्रकृत्वः पुनश्च भूयोऽपि नमो नमस्ते॥३९॥**

(वायुः यमः अग्निः वरुणः शशाङ्कः, प्रजापति त्वं प्रपितामहः च। नमः नमः ते अस्तु सहस्रकृत्वः, पुनः च भूयः अपि नमः नमः ते॥)

त्वं वायुः यमः अग्निः वरुणः शश-अङ्कः प्रजा-पति प्र-पिता-महः च। नमः नमः ते अस्तु, सहस्र-कृत्वः पुनः च भूयः अपि, ते नमः नमः। (**11.39**)

You are [the deities and the entities] Wind, Death, Fire, Water, and Moon, [as well as] Lord of the Universe and Great-Grandfather [i.e., the uncaused cause of the cause of the universe]. Let there be repeated salutations to You—again and again, a thousand times, repeated salutations to You.

| | | | |
|---|---|---|---|
| 1 | त्वं वायुः | You are [the deity and the entity] Wind | fr. त्वम् *prn. sg. nom.*; वायु *m. sg. nom.* |
| 2 | यमः | Death | fr. यम *m. sg. nom.* |
| 3 | अग्निः | Fire | fr. अग्नि *m. sg. nom.* |
| 4 | वरुणः | Water | fr. वरुण *m. sg. nom.* |
| 5 | शश-अङ्कः | [and] Moon | fr. शश-अङ्क *m. sg. nom.* |
| 6 | प्रजा-पति | [as well as] Lord of the Universe | fr. प्रजा-पति *m. sg. nom.* |
| 8 | प्र-पिता-महः | Great-Grandfather [i.e., the uncaused cause of the cause of the universe] | fr. प्र-पिता-मह *m. sg. nom.* (**6.40:**) |
| 7 | च | and | fr. च *in.* |
| 10 | नमः नमः | repeated salutations | fr. नमस् *n. sg. nom.* (**3.6:**) |
| 11 | ते | to You | fr. त्वम् *prn. sg. dat.* (**4.3:**) (**7.10.A.3:**) |
| 9 | अस्तु | let there be | fr. √अस् *2.P. impv. 3rd sg.* |
| 14 | सहस्र-कृत्वः | a thousand times | fr. सहस्र-कृत्वस् *in.* (**4.27:**) |
| 12 | पुनः च | again | fr. पुनर् *in.*; च *in.* |
| 13 | भूयः अपि | and again | fr. भूयस् *in.*; अपि *in.* |
| 16 | ते | to You | fr. त्वम् *prn. sg. dat.* (**7.10.A.3:**) |
| 15 | नमः नमः | repeated salutations | fr. नमस् *n. sg. nom.* (**3.6:**) |

**नमः पुरस्तादथ पृष्ठतस्ते नमोऽस्तु ते सर्वत एव सर्व।**
**अनन्तवीर्यामितविक्रमस्त्वं सर्वं समाप्नोषि ततोऽसि सर्वः॥४०॥**

(नमः पुरस्तात् अथ पृष्ठतः ते, नमः अस्तु ते सर्वतः एव सर्व। अनन्तवीर्यामितविक्रमः त्वं, सर्वं समाप्नोषि ततः असि सर्वः॥)

पुरस्तात् अथ पृष्ठतः ते नमः, सर्वतः एव नमः ते अस्तु, सर्व। त्वम् अन्-अन्त-वीर्य-अ-मित-विक्रमः सर्वं समाप्नोषि। ततः सर्वः असि। (**11.40**)

Salutation to You in front [of me] and behind [me]. Let there be salutation to You, indeed, in all directions, O Everything. You of infinite power and infinite prowess completely pervade all. Therefore, You are all.

| | | | |
|---|---|---|---|
| 2 | पुरस्तात् | in front [of me] | fr. पुरस्तात् *in.* (**6.16:**) |
| 3 | अथ पृष्ठतः | and behind [me] | fr. अथ *in.* (**6.19:**); पृष्ठतस् *in.* (**6.19:**) |
| 1 | ते नमः | salutation to You | fr. त्वम् *prn. sg. dat.* (**4.3:**) (**7.10.A.3:**); नमस् *n. sg. nom.* (**3.6:**) |
| 6 | सर्वतः एव | indeed in all directions | fr. सर्वतस् *in.* (**6.19:**); एव *in.* (**6.19:**) |
| 5 | नमः ते | salutation to You | fr. नमस् *n. sg. nom.*; त्वम् *prn. sg. dat.* (**4.3:**) (**7.10.A.3:**) |
| 4 | अस्तु | let there be | fr. √अस् *2.P. impv. 3rd sg.* |
| 7 | सर्व | O Everything | fr. सर्व *n. sg. voc.* (**4.16:**) |
| 8 | त्वम् | You | fr. त्वम् *prn. sg. nom.* |
| 9 | अन्-अन्त-वीर्य- | of infinite power | |
| 10 | -अ-मित-विक्रमः | and infinite prowess | fr. अनन्त-वीर्य-अमित-विक्रम *a. m. sg. nom.* |
| 11 | सर्वं समाप्नोषि | completely pervade all | fr. सर्व *n./m. sg. acc.* (**4.16.2:**); सम् + √आप् *5.P. pr. 2nd sg.* (**5.3:**) |
| 12 | ततः | therefore | fr. ततस् *in.* (**6.19:**) |
| 13 | सर्वः असि | You are all | fr. सर्व *m. sg. nom.* (**4.16.2:**); √अस् *2.P. pr. 2nd sg.* (**5.19.4:**) |

सखेति मत्वा प्रसभं यदुक्तं हे कृष्ण हे यादव हे सखेति।
अजानता महिमानं तवेदं मया प्रमादात्प्रणयेन वापि॥ ४१॥
यच्चावहासार्थमसत्कृतोऽसि विहारशय्यासनभोजनेषु।
एकोऽथवाप्यच्युत तत्समक्षं तत्क्षामये त्वामहमप्रमेयम्॥ ४२॥

(सखा इति मत्वा प्रसभं यद् उक्तं, हे कृष्ण हे यादव हे सखे इति। अजानता महिमानं तव इदं, मया प्रमादात् प्रणयेन वा अपि॥
यद् च अवहासार्थम् असत्कृतः असि, विहारशय्यासनभोजनेषु। एकः अथवा अपि अच्युत तद् समक्षं, तद् क्षामये त्वाम् अहम् अप्रमेयम्॥)

अ-च्युत, यद् तव महिमानम् इदम् [रूपं neut., or = इमं महिमानं masc.] अ-जानता मया प्रमादात् प्रणयेन वा अपि सखा इति मत्वा "हे कृष्ण", "हे यादव", "हे सखे" [**2.21:** & **2.1.a:**] इति प्रसभम् उक्तम्, यद् च विहार-शय्या-आसन-भोजनेषु एकः अथवा तद् समक्षम् अपि अवहास-अर्थम् अ-सत्-कृतः असि — तद् अहं त्वाम् अ-प्रमेयं क्षामये। (**11.41-42**)

O Changeless, if, not knowing this [form], Your glory—whether out of carelessness or even out of friendship—thinking [You a mere] "friend," I impulsively called out "O [Mr.] कृष्ण," "O यादव [Clansman]," "O Buddy," and if—while walking, lying down, sitting, or eating, alone or even there in public—You have, out of jest, been slighted [i.e., treated as if not there], then I beg the patience and understanding of You who cannot be [separately] known.

| | | | |
|---|---|---|---|
| 1 | अ-च्युत | O Changeless | fr. अच्युत *m. sg. voc.* |
| 2 | यद् | if | fr. यद् *in.* (**6.20:**) |
| 5 | तव महिमानम् | Your glory | fr. त्वम् *prn. sg. gen.*; महिमन् *m. sg. acc.* (**3.22:**) |
| 4 | इदम् [रूपम्] | this [form] | fr. इदम् *prn. n. sg. acc.* |
| 3 | अ-जानता | not knowing | fr. अजानत् *pr. pt. of* √ज्ञा *pt. m. sg. inst.* (**5.23.2:**) |
| 10 | मया | I | fr. अहम् *prn. sg. inst.* (**7.7:**) |
| 6 | प्रमादात् | whether out of carelessness | fr. प्रमाद *m. sg. abl.* (**7.11.1:**) |
| 7 | प्रणयेन वा अपि | or even out of friendship | fr. प्रणय *m. sg. inst.* (**7.9.1:**); वा *in.*; अपि *in.* |
| 9 | सखा | friend | fr. सखि *m. sg. nom.* (**3.33:**) (**7.7.2:**) |
| 8 | इति मत्वा | thinking [You a mere] | fr. इति *in.*; मत्वा *in. pt. of* √मन् (**6.9:** & **.6:**) |
| 13 | हे कृष्ण | O [Mr.] कृष्ण | fr. हे *inj.* (**6.21:**); कृष्ण *m. sg. voc.* |
| 14 | हे यादव | O यादव [Clansman] | fr. हे *inj.* (**6.21:**); यादव *a. m. sg. voc.* |
| 15 | हे सखे इति | O Buddy | fr. हे *inj.* (**6.21:**); सखि *m. sg. voc.*; इति *in.* |
| 11 | प्रसभम् | impulsively | fr. प्रसभम् *in.* |
| 12 | उक्तम् | called out | fr. उक्त *pp. of* √वच् *pt. n. sg. nom.* (**6.6:** & **2.3.a:** & **2.80:**) (**7.28:** *impersonal*) |

| | | | |
|---|---|---|---|
| 16 | यद् च | and if | fr. यद् *in.* (**6.20:**); च *in.* |
| 17 | विहार- | while walking | |
| 18 | -शय्या- | lying down | |
| 19 | -आसन- | sitting | |
| 20 | -भोजनेषु | or eating | fr. विहार-शय्या-आसन-भोजन *n. pl. loc.* (**7.13.1.h:**) |
| 21 | एकः अथवा | alone or | fr. एक *prn. a. m. sg. nom.*; अथवा *in.* |
| 22 | तद् समक्षम् अपि | even there in public | fr. तद् *in.* (**6.20:**); समक्षम् *in.* (**7.8.8:**); अपि *in.* |
| 24 | अवहास-अर्थम् | out of jest | fr. अवहास-अर्थम् *in.* (**6.32:** & **7.8.8:**) |
| 25 | अ-सत्-कृतः | slighted [i.e., treated as if not there] | fr. असत्-कृत *a. m. sg. nom.* |
| 23 | असि | You have been | fr. √अस् *2.P. pr. 2nd sg.* (**5.19.4:**) (**7.21.1.a:**) |
| 26 | तद् अहं | then I | fr. तद् *in.* (**6.20:**); अहम् *prn. sg. nom.* |
| 28 | त्वाम् | of You | fr. त्वम् *prn. sg. acc.* |
| 29 | अ-प्रमेयं | who cannot be [separately] known | fr. अप्रमेय *pot. ps. pt. of* प्र + √मा *a. m. sg. acc.* (**6.8:**) |
| 27 | क्षामये | beg the patience and understanding | fr. √क्षम् *Ā. cs. pr. 1st sg.* |

**पितासि लोकस्य चराचरस्य त्वमस्य पूज्यश्च गुरुर्गरीयान्।**
**न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यो लोकत्रयेऽप्यप्रतिमप्रभाव॥ ४३॥**

(पिता असि लोकस्य चराचरस्य, त्वम् अस्य पूज्यः च गुरुः गरीयान्। न त्वत्समः अस्ति अभ्यधिकः कुतः अन्यः, लोकत्रये अपि अप्रतिमप्रभाव॥)

त्वं चर-अ-चरस्य लोकस्य पिता, पूज्यः, अस्य च गरीयान् गुरुः असि। लोक-त्रये अपि त्वत्-समः न अस्ति, कुतः अभ्यधिकः अन्यः, अ-प्रतिम-प्रभाव। (**11.43**) You are the father of the mobile and immobile world, [alone] to be worshipped, and its venerable teacher. There is no equal to You in even the three worlds [i.e., earth, sky, and heaven], [so] how [could there be] another who is superior, O You of Incomparable Glory?

| | | | |
|---|---|---|---|
| 1 | त्वं | You | fr. त्वम् *prn. sg. nom.* |
| 4 | चर-अ-चरस्य | of the mobile and immobile | fr. चर-अचर *a. m. sg. gen.* |
| 5 | लोकस्य | world | fr. लोक *m. sg. gen.* |
| 3 | पिता | the father | fr. पितृ *m. sg. nom.* (**3.38:**) |
| 6 | पूज्यः | [alone] to be worshipped | fr. पूज्य *pot. ps. pt. of* √पूज् *a. m. sg. nom.* |
| 7 | अस्य च | and its | fr. इदम् *prn. m. sg. gen.*; च *in.* |
| 8 | गरीयान् | venerable | fr. गरीयस् *cpv. a. m. sg. nom.* (**6.25:** & **3.14:**) |
| 9 | गुरुः | teacher | fr. गुरु *m. sg. nom.* |
| 2 | असि | are | fr. √अस् *2.P. pr. 2nd sg.* (**5.19.4:**) |

| | | | |
|---|---|---|---|
| 12 | लोक-त्रये अपि | in even the three worlds [i.e., earth, sky, and heaven] | fr. लोक-त्रय *n. sg. loc.* (**4.30:**); अपि *in.* |
| 11 | त्वत्-समः | equal to You | fr. त्वद्-सम *a. m. sg. nom.* (**4.2:** & **2.24:**) |
| 10 | न अस्ति | there is no | fr. न *in.*; √अस् *2.P. pr. 3rd sg.* |
| 13 | कुतः | [so] how [could there be] | fr. कुतस् *in.* (**6.19:**) |
| 15 | अभ्यधिकः | who is superior | fr. अभ्यधिक *a. m. sg. nom.* |
| 14 | अन्यः | another | fr. अन्य *prn. a. m. sg. nom.* |
| 16 | अ-प्रतिम- | O You of Incomparable | |
| 17 | -प्रभाव | Glory | fr. अप्रतिम-प्रभाव *a. m. sg. voc.* |

**तस्मात्प्रणम्य प्रणिधाय कायं प्रसादये त्वामहमीशमीड्यम्।**
**पितेव पुत्रस्य सखेव सख्युः प्रियः प्रियायार्हसि देव सोढुम्॥ ४४॥**

(तस्मात् प्रणम्य प्रणिधाय कायं, प्रसादये त्वाम् अहम् ईशम् ईड्यम्। पिता इव पुत्रस्य सखा इव सख्युः, प्रियः प्रियायाः अर्हसि देव सोढुम्॥)

तस्मात् प्रणम्य कायं प्रणिधाय अहं त्वाम् ईड्यम् ईशं प्रसादये। पुत्रस्य पिता इव, सख्युः सखा इव, प्रियायाः [**2.1.a:**] प्रियः [इव] सोढुम् अर्हसि, देव। (**11.44**)

Therefore, bowing and properly prostrating [my] body, I propitiate You who are the worshipful Lord. Like a father [toward his] son, a friend [toward his] friend, and a beloved [toward his] lover [i.e., as my creator, comrade, and the focus of my devotion], you ought to be patient and understanding [toward my mistakes], O Lord.

| | | | |
|---|---|---|---|
| 1 | तस्मात् | therefore | fr. तस्मात् *in.* |
| 2 | प्रणम्य | bowing | fr. प्रणम्य *in. pt. of* प्र + √नम् (**6.9: & 2.92:**) |
| 4 | कायं | [my] body | fr. काय *m. sg. acc.* |
| 3 | प्रणिधाय | [and] properly prostrating | fr. प्रणिधाय *in. pt. of* प्र + नि + √धा (**6.9: & 2.92:**) |
| 5 | अहं | I | fr. अहम् *prn. sg. nom.* |
| 7 | त्वाम् | You | fr. त्वम् *prn. sg. acc.* |
| 8 | ईड्यम् | who are the worshipful | fr. ईड्य *pot. ps. pt. of* √ईड् *a. m. sg. acc.* |
| 9 | ईशं | Lord | fr. ईश *m. sg. acc.* |
| 6 | प्रसादये | propitiate | fr. प्र + √सद् *Ā. cs. pr. 1st sg.* |

| | | | |
|---|---|---|---|
| 10 | पुत्रस्य पिता इव | like a father [to his] son | fr. पुत्र *m. sg. gen.*; पितृ *m. sg. nom.*; इव *in.* (**6.19:**) |
| 11 | सख्युः सखा इव | like a friend [to his] friend | fr. सखि *m. sg. gen.* (**3.33:**); सखि *m. sg. nom.* (**3.33:**); इव *in.* |
| 12 | प्रियायाः प्रियः | [and] a beloved [to his] lover | fr. प्रिया *f. sg. gen.* (**3.28.d:**); प्रिय *m. sg. nom.* |
| 13 | सोढुम् अर्हसि | you ought to be patient and understanding [towards my mistakes] | fr. सोढुम् *inf. of* √सह् *in.* (**2.109:**); √अर्ह् *1.P. pr. 2nd sg.* |
| 14 | देव | O Lord | fr. देव *m. sg. voc.* |

**अदृष्टपूर्वं हृषितोऽस्मि दृष्ट्वा भयेन च प्रव्यथितं मनो मे।**
**तदेव मे दर्शय देव रूपं प्रसीद देवेश जगन्निवास॥ ४५॥**

(अदृष्टपूर्वं हृषितः अस्मि दृष्ट्वा, भयेन च प्रव्यथितं मनः मे। तद् एव मे दर्शय देव रूपं, प्रसीद देवेश जगन्निवास॥)

अ-दृष्ट-पूर्वं दृष्ट्वा हृषितः अस्मि, भयेन च मे मनः प्रव्यथितम्। देव, तद् रूपम् एव मे दर्शय। प्रसीद, देव-ईश जगन्-निवास। (**11.45**)

Having seen what was not seen before, I am pleased—and [yet] my mind is shaken with fear. O Lord, please show me that form [as my friend] alone. Be gracious, O Lord of the Deities, the Abode of the Universe.

| | | | |
|---|---|---|---|
| 2 | अ-दृष्ट- | what was not seen | |
| 3 | -पूर्वं | before | fr. अदृष्ट-पूर्व *a. n. sg. acc.* |
| 1 | दृष्ट्वा | having seen | fr. दृष्ट्वा *in. pt. of* √दृश् (**2.85:**) |
| 5 | हृषितः | pleased | fr. हृषित *pp. of* √हृष् *a. m. sg. nom.* (**6.6:**) |
| 4 | अस्मि | I am | fr. √अस् *2.P. pr. 1st sg.* |
| 6 | भयेन च | and [yet] with fear | fr. भय *n. sg. inst.*; च *in.* |
| 7 | मे मनः | my mind | fr. अहम् *prn. sg. gen.*; मनस् *n. sg. nom.* (**3.6:**) |
| 8 | प्रव्यथितम् | is shaken | fr. प्रव्यथित *pp. of* प्र + √व्यथ् *a. n. sg. nom.* (**6.6:**) |
| 9 | देव | O Lord | fr. देव *m. sg. voc.* |
| 12 | तद् रूपम् एव | that form [as my friend] alone | fr. तद् *prn. n. sg. acc.*; रूप *n. sg. acc.*; एव *in.* (**6.19:**) |
| 11 | मे | me | fr. अहम् *prn. sg. dat.* (**4.3:**) (**7.10.A.1:**) |
| 10 | दर्शय | please show | fr. √दृश् *P. cs. impv. 2nd sg.* |
| 13 | प्रसीद | be gracious | fr. प्र + √सद् *1.P. impv. 2nd sg.* (**5.15.3:**) |
| 14 | देव-ईश | O Lord of the Deities | fr. देव-ईश *m. sg. voc.* |
| 15 | जगन्-निवास | the Abode of the Universe | fr. जगत्-निवास *m. sg. voc.* (**2.44:**) |

**किरीटिनं गदिनं चक्रहस्तमिच्छामि त्वां द्रष्टुमहं तथैव।**
**तेनैव रूपेण चतुर्भुजेन सहस्रबाहो भव विश्वमूर्ते॥ ४६॥**

(किरीटिनं गदिनं चक्रहस्तम्, इच्छामि त्वां द्रष्टुम् अहं तथा एव। तेन एव रूपेण चतुर्भुजेन, सहस्रबाहो भव विश्वमूर्ते॥ )

तथा एव अहं त्वां किरीटिनं गदिनं चक्र-हस्तं द्रष्टुम् इच्छामि। तेन एव चतुर्-भुजेन रूपेण भव, सहस्र-बाहो विश्व-मूर्ते। (**11.46**)

[But first], so too, I wish to [again] see You [as before—*as in* 11.17] with crown, mace, and discus in hand [within the cosmic form]. Please be with just that same four-armed form [as Lord विष्णु that I worship as my personal deity, इष्ट-देवता], O Thousand-Armed Whose Form Is the Universe.

| | | | |
|---|---|---|---|
| 1 | तथा एव | [but first] so too | fr. तथा *in.* (**6.19:**); एव *in.* (**6.19:**) |
| 2 | अहं | I | fr. अहम् *prn. sg. nom.* |
| 4 | त्वां | You | fr. त्वम् *prn. sg. acc.* (**7.20:**) |
| 5 | किरीटिनं | with crown | fr. किरीटिन् *a. m. sg. acc.* (**3.15:**) |
| 6 | गदिनं | with mace | fr. गदिन् *a. m. sg. acc.* |
| 7 | चक्र-हस्तं | [and] discus in hand | fr. चक्र-हस्त *a. m. sg. acc.* |
| 3 | द्रष्टुम् इच्छामि | wish to [again] see | fr. द्रष्टुम् *inf. of* √दृश् *in.* (**2.85:**); √इष् *6.P. pr. 1st sg.* (**5.17.3:**) |
| 9 | तेन एव | with just that same | fr. तद् *prn. n. sg. inst.*; एव *in.* (**6.19:**) |
| 10 | चतुर्-भुजेन | four-armed | fr. चतुर्-भुज *in.* (**2.24:** & **.29:**) |
| 11 | रूपेण | form | fr. रूप *n. sg. inst.* |
| 8 | भव | please be | fr. √भू *1.P. impv. 2nd sg.* (**5.3:** & **2.3:** & **2.71:**) |
| 12 | सहस्र-बाहो | O Thousand-Armed | fr. सहस्र-बाहु *a. m. sg. voc.* (**6.19:**) |
| 13 | विश्व-मूर्ते | Whose Form Is the Universe | fr. विश्व-मूर्ति *a. m. sg. voc.* (**3.29:**) |

**श्रीभगवानुवाच।**
**मया प्रसन्नेन तवार्जुनेदं रूपं परं दर्शितमात्मयोगात्।**
**तेजोमयं विश्वमनन्तमाद्यं यन्मे त्वदन्येन न दृष्टपूर्वम्॥ ४७॥**

(श्रीभगवान् उवाच। मया प्रसन्नेन तव अर्जुन इदं, रूपं परं दर्शितम् आत्मयोगात्। तेजोमयं विश्वम् अनन्तम् आद्यं, यद् मे त्वदन्येन न दृष्टपूर्वम्॥)

श्री-भगवान् उवाच। अर्जुन, प्रसन्नेन मया आत्म-योगात् इदं परं रूपं तव [तुभ्यम् इत्यर्थः] दर्शितं, यद् मे तेजोमयं विश्वम् अन्-अन्तम् आद्यं [रूपं] त्वद्-अन्येन न दृष्ट-पूर्वम्। (**11.47**)

[Having again taken the popular Lord विष्णु form] the Lord said: O अर्जुन, being pleased, I showed to you through My power this limitless form, which—brilliant, universal, endless, and primal [form] of Me—has not been seen by anyone [other] than you.

| | | | |
|---|---|---|---|
| 1 | श्री-भगवान् उवाच | the Lord said | fr. श्री-भगवत् *m. sg. nom.*; √वच् *P. perf. 3rd sg.* (**5.10.3:**) |
| 2 | अर्जुन | O अर्जुन | fr. अर्जुन *m. sg. voc.* |
| 3 | प्रसन्नेन | being pleased | fr. प्रसन्न *pp. of* प्र + √सद् *a. m. sg. inst.* (**6.6:**) |
| 4 | मया | I | fr. अहम् *prn. sg. inst.* (**7.7:**) |
| 7 | आत्म-योगात् | through My power | fr. आत्म-योग *m. sg. abl.* |
| 8 | इदं परं | this limitless | fr. इदम् *prn. n. sg. acc.*; पर *prn. a. n. sg. acc.* (**4.16.3:**) |
| 9 | रूपं | form | fr. रूप *n. sg. acc.* |
| 6 | तव [तुभ्यम् इत्यर्थः] | to you | fr. त्वम् *prn. sg. gen.* (**7.12.1.c:**) |
| 5 | दर्शितं | showed | fr. दर्शित *pp. of* √दृश् *pt. n. sg. nom.* (**6.6:**) |
| 10 | यद् | which | fr. यद् *n. sg. nom.* |
| 15 | मे | of Me | fr. अहम् *prn. sg. gen.* |
| 11 | तेजोमयं | brilliant | fr. तेजोमय *a. n. sg. nom.* |
| 12 | विश्वम् | universal | fr. विश्व *prn. a. n. sg. nom.* (**4.16.2:**) |
| 13 | अन्-अन्तम् | endless | fr. अनन्त *a. n. sg. nom.* |
| 14 | आद्यं [रूपं] | and primal [form] | fr. आद्य *a. n. sg. nom.* |
| 17 | त्वद्-अन्येन | by anyone [other] than you | fr. त्वद्-अन्य *prn. a. m. sg. inst.* (**4.2:** & **2.24:** & **2.43:** & **4.16.1:**) |
| <u>16</u> | न दृष्ट-पूर्वम् | has not been seen [before] | fr. न *in.*; दृष्ट-पूर्व *a. n. sg. nom.* |

**न वेदयज्ञाध्ययनैर्न दानैर्न च क्रियाभिर्न तपोभिरुग्रैः।**
**एवंरूपः शक्य अहं नृलोके द्रष्टुं त्वदन्येन कुरुप्रवीर॥ ४८॥**

(न वेदयज्ञाध्ययनैः न दानैः, न च क्रियाभिः न तपोभिः उग्रैः। एवंरूपः शक्यः अहं नृलोके, द्रष्टुं त्वदन्येन कुरुप्रवीर॥)

न वेद-यज्ञ-अध्ययनैः, न दानैः, न क्रियाभिः, न च उग्रैः तपोभिः अहम् एवं-रूपः नृ-लोके त्वद्-अन्येन द्रष्टुं शक्यः [**2.1.a:**, **2.31:** instead of **2.32:**], कुरु-प्रवीर। (**11.48**)

Not by study of the वेद-s or of यज्ञ-s, or by charity, or by [performing] rituals, or by vigorous prayerful disciplines can I be seen in such a form in the world of humans by anyone [other] than you, O अर्जुन.

| | | | |
|---|---|---|---|
| 1 | न | not | fr. न *in.* |
| 3 | वेद-यज्ञ- | of the वेद-s or of यज्ञ-s | |
| 2 | -अध्ययनैः | by study | fr. वेद-यज्ञ-अध्ययन *n. pl. inst.* |
| 4 | न दानैः | not by charity | fr. न *in.*; दान *n. pl. inst.* |
| 5 | न क्रियाभिः | not by [performing] rituals | fr. न *in.*; क्रिया *f. pl. inst.* |
| 6 | न च उग्रैः | not by vigorous | fr. न *in.*; च *in.*; उग्र *a. n. pl. inst.* |
| 7 | तपोभिः | prayerful disciplines | fr. तपस् *n. pl. inst.* (**3.6.j:**) |
| 8 | अहम् | I | fr. अहम् *prn. sg. nom.* |
| 11 | एवं-रूपः | in such a form | fr. एवम्-रूप *a. m. sg. nom.* (**2.54:**) |
| 12 | नृ-लोके | in the world of humans | fr. नृ-लोक *m. sg. loc.* |
| 13 | त्वद्-अन्येन | by anyone [other] than you | fr. त्वद्-अन्य *prn. a. m. sg. inst.* (**4.2:** & **2.24:** & **2.43:** & **4.16.1:**) |
| 10 | द्रष्टुं | seen | fr. द्रष्टुम् *inf. of* √दृश् *in.* (**2.85:**) (**7.20.2:**) |
| 9 | शक्यः | can be | fr. शक्य *pot. ps. pt. of* √शक् *pt. m. sg. nom.* |
| <u>14</u> | कुरु-प्रवीर | O अर्जुन (hero of the कुरु people) | fr. कुरु-प्रवीर *m. sg. voc.* |

**मा ते व्यथा मा च विमूढभावो दृष्ट्वा रूपं घोरमीदृङ्ममेदम्।**
**व्यपेतभीः प्रीतमनाः पुनस्त्वं तदेव मे रूपमिदं प्रपश्य॥ ४९॥**

(मा ते व्यथा मा च विमूढभावः, दृष्ट्वा रूपं घोरम् ईदृक् मम इदम्। व्यपेतभीः प्रीतमनाः पुनः त्वं, तद् एव मे रूपम् इदं प्रपश्य॥)

इदं मम ईदृक् घोरं रूपं दृष्ट्वा, ते व्यथा मा [अस्तु], विमूढ-भावः च मा [अस्तु]। त्वं व्यपेत-भीः प्रीत-मनाः पुनः तद् एव मे रूपम् इदं प्रपश्य। (**11.49**)

Seeing such a gruesome form as this of Mine, may you have no fear, nor [may] [your] mind [be] confused. Being without fear and of pleased mind again, may you see now that same form of me [as your friend].

| | | | |
|---|---|---|---|
| 5 | इदं | as this | fr. इदम् *prn. n. sg. acc.* |
| 6 | मम | of Mine | fr. अहम् *prn. sg. gen.* |
| 2 | ईदृक् | such | fr. ईदृश् *a. n. sg. acc.* (**4.17.1:** & **3.6:** & **2.24:**) |
| 3 | घोरं | a gruesome | fr. घोर *a. n. sg. acc.* |
| 4 | रूपं | form | fr. रूप *n. sg. acc.* |
| 1 | दृष्ट्वा | seeing | fr. दृष्ट्वा *in. pt. of* √दृश् (**2.85:**) |
| 8 | ते | you have | fr. त्वम् *prn. sg. gen.* (**7.12.1.a:**) |
| 9 | व्यथा | fear | fr. व्यथा *f. sg. nom.* |
| 7 | मा [अस्तु] | may not | fr. मा *in.* (**7.24.5:**) |
| 11 | विमूढ-भावः च | [your] mind [be] confused | fr. विमूढ-भाव *m. sg. nom.*; च *in.* |
| 10 | मा [अस्तु] | nor [may] | fr. मा *in.* (**7.24.5:**) |
| 17 | त्वं | you | fr. त्वम् *prn. sg. nom.* |
| 12 | व्यपेत- | being without | |
| 13 | -भीः | fear | fr. व्यपेत-भी *a. m. sg. nom.* (**3.36:** & **3.36.a:**) |
| 14 | प्रीत- | [and] of pleased | |
| 15 | -मनाः | mind | fr. प्रीत-मनस् *a. m. sg. nom.* (**3.6.i:**) |
| 16 | पुनः | again | fr. पुनर् *in.* |
| 20 | तद् एव | that same | fr. तद् *prn. n. sg. acc.*; एव *in.* (**6.19:**) |
| 21 | मे रूपम् | form of me [as your friend] | fr. अहम् *prn. sg. gen.*; रूप *n. sg. acc.* |
| 19 | इदं | now, here | fr. इदम् *in.* |
| 18 | प्रपश्य | may see | fr. प्र + √दृश् *1.P. impv. 2nd sg.* (**5.15.6:**) |

**सञ्जय उवाच।**
**इत्यर्जुनं वासुदेवस्तथोक्त्वा स्वकं रूपं दर्शयामास भूयः।**
**आश्वासयामास च भीतमेनं भूत्वा पुनः सौम्यवपुर्महात्मा।।५०।।**

(सञ्जयः उवाच। इति अर्जुनं वासुदेवः तथा उक्त्वा, स्वकं रूपं दर्शयामास भूयः। आश्वासयामास च भीतम् एनं, भूत्वा पुनः सौम्यवपुः महात्मा।। )

सञ्जयः उवाच। इति तथा वासु-देवः अर्जुनम् उक्त्वा, स्वकं रूपं भूयः दर्शयाम्-आस। महा-आत्मा च सौम्य-वपुः पुनः भूत्वा, एनं भीतम् आश्वासयाम्-आस। (**11.50**)

सञ्जय said: Thus having spoken to अर्जुन, कृष्ण showed again his own [human] form. And, having become again the Lord with a pleasing form, soothed him who was frightened.

| | | | |
|---|---|---|---|
| 1 | सञ्जयः उवाच | सञ्जय said | fr. सञ्जय *m. sg. nom.*; √वच् *P. perf. 3rd sg.* (**5.10.3:**) |
| 3 | इति तथा | thus | fr. इति *in.*; तथा *in.* (**6.19:**) |
| 5 | वासु-देवः | (कृष्ण) in whom everything exists and who is in the form of conscious being | fr. वासु-देव *m. sg. nom.* |
| 4 | अर्जुनम् | to अर्जुन | fr. अर्जुन *m. sg. acc.* |
| 2 | उक्त्वा | having spoken | fr. उक्त्वा *in. pt. of* √वच् (**6.9:** & **6.6:** & **2.3.a:** & **2.80:**) |
| 8 | स्वकं रूपं | his own [human] form | fr. स्वक *prn. a. n. sg. acc.*; रूप *n. sg. acc.* |
| 7 | भूयः | again | fr. भूयस् *in.* |
| 6 | दर्शयाम्-आस | showed | fr. √दृश् *P. cs. peri. perf. 3rd sg.* (**5.29:**) |
| 9 | महा-आत्मा च | and the Lord | fr. महा-आत्मन् *m. sg. nom.*; च *in.* |
| 11 | सौम्य- | with a pleasing | |
| 12 | -वपुः | form | fr. सौम्य-वपुस् *a. m. sg. nom.* (**3.6:**) |
| 10 | पुनः भूत्वा | having become again | fr. पुनर् *in.*; भूत्वा *in. pt. of* √भू |
| 14 | एनं | him | fr. एनद् *prn. m. sg. acc.* (**4.10:**) |
| 15 | भीतम् | who was frightened | fr. भीत *pp. of* √भी *a. m. sg. acc.* |
| 13 | आश्वासयाम्-आस | soothed | fr. आ + √श्वस् *P. cs. peri. perf. 3rd sg.* (**5.29:**) |

**अर्जुन उवाच।**

**दृष्ट्वेदं मानुषं रूपं तव सौम्यं जनार्दन। इदानीमस्मि संवृत्तः सचेताः प्रकृतिं गतः॥५१॥**

(अर्जुनः उवाच। दृष्ट्वा इदं मानुषं रूपं, तव सौम्यं जनार्दन। इदानीम् अस्मि संवृत्तः, सचेताः प्रकृतिं गतः॥)

अर्जुनः उवाच। जन-अर्दन, इदं तव सौम्यं मानुषं रूपं दृष्ट्वा, इदानीं स-चेताः संवृत्तः प्रकृतिं [च] गतः अस्मि। (**11.51**)

अर्जुन said: O कृष्ण, seeing this, Your pleasing human form, now I have recovered [my] mind and have returned to [my] original disposition.

| | | | |
|---|---|---|---|
| 1 | अर्जुनः उवाच | अर्जुन said | fr. अर्जुन *m. sg. nom.*; √वच् *P. perf. 3rd sg.* (**5.10.3:**) |
| 2 | जन-अर्दन | (कृष्ण) O One Who Is Prayed to by People | fr. जन-अर्दन *m. sg. voc.* |
| 4 | इदं | this | fr. इदम् *prn. n. sg. acc.* |
| 5 | तव सौम्यं | Your pleasing | fr. त्वम् *prn. sg. gen.*; सौम्य *a. n. sg. acc.* |
| 6 | मानुषं रूपं | human form | fr. मानुष *a. n. sg. acc.*; रूप *n. sg. acc.* |
| 3 | दृष्ट्वा | seeing | fr. दृष्ट्वा *in. pt. of* √दृश् (**2.85:**) |
| 7 | इदानीं | now | fr. इदानीम् *in.* (**6.19:**) |
| 9 | स-चेताः संवृत्तः | recovered [my] mind | fr. स-चेतस् *a. m. sg. nom.* (**3.6.i:**); संवृत्त *pp. of* सम् + √वृत् *pt. m. sg. nom.* (**2.54:**) |
| 10 | प्रकृतिं [च] गतः | [and] returned to [my] original disposition | fr. प्रकृति *f. sg. acc.* (**7.8.2:**); गत *pp. of* √गम् *pt. m. sg. nom.* (**6.6:**) |
| 8 | अस्मि | I have | fr. √अस् *2.P. pr. 1st sg.* |

**श्रीभगवानुवाच।**

**सुदुर्दर्शमिदं रूपं दृष्टवानसि यन्मम। देवा अप्यस्य रूपस्य नित्यं दर्शनकाङ्क्षिणः॥५२॥**

(श्रीभगवान् उवाच। सुदुर्दर्शम् इदं रूपं, दृष्टवान् असि यद् मम। देवाः अपि अस्य रूपस्य, नित्यं दर्शनकाङ्क्षिणः॥)

श्री-भगवान् उवाच। यद् इदं मम सु-दुर्-दर्शं रूपं दृष्टवान् असि, देवाः अपि अस्य रूपस्य नित्यं दर्शन-काङ्क्षिणः। (**11.52**)

The Lord said: This form of Mine that you have seen, which is very difficult to see—even the gods are always desirous of seeing this form.

| | | | |
|---|---|---|---|
| 1 | श्री-भगवान् उवाच | the Lord said | fr. श्री-भगवत् *m. sg. nom.*; √वच् *P. perf. 3rd sg.* (**5.10.3:**) |
| 5 | यद् | which, that | fr. यद् *prn. sg. acc.* |
| 2 | इदं | this | fr. इदम् *prn. n. sg. acc.* |
| 4 | मम | of Mine | fr. अहम् *prn. sg. gen.* |
| 7 | सु-दुर्-दर्शं | which is very difficult to see | fr. सु-दुस्-दर्श *a. n. sg. acc.* (**2.24:** & **.29:**) |
| 3 | रूपं | form | fr. रूप *n. sg. acc.* |
| 6 | दृष्टवान् असि | you have seen | fr. दृष्टवत् *past act. pt. of* √दृश् *pt. n. sg. nom.* (**6.7:** & **2.85:**); √अस् *2.P. pr. 2nd sg.* (**5.19.4:**) |

| | | | |
|---|---|---|---|
| 8 | देवाः अपि | even the gods | fr. देव *m. pl. nom.*; अपि *in.* |
| 11 | अस्य रूपस्य | this form | fr. इदम् *prn. n. sg. gen.*; रूप *n. sg. gen.* (**7.12.2.a:**) |
| 9 | नित्यं | always | fr. नित्यम् *in.* (**7.8.8:**) |
| 10 | दर्शन-काङ्क्षिणः | are desirous of seeing | fr. दर्शन-काङ्क्षिन् *a. m. pl. nom.* (**3.15:** & **2.92:**) |

**नाहं वेदैर्न तपसा न दानेन न चेज्यया। शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा॥५३॥**
(न अहं वेदैः न तपसा, न दानेन न च इज्यया। शक्यः एवंविधः दृष्टुं, दृष्टवान् असि मां यथा॥)
यथा मां दृष्टवान् असि, एवं-विधः अहं न वेदैः, न तपसा, न दानेन, न च इज्यया दृष्टुं शक्यः। (**11.53**)
In which way you have seen Me, in such a form, I can be seen not by [study of] the वेद-s, or by prayerful discipline, or by charity, or by ritual.

| | | | |
|---|---|---|---|
| 1 | यथा | in which way | fr. यथा *in.* (**6.19:**) |
| 3 | मां | Me | fr. अहम् *prn. sg. acc.* |
| 2 | दृष्टवान् असि | you have seen | fr. दृष्टवत् *past act. pt. of* √दृश् *pt. n. sg. nom.* (**6.7:**); √अस् *2.P. pr. 2nd sg.* (**5.19.4:**) |
| 4 | एवं-विधः | in such a form | fr. एवम्-विध *a. m. sg. nom.* (**2.54:**) |
| 5 | अहं | I | fr. अहम् *prn. sg. nom.* |
| 8 | न वेदैः | not by [study of] the वेद-s | fr. न *in.*; वेद *m. pl. inst.* |
| 9 | न तपसा | not by prayerful discipline | fr. न *in.*; तमस् *n. sg. inst.* (**3.6:**) |
| 10 | न दानेन | not by charity | fr. न *in.*; दान *n. sg. inst.* |
| 11 | न च इज्यया | not by ritual | fr. न *in.*; च *in.*; इज्या *f. sg. inst.* (**3.28.c:**) |
| 7 | दृष्टुं | seen | fr. दृष्टुम् *inf. of* √दृश् *in.* (**2.85:**) (**7.20.2:**) |
| 6 | शक्यः | can be | fr. शक्य *pot. ps. pt. of* √शक् *pt. m. sg. nom.* |

**भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन। ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप॥५४॥**

(भक्त्या तु अनन्यया शक्यः, अहम् एवंविधः अर्जुन। ज्ञातुं द्रष्टुं च तत्त्वेन, प्रवेष्टुं च परन्तप॥)

अर्जुन परन्-तप, अन्-अन्यया तु भक्त्या एवं-विधः अहं तत्त्वेन ज्ञातुं द्रष्टुं च प्रवेष्टुं च शक्यः [**2.1.a:**]। (**11.54**)

—Whereas, O अर्जुन, Vexer of Foes, [only] by a devotion in which there is no other [outside of Me] am I—in such a form—possible, in truth, to know; to see [not with a magical eye, but with the ज्ञानिन्-'s eye that sees only Me]; and to enter into [i.e., to include oneself as Me].

| | | | |
|---|---|---|---|
| 2 | अर्जुन | O अर्जुन | fr. अर्जुन *m. sg. voc.* |
| 3 | परन्-तप | O Vexer of Foes | fr. पर-म्-तप *m. sg. voc.* (**2.55:**) |
| 5 | अन्-अन्यया | in which there is no other [outside of Me] | fr. अनन्या *prn. a. f. sg. inst.* (**4.16.1:**) |
| 1 | तु | whereas | fr. तु *in.* |
| 4 | भक्त्या | [only] by a devotion | fr. भक्ति *f. sg. inst.* |
| 8 | एवं-विधः | in such a form | fr. एवम्-विध *a. m. sg. nom.* (**2.54:**) |
| 6 | अहं | I | fr. अहम् *prn. sg. nom.* |
| 9 | तत्त्वेन | in truth | fr. तत्त्वेन *in.* (**7.9.14:**) |
| 10 | ज्ञातुं | to know | fr. ज्ञातुम् *inf. of* √ज्ञा *in.* (**7.20.2:**) |
| 11 | द्रष्टुं च | to see [not with a magical eye, but with the ज्ञानिन्-'s eye that sees only Me] | fr. द्रष्टुम् *inf. of* √दृश् *in.* (**2.85:**) (**7.20:**); च *in.* |
| 12 | प्रवेष्टुं च | and to enter into [i.e., include oneself as Me] | fr. प्रवेष्टुम् *inf. of* प्र + √विश् *in.* (**2.85:**); च *in.* |
| 7 | शक्यः | am possible | fr. शक्य *pot. ps. pt. of* √शक् *pt. m. sg. nom.* |

**मत्कर्मकृन्मत्परमो मद्भक्तः सङ्गवर्जितः। निर्वैरः सर्वभूतेषु यः स मामेति पाण्डव॥५५॥**

(मत्कर्मकृत् मत्परमः, मद्भक्तः सङ्गवर्जितः। निर्वैरः सर्वभूतेषु, यः सः माम् एति पाण्डव॥)

यः मत्-कर्म-कृत्, मत्-परमः, मद्-भक्तः, सङ्ग-वर्जितः, सर्व-भूतेषु निर्-वैरः [च], सः माम् एति, पाण्डव। (**11.55**)

The one who performs [one's] duty for the sake of [attaining] Me, for whom the paramount [achievement] is Me, who is devoted to Me, free from attachment [as there is only Me], and without hostility toward any being [all of them being Me]—that one attains Me, O अर्जुन.

| | | | |
|---|---|---|---|
| 1 | यः | the one who | fr. यद् *prn. m. sg nom.* |
| 3 | मत्- | for the sake of [attaining] Me | |
| 2 | -कर्म-कृत् | performs [one's] duty | fr. मद्-कर्म-कृत् *a. m. sg. nom.* (**2.24:** & **6.24.2:**) |
| 4 | मत्-परमः | for whom the paramount [achievement] is Me | fr. मद्-परम *a. m. sg. nom.* (**2.24:**) |
| 5 | मद्-भक्तः | who is devoted to Me | fr. मद्-भक्त *a. m. sg. nom.* (**2.24:** & **.43:**) |
| 6 | सङ्ग-वर्जितः | free from attachment [as there is only Me] | fr. सङ्ग-वर्जित *a. m. sg. nom.* |
| 8 | सर्व-भूतेषु | towards any being [which are all Me] | fr. सर्व-भूत *n. pl. loc.* |
| 7 | निर्-वैरः [च] | [and] without hostility | fr. निस्-वैर *a. m. sg. nom.* (**2.24:** & **.29:**); च *in.* |
| 9 | सः | that one | fr. तद् *prn. m. sg. nom.* |
| 10 | माम् एति | attains Me | fr. अहम् *prn. sg. acc.*; √इ *2.P. pr.* $3^{rd}$ *sg.* (**5.3:**) |
| 11 | पाण्डव | (अर्जुन) O Son of King पाण्डु | fr. पाण्डव *m. sg. voc.* |

**ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे विश्वरूपदर्शनयोगो नामैकादशोऽध्यायः॥११॥**

(ओं तद् सत्। इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे विश्वरूपदर्शनयोगः नाम एकादशः अध्यायः॥)

ओं तद् सत्। इति श्रीमद्-भगवद्-गीतासु उपनिषत्सु ब्रह्म-विद्यायां योग-शास्त्रे श्री-कृष्ण-अर्जुन-संवादे विश्व-रूप-दर्शन-योगः नाम एका-दशः अध्यायः। (**11**)

ओं (ब्रह्मन्, the witness of all) is that [only] reality. Thus ends the eleventh chapter, called "The Topic of Vision of the Cosmic Form," of the [eighteen chapters of] *Songs of the Glorious Lord*, which is [looked upon as] उपनिषद् [and whose teaching is] in [the form of] a dialogue between श्री कृष्ण and अर्जुन, [the subject matter being] a knowledge of ब्रह्मन् and योग.

| | | | |
|---|---|---|---|
| 1 | ओं | ओम् (ब्रह्मन्, the witness of all,) | fr. ओम् *in.* |
| 2 | तद् सत् | [is] that [only] reality | fr. तद् *prn. n. sg. nom.*; सत् *n. sg. nom.* |
| 3 | इति | (quote-end quote), thus ends | fr. इति *in.* |
| 11 | श्रीमद्- | of the venerable, the glorious | |
| 12 | -भगवद्- | one having [limitless] glories, Lord | |
| 10 | -गीतासु | in [i.e., of] songs | fr. श्रीमत्-भगवत्-गीता *f. pl. loc.* (**2.43:**) |
| 13 | उपनिषत्सु | [which are/is looked upon as] उपनिषद्, sacred scripture | fr. उपनिषद् *f. pl. loc.* (**6.24:**) |
| 18 | ब्रह्म- | of ब्रह्मन् (reality/सत्) | |
| 17 | -विद्यायां | [and] a knowledge | fr. ब्रह्म-विद्या *f. sg. loc.* |
| 19 | योग-शास्त्रे | [and instruction of] योग (means, discipline, etc.) | fr. योग-शास्त्र *n. sg. loc.* |
| 15 | श्री-कृष्ण- | between Lord कृष्ण | |
| 16 | -अर्जुन- | and अर्जुन | |
| 14 | -संवादे | in [the form of] a dialogue | fr. श्री-कृष्ण-अर्जुन-संवाद *n. sg. loc.* (**2.7:**) |
| 9 | विश्व-रूप- | of the cosmic form | |
| 8 | -दर्शन- | of the vision | |
| 7 | -योगः | the topic | fr. विश्व-रूप-दर्शन-योग *a. m. sg. nom.* |
| 6 | नाम | by the name, called | fr. नाम *in.* |
| 4 | एका-दशः | the eleventh | fr. एकादश *ordinal a. m. sg. nom.* |
| 5 | अध्यायः | chapter | fr. अध्याय *m. sg. nom.* |

# अथ द्वादशोऽध्यायः

**अर्जुन उवाच।**

**एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते। ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः॥१॥**

(अर्जुनः उवाच। एवं सततयुक्ताः ये, भक्ताः त्वां पर्युपासते। ये च अपि अक्षरम् अव्यक्तं, तेषां के योगवित्तमाः॥)

अर्जुनः उवाच। ये एवं सतत-युक्ताः भक्ताः त्वां पर्युपासते, ये च अपि अ-व्यक्तम् अ-क्षरम् [त्वां पर्युपासते], तेषां के योग-वित्तमाः। (**12.1**)

अर्जुन said: Between those devotees who in this same way (*see* 11.55) are always committed [to You] [i.e., मत्-कर्म-कृत्] and seek You [as the विश्व-रूप], and those who [seek You] as the not objectified अक्षर [i.e., formless ब्रह्मन्]—who are the best knowers of योग?

| | | | |
|---|---|---|---|
| 1 | अर्जुनः उवाच | अर्जुन said | fr. अर्जुन *m. sg. nom.*; √वच् *P. perf. 3rd sg.* (**5.10.3:**) |
| 4 | ये | who | fr. यद् *prn. m. pl. nom.* |
| 5 | एवं | in this same way (*see* 11.55) | fr. एवम् *in.* (**6.19:**) |
| 6 | सतत-युक्ताः | [are] always committed [to You] | fr. सतत-युक्त *m. pl. nom.* |
| 3 | भक्ताः | devotees | fr. भक्त *pp. of* √भज् *m. pl. nom.* (**2.81:**) |
| 8 | त्वां | You [as the विश्वरूप] | fr. त्वम् *prn. sg. acc.* |
| 7 | पर्युपासते | [and] who seek | fr. परि + उप + √आस् *2.Ā. pr. 3rd pl.* (**5.6.b:**) |
| 9 | ये च अपि | and also those who [seek You] | fr. यद् *prn. m. pl. nom.*; च *in.*; अपि *in.* |
| 10 | अ-व्यक्तम् | [as] the not objectified [i.e., formless] | fr. अव्यक्त *pp. of* वि + √अञ्ज् *a. n. sg. acc.* (**6.6:** & **2.81:**) |
| 11 | अ-क्षरम् | अक्षर [ब्रह्मन्] | fr. अक्षर *n. sg. acc.* |
| 2 | तेषां | among [i.e., between] those | fr. तद् *prn. m. pl. loc.* (**7.13.1.a:**) |
| 12 | के | who [are]? | fr. किम् *prn. pl. nom.* |
| 13 | योग-वित्तमाः | the best knowers of योग | fr. योग-वित्तम *spv. a. m. pl. nom.* (**6.25:**) |

**श्रीभगवानुवाच।**

**मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते। श्रद्धया परयोपेतास्ते मे युक्ततमा मताः॥२॥**

(श्रीभगवान् उवाच। मयि आवेश्य मनः ये मां, नित्ययुक्ताः उपासते। श्रद्धया परया उपेताः, ते मे युक्ततमाः मताः॥)

श्री-भगवान् उवाच। ये मयि मनः आवेश्य, नित्य-युक्ताः, परया श्रद्धया उपेताः माम् उपासते, ते युक्ततमाः मे मताः। (**12.2**)

The Lord said: Those who, placing [their] mind in Me, being always committed [i.e., कर्म-योगिन्-s who are मत्-कर्म-कृत्], and being endowed with ultimate trust [in My teaching] [and thus] seek Me—they are considered by Me to be [among] the best knowers of योग (the means to attain Me).

| | | | |
|---|---|---|---|
| 1 | श्री-भगवान् उवाच | the Lord said | fr. श्री-भगवत् *m. sg. nom.*; √वच् *P. perf. $3^{rd}$ sg.* (**5.10.3:**) |
| 2 | ये | those who | fr. यद् *prn. m. pl. nom.* |
| 4 | मयि मनः | [their] mind in Me | fr. अहम् *prn. sg. loc.*; मनस् *n. sg. acc.* (**3.6:**) |
| 3 | आवेश्य | placing | fr. आवेश्य *in. pt. of* आ + *cs.* √विश् (**6.9:**) |
| 5 | नित्य-युक्ताः | being always committed | fr. नित्य-युक्त *a. m. pl. nom.* |
| 7 | परया श्रद्धया | with ultimate trust [in My teaching] | fr. परा *prn. a. f. sg. inst.* (**4.16.3:**); श्रद्धा *f. sg. inst.* |
| 6 | उपेताः | [and] being endowed | fr. उपेत *pp. of* उप + √इ *a. m. pl. nom.* |
| 9 | माम् | Me | fr. अहम् *prn. sg. acc.* |
| 8 | उपासते | [thus] seek | fr. उप + √आस् *2.Ā. pr. $3^{rd}$ pl.* (**5.6.b:**) |
| 10 | ते | they | fr. तद् *prn. m. pl. nom.* |
| 13 | युक्ततमाः | [among] the best knowers of योग (the means to attain Me) | fr. युक्ततम *spv. a. m. pl. nom.* (**6.25:**) |
| 12 | मे | by Me | fr. अहम् *prn. sg. gen.* (**7.12.3.a:**) |
| 11 | मताः | are considered (to be) | fr. मत *pp. of* √मन् *pt. m. pl. nom.* (**6.6:**) |

**ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते। सर्वत्रगमचिन्त्यं च कूटस्थमचलं ध्रुवम्॥३॥**
**सन्नियम्येन्द्रियग्रामं सर्वत्र समबुद्धयः। ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः॥४॥**

(ये तु अक्षरम् अनिर्देश्यम्, अव्यक्तं पर्युपासते। सर्वत्रगम् अचिन्त्यं च, कूटस्थम् अचलं ध्रुवम्॥
सन्नियम्य इन्द्रियग्रामं, सर्वत्र समबुद्धयः। ते प्राप्नुवन्ति माम् एव, सर्वभूतहिते रताः॥)

ये तु अ-निर्देश्यम् अ-व्यक्तं सर्वत्र-गम् अ-चिन्त्यं कूट-स्थम् अ-चलं ध्रुवं च अ-क्षरं पर्युपासते, [ये] इन्द्रिय-ग्रामं सन्नियम्य, सर्वत्र सम-बुद्धयः, सर्व-भूत-हिते रताः — ते माम् एव प्राप्नुवन्ति। (**12.3-4**)

—Whereas those who seek [i.e., know] [Me as] अक्षर (imperishable ब्रह्मन्)—which cannot be described [i.e., delimited by words], not objectified [by the senses], [is] locationless, which cannot be an object of the mind, which remains [true] in the apparent [i.e., as the basis and witness of माया], [is] immovable and permanent [in time]—[and those who] completely master [their] organs [of sense and action], whose vision remains the same toward everything, and who are dedicated to the welfare of all beings—they attain only Me.

| | | | |
|---|---|---|---|
| 1 | ये तु | whereas those who | fr. यद् *prn. m. pl. nom.*; तु *in.* |
| 4 | अ-निर्देश्यम् | which cannot be described [i.e., delimited by words] | fr. अनिर्देश्य *pot. ps. pt. of* निस् + √दिश् *a. n. sg. acc.* (**6.8:** & **2.24:** & **2.29:**) |
| 5 | अ-व्यक्तं | not objectified [by the senses] | fr. अव्यक्त *pp. of* वि + √अञ्ज् *a. n. sg. acc.* (**6.6:** & **2.81:**) |
| 6 | सर्वत्र-गम् | [is] locationless | fr. सर्वत्र-ग *a. n. sg. acc.* (**6.24.3:**) |
| 7 | अ-चिन्त्यं | which cannot be an object of the mind | fr. अचिन्त्य *pot. ps. pt. of* √चिन्त् *a. n. sg. acc.* |
| 8 | कूट-स्थम् | which remains [true] in the apparent [i.e., as the basis and witness of माया] | fr. कुट-स्थ *pt. n. sg. acc.* (**6.24.1:**) |
| 9 | अ-चलं | immovable | fr. अचल *a. n. sg. acc.* |
| 10 | ध्रुवं च | and permanent [in time] | fr. ध्रुव *a. n. sg. acc.*; च *in.* |
| 3 | अ-क्षरं | अक्षर (imperishable ब्रह्मन्) | fr. अक्षर *n. sg. acc.* |
| 2 | पर्युपासते | seek [i.e., know] [Me as] | fr. परि + उप + √आस् *2.Ā. pr. 3rd pl.* (**5.6.b:**) |
| 11 | [ये] | [and those who] | |
| 13 | इन्द्रिय-ग्रामं | [their] organs [of sense and action] | fr. इन्द्रिय-ग्राम *m. sg. acc.* |
| 12 | सन्नियम्य | completely master | fr. सन्नियम्य *in. pt. of* सम् + नि + √यम् (**6.9:** & **2.55:**) |
| 15 | सर्वत्र | towards everything | fr. सर्वत्र *in.* (**6.19:**) |
| 14 | सम-बुद्धयः | whose vision remains the same | fr. सम-बुद्धि *a. m. pl. nom.* |
| 18 | सर्व-भूत- | of all beings | |
| 17 | -हिते | to the welfare | fr. सर्व-भूत-हित *n. sg. loc.* (**7.13.2.a:**) |
| 16 | रताः | [and] who are dedicated | fr. रत *pp. of* √रम् *a. m. pl. nom.* (**6.6:**) |

| | | |
|---|---|---|
| 19 ते | they | fr. तद् *prn. m. pl. nom.* |
| 21 माम् एव | only Me | fr. अहम् *prn. sg. acc.*; एव *in.* (**6.19:**) |
| 20 प्राप्नुवन्ति | attain | fr. प्र + √आप् *5.P. pr. 3rd pl.* (**5.21.2:**) |

**क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम्। अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते॥५॥**
(क्लेशः अधिकतरः तेषाम्, अव्यक्तासक्तचेतसाम्। अव्यक्ता हि गतिः दुःखं, देहवद्भिः अवाप्यते॥)
तेषाम् अ-व्यक्त-आसक्त-चेतसां क्लेशः अधिकतरः [स्यात्], देहवद्भिः हि (=यस्मात्) अ-व्यक्ता गतिः दुःखम् अवाप्यते। (**12.5**)
Among those whose mind is committed to what is not objectified, affliction [is or can be] greater, because an end that cannot be objectified is reached with difficulty by those who [instead of being ज्ञानिन्-s] are [सन्न्यासिन्-s who are still] देहवत् (identified with their body).

| | | |
|---|---|---|
| 1 तेषाम् | among those | fr. तद् *prn. m. pl. loc.* (**7.13.1.a:**) |
| 3 अ-व्यक्त- | to what is not objectified | |
| 2 -आसक्त-चेतसां | whose mind is committed | fr. अव्यक्त-आसक्त-चेतस् *a. m. pl. loc.* (**3.6:**) |
| 4 क्लेशः | affliction | fr. क्लेश *m. sg. nom.* |
| 5 अधिकतरः [स्यात्] | [is or can be] greater | fr. अधिकतर *cpv. a. m. sg. nom.* (**6.25:**) |
| 11 देहवद्भिः | by those who are [still] देहवत् (identified with their body) | fr. देहवत् *a. m. pl. inst.* |
| 6 हि (=यस्मात्) | because | fr. हि *in.* |
| 8 अ-व्यक्ता | that cannot be objectified | fr. अव्यक्ता *pp. of* वि + √अञ्ज् *a. f. sg. nom.* (**6.6:** & **2.81:**) |
| 7 गतिः | an end | fr. गति *f. sg. nom.* |
| 10 दुःखम् | with difficulty | fr. दुःखम् *in.* (**7.8.8:**) |
| 9 अवाप्यते | is reached | fr. अव + √आप् *ps. pr. 3rd sg.* |

**ये तु सर्वाणि कर्माणि मयि सन्न्यस्य मत्पराः। अनन्येनैव योगेन मां ध्यायन्त उपासते॥६॥**
**तेषामहं समुद्धर्ता मृत्युसंसारसागरात्। भवामि नचिरात्पार्थ मय्यावेशितचेतसाम्॥७॥**

(ये तु सर्वाणि कर्माणि, मयि सन्न्यस्य मत्पराः। अनन्येन एव योगेन, मां ध्यायन्तः उपासते॥
तेषाम् अहं समुद्धर्ता, मृत्युसंसारसागरात्। भवामि नचिरात् पार्थ, मयि आवेशितचेतसाम्॥)

पार्थ, ये तु सर्वाणि कर्माणि मयि सन्न्यस्य, मत्-पराः, अन्-अन्येन एव योगेन मां ध्यायन्तः उपासते, तेषां मयि आवेशित-चेतसाम् अहं मृत्यु-संसार-सागरात् समुद्धर्ता न-चिरात् भवामि। (**12.6-7**)

—Whereas, O अर्जुन, those [कर्म-योगिन्-s] who seek [Me]—giving up all action unto Me, having Me as their ultimate, and meditating on Me with undivided discipline—for them whose mind is absorbed in Me, I become before long [their] liberator from the ocean that is संसार (a life of becoming), [which is] filled with death.

| | | | |
|---|---|---|---|
| 1 | पार्थ | (अर्जुन) O Son of पृथा | fr. पार्थ *m. sg. voc.* |
| 2 | ये तु | whereas those [कर्मयोगिन्-s] who | fr. यद् *prn. m. pl. nom.*; तु *in.* |
| 5 | सर्वाणि कर्माणि | all action | fr. सर्व *prn. a. n. pl. acc.* (**4.16.2:**); कर्मन् *n. pl. acc.* (**3.22:**) |
| 6 | मयि | unto Me | fr. अहम् *prn. sg. loc.* |
| 4 | सन्न्यस्य | giving up | fr. सन्न्यस्य *in. pt. of* सम् + नि + √अस् (**2.55:**) |
| 7 | मत्-पराः | having Me as their ultimate | fr. मद्-पर *a. m. pl. nom.* (**4.2:** & **2.24:**) |
| 9 | अन्-अन्येन एव | with undivided | fr. अनन्य *prn. a. m. sg. inst.*; एव *in.* (**6.19:**) |
| 10 | योगेन | discipline | fr. योग *m. sg. inst.* |
| 8 | मां ध्यायन्तः | and meditating on Me | fr. अहम् *prn. sg. acc.*; ध्यायत् *pr. pt. of* √ध्यै *pt. m.pl. nom.* (**2.71:** & **3.12:**) |
| 3 | उपासते | seek [Me] | fr. उप + √आस् *2.Ā. pr. 3rd pl.* (**5.6.b:**) |
| 11 | तेषां | for them | fr. तद् *prn. m. pl. gen.* |
| 14 | मयि | in Me | fr. अहम् *prn. sg. loc.* |
| 13 | आवेशित- | is absorbed | |
| 12 | -चेतसाम् | whose mind | fr. आवेशित-चेतस् *a. m. pl. gen.* (**3.6:**) |
| 15 | अहं | I | fr. अहम् *prn. sg. nom.* |
| 21 | मृत्यु- | [filled] with death | |
| 20 | -संसार- | that is संसार (a life of becoming) | |
| 19 | -सागरात् | from the ocean | fr. मृत्यु-संसार-सागर *m. sg. abl.* |
| 18 | समुद्धर्ता | [their] liberator | fr. समुद्धर्तृ *m. sg. nom.* (**3.38:**) |
| 17 | न-चिरात् | before long | fr. नचिरात् *in.* (**6.33:** & **7.11.3:**) |
| <u>16</u> | भवामि | become | fr. √भू *1.P. pr. 1st sg.* (**5.3:** & **2.3:** & **2.71:** & **5.5.a:**) |

**मय्येव मन आधत्स्व मयि बुद्धिं निवेशय। निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः॥८॥**

(मयि एव मनः आधत्स्व, मयि बुद्धिं निवेशय। निवसिष्यसि मयि एव, अतः ऊर्ध्वं न संशयः॥)

मयि एव मनः आधत्स्व। मयि बुद्धिं निवेशय। अतः ऊर्ध्वं मयि एव [**2.1.a:**] निवसिष्यसि, न संशयः। (**12.8**)

Place [your] मनस् (the vacillating mind) only in Me [i.e., gain a steadiness contemplating Me]. Place [your] बुद्धि (intellect/knowledge) in Me [i.e., gain clear knowledge of Me]. Thereupon, you will abide in [i.e., attain] Me alone. [In this] there is no doubt.

| | | | |
|---|---|---|---|
| 2 | मयि एव | only in Me [i.e., gain a steadiness contemplating Me] | fr. अहम् *prn. sg. loc.*; एव *in.* (**6.19:**) |
| 1 | मनः आधत्स्व | place [your] मनस् (the vacillating mind) | fr. मनस् *n. sg. acc.* (**3.6:**); आ + √धा *3.Ā. impv. 2nd sg.* (**5.20.2:** & **2.76:** & **2.77:**) |
| 4 | मयि | in Me [i.e., gain clear knowledge of Me] | fr. अहम् *prn. sg. loc.* |
| 3 | बुद्धिं निवेशय | place [your] बुद्धि (intellect/knowledge) | fr. बुद्धि *f. sg. acc.*; नि + *cs.* √विश् *P. cs. impv. 2nd sg.* (**5.20.2:** & **2.76:** & **2.77:**) |
| 5 | अतः ऊर्ध्वं | thereupon | fr. अतस् *in.* (**6.19:**); ऊर्ध्वम् *in.* (**6.16:**) |
| 7 | मयि एव | Me alone | fr. अहम् *prn. sg. loc.*; एव *in.* (**6.19:**) |
| 6 | निवसिष्यसि | you will abide in [i.e., attain] | fr. नि + √वस् *P. fut. 2nd sg.* |
| 8 | न संशयः | [in this] [there is] no doubt | fr. न *in.*; संशय *m. sg. nom.* |

**अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम्। अभ्यासयोगेन ततो मामिच्छाप्तुं धनञ्जय॥९॥**

(अथ चित्तं समाधातुं, न शक्नोषि मयि स्थिरम्। अभ्यासयोगेन ततः, माम् इच्छ आप्तुं धनञ्जय॥)

अथ मयि चित्तं स्थिरं समाधातुं न शक्नोषि, ततः अभ्यास-योगेन माम् आप्तुम् इच्छ, धनञ्-जय। (**12.9**)

If you are not able to place [your] mind steadily in Me, then seek to attain Me by a योग consisting of continual practice [i.e., study and contemplation—repeatedly bringing the mind back to these two], O अर्जुन.

| | | | |
|---|---|---|---|
| 1 | अथ | if | fr. अथ *in.* (**6.19:**) |
| 5 | मयि | in Me | fr. अहम् *prn. sg. loc.* |
| 4 | चित्तं स्थिरं | [your] mind steadily | fr. चित्त *pp. of* √चित् *n. sg. acc.*; स्थिरम् *in.* (**7.8.8:**) |
| 3 | समाधातुं | to place | fr. समाधातुम् *inf. of* सम् + आ + √धा *in.* |
| 2 | न शक्नोषि | you are not able | fr. न *in.*; √शक् *5.P. pr. 2nd sg.* (**5.3:** & **2.101:**) |

| | | | |
|---|---|---|---|
| 6 | ततः | then | fr. ततस् *in.* (**6.19:**) |
| 10 | अभ्यास- | consisting of continual practice [i.e., study and contemplation—repeatedly bringing the mind back to these two] | |
| 9 | -योगेन | by a योग | fr. अभ्यास-योग *m. sg. inst.* |
| 8 | माम् आप्तुम् | to attain Me | fr. अहम् *prn. sg. acc.* (**7.20:**); आप्तुम् *inf. of* √आप् *in.* |
| 7 | इच्छ | seek | fr. √इष् *6.P. impv. 2nd sg.* (**5.17.3:**) |
| 11 | धनञ्-जय | (अर्जुन) O Winner of Laurels | fr. धन-म्-जय *m. sg. voc.* (**2.55:**) |

**अभ्यासेऽप्यसमर्थोऽसि मत्कर्मपरमो भव। मदर्थमपि कर्माणि कुर्वन्सिद्धिमवाप्स्यसि॥१०॥**

(अभ्यासे अपि असमर्थः असि, मत्कर्मपरमः भव। मदर्थम् अपि कर्माणि, कुर्वन् सिद्धिम् अवाप्स्यसि॥)

[अथ] अभ्यासे अपि अ-समर्थः असि, मत्-कर्म-परमः भव। कर्माणि मद्-अर्थं कुर्वन् अपि सिद्धिम् अवाप्स्यसि। (**12.10**)

[If] you are incapable in even [this] continual practice, [then as a कर्म-योगिन्] be one for whom action dedicated to [attaining] Me is paramount. Even doing actions [at their outset] for the sake of [attaining] Me, you will attain success [in terms, initially, of maturity and peace of mind].

| | | | |
|---|---|---|---|
| 1 | [अथ] | [if] | |
| 4 | अभ्यासे अपि | in even [this] continual practice | fr. अभ्यास *m. sg. loc.*; अपि *in.* |
| 3 | अ-समर्थः | incapable | fr. असमर्थ *a. m. sg. nom.* |
| 2 | असि | you are | fr. √अस् *2.P. pr. 2nd sg.* (**5.19.4:**) |
| 7 | मत्- | dedicated to [attaining] Me | |
| 6 | -कर्म- | one for whom action | |
| 8 | -परमः | is paramount | fr. मद्-कर्म-परम *a. m. sg. nom.* (**2.24:**) |
| 5 | भव | [then] be | fr. √भू *1.P. impv. 2nd sg.* (**5.3:** & **2.3:** & **2.71:**) |
| 10 | कर्माणि | actions [at their outset] | fr. कर्मन् *n. pl. acc.* (**3.22:**) |
| 11 | मद्-अर्थं | for the sake of [attaining] Me | fr. मद्-अर्थम् *in.* (**6.32:** & **2.24:** & **2.43:** & **7.8.8:**) |
| 9 | कुर्वन् अपि | even doing | fr. कुर्वत् *pr. pt. of* √कृ *pt. m. sg. nom.* (**5.22.1:** & **2.67:**); अपि *in.* |
| 13 | सिद्धिम् | success [in terms, initially, of maturity and peace of mind] | fr. सिद्धि *f. sg. acc.* |
| 12 | अवाप्स्यसि | you will attain | fr. अव + √आप् *P. fut. 2nd sg.* |

**अथैतदप्यशक्तोऽसि कर्तुं मद्योगमाश्रितः। सर्वकर्मफलत्यागं ततः कुरु यतात्मवान्॥११॥**

(अथ एतद् अपि अशक्तः असि, कर्तुं मद्योगम् आश्रितः। सर्वकर्मफलत्यागं, ततः कुरु यतात्मवान्॥)

अथ मद्-योगम् आश्रितः एतद् अपि कर्तुम् अ-शक्तः असि, ततः यत-आत्मवान् [सन्] सर्व-कर्म-फल-त्यागं कुरु। (**12.11**)

If, being committed to My योग, you are not able to do even this, then—being one whose mind is disciplined—please give up [the false notion of being the author of] the results of all actions (*see* 2.47 *and* 18.11).

| | | | |
|---|---|---|---|
| 1 | अथ | if | fr. अथ *in.* (**6.19:**) |
| 3 | मद्-योगम् | to My योग | fr. मद्-योग *m. sg. acc.* |
| 2 | आश्रितः | being committed | fr. आश्रित *pp. of* √श्रि *pt. m. sg. nom.* |
| 7 | एतद् अपि | even this | fr. एतद् *prn. n. sg. acc.*; अपि *in.* |
| 6 | कर्तुम् | to do | fr. कर्तुम् *inf. of* √कृ *in.* (**6.10:** & **5.34:**) |
| 5 | अ-शक्तः | not able | fr. अशक्त *pp. of* √शक् *pt. m. sg. nom.* |
| 4 | असि | you are | fr. √अस् *2.P. pr.* 2nd *sg.* (**5.19.4:**) |
| 8 | ततः | then | fr. ततस् *in.* (**6.19:**) |
| 9 | यत-आत्मवान् | being one whose mind is disciplined | fr. यत-आत्मवत् *a. m. sg. nom..* (**3.13.a:**) |
| 12 | सर्व-कर्म- | of all actions | |
| 11 | -फल-त्यागं | give up [the false notion of being the author of] the results | fr. सर्व-कर्म-फल-त्याग *m. sg. acc.* |
| 10 | कुरु | please (do) | fr. √कृ *8.P. impv.* 2nd *sg.* (**5.22.1:**) |

**श्रेयो हि ज्ञानमभ्यासाज्ज्ञानाद्ध्यानं विशिष्यते। ध्यानात्कर्मफलत्यागस्त्यागाच्छान्तिरनन्तरम्॥१२॥**

(श्रेयः हि ज्ञानम् अभ्यासात्, ज्ञानात् ध्यानं विशिष्यते। ध्यानात् कर्मफलत्यागः, त्यागात् शान्तिः अनन्तरम्॥)

अभ्यासात् ज्ञानं श्रेयः हि, ज्ञानात् ध्यानं विशिष्यते, ध्यानात् कर्म-फल-त्यागः [विशिष्यते]। त्यागात् शान्तिः अन्-अन्तरम् [स्यात्]। (**12.12**) Than अभ्यास (continued practice), understanding [with practice] is better indeed. Than understanding, contemplation [with understanding] is better. Than contemplation, कर्म-फल-त्याग [is (initially) better]. Out of [this] renunciation, peace [of mind] immediately follows.

| | | | |
|---|---|---|---|
| 1 | अभ्यासात् | than अभ्यास (continued practice) | fr. अभ्यास *m. sg. abl.* (**7.11.2.a:**) |
| 2 | ज्ञानं श्रेयः हि | understanding [with practice] is better indeed | fr. ज्ञान *n. sg. nom.*; श्रेयस् *cpv. a. n. sg. nom.* (**3.14:**); हि *in.* |
| 3 | ज्ञानात् | than understanding | fr. ज्ञान *n. sg. abl.* |
| 4 | ध्यानं विशिष्यते | contemplation [with understanding] is better | fr. ध्यान *n. sg. nom.*; वि+ √शिष् *ps. pr.* 3rd *sg.* |

| | | | |
|---|---|---|---|
| 5 | ध्यानात् | than contemplation | fr. ध्यान *n. sg. abl.* |
| 6 | कर्म-फल-त्यागः | कर्मफलत्याग [is (initially) better] | fr. कर्म-फल-त्याग *m. sg. nom.* |
| 7 | त्यागात् | out of [this] renunciation | fr. त्याग *m. sg. abl.* |
| 8 | शान्तिः | peace [of mind] | fr. शान्ति *f. sg. nom.* |
| 9 | अन्-अन्तरम् | immediate | fr. अनन्तरम् *in.* (**6.16:**) |
| 10 | [स्यात्] | [follows] | |

**अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च। निर्ममो निरहङ्कारः समदुःखसुखः क्षमी॥१३॥**
**सन्तुष्टः सततं योगी यतात्मा दृढनिश्चयः। मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः॥१४॥**

(अद्वेष्टा सर्वभूतानां, मैत्रः करुणः एव च। निर्ममः निरहङ्कारः, समदुखसुखः क्षमी॥
सन्तुष्टः सततं योगी, यतात्मा दृढनिश्चयः। मयि अर्पितमनोबुद्धिः, यः मद्भक्तः सः मे प्रियः॥)

सर्व-भूतानाम् अ-द्वेष्टा, मैत्रः, करुणः एव च, निर्-ममः, निर्-अहङ्-कारः, सम-दुख-सुखः, क्षमी, सन्तुष्टः स-ततं योगी, यत-आत्मा, दृढ-निश्चयः, मयि अर्पित-मनस्-बुद्धिः, यः [ईदृक्] मद्-भक्तः, सः मे प्रियः। (**12.13-14**)

[The ज्ञानिन्] who is not displeased toward any being, is friendly and compassionate, free from the judgment "this is mine," free from the judgment that "I [am only this body-mind]," the same in pleasure or pain [i.e., not elated nor saddened], accommodative [i.e., patient and understanding], always contented and contemplative, disciplined, of firm resolve, with mind and intellect resolved in Me, who is [in this way] devoted to Me—that one—is dear to Me [i.e., as dear as Myself; because that one is Myself, and that one knows this fact].

| | | | |
|---|---|---|---|
| 2 | सर्व-भूतानाम् | towards any being | fr. सर्व-भूत *n. pl. gen.* (**7.12:**) |
| 1 | अ-द्वेष्टा | [the ज्ञानिन्] who is not displeased | fr. अद्वेष्टृ *a. m. sg. nom.* (**3.38:**) |
| 3 | मैत्रः | is friendly | fr. मैत्र *a. m. sg. nom.* |
| 4 | करुणः एव च | and compassionate | fr. करुण *a. m. sg. nom.*; एव *in.* (**6.19:**); च *in.* |
| 5 | निर्-ममः | free from the judgment "this is mine" | fr. निस्-मम *a. m. sg. nom.* (**2.29:**) |
| 6 | निर्-अहङ्-कारः | free from the judgment "I [am only this body-mind]" | fr. निस्-अहम्-कार *a. m. sg. nom.* (**2.29:** & **.55:**) |
| 7 | सम-दुख-सुखः | the same in pleasure or pain [i.e., not elated nor saddened] | fr. सम-दुःख-सुख *a. m. sg. nom.* |
| 8 | क्षमी | accommodative [i.e., patient and understanding] | fr. क्षमिन् *a. m. sg. nom.* (**3.15:**) |
| 9 | सन्तुष्टः स-ततं | always contented | fr. सन्तुष्ट *pp. of* सम् + √तुष् *a. m. sg. nom.* (**2.88:** & **.55:**); स-ततम् *in.* (**7.8.8:**) |
| 10 | योगी | [and] contemplative | fr. योगिन् *a. m. sg. nom.* (**3.15:**) |

| | | | |
|---|---|---|---|
| 11 | यत-आत्मा | disciplined | fr. यत-आत्मन् *a. m. sg. nom.* (**3.22:**) |
| 12 | दृढ-निश्चयः | of firm resolve | fr. दृढ-निश्चय *a. m. sg. nom.* |
| 15 | मयि | in Me | fr. अहम् *prn. sg. loc.* |
| 14 | अर्पित- | resolved | |
| 13 | -मनस्-बुद्धिः | with mind and intellect | fr. अर्पित-मनस्-बुद्धि *a. m. sg. nom.* (**2.24: & .33:**) |
| 16 | यः [ईदृक्] | who is [in this way] | fr. यद् *prn. m. sg. nom.* |
| 17 | मद्-भक्तः | devoted to Me | fr. मद्-भक्त *a. m. sg. nom.* (**2.24:** & **.43:**) |
| 18 | सः | that one [is] | fr. तद् *prn. m. sg. nom.* |
| 19 | मे प्रियः | dear to Me | fr. अहम् *prn. sg. gen.* (**7.12.2.b:**); प्रिय *a. m. sg. nom.* |

**यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः। हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः॥१५॥**

(यस्मात् न उद्विजते लोकः, लोकात् न उद्विजते च यः। हर्षामर्षभयोद्वेगैः, मुक्तः यः सः च मे प्रियः॥)

यस्मात् लोकः न उद्विजते, यः च लोकात् न उद्विजते, यः च हर्ष-अमर्ष-भय-उद्वेगैः मुक्तः, सः मे प्रियः। (**12.15**)

Of whom the world [i.e., living beings and the environment] is not afraid [or need not protect itself against] and who is not afraid of the world, and the one who is freed from elation, intolerance, fear, and anxiety—that one is dear to Me.

| | | | |
|---|---|---|---|
| 1 | यस्मात् | from [i.e., of] whom | fr. यद् *m. sg. abl.* (**7.11:**) |
| 2 | लोकः | the world [i.e., living beings, and the environment] | fr. लोक *m. sg. nom.* |
| 3 | न उद्विजते | is not afraid [or need not protect itself against] | fr. न *in.*; उद् + √विज् *6.Ā. pr. 3rd sg.* |
| 4 | यः च | and who | fr. यद् *prn. m. sg. nom.*; च *in.* |
| 6 | लोकात् | of the world | fr. लोक *m. sg. abl.* |
| 5 | न उद्विजते | is not afraid | fr. न *in.*; उद् + √विज् *6.Ā. pr. 3rd sg.* |
| 7 | यः च | and the one who | fr. यद् *prn. m. sg. nom.*; च *in.* |
| 9 | हर्ष- | from elation | |
| 10 | -अमर्ष- | intolerance | |
| 11 | -भय- | fear | |
| 12 | -उद्वेगैः | and anxiety | fr. हर्ष-अमर्ष-भय-उद्वेग *m. pl. inst.* |
| 8 | मुक्तः | is freed | fr. मुक्त *pp. of* √मुच् *a. m. sg. nom.* (**2.80:**) |
| 13 | सः | that one [is] | fr. तद् *prn. m. sg. nom.* |
| 14 | मे प्रियः | dear to Me | fr. अहम् *prn. sg. gen.* (**7.12.2.b:**); प्रिय *a. m. sg. nom.* |

**अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः। सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः॥१६॥**

(अनपेक्षः शुचिः दक्षः, उदासीनः गतव्यथः। सर्वारम्भपरित्यागी, यः मद्भक्तः सः मे प्रियः॥)

अन्-अपेक्षः, शुचिः, दक्षः, उदासीनः, गत-व्यथः, सर्व-आरम्भ-परित्यागी, यः [ईदृक्] मद्-भक्तः, सः मे प्रियः। (**12.16**)

Without dependence [on anything for happiness], clean [externally and mentally], adept [i.e., wise in all situations], neutral, not shaken with fear, completely renounced all [doership in] activities—who is [in this way] devoted to Me, that one is dear to Me.

| | | | |
|---|---|---|---|
| 1 | अन्-अपेक्षः | without dependence [on anything for happiness] | fr. अनपेक्ष *a. m. sg. nom.* |
| 2 | शुचिः | clean [externally and mentally] | fr. शुचि *a. m. sg. nom.* |
| 3 | दक्षः | adept [i.e., wise in all situations] | fr. दक्ष *a. m. sg. nom.* |
| 4 | उदासीनः | neutral | fr. उदासीन *pr. mid. pt. of* उद् + √आस् *a. m. sg. nom.* (**6.5:** *irreg.*) |
| 5 | गत-व्यथः | not shaken with fear | fr. गत-व्यथ *a. m. sg. nom.* |
| 7 | सर्व-आरम्भ- | all [doership in] activities | |
| 6 | -परित्यागी | completely renounced | fr. सर्व-आरम्भ-परित्यागिन् *a. m. sg. nom.* (**3.15:**) |
| 8 | यः [ईदृक्] | who is [in this way] | fr. यद् *prn. m. sg. nom.* |
| 9 | मद्-भक्तः | devoted to Me | fr. मद्-भक्त *a. m. sg. nom.* (**2.24:** & **.43:**) |
| 10 | सः | that one [is] | fr. तद् *prn. n. sg. nom.* |
| 11 | मे प्रियः | dear to Me | fr. अहम् *prn. sg. gen.* (**7.12.2.b:**); प्रिय *a. m. sg. nom.* |

**यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति। शुभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः॥१७॥**

(यः न हृष्यति न द्वेष्टि, न शोचति न काङ्क्षति। शुभाशुभपरित्यागी, भक्तिमान् यः सः मे प्रियः॥)

यः न हृष्यति, न द्वेष्टि, न शोचति, न काङ्क्षति, शुभ-अ-शुभ-परित्यागी, यः [ईदृक्] भक्तिमान्, सः मे प्रियः। (**12.17**)

Does not become elated, does not become displeased, does not grieve, does not require/anticipate, who [naturally and] completely renounces [the status of being the doer and experiencer in] pleasant and unpleasant activity—who [thus] has devotion, that one is dear to Me.

| | | | |
|---|---|---|---|
| 1 | यः | [who] | fr. यद् *prn. m. sg. nom.* |
| 2 | न हृष्यति | does not get elated | fr. न *in.*; √हृष् *4.Ā. pr. 3rd sg.* |
| 3 | न द्वेष्टि | does not become displeased | fr. न *in.*; √द्विष् *2.P. pr. 3rd sg.* (**2.88:**) |
| 4 | न शोचति | does not grieve | fr. न *in.*; √शुच् *1.P. pr. 3rd sg.* |
| 5 | न काङ्क्षति | does not require/anticipate | fr. न *in.*; √काङ्क्ष् *1.P. pr. 3rd sg.* |
| 7 | शुभ-अ-शुभ- | [the status of being the doer and experiencer in] pleasant and unpleasant activity | |
| 6 | -परित्यागी | who [naturally and] completely renounces | fr. शुभ-अशुभ-परित्यागिन् *a. m. sg. nom.* (**3.15:**) |

| | | | |
|---|---|---|---|
| 8 | यः [ईदृक्] | who [thus] | fr. यद् *prn. m. sg. nom.* |
| 9 | भक्तिमान् | has devotion | fr. भक्तिमत् *a. m. sg. nom.* (**3.13.a:**) |
| 10 | सः | that one [is] | fr. तद् *prn. m. sg. nom.* |
| 11 | मे प्रियः | dear to Me | fr. अहम् *prn. sg. gen.* (**7.12.2.b:**); प्रिय *a. m. sg. nom.* |

**समः शत्रौ च मित्रे च तथा मानापमानयोः। शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः॥१८॥**
**तुल्यनिन्दास्तुतिर्मौनी सन्तुष्टो येन केनचित्। अनिकेतः स्थिरमतिर्भक्तिमान्मे प्रियो नरः॥१९॥**

(समः शत्रौ च मित्रे च, तथा मानापमानयोः। शीतोष्णसुखदुःखेषु, समः सङ्गविवर्जितः॥
तुल्यनिन्दास्तुतिः मौनी, सन्तुष्टः येन केनचिद्। अनिकेतः स्थिरमतिः, भक्तिमान् मे प्रियः नरः॥)

[यः] शत्रौ च मित्रे च तथा मान-अपमानयोः समः, शीत-उष्ण-सुख-दुःखेषु समः, सङ्ग-विवर्जितः, तुल्य-निन्दा-स्तुतिः, मौनी, येन केन-चिद् सन्तुष्टः, अ-निकेतः, स्थिर-मतिः, [ईदृक्] भक्तिमान्, [सः] नरः मे प्रियः। (**12.18-19**)

The same toward [another who takes himself or herself as] an enemy or a friend and toward respect or disrespect; the same toward [the opposites] cold and hot, pleasure and pain; free from attachment, for whom censure and praise are alike [addressing only this body or mind, but not one's self]; disciplined in speech; satisfied with whatever [happens]; homeless [i.e., a सन्न्यासिन् or one who has no ownership toward a house he or she may own]; whose knowledge is firm—who [in this way] has devotion, [that] person is dear to Me.

| | | | |
|---|---|---|---|
| 1 | [यः] | [the one who] [is] | |
| 3 | शत्रौ च | towards [another who takes himself or herself as] an enemy | fr. शत्रु *m. sg. loc.* (**7.13.2.c:**); च *in.* |
| 4 | मित्रे च | or a friend | fr. मित्र *m. sg. loc.* (**7.13.2.c:**); च *in.* |
| 5 | तथा | and | fr. तथा *in.* (**6.19:**) |
| 6 | मान- | towards respect | |
| 7 | -अपमानयोः | or disrespect | fr. मान-अपमान *m. du. loc.* (**7.13.1.h:**) |
| 2 | समः | the same | fr. सम *a. m. sg. nom.* |
| 9 | शीत-उष्ण- | towards [the opposites] cold and hot | |
| 10 | -सुख-दुःखेषु | pleasure and pain | fr. शीत-उष्ण-सुख-दुःख *n. pl. loc.* (**7.13.1.h:**) |
| 8 | समः | the same | fr. सम *a. m. sg. nom.* |
| 11 | सङ्ग-विवर्जितः | free from attachment | fr. सङ्ग-विवर्जित *a. m. sg. nom.* |
| 13 | तुल्य- | are alike [addressing only this body or mind, but not one's self] | |
| 12 | -निन्दा-स्तुतिः | for whom censure and praise | fr. तुल्य-निन्दा-स्तुति *a. m. sg. nom.* |

| | | | |
|---|---|---|---|
| 14 | मौनी | disciplined in speech | fr. मौनिन् *a. m. sg. nom.* (**3.15:**) |
| 16 | येन केन-चिद् | with whatever [happens] | fr. यद् *prn. n. sg. inst.*; क-चिद् *prn. cmpd. n. sg. inst.* (**4.20:**) |
| 15 | सन्तुष्टः | satisfied | fr. सन्तुष्ट *pp. of* सम् + √तुष् *a. m. sg. nom.* (**2.88:** & **.55:**) |
| 17 | अ-निकेतः | homeless [i.e., a **सन्न्यासिन्** or who has no ownership towards a house he or she may own] | fr. अनिकेत *a. m. sg. nom.* |
| 18 | स्थिर-मतिः | whose knowledge is firm | fr. स्थिर-मति *a. m. sg. nom.* |
| 19 | [ईदृक्] भक्तिमान् | who [in this way] has devotion | fr. भक्तिमत् *a. m. sg. nom.* (**3.13.a:**) |
| 20 | [सः] नरः | [that] person [is] | fr. नर *m. sg. nom.* |
| 21 | मे प्रियः | dear to Me | fr. अहम् *prn. sg. gen.* (**7.12.2.b:**); प्रिय *a. m. sg. nom.* |

**ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते। श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः॥२०॥**

(ये तु धर्म्यामृतम् इदं, यथोक्तं पर्युपासते। श्रद्दधानाः मत्परमाः, भक्ताः ते अतीव मे प्रियाः॥)

ये तु यथा-उक्तम् इदं धर्म्य-अ-मृतं पर्युपासते, श्रद्-दधानाः, मत्-परमाः, [ईदृशः] भक्ताः ते मे अतीव प्रियाः। (**12.20**)

Those indeed who follow this, as was told, that is in keeping with धर्म and [is an expression of and therefore leading to] complete freedom, who are endowed with trust [in My teaching], for whom I am paramount—such devotees as those are very dear to Me.

| | | | |
|---|---|---|---|
| 1 | ये तु | those indeed who | fr. यद् *prn. m. pl. nom.*; तु *in.* |
| 4 | यथा-उक्तम् | as was told | fr. यथा-उक्तम् *in.* |
| 3 | इदं | this | fr. इदम् *prn. n. sg. acc.* |
| 5 | धर्म्य- | that is in keeping with धर्म | |
| 6 | -अ-मृतं | and [is an expression of and therefore leading to] complete freedom | fr. धर्म्य-अमृत *a. n. sg. acc.* |
| 2 | पर्युपासते | follow | fr. परि + उप + √आस् *2.Ā. pr. 3rd pl.* (**5.6.b:**) |
| 7 | श्रद्-दधानाः | who are endowed with trust [in My teaching] | fr. श्रद्-दधान *pr. mid. pt. of* श्रद् *in.* + √धा *a. m. sg. nom.* (**6.5:**, **5.8.2:**, **5.20.2:**, **6.13:**, **2.24:** & **2.43:**) |
| 8 | मत्-परमाः | for whom I am paramount | fr. मद्-परम *a. m. pl. nom.* (**2.24:**) |
| 9 | [ईदृशः] भक्ताः | such devotees | fr. भक्त *pp. of* √भज् *m. pl. nom.* (**2.81:**) |
| 10 | ते | [as] those [are] | fr. तद् *prn. m. pl. nom.* |
| 12 | मे | to Me | fr. अहम् *prn. sg. gen.* (**7.12.2.b:**) |
| 11 | अतीव प्रियाः | very dear | fr. अतीव *in.*; प्रिय *a. m. sg. nom.* |

**ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे भक्तियोगो नाम द्वादशोऽध्यायः॥१२॥**

(ओं तद् सत्। इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे भक्तियोगः नाम द्वादशः अध्यायः॥)

ओं तद् सत्। इति श्रीमद्-भगवद्-गीतासु उपनिषत्सु ब्रह्म-विद्यायां योग-शास्त्रे श्री-कृष्ण-अर्जुन-संवादे भक्ति-योगः नाम द्वा-दशः अध्यायः। (**12**)

ओं (ब्रह्मन्, the witness of all) is that [only] reality. Thus ends the twelfth chapter, called "The Topic of Devotion," of the [eighteen chapters of] *Songs of the Glorious Lord*, which is [looked upon as] उपनिषद् [and whose teaching is] in [the form of] a dialogue between श्री कृष्ण and अर्जुन, [the subject matter being] a knowledge of ब्रह्मन् and योग.

| | | | |
|---|---|---|---|
| 1 | ओं | ओम् (ब्रह्मन्, the witness of all,) | fr. ओम् *in.* |
| 2 | तद् सत् | [is] that [only] reality | fr. तद् *prn. n. sg. nom.*; सत् *n. sg. nom.* |
| 3 | इति | (quote-end quote), thus ends | fr. इति *in.* |
| 10 | श्रीमद्- | of the venerable, the glorious | |
| 11 | -भगवद्- | one having [limitless] glories, Lord | |
| 9 | -गीतासु | in [i.e., of] songs | fr. श्रीमत्-भगवत्-गीता *f. pl. loc.* (**2.43:**) |
| 12 | उपनिषत्सु | [which are/is looked upon as] उपनिषद्, sacred scripture | fr. उपनिषद् *f. pl. loc.* (**6.24:**) |
| 17 | ब्रह्म- | of ब्रह्मन् (reality/सत्) | |
| 16 | -विद्यायां | [and] a knowledge | fr. ब्रह्म-विद्या *f. sg. loc.* |
| 18 | योग-शास्त्रे | [and instruction of] योग (means, discipline, etc.) | fr. योग-शास्त्र *n. sg. loc.* |
| 14 | श्री-कृष्ण- | between Lord कृष्ण | |
| 15 | -अर्जुन- | and अर्जुन | |
| 13 | -संवादे | in [the form of] a dialogue | fr. श्री-कृष्ण-अर्जुन-संवाद *n. sg. loc.* |
| 8 | भक्ति- | of devotion | |
| 7 | -योगः | the topic | fr. भक्ति-योग *a. m. sg. nom.* |
| 6 | नाम | by the name, called | fr. नाम *in.* |
| 4 | द्वा-दशः | the twelfth | fr. द्वा-दश *ordinal a. m. sg. nom.* |
| 5 | अध्यायः | chapter | fr. अध्याय *m. sg. nom.* |

# ओम् अथ त्रयोदशोऽध्यायः

**अर्जुन उवाच।**

**प्रकृतिं पुरुषं चैव क्षेत्रं क्षेत्रज्ञमेव च। एतद्वेदितुमिच्छामि ज्ञानं ज्ञेयं च केशव॥**

(अर्जुनः उवाच। प्रकृतिं पुरुषं च एव, क्षेत्रं क्षेत्रज्ञम् एव च। एतद् वेदितुम् इच्छामि, ज्ञानं ज्ञेयं च केशव॥)

अर्जुनः उवाच। प्रकृतिं पुरुषम् एव च, क्षेत्रं क्षेत्र-ज्ञम् एव च, ज्ञानं ज्ञेयं च, एतद् वेदितुम् इच्छामि, केशव।

अर्जुन said: What I wish to know, O कृष्ण, is this: प्रकृति and पुरुष (nature and the one who fills nature), क्षेत्र and क्षेत्रज्ञ (the field and the knower of the field), and ज्ञान and ज्ञेय (knowledge and what is to be known).

| | | | |
|---|---|---|---|
| 1 | अर्जुनः उवाच | अर्जुन said | fr. अर्जुन *m. sg. nom.*; √वच् *P. perf. 3rd sg.* (**5.10.3:**) |
| 6 | प्रकृतिं | प्रकृति (nature) | fr. प्रकृति *f. sg. acc.* (**7.20:**) |
| 7 | पुरुषम् एव च | and पुरुष (the one who fills nature) | fr. पुरुष *m. sg. acc.*; एव *in.* (**6.19:**); च *in.* |
| 8 | क्षेत्रं | क्षेत्र (the field) | fr. क्षेत्र *n. sg. acc.* |
| 9 | क्षेत्र-ज्ञम् एव च | and क्षेत्रज्ञ (the knower of the field) | fr. क्षेत्र-ज्ञ *m. sg. acc.* (**6.24.1:**); एव *in.* (**6.19:**); च *in.* |
| 10 | ज्ञानं | ज्ञान (knowledge) | fr. ज्ञान *n. sg. acc.* |
| 11 | ज्ञेयं च | and ज्ञेय (what is to be known) | fr. ज्ञेय *pot. ps. pt. of* √ज्ञा *n. sg. acc.* (**6.8:**); च *in.* |
| 5 | एतद् | [is] this | fr. एतद् *prn. n. acc.* |
| 3 | वेदितुम् | to know | fr. वेदितुम् *inf. of* √विद् *in.* (**6.10:**) |
| 2 | इच्छामि | [what] I wish | fr. √इष् *6.P. pr. 1st sg.* (**5.17.3:** & **5.5.a:**) |
| 4 | केशव | (कृष्ण) O Destroyer of the Demon केशिन् | fr. केशव *m. sg. voc.* |

**श्रीभगवानुवाच।**

**इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते। एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः॥१॥**

(श्रीभगवान् उवाच। इदं शरीरं कौन्तेय, क्षेत्रम् इति अभिधीयते। एतद् यः वेत्ति तं प्राहुः, क्षेत्रज्ञः इति तद्विदः॥)

श्री-भगवान् उवाच। कौन्तेय, इदं शरीरं क्षेत्रम् इति अभिधीयते। यः एतद् वेत्ति, तं तद्-विदः क्षेत्र-ज्ञः इति प्राहुः। (**13.1**)

The Lord said: O अर्जुन, this body [where one reaps the fruits—पुण्य and पाप—initially presented as this human body; later to be expanded to the entire body of the universe, to प्रकृति] is called क्षेत्र. Those who know both of these [क्षेत्र and क्षेत्रज्ञ] call the one who knows this [क्षेत्र] as क्षेत्रज्ञ.

| | | | |
|---|---|---|---|
| 1 | श्री-भगवान् उवाच | the Lord said | fr. श्री-भगवत् *m. sg. nom.*; √वच् *P. perf. 3rd sg.* (**5.10.3:**) |
| 2 | कौन्तेय | (अर्जुन) O Son of कुन्ती | fr. कौन्तेय *m. sg. voc.* |
| 3 | इदं शरीरं | this body | fr. इदम् *prn. n. sg. nom.*; शरीर *n. sg. nom.* |
| 5 | क्षेत्रम् | क्षेत्र | fr. क्षेत्र *n. sg. nom.* |
| 4 | इति अभिधीयते | is called | fr. इति *in.*; अभि + √धा *ps. pr. 3rd sg.* (**5.37.1:**) |
| 9 | यः | who | fr. यद् *prn. m. sg. nom.* |
| 10 | एतद् वेत्ति | knows this [क्षेत्र] | fr. एतद् *prn. n. sg. acc.*; √विद् *2.P. pr. 3rd sg.* (**5.3:** & **2.42:**) |
| 8 | तं | the one | fr. तद् *m. sg. acc.* |
| 6 | तद्-विदः | those who know both of these [क्षेत्र and क्षेत्रज्ञ] | fr. तद्-विद् *m. pl. nom.* (**6.24:** & **3.6:**) |
| 11 | क्षेत्र-ज्ञः इति | as क्षेत्रज्ञ | fr. क्षेत्र-ज्ञ *m. sg. nom.* (**6.24.1:**) (**7.7.2:**); इति *in.* |
| 7 | प्राहुः | call | fr. प्र + √अह् *P. perf. 3rd pl.* (**5.8.5:**) |

**क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत। क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम॥२॥**

(क्षेत्रज्ञं च अपि मां विद्धि, सर्वक्षेत्रेषु भारत। क्षेत्रक्षेत्रज्ञयोः ज्ञानं, यद् तद् ज्ञानं मतं मम॥)

सर्व-क्षेत्रेषु अपि च मां क्षेत्र-ज्ञं विद्धि, भारत। यद् क्षेत्र-क्षेत्रज्ञयोः ज्ञानं, तद् ज्ञानं मम मतम्। (**13.2**)

In all the क्षेत्र-s, know Me [who is not subject to संसार] to be the [only] क्षेत्रज्ञ [i.e., know Me, the Lord, as the only I, the only knower], O अर्जुन. Knowledge which is of [this] क्षेत्र and क्षेत्रज्ञ—that [alone] is considered by Me to be ज्ञान [as it alone is final and it alone releases one from संसार].

| | | | |
|---|---|---|---|
| 1 | सर्व-क्षेत्रेषु अपि च | in all the क्षेत्र-s | fr. सर्व-क्षेत्र *n. pl. loc.*; अपि *in.*; च *in.* |
| 3 | मां | Me [who is not subject to संसार] | fr. अहम् *prn. sg. acc.*. |
| 4 | क्षेत्र-ज्ञं | to be the [only] क्षेत्रज्ञ | fr. क्षेत्र-ज्ञ *m. sg. acc.* (**6.24.1:**) |
| 2 | विद्धि | know | fr. √विद् *2.P. impv. 2nd sg.* (**5.6.a:**) |
| 5 | भारत | (अर्जुन) O Descendant of Emperor भरत, (Brilliant) Son of India | fr. भारत *m. sg. voc.* |

| | | | |
|---|---|---|---|
| 7 | यद् | which [is] | fr. यद् *prn. n. sg. nom.* |
| 8 | क्षेत्र-क्षेत्रज्ञयोः | of [this] क्षेत्र and क्षेत्रज्ञ | fr. क्षेत्र-क्षेत्रज्ञ *m. du. gen.* |
| 6 | ज्ञानं | knowledge | fr. ज्ञान *n. sg. nom.* |
| 9 | तद् | that [alone] | fr. तद् *prn. n. sg. nom.* |
| 12 | ज्ञानं | [to be] ज्ञान [as it alone is final and it releases one from संसार] | fr. ज्ञान *n. sg. nom.* |
| 11 | मम | by Me | fr. अहम् *prn. sg. gen.* (**7.12.3.a:**) |
| 10 | मतम् | is considered | fr. मत *pp. of* √मन् *pt. n. sg. nom.* (**6.6:**) |

**तत्क्षेत्रं यच्च यादृक्च यद्विकारि यतश्च यत्। स च यो यत्प्रभावश्च तत्समासेन मे शृणु॥ ३॥**

(तद् क्षेत्रं यद् च यादृक् च, यद्विकारि यतः च यद्। सः च यः यत्प्रभावः च, तद् समासेन मे शृणु॥)

यद् तद् क्षेत्रं, यादृक् च, यद्-विकारि च, यतः च यद्, यः च सः, यत्-प्रभावः च — तद् समासेन मे शृणु। (**13.3**)

What is that क्षेत्र? [What is] its appearance, having which modifications? From what [source] [does] it [arise]? And what is that [source, the क्षेत्रज्ञ, which is Me] and what glories is [that source] having? About that, in brief, listen to Me.

| | | | |
|---|---|---|---|
| 1 | यद् तद् | what is that | fr. यद् *prn. n. sg. nom.*; तद् *prn. n. sg. nom.* |
| 2 | क्षेत्रं | क्षेत्र | fr. क्षेत्र *n. sg. nom.* |
| 3 | यादृक् च | [what is] its appearance | fr. यादृश् *a. n. sg. nom.* (**4.17.1:** & **6.24:** & **3.6:**); च *in.* |
| 4 | यद्-विकारि च | having which modifications | fr. यद्-विकारिन् *a. n. sg. nom.* (**3.15:**); च *in.* |
| 5 | यतः च यद् | from what [source] [does] it [arise] | fr. यतस् *in.* (**6.19:**); च *in.*; यद् *prn. n. sg. nom.* |
| 6 | यः च | and what | fr. यद् *prn. m. sg. nom.*; च *in.* |
| 7 | सः | is that [source, the क्षेत्रज्ञ, which is Me] | fr. तद् *prn. m. sg. nom.* |
| 8 | यत्-प्रभावः च | and what glories is [that source] having | fr. यद्-प्रभाव *m. sg. nom.* (**2.24:**); च *in.* |
| 9 | तद् समासेन | [about] that in brief | fr. तद् *prn. n. sg. acc.*; समासेन *in.* (**7.9.14:**) |
| 11 | मे | to Me | fr. अहम् *prn. sg. dat.* (**7.10.A.1:**) |
| 10 | शृणु | listen | fr. √श्रु *5.P. impv.* $2^{nd}$ *sg.* (**5.21.3:**) |

**ऋषिभिर्बहुधा गीतं छन्दोभिर्विविधैः पृथक्। ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः॥४॥**

(ऋषिभिः बहुधा गीतं, छन्दोभिः विविधैः पृथक्। ब्रह्मसूत्रपदैः च एव, हेतुमद्भिः विनिश्चितैः॥)

ऋषिभिः विविधैः छन्दोभिः, विनिश्चितैः हेतुमद्भिः ब्रह्म-सूत्र-पदैः एव च बहुधा पृथक् गीतम्। (**13.4**)

[Each, the क्षेत्र and its source] has been sung as distinct [from each other] in many ways by the seers/sages—through various verses and through concise statements that reveal ब्रह्मन् (reality) with [supporting] logic and which are well ascertained [i.e., without doubt].

| | | | |
|---|---|---|---|
| 4 | ऋषिभिः | by the seers/sages | fr. ऋषि *m. pl. inst.* |
| 5 | विविधैः | through various | fr. विविध *a. n. pl inst.* |
| 6 | छन्दोभिः | verses | fr. छन्दस् *n. pl. inst.* (**3.6:**) |
| 11 | विनिश्चितैः | and which are well ascertained [i.e., without doubt] | fr. विनिश्चित *pp. of* वि + निस् + √चि *a. n. pl. inst.* (**2.24:** & **.27:**) |
| 10 | हेतुमद्भिः | with [supporting] logic | fr. हेतुमत् *a. n. pl. inst.* (**3.13:**) |
| 9 | ब्रह्म- | ब्रह्मन् (reality) | |
| 8 | -सूत्र-पदैः | through concise statements that reveal | fr. ब्रह्म-सूत्र-पद *n. pl. inst.* |
| 7 | एव च | and | fr. एव *in.* (**6.19:**); च *in.* |
| 3 | बहुधा | in many ways | fr. बहुधा *in.* (**6.19:**) |
| 2 | पृथक् | as distinct [from each other] | fr. पृथक् *in.* |
| <u>1</u> | गीतम् | [each, the क्षेत्र and its source] has been sung | fr. गीत *pp. of* √गै *pt. n. sg. nom.* (**5.8.8:** & **6.6:**) |

**महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च। इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचराः॥५॥**

**इच्छा द्वेषः सुखं दुःखं सङ्घातश्चेतना धृतिः। एतत्क्षेत्रं समासेन सविकारमुदाहृतम्॥६॥**

(महाभूतानि अहङ्कारः, बुद्धिः अव्यक्तम् एव च। इन्द्रियाणि दश एकं च, पञ्च च इन्द्रियगोचराः॥
इच्छा द्वेषः सुखं दुःखं, सङ्घातः चेतना धृतिः। एतद् क्षेत्रं समासेन, सविकारम् उदाहृतम्॥)

महा-भूतानि, अहङ्-कारः, बुद्धिः, अ-व्यक्तम् एव च, दश इन्द्रियाणि, एकं च [मनः], पञ्च च इन्द्रिय-गोचराः, इच्छा, द्वेषः, सुखं, दुःखं, सङ्घातः, चेतना, धृतिः — एतद् क्षेत्रं स-विकारं समासेन उदाहृतम्। (**13.5-6**)

The [five distinct] pervasive [i.e., subtle] elements, the अहङ्कार [i.e., the universe's अहङ्कार = Lord ब्रह्मा, the कर्तृ of the universe], the बुद्धि [i.e., the universe's intellect = the सङ्कल्प of the Lord at the time of manifestation, wherein the laws are determined by which everything is manifest], the अव्यक्त (unmanifest cause, ईश्वर-शक्ति/माया) [all the aforementioned constitute प्रकृति], [and then प्रकृति-'s modifications, including] the ten organs, the one [mind, including the intellect], the five [gross] sense objects [i.e., the physical universe], desire, aversion, pleasure, pain, the physical body, cognition, and resolve—[all] this is in brief called the क्षेत्र (field) along with [its] modifications.

| | | | |
|---|---|---|---|
| 1 | महा-भूतानि | the [five distinct] pervasive [i.e., subtle] elements | fr. महा-भूत *n. pl. nom.* |
| 2 | अहङ्-कारः | the अहङ्कार [i.e., the universe's अहङ्कार = Lord ब्रह्मा, the कर्तृ of the universe] | fr. अहम्-कार *m. sg. nom.* (**2.55:**) |
| 3 | बुद्धिः | the बुद्धि [i.e., the universe's intellect = the सङ्कल्प of the Lord at the time of manifestation, wherein the laws are determined by which everything is manifest] | fr. बुद्धि *f. sg. nom.* |
| 4 | अ-व्यक्तम् एव च | the अव्यक्त (unmanifest cause, ईश्वर-शक्ति/माया) | fr. अव्यक्त *pp. of* वि + √अञ्ज् *n. sg. nom.* (**6.6:** & **2.81:**); एव *in.* (**6.19:**); च *in.* |
| 5 | दश इन्द्रियाणि | [and then] the ten organs | fr. दशन् *num. a. n. pl.* (**4.25:**); इन्द्रिय *n. pl. nom.* |
| 6 | एकं च [मनः] | the one [mind, including the intellect] | fr. एक *num. a. n. sg. nom.* (**4.23.a:**); च *in.* |
| 7 | पञ्च च | the five | fr. पञ्चन् *num. a. n. pl. nom.* (**4.25:**); च *in.* |
| 8 | इन्द्रिय-गोचराः | [gross] sense objects [i.e., the physical universe] | fr. इन्द्रिय-गोचर *m. pl. nom.* |
| 9 | इच्छा | desire | fr. इच्छा *f. sg. nom.* |
| 10 | द्वेषः | aversion | fr. द्वेष *m. sg. nom.* |
| 11 | सुखं | pleasure | fr. सुख *n. sg. nom.* |
| 12 | दुःखं | pain | fr. दुःख *n. sg. nom.* |
| 13 | सङ्घातः | the physical body | fr. सङ्घात *m. sg. nom.* |
| 14 | चेतना | cognition | fr. चेतना *f. sg. nom.* |
| 15 | धृतिः | [and] resolve | fr. धृति *f. sg. nom.* |
| 16 | एतद् | [all] this | fr. एतद् *prn. n. sg. nom.* (**7.5.2.a:**) |
| 19 | क्षेत्रं | the क्षेत्र (the field) | fr. क्षेत्र *n. sg. nom.* (**7.7.1:**) |
| 20 | स-विकारं | along with [its] modifications | fr. सविकार *a. n. sg. nom.* |
| 17 | समासेन | in brief | fr. समासेन *in.* (**6.19:**) |
| 18 | उदाहृतम् | is called | fr. उदाहृत *pp. of* उद् + आ + √हृ *pt. n. sg. nom.* |

**अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवम्। आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः॥७॥**
**इन्द्रियार्थेषु वैराग्यमनहङ्कार एव च। जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम्॥८॥**
(अमानित्वम् अदम्भित्वम्, अहिंसा क्षान्तिः आर्जवम्। आचार्योपासनं शौचं, स्थैर्यम् आत्मविनिग्रहः॥
इन्द्रियार्थेषु वैराग्यम्, अनहङ्कारः एव च। जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम्॥)

[यद् ज्ञानम् इति—] अ-मानित्वम्, अ-दम्भित्वम्, अ-हिंसा, क्षान्तिः, आर्जवम्, आचार्य-उपासनं, शौचं, स्थैर्यम्, आत्म-विनिग्रहः, इन्द्रिय-अर्थेषु वैराग्यम्, अन्-अहङ्-कारः एव च, जन्म-मृत्यु-जरा-व्याधि-दुःख-दोष-अनुदर्शनम्। (**13.7-8**)

[What also is ज्ञान is] absence of conceit [i.e., not demanding that others know one's virtues]; absence of hypocrisy [i.e., not demanding that others recognize virtues that one does not have]; harmlessness; accommodation [i.e., patience and understanding]; straightforwardness; reverence for [and attendance to] the teacher; cleanliness; steadfastness; self-discipline; dispassion toward sense objects; absence of arrogance [i.e., not presenting oneself in the reflection of some glory in one's possession]; and seeing the problem of sorrow [i.e., guilt and hurt] in birth, death, ageing, and diseases.

| | | | |
|---|---|---|---|
| 1 | [यद् ज्ञानम् इति—] | [what also is ज्ञान is] | |
| 2 | अ-मानित्वम् | absence of conceit [i.e., not demanding that others know one's virtues] | fr. अमानित्व *n. sg. nom.* |
| 3 | अ-दम्भित्वम् | absence of hypocrisy [i.e., not demanding that others know my virtues that I do not have] | fr. अदम्भित्व *n. sg. nom.* |
| 4 | अ-हिंसा | harmlessness | fr. अहिंसा *f. sg. nom.* |
| 5 | क्षान्तिः | accommodation [i.e., patience and understanding] | fr. क्षान्ति *f. sg. nom.* |
| 6 | आर्जवम् | straightforwardness | fr. आर्जव *n. sg. nom.* |
| 8 | आचार्य- | the teacher | |
| 7 | -उपासनं | reverence for [and attendance to] | fr. आचार्य-उपासन *n. sg. nom.* |
| 9 | शौचं | cleanliness | fr. शौच *n. sg. nom.* |
| 10 | स्थैर्यम् | steadfastness | fr. स्थैर्य *n. sg. nom.* |
| 11 | आत्म- | self- | |
| 12 | -विनिग्रहः | -discipline | fr. आत्म-विनिग्रह *m. sg. nom.* |
| 14 | इन्द्रिय-अर्थेषु | towards sense objects | fr. इन्द्रिय-अर्थ *m. pl. loc.* |
| 13 | वैराग्यम् | dispassion | fr. वैराग्य *n. sg. nom.* |
| 15 | अन्-अहङ्-कारः | absence of arrogance [i.e., not presenting oneself in the reflection of some glory in one's possession] | fr. अन्-अहम्-कार *m. sg. nom.* (**2.55:**) |
| 16 | एव च | and | fr. एव *in.* (**6.19:**); च *in.* |

| | | |
|---|---|---|
| 20 जन्म-मृत्यु- | in birth death | |
| 21 -जरा-व्याधि- | ageing and diseases | |
| 19 -दुःख- | of sorrow [i.e., guilt and hurt] | |
| 18 -दोष- | the problem | |
| 17 -अनुदर्शनम् | seeing | fr. जन्म-मृत्यु-जरा-व्याधि-दुःख-दोष-अनुदर्शन *n. sg. nom.* |

**असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु। नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु॥९॥**
**मयि चानन्ययोगेन भक्तिरव्यभिचारिणी। विविक्तदेशसेवित्वमरतिर्जनसंसदि॥१०॥**
**अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम्। एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा॥११॥**

(असक्तिः अनभिष्वङ्गः, पुत्रदारगृहादिषु। नित्यं च समचित्तत्वम्, इष्टानिष्टोपपत्तिषु॥
मयि च अनन्ययोगेन, भक्तिः अव्यभिचारिणी। विविक्तदेशसेवित्वम्, अरतिः जनसंसदि॥
अध्यात्मज्ञाननित्यत्वं, तत्त्वज्ञानार्थदर्शनम्। एतद् ज्ञानम् इति प्रोक्तम्, अज्ञानं यद् अतः अन्यथा॥)

[किं च] अ-सक्तिः, पुत्र-दार-गृह-आदिषु अन्-अभिष्वङ्गः, इष्ट-अन्-इष्ट-उपपत्तिषु च नित्यं सम-चित्तत्वं, मयि अन्-अन्य-योगेन च अ-व्यभिचारिणी भक्तिः, विविक्त-देश-सेवित्वं, जन-संसदि अ-रतिः, अध्यात्म-ज्ञान-नित्यत्वं, तत्त्व-ज्ञान-अर्थ-दर्शनम् — एतद् ज्ञानम् इति प्रोक्तं, यद् अतः अन्यथा अ-ज्ञानम्। (**13.9-11**) [Also] absence of ownership; lack of identification toward son [i.e., offspring], wife [i.e., spouse], house, etc.; continual equanimity of mind toward occurrences of the desirable and the undesirable; unswerving devotion in Me through a योग (vision of identity, समाधि) in which there is no other; the disposition to [or a value to] repair to a quiet place [where I do not have to fear, do not feel I have to change, and do not have to escape from]; not longing for the company of people [i.e., not needing to escape from myself through others]; being always centered on the knowledge of the I; and seeing the goal of the knowledge of truth [that goal being complete freedom]—[all] this is [also] called ज्ञान [an expression of knowledge and, thus, a means of gaining knowledge]. What is other than this is an obstacle to knowledge.

| | | |
|---|---|---|
| 1 [किं च] अ-सक्तिः | [also] absence of ownership | fr. असक्त *pp. of* √सञ्ज् *m. sg. nom.* (**6.6:** & **2.81:**) |
| 3 पुत्र- | towards son [i.e., offspring] | |
| 4 -दार- | wife [i.e., spouse] | |
| 5 -गृह-आदिषु | house etc. | fr. पुत्र-दार-गृह-आदि *a. n. pl. loc.* |
| 2 अन्-अभिष्वङ्गः | lack of identification | fr. अनभिष्वङ्ग *m. sg. nom.* |
| 9 इष्ट-अन्-इष्ट- | of the desirable and the undesirable | |
| 8 -उपपत्तिषु च | towards occurrences | fr. इष्ट-अनिष्ट-उपपत्ति *f. pl. nom.*; च *in.* |
| 6 नित्यं | continual | fr. नित्यम् *in.* (**7.8.8:**) |
| 7 सम-चित्तत्वं | equanimity of mind | fr. सम-चित्तत्व *n. sg. nom.* |

| | | | |
|---|---|---|---|
| 12 | मयि | in Me | fr. अहम् *prn. sg. loc.* |
| 13 | अन्-अन्य-योगेन च | through a योग (vision of identity, समाधि) in which there is no other | fr. अनन्य-योग *m. sg. nom.*; च *in.* |
| 10 | अ-व्यभिचारिणी | unswerving | fr. अव्यभिचारिणी *a. f. sg. nom.* (**3.15:** & **3.9:** & **2.92:**) |
| 11 | भक्तिः | devotion | fr. भक्ति *f. sg. nom.* |
| 15 | विविक्त- | to a quiet | |
| 16 | -देश- | place | |
| 14 | -सेवित्वं | the disposition to [or a value to] repair | fr. विविक्त-देश-सेवित्व *n. sg. nom.* |
| 18 | जन-संसदि | for the company of people [i.e., not needing to escape from myself through others] | fr. जन-संसद् *f. sg. loc.* (**6.24:** & **3.6:**) |
| 17 | अ-रतिः | not longing | fr. अरति *f. sg. nom.* |
| 20 | अध्यात्म-ज्ञान- | centered on the knowledge of the I | |
| 19 | -नित्यत्वं | being always | fr. अध्यात्म-ज्ञान-नित्यत्व *n. sg. nom.* |
| 22 | तत्त्व-ज्ञान- | of the knowledge of truth [that goal being complete freedom] | |
| 21 | -अर्थ-दर्शनम् | [and] seeing the goal | fr. तत्त्व-ज्ञान-अर्थ-दर्शन *n. sg. nom.* |
| 23 | एतद् | [all] this | fr. एतद् *prn. n. sg. nom.* |
| 25 | ज्ञानम् | ज्ञान [an expression of knowledge and, thus, a means of gaining knowledge] | fr. ज्ञान *n. sg. nom.* |
| 24 | इति प्रोक्तं | is [also] called | fr. इति *in.*; प्रोक्त *pp. of* प्र + √वच् *pt. n. sg. nom.* (**6.6:** & **2.3.a:** & **2.80:**) |
| 26 | यद् | what [is] | fr. यद् *prn. n. sg. nom.* |
| 27 | अतः अन्यथा | other than this | fr. अतस् *in.* (**6.19:**); अन्यथा *in.* (**6.19:**) |
| 28 | अ-ज्ञानम् | [is] an obstacle to knowledge | fr. अज्ञान *n. sg. nom.* |

**ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वामृतमश्नुते। अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते॥१२॥**

(ज्ञेयं यद् तद् प्रवक्ष्यामि, यद् ज्ञात्वा अमृतम् अश्नुते। अनादिमत् परं ब्रह्म, न सत् तद् न असत् उच्यते॥)

यद् ज्ञेयं तद् प्रवक्ष्यामि। यद् ज्ञात्वा अ-मृतम् अश्नुते, तद् अन्-आदिमत् परं ब्रह्म, न सत् न अ-सत् उच्यते। (**13.12**)

What is ज्ञेय (to be known), that I will [now] tell [you]. Knowing which one gains immortality [called मोक्ष (the reason it's to be known)]—that [ज्ञेय] is beginningless and limitless ब्रह्मन् (reality, My nature), said to be neither [an object] that *is*, nor *is not*.

| | | | |
|---|---|---|---|
| 1 | यद् ज्ञेयं | what is ज्ञेय (to be known) | fr. यद् *prn. n. sg. nom.*; ज्ञेय *pp. of* √ज्ञा *n. sg. nom.* (**6.8:**) |
| 2 | तद् प्रवक्ष्यामि | that I will [now] tell [you] | fr. तद् *prn. n. sg. acc.*; प्र + √वच् *P. fut. 1st sg.* (**2.80:** & **5.5.a:**) |
| 3 | यद् ज्ञात्वा | knowing which | fr. यद् *prn. n. sg. acc.*; ज्ञात्वा *in. pt. of* √ज्ञा |
| 5 | अ-मृतम् | immortality [called मोक्ष (the reason it's to be known)] | fr. अमृत *pp. of* √मृ *n. sg. acc.* |
| 4 | अश्नुते | one gains | fr. √अश् *5.Ā. pr. 3rd sg.* |
| 6 | तद् | that [ज्ञेय] [is] | fr. तद् *prn. n. sg. nom.* |
| 7 | अन्-आदिमत् | beginningless | fr. अनादिमत् *a. n. sg. nom.* (**3.13:**) |
| 8 | परं ब्रह्म | [and] limitless ब्रह्मन् (reality, My nature) | fr. पर *prn. a. n. sg. nom.* (**4.16.3:**); ब्रह्मन् *n. sg. nom.* (**3.22:**) |
| 10 | न सत् | neither [an object] that *is* | fr. न *in.*; सत् *pr. pt. of* √अस् *n. sg. nom.* (**6.4:** & **5.19.4:** & **3.12:**) |
| 11 | न अ-सत् | nor *is not* | fr. न *in.*; असत् *pr. pt. of* √अस् *n. sg. nom.* (**6.4:** & **5.19.4:** & **3.12:**) |
| 9 | उच्यते | said to be | fr. √वच् *ps. pr. 3rd sg.* (**5.37.6:** & **2.3.a:**) |

**सर्वतःपाणिपादं तत्सर्वतोऽक्षिशिरोमुखम्। सर्वतःश्रुतिमल्लोके सर्वमावृत्य तिष्ठति॥१३॥**

(सर्वतःपाणिपादं तद्, सर्वतोऽक्षिशिरोमुखम्। सर्वतःश्रुतिमन् लोके, सर्वम् आवृत्य तिष्ठति॥)

सर्वम् आवृत्य तद् लोके सर्वतः-पाणि-पादं सर्वतस्-[अ]क्षि-शिरस्-मुखं सर्वतः-श्रुतिमन् तिष्ठति। (**13.13**)

[Not that *it is not*, since] that [ज्ञेयं ब्रह्मन्] remains [motionless, yet] pervading all in the लोक (universe) [as each being's reality]—with [all beings'] hands and feet everywhere; with [their] eyes, heads, and mouths everywhere; and with [their] ears everywhere.

| | | | |
|---|---|---|---|
| 4 | सर्वम् | all [as their reality] | fr. सर्व *prn. a. n. sg. acc.* (**4.16.2:**) |
| 3 | आवृत्य | pervading | fr. आवृत्य *in. pt. of* आ + √वृत् (**6.9:**) |
| 1 | तद् | that [ज्ञेयं ब्रह्मन्] | fr. तद् *prn. n. sg. nom.* |
| 5 | लोके | in the लोक (the universe) | fr. लोक *m. sg. loc.* |
| 7 | सर्वतः- | everywhere | |
| 6 | -पाणि-पादं | with [all beings'] hands and feet | fr. सर्वतस्-पाणि-पाद *a. n. sg. nom.* (**2.24:**) |
| 9 | सर्वतस्- | everywhere | |
| 8 | -[अ]क्षि-शिरस्-मुखं | with [their] eyes, heads, and mouths | fr. सर्वतस्-[अ]क्षि-शिरस्-मुख *a. n. sg. nom.* (**2.24:** & **.32:** & **.33:**) |
| 10 | सर्वतः-श्रुतिमन् | [and] with [their] ears everywhere | fr. सरतस्-श्रुतिमत् *a. n. sg. nom.* (**2.24:** & **3.13:**) |
| <u>2</u> | तिष्ठति | remains [motionless, yet] | fr. √स्था *1.P. pr. 3rd sg.* (**5.15.4:**) |

**सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम्। असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च॥१४॥**

(सर्वेन्द्रियगुणाभासं, सर्वेन्द्रियविवर्जितम्। असक्तं सर्वभृत् च एव, निर्गुणं गुणभोक्तृ च॥)

सर्व-इन्द्रिय-गुण-आभासं सर्व-इन्द्रिय-विवर्जितम्, अ-सक्तं सर्व-भृत् एव च, निर्-गुणं गुण-भोक्तृ च। (**13.14**)

[Not that *it is*, since that ज्ञेयं ब्रह्मन्] [merely] appears as the attributes [i.e., the functioning— seeing, etc.] of all the organs [in these bodies], [yet] is free from all the organs; is unattached [yet] sustains all; and is free from the गुण-s [yet] is the experiencer of the गुण-s.

| | | | |
|---|---|---|---|
| 2 | सर्व-इन्द्रिय- | of all the organs [in these bodies] | |
| 1 | -गुण-आभासं | [it merely] appears as the attributes [i.e., the functioning—seeing, etc.] | fr. सर्व-इन्द्रिय-गुण-आभास *a. n. sg. nom.* |
| 4 | सर्व-इन्द्रिय- | all the organs | |
| 3 | -विवर्जितम् | [yet] is free from | fr. सर्व-इन्द्रिय-विवर्जित *a. n. sg. nom.* |
| 5 | अ-सक्तं | is unattached | fr. असक्त *pp. of* √सञ्ज् *a. n. sg. nom.* (**6.6:** & **2.81:**) |
| 6 | सर्व-भृत् एव च | [yet] sustains all | fr. सर्व-भृत् *a. n. sg. nom.* (**6.24.2:** & **3.5:**); एव *in.*; च *in.* |

| | | | |
|---|---|---|---|
| 7 | निर्-गुणं | and is free from the गुण-s | fr. निस्-गुण *a. n. sg. nom.* (**2.24:** & **2.29:**) |
| 8 | गुण-भोक्तृ च | [yet] is the experiencer of the गुण-s | fr. गुण-भोक्तृ *a. n. sg. nom.* (**3.38:**); च *in.* |

**बहिरन्तश्च भूतानामचरं चरमेव च। सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चान्तिके च तत्॥१५॥**
(बहिः अन्तः च भूतानाम्, अचरं चरम् एव च। सूक्ष्मत्वात् तद् अविज्ञेयं, दूरस्थं च अन्तिके च तद्॥)
भूतानां बहिः अन्तः च, चरम् अ-चरम् एव च। सूक्ष्मत्वात् तद् अ-विज्ञेयं। तद् दूर-स्थं च अन्तिके च। (**13.15**)
It is [with reference to these bodies] outside and inside of [all] beings, and is whatever does and does not move [in the universe]. Since it is subtle [i.e., innermost, as "I"], it is not knowable [as a "this or that," an object]. It is [as] far [as the farthest, imagined object] and [as] near [as "I"].

| | | | |
|---|---|---|---|
| 3 | भूतानां | of [all] beings | fr. भूत *pp. of* √भू *n. pl. gen.* (**6.6:**) |
| 1 | बहिः | [it is] [with reference to these bodies] outside | fr. बहिस् *in.* (**6.16:**) |
| 2 | अन्तः च | and inside | fr. अन्तर् *in.* (**6.15:**); च *in.* |
| 4 | चरम् | and is whatever does move | fr. चर *a. n. sg nom.* |
| 5 | अ-चरम् एव च | and does not move [in the universe] | fr. अचर *a. n. sg. nom.*; एव *in.* (**6.19:**); च *in.* |
| 6 | सूक्ष्मत्वात् | since it is subtle [i.e., innermost, as "I"] | fr. सूक्ष्मत्व *n. sg. abl.* (**7.11.1:**) |
| 7 | तद् | it [is] | fr. तद् *prn. n. sg. nom.* |
| 8 | अ-विज्ञेयं | not knowable [as a "this or that," an object] | fr. अविज्ञेय *pot. ps. pt. of* वि + √ज्ञा *a. n. sg. nom.* (**6.8:**) |
| 9 | तद् | it [is] | fr. तद् *prn. n. sg. nom.* |
| 10 | दूर-स्थं च | [as] far [as the farthest, imagined object] | fr. दूर-स्थम् *in.* (**7.8.8:**); च *in.* |
| 11 | अन्तिके च | and [as] near [as "I"] | fr. अन्तिके *in.* (**7.13.3:** & **6.18:**);च *in.* |

**अविभक्तं च भूतेषु विभक्तमिव च स्थितम्। भूतभर्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च॥१६॥**

(अविभक्तं च भूतेषु, विभक्तम् इव च स्थितम्। भूतभर्तृ च तद् ज्ञेयं, ग्रसिष्णु प्रभविष्णु च॥)

भूतेषु च अ-विभक्तं विभक्तम् इव च स्थितं, भूत-भर्तृ ग्रसिष्णु च प्रभविष्णु च तद् ज्ञेयम्। (**13.16**)

That ज्ञेय remains undivided [i.e., as one only] yet [is] seemingly divided [as many] in [all] beings; [this one and only] is the one who sustains [all these] beings [embodiments and objects] and is [their] devourer and creator.

| | | | |
|---|---|---|---|
| 6 | भूतेषु च | in [all] beings | fr. भूत *pp. of* √भू *n. pl. loc.* (**6.6:**); च *in.* |
| 3 | अ-विभक्तं | undivided [i.e., as one only] | fr. अविभक्त *pp. of* वि + √भज् *a. n. sg. nom.* (**2.81:**) |
| 5 | विभक्तम् | divided [as many] | fr. विभक्त *pp. of* वि + √भज् *a. n. sg. nom.* (**2.81:**) |
| 4 | इव च | [yet is] seemingly | fr. इव *in.* (**6.19:**); च *in.* |
| 2 | स्थितं | remains | fr. स्थित *pp. of* √स्था *pt. n. sg. nom.* (**6.6:**) |
| 7 | भूत-भर्तृ | [this one and only] is the one who sustains [all these] beings [embodiments and objects] | fr. भूत-भर्तृ *a. n. sg. nom.* (**3.38:**) |
| 8 | ग्रसिष्णु च | and is [their] devourer | fr. ग्रसिष्णु *n. sg. nom.*; च *in.* |
| 9 | प्रभविष्णु च | and creator | fr. प्रभविष्णु *n. sg. nom.*; च *in.* |
| 1 | तद् ज्ञेयम् | that ज्ञेय | fr. तद् *prn. n. sg. nom.*; ज्ञेय *pot. ps. pt. of* √ज्ञा *n. sg. nom.* (**6.8:**) |

**ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते। ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य विष्ठितम्॥१७॥**

(ज्योतिषाम् अपि तद् ज्योतिः, तमसः परम् उच्यते। ज्ञानं ज्ञेयं ज्ञानगम्यं, हृदि सर्वस्य विष्ठितम्॥)

तद् ज्योतिषाम् अपि ज्योतिः, तमसः परम् उच्यते। [तद्] ज्ञानं ज्ञेयं ज्ञान-गम्यम्। [तद्] सर्वस्य हृदि विष्ठितम्। (**13.17**)

It is the light of lights [i.e., the solely self-revealing conscious-being by which even the sun is revealed] said to be beyond darkness [or ignorance, as it reveals both]. It is ज्ञान (*see* 13.2 *and* 13.7–11), ज्ञेय, and the result to be attained by ज्ञान. It abides in the center of everything [and is to be known in this intellect].

| | | | |
|---|---|---|---|
| 1 | तद् | it [is] | fr. तद् *prn. n. sg. nom.* |
| 3 | ज्योतिषाम् | of lights [i.e., the solely self-revealing conscious being by which even the sun is revealed] | fr. ज्योतिस् *n. pl. gen.* (**3.6:** & **2.101:**) |
| 2 | अपि ज्योतिः | [indeed] the light | fr. अपि *in.*; ज्योतिस् *n. sg. nom.* (**3.6:**) |
| 6 | तमसः | darkness [or ignorance, as it reveals both] | fr. तमस् *n. sg. abl.* (**3.6:**) |
| 5 | परम् | beyond | fr. पर *prn. a. n. sg. nom.* (**4.16.3:** & **6.16:**) |
| 4 | उच्यते | said to be | fr. √वच् *ps. pr. 3rd sg.* (**5.37.6:** & **2.3.a:**) |

| | | | |
|---|---|---|---|
| 7 | [तद्] | [it is] | |
| 8 | ज्ञानं | ज्ञान | fr. ज्ञान *n. sg. nom.* |
| 9 | ज्ञेयं | ज्ञेय | fr. ज्ञेय *pot. ps. pt. of* √ज्ञा *n. sg. nom.* (**6.8:**) |
| 10 | ज्ञान-गम्यम् | and the result to be attained by ज्ञान | fr. ज्ञान-गम्य *n. sg. nom.* |
| 11 | [तद्] | [it] | |
| 13 | सर्वस्य हृदि | in the center of everything [and is to be known in this intellect] | fr. सर्व *prn. a. n. sg. gen.*; हृद् *n. sg. loc.* (**3.6:**) |
| 12 | विष्ठितम् | abides | fr. विष्ठित *pp. of* वि + √स्था *pt. n. sg. nom.* (**6.6:** & **2.101:**) |

**इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः। मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते॥१८॥**
(इति क्षेत्रं तथा ज्ञानं, ज्ञेयं च उक्तम् समासतः। मद्भक्तः एतद् विज्ञाय, मद्भावाय उपपद्यते॥)
इति क्षेत्रं तथा ज्ञानं ज्ञेयं च समासतः उक्तम्। एतद् विज्ञाय, मद्-भक्तः मद्-भावाय उपपद्यते। (**13.18**)
Thus the क्षेत्र, the ज्ञान, and the ज्ञेय have been briefly told. Clearly knowing this, one who is devoted to Me [who is this ज्ञेय] is fit for My nature [called मोक्ष, complete freedom].

| | | | |
|---|---|---|---|
| 1 | इति | thus | fr. इति *in.* |
| 2 | क्षेत्रं | the क्षेत्र | fr. क्षेत्र *n. sg. nom.* |
| 3 | तथा ज्ञानं | [and] the ज्ञान | fr. तथा *in.* (**6.19:**); ज्ञान *n. sg. nom.* |
| 4 | ज्ञेयं च | and the ज्ञेय | fr. ज्ञेय *pot. ps. pt. of* √ज्ञा *n. sg. nom.* (**6.8:**); च *in.* |
| 6 | समासतः | briefly | fr. समासतस् *in.* (**6.19:**) |
| 5 | उक्तम् | have been told | fr. उक्त *pp. of* √वच् *pt. n. sg. nom.* (**6.6:** & **2.3.a:** & **2.80:**) |
| 7 | एतद् विज्ञाय | clearly knowing this | fr. एतद् *prn. n. sg. acc.*; विज्ञाय *in pt. of* वि + √ज्ञा (**6.9:**) |
| 8 | मद्-भक्तः | one who is devoted to Me [who is this ज्ञेय] | fr. मद्-भक्त *a. m. sg. nom.* (**2.24:** & **.43:**) |
| 10 | मद्-भावाय | for My nature [called मोक्ष, complete freedom] | fr. मद्-भाव *m. sg. dat.* (**2.24:** & **.43:**) (**7.10.B.1:**) |
| 9 | उपपद्यते | is fit | fr. उप + √पद् *4.Ā. pr. 3rd sg.* (**5.37.6:** & **2.3.a:**) |

**प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपी। विकारांश्च गुणांश्चैव विद्धि प्रकृतिसम्भवान्॥१९॥**

(प्रकृतिं पुरुषं च एव, विद्धि अनादी उभौ अपि। विकारान् च गुणान् च एव, विद्धि प्रकृतिसम्भवान्॥)

प्रकृतिं पुरुषम् एव च उभौ अपि अन्-आदी विद्धि। गुणान् च विकारान् एव च प्रकृति-सम्भवान् विद्धि। (**13.19**)

May you know that both प्रकृति and पुरुष are beginningless. And may you know that the गुण-s [i.e., mental dispositions—not the three unmodified गुण-s (the constituents of प्रकृति)] and [other] modifications [from intellects to all physical bodies] are born of प्रकृति.

| | | | |
|---|---|---|---|
| 3 | प्रकृतिं | प्रकृति | fr. प्रकृति *f. sg. acc.* |
| 4 | पुरुषम् एव च | and पुरुष | fr. पुरुष *m. sg. acc.*; एव *in.* (**6.19:**); च *in.* |
| 2 | उभौ अपि | both | fr. उभ *prn. a. m. du. acc.* (**4.16.b:** & **7.5.2.a:**); अपि *in.* |
| 5 | अन्-आदी | [are] beginningless | fr. अन्-आदि *a. m. du. acc.* |
| 1 | विद्धि | may you know that | fr. √विद् *2.P. impv.* $2^{nd}$ *sg.* (**5.6.a:**) |
| 7 | गुणान् च | the गुण-s [i.e., mental dispositions—not the three unmodified गुण-s (the constituents of प्रकृति)] | fr. गुण *m. pl. acc.*; च *in.* |
| 8 | विकारान् एव च | and [other] modifications [from intellects to all physical bodies] | fr. विकार *m. pl. acc.*; एव *in.* (**6.19:**); च *in.* |
| 10 | प्रकृति- | of प्रकृति | |
| 9 | -सम्भवान् | [are] born | fr. प्रकृति-सम्भव *a. m. pl. acc.* |
| 6 | विद्धि | [and] may you know that | fr. √विद् *2.P. impv.* $2^{nd}$ *sg.* (**5.6.a:**) |

**कार्यकरणकर्तृत्वे हेतुः प्रकृतिरुच्यते। पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते॥२०॥**

(कार्यकरणकर्तृत्वे, हेतुः प्रकृतिः उच्यते। पुरुषः सुखदुःखानां, भोक्तृत्वे हेतुः उच्यते॥)

प्रकृतिः कार्य-करण-कर्तृत्वे हेतुः उच्यते। पुरुषः सुख-दुःखानां भोक्तृत्वे हेतुः उच्यते। (**13.20**)

प्रकृति is said to be the cause of the origination of the physical body and [its] instruments [i.e., mind, senses, etc.]. The पुरुष (क्षेत्रज्ञ or, in this case, the individual जीव) is said to be the cause of being the experiencer of pleasant and unpleasant situations.

| | | | |
|---|---|---|---|
| 1 | प्रकृतिः | प्रकृति | fr. प्रकृति *f. sg. nom.* |
| 5 | कार्य- | of the physical body | |
| 6 | -करण- | and [its] instruments [i.e., mind, senses, etc.] | |
| 4 | -कर्तृत्वे | of the origination | fr. कार्य-करण-कर्तृत्व *n. sg. loc.* (**7.13.1.d:**) |
| 3 | हेतुः | the cause | fr. हेतु *m. sg. nom.* (**7.7.1:**) |
| 2 | उच्यते | is said to be | fr. √वच् *ps. pr.* $3^{rd}$ *sg.* (**5.37.6:** & **2.3.a:**) |

| | | | |
|---|---|---|---|
| 7 | पुरुषः | the पुरुष (क्षेत्रज्ञ or, in this case, the individual जीव) | fr. पुरुष *m. sg. nom.* |
| 11 | सुख-दुःखानां | of pleasant and unpleasant situations | fr. सुख-दुःख *n. pl. gen.* |
| 10 | भोक्तृत्वे | of being the experiencer | fr. भोक्तृत्व *n. sg. loc.* (**7.13.1.d:**) |
| 9 | हेतुः | the cause | fr. हेतु *m. sg. nom.* (**7.7.1:**) |
| 8 | उच्यते | is said to be | fr. √वच् *ps. pr. 3rd sg.* (**5.37.6: & 2.3.a:**) |

**पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान्गुणान्। कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु॥ २१॥**

(पुरुषः प्रकृतिस्थः हि, भुङ्क्ते प्रकृतिजान् गुणान्। कारणं गुणसङ्गः अस्य, सदसद्योनिजन्मसु॥)

प्रकृति-स्थः हि (=यस्मात्) पुरुषः प्रकृति-जान् गुणान् भुङ्क्ते। सद्-अ-सद्-योनि-जन्मसु कारणम् अस्य गुण-सङ्गः। (**13.21**)

—Because the पुरुष, abiding in प्रकृति, experiences the [modifications of the] गुण-s born of प्रकृति. In regard to births in virtuous and nonvirtuous wombs [i.e., संसार], one's [i.e., the ignorant जीव-'s] attachment to [the modifications of the] गुण-s is the cause.

| | | | |
|---|---|---|---|
| 3 | प्रकृति-स्थः | abiding in प्रकृति | fr. प्रकृति-स्थ *a. m. sg. nom.* (**6.24.1:**) |
| 1 | हि (=यस्मात्) | because | fr. हि *in.* |
| 2 | पुरुषः | the पुरुष | fr. पुरुष *m. sg. nom.* |
| 6 | प्रकृति-जान् | born of प्रकृति | fr. प्रकृति-ज *a. m. pl. acc.* (**6.24.3:**) |
| 5 | गुणान् | the [modifications of the] गुण-s | fr. गुण *m. pl. acc.* |
| 4 | भुङ्क्ते | experiences | fr. √भुज् *7.Ā. pr. 3rd sg.* (**2.81:**) |
| 8 | सद्-अ-सद्- | in virtuous and non-virtuous | |
| 9 | -योनि- | wombs [i.e., संसार] | |
| 7 | -जन्मसु | in regard to births | fr. सत्-असत्-योनि-जन्मन् *n. pl. loc.* (**2.43:**) |
| 12 | कारणम् | [is] the cause | fr. कारण *n. sg. nom.* |
| 10 | अस्य | one's [i.e., the ignorant जीव-'s] | fr. इदम् *prn. m. sg. gen.* |
| 11 | गुण-सङ्गः | attachment to [the modifications of the] गुण-s | fr. गुण-सङ्ग *m. sg. nom.* |

**उपद्रष्टानुमन्ता च भर्ता भोक्ता महेश्वरः। परमात्मेति चाप्युक्तो देहेऽस्मिन्पुरुषः परः॥ २२॥**

(उपद्रष्टा अनुमन्ता च, भर्ता भोक्ता महेश्वरः। परमात्मा इति च अपि उक्तः, देहे अस्मिन् पुरुषः परः॥)

अस्मिन् देहे पुरुषः परः, उपद्रष्टा, अनुमन्ता च, भर्ता, भोक्ता, महा-ईश्वरः, परम-आत्मा च इति अपि उक्तः। (**13.22**) [But in fact] the पुरुष—[even while] in this body—is limitless, the immediate witness, the permitter, the sustainer, the [unattached] experiencer, the [very] Lord [i.e., Myself], and is indeed called the परमात्मन् (the limitless I).

| | | | |
|---|---|---|---|
| 2 | अस्मिन् देहे | [even while] in this body | fr. इदम् *prn. m. sg. loc.*; देह *m. sg. loc.* |
| 1 | पुरुषः | the पुरुष | fr. पुरुष *m. sg. nom.* |
| 3 | परः | [is] limitless | fr. पर *prn. a. m. sg. nom.* (**4.16.3:**) |
| 4 | उपद्रष्टा | the immediate witness | fr. उपद्रष्टृ *m. sg. nom.* (**3.38:**) |
| 5 | अनुमन्ता च | the permitter | fr. अनुमन्तृ *m. sg. nom.* (**3.38:**) |
| 6 | भर्ता | the sustainer | fr. भर्तृ *m. sg. nom.* (**3.38:**) |
| 7 | भोक्ता | the [unattached] experiencer | fr. भोक्तृ *m. sg. nom.* (**3.38:**) |
| 8 | महा-ईश्वरः | the [very] Lord [i.e., Myself] | fr. महा-ईश्वर *m. sg. nom.* |
| 10 | परम-आत्मा च | and the परमात्मन् (the limitless I) | fr. परम-आत्मन् *m. sg. nom.* (**3.22:**); च *in.* |
| 9 | इति अपि उक्तः | is indeed called | fr. इति *in.*; अपि *in.*; उक्त *pp. of* √वच् *pt. n. sg. nom.* (**6.6:** & **2.3.a:** & **2.80:**) |

**य एवं वेत्ति पुरुषं प्रकृतिं च गुणैः सह। सर्वथा वर्तमानोऽपि न स भूयोऽभिजायते॥ २३॥**

(यः एवं वेत्ति पुरुषं, प्रकृतिं च गुणैः सह। सर्वथा वर्तमानः अपि, न सः भूयः अभिजायते॥)

यः एवं पुरुषं गुणैः सह प्रकृतिं च वेत्ति, सः सर्वथा वर्तमानः अपि भूयः न अभिजायते। (**13.23**)

The one who in this way knows पुरुष and प्रकृति with its गुण-s—that one, even though performing action in all ways [whether as a student, householder, retiree, or सन्न्यासिन्] is not born again.

| | | | |
|---|---|---|---|
| 1 | यः एवं | the one who in this way | fr. यद् *prn. m. sg. nom.*; एवम् *in.* (**6.19:**) |
| 3 | पुरुषं | पुरुष | fr. पुरुष *m. sg. acc.* |
| 5 | गुणैः सह | with its गुण-s | fr. गुण *m. sg. inst.* (**6.16:**); सह *in.* (**6.19:**) |
| 4 | प्रकृतिं च | and प्रकृति | fr. प्रकृति *f. sg. acc.*; च *in.* |
| 2 | वेत्ति | knows | fr. √विद् *2.P. pr. 3rd sg.* (**2.42:**) |
| 6 | सः | that one | fr. तद् *prn. m. sg. nom.* |
| 8 | सर्वथा | in all ways | fr. सर्वथा *in.* (**6.19:**) |
| 7 | वर्तमानः अपि | even though performing action | fr. वर्तमान *pr. mid. pt. of* √वृत् *pt. m. sg. nom.* (**6.5:**); अपि *in.* |
| 10 | भूयः | again | fr. भूयस् *in.* |
| 9 | न अभिजायते | is not born | fr. न *in.*; अभि + √जन् *4.Ā. pr. 3rd sg.* (**5.16.4:**) |

**ध्यानेनात्मनि पश्यन्ति केचिदात्मानमात्मना। अन्ये साङ्ख्येन योगेन कर्मयोगेन चापरे॥ २४॥**

(ध्यानेन आत्मनि पश्यन्ति, केचिद् आत्मानम् आत्मना। अन्ये साङ्ख्येन योगेन, कर्मयोगेन च अपरे॥ )

के-चिद् ध्यानेन (=श्रवण-मनन-निदिध्यासनेन) आत्मनि आत्मना आत्मानं पश्यन्ति, अन्ये साङ्ख्येन योगेन (=श्रवणेन एव), अपरे (=कर्मयोगिनः) च कर्म-योगेन। (**13.24**) Some [ज्ञानिन्-s] see the self—in the mind, by the mind—with contemplation [after study to remove obstacles to assimilation of knowledge], [a rare few] others [simply] by inquiry [i.e., study of the teaching], and [some] others [by this teaching] while engaged in [their] duties.

| | | | |
|---|---|---|---|
| 1 | के-चिद् | some [ज्ञानिन्-s] | fr. क-चिद् *prn. cmpd. m. pl. nom.* (**4.20:**) |
| 6 | ध्यानेन | with contemplation [after study to remove obstacles to assimilation of knowledge] | fr. ध्यान *n. sg. inst.* (**7.9.9:**) |
| 4 | आत्मनि | in the mind | fr. आत्मन् *m. sg. loc.* (**3.22:**) |
| 5 | आत्मना | by the mind | fr. आत्मन् *m. sg. inst.* (**3.22:**) |
| 3 | आत्मानं | the self | fr. आत्मन् *m. sg. acc.* (**3.22:**) |
| 2 | पश्यन्ति | see | fr. √दृश् *1.P. pr. 3rd pl.* (**5.15.6:**) |
| 7 | अन्ये | [a rare few] others | fr. अन्य *prn. a. m. pl. nom.* (**4.16.1:**) |
| 8 | साङ्ख्येन योगेन | [simply] by inquiry [i.e., study of the teaching] | fr. साङ्ख्य *m. sg. inst.*; योग *m. sg. inst.* (**7.9:**) |
| 9 | अपरे च | and [some] others | fr. अपर *prn. a. m. pl. nom.* (**4.16.3:**); हि *in.* |
| 10 | कर्म-योगेन | [by this teaching] while engaged in [their] duties | fr. कर्म-योग *m. sg. inst.* (**7.9.9:**) |

**अन्ये त्वेवमजानन्तः श्रुत्वान्येभ्य उपासते। तेऽपि चातितरन्त्येव मृत्युं श्रुतिपरायणाः॥ २५॥**

(अन्ये तु एवम् अजानन्तः, श्रुत्वा अन्येभ्यः उपासते। ते अपि च अतितरन्ति एव, मृत्युं श्रुतिपरायणाः॥ )

अन्ये तु एवम् अ-जानन्तः अन्येभ्यः श्रुत्वा उपासते। ते अपि च श्रुति-परायणाः मृत्युम् अतितरन्ति एव। (**13.25**) —Whereas others, not [yet] knowing [this teaching], worship [Me] according to what they have heard from others [i.e., from गुरु-s who tell them to initially do पूजा, जप (mental chanting), etc.]. They also, being ones for whom listening [to the teaching] is the ultimate end, [eventually] cross over death.

| | | | |
|---|---|---|---|
| 1 | अन्ये तु | whereas others | fr. अन्य *prn. a. m. pl. nom.* (**4.16.1:**); तु *in.* |
| 2 | एवम् अ-जानन्तः | not [yet] knowing [this teaching] | fr. एवम् *in.* (**6.19:**); अजानत् *pr. pt. of* √ज्ञा *a. m. pl. nom.* (**5.23.2:** & **3.12:**) |
| 5 | अन्येभ्यः | from others [गुरु-s who tell them to initially do पूजा, जप (mental chanting), etc.] | fr. अन्य *prn. a. m. pl. abl.* (**4.16.1:**) |
| 4 | श्रुत्वा | according to what they have heard | fr. श्रुत्वा *in. pt. of* √श्रु |
| 3 | उपासते | worship [Me] | fr. उप + √आस् *2.Ā. pr. 3rd pl.* (**5.6.b:**) |

| | | | |
|---|---|---|---|
| 6 | ते अपि च | they also | fr. तद् *prn. m. pl. nom.*; अपि *in.*; च *in.* |
| 7 | श्रुति-परायणाः | being ones for whom listening [to the teaching] is the ultimate end | fr. श्रुति-परायण *a. m. pl. nom.* |
| 9 | मृत्युम् | death | fr. मृत्यु *m. sg. acc.* |
| 8 | अतितरन्ति एव | [eventually] cross over | fr. अति + √तॄ *1.P. pr.* $3^{rd}$ *pl.* (**5.3:** & **2.3:**); एव *in.* (**6.19:**) |

**यावत्सञ्जायते किञ्चित्सत्त्वं स्थावरजङ्गमम्। क्षेत्रक्षेत्रज्ञसंयोगात्तद्विद्धि भरतर्षभ॥ २६॥**

(यावत् सञ्जायते किञ्चिद्, सत्त्वं स्थावरजङ्गमम्। क्षेत्रक्षेत्रज्ञसंयोगात्, तद् विद्धि भरतर्षभ॥ )

यावत् किञ्-चिद् सत्त्वं स्थावर-जङ्गमं सञ्जायते, तद् क्षेत्र-क्षेत्रज्ञ-संयोगात् विद्धि, भरत-ऋषभ। (**13.26**)

As long as any being [i.e., a जीव] [continues to] be [re-]born as immobile or mobile—know that to be due to the संयोग (association—due to a lack of विवेक; i.e., knowing the difference) between the क्षेत्र and the क्षेत्रज्ञ, O अर्जुन.

| | | | |
|---|---|---|---|
| 1 | यावत् | as long as | fr. यावत् *in.* (**6.20:**) |
| 2 | किञ्-चिद् | any | fr. क-चिद् *prn. cmpd. n. sg. nom.* (**4.20:**) |
| 3 | सत्त्वं | being [i.e., a जीव] | fr. सत्त्व *n. sg. nom.* |
| 5 | स्थावर- | as immobile | |
| 6 | -जङ्गमं | or mobile | fr. स्थावर-जङ्गम *n. sg. nom.* (**7.7.1:**) |
| 4 | सञ्जायते | [continues to] be [re-]born | fr. सम् + √जन् *4.Ā. pr.* $3^{rd}$ *sg.* (**5.16.4:**) |
| 8 | तद् | that [to be] | fr. तद् *prn. n. sg. acc.* |
| 10 | क्षेत्र-क्षेत्रज्ञ- | between the क्षेत्र and the क्षेत्रज्ञ | |
| 9 | -संयोगात् | due to the संयोग (association—due to a lack of विवेक; i.e., knowing the difference) | fr. क्षेत्र-क्षेत्रज्ञ-संयोग *m. sg. abl.* (**7.11.1:**) |
| 7 | विद्धि | know | fr. √विद् *2.P. impv.* $2^{nd}$ *sg.* (**5.6.a:**) |
| 11 | भरत-ऋषभ | (अर्जुन) O Prominent Among the Descendants of भरत | fr. भरत-ऋषभ *m. sg. voc.* |

**समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम्। विनश्यत्स्वविनश्यन्तं यः पश्यति स पश्यति॥ २७॥**

(समं सर्वेषु भूतेषु, तिष्ठन्तं परमेश्वरम्। विनश्यत्सु अविनश्यन्तं, यः पश्यति सः पश्यति॥)

यः परम-ईश्वरं सर्वेषु भूतेषु समं तिष्ठन्तं, विनश्यत्सु [च] अ-विनश्यन्तं पश्यति, सः पश्यति। (**13.27**)

The one who sees the Lord [Me] as remaining the same in all beings and as not being destroyed among those [bodies] being destroyed—that one [alone] sees.

| | | | |
|---|---|---|---|
| 1 | यः | the one who | fr. यद् *prn. m. sg. nom.* |
| 3 | परम-ईश्वरं | the Lord [Me] [as] | fr. परम-ईश्वर *m. sg. acc.* |
| 6 | सर्वेषु भूतेषु | in all beings | fr. सर्व *prn. a. n. pl. loc.*; भूत *pp. of* √भू *n. pl. loc.* (**6.6:**) |
| 5 | समं | the same | fr. सम *a. m. sg. acc.* |
| 4 | तिष्ठन्तं | remaining | fr. तिष्ठत् *pr. pt. of* √स्था *a. m. sg. acc.* (**5.15.4:** & **3.12:**) |
| 8 | विनश्यत्सु [च] | among those [bodies] being destroyed | fr. विनश्यत् *pr. pt. of* वि + √नश् *a. m. pl. loc.* (**3.12:**) (**7.13.1.a:**) |
| 7 | अ-विनश्यन्तं | [and] as not being destroyed | fr. अविनश्यत् *pr. pt. of* वि + √नश् *a. m. sg. acc.* (**3.12:**) |
| 2 | पश्यति | sees | fr. √दृश् *1.P. pr. 3rd sg.* (**5.15.6:**) |
| 9 | सः पश्यति | that one [alone] sees | fr. तद् *prn. m. sg. nom.*; √दृश् *1.P. pr. 3rd sg.* (**5.15.6:**) |

**समं पश्यन्हि सर्वत्र समवस्थितमीश्वरम्। न हिनस्त्यात्मनात्मानं ततो याति परां गतिम्॥ २८॥**

(समं पश्यन् हि सर्वत्र, समवस्थितम् ईश्वरम्। न हिनस्ति आत्मना आत्मानं, ततः याति परां गतिम्॥)

ईश्वरं हि (=यस्मात्) सर्वत्र समं समवस्थितं पश्यन्, आत्मना आत्मानं न हिनस्ति, ततः परां गतिं याति। (**13.28**)

—Because seeing [Me] the Lord as remaining सम (the same) everywhere [as the self of all], one does not by oneself [i.e., through the mind] destroy [i.e., lose sight of] the self [since that self is the all-pervasive Me] and, hence, attains the ultimate end [i.e., the end of संसार].

| | | | |
|---|---|---|---|
| 3 | ईश्वरं | (Me) the Lord [as] | fr. ईश्वर *m. sg. acc.* |
| 1 | हि (=यस्मात्) | because | fr. हि *in.* |
| 6 | सर्वत्र | everywhere [as the self of all] | fr. सर्वत्र *in.* (**6.19:**) |
| 5 | समं | सम (the same) | fr. सम *a. m. sg. acc.* |
| 4 | समवस्थितं | remaining | fr. समवस्थित *pp. of* सम् + अव + √स्था *a. m. sg. acc.* (**6.6:**) |
| 2 | पश्यन् | seeing | fr. पश्यत् *pr. pt. of* √दृश् *pt. m. sg. nom.* (**5.15.6:** & **3.12:**) |

| | | | |
|---|---|---|---|
| 7 | आत्मना | by oneself [i.e., through the mind] | fr. आत्मन् *m. sg. inst.* (**3.22:**) |
| 9 | आत्मानं | the self [since that self is the all-pervasive Me] | fr. आत्मन् *m. sg. acc.* (**3.22:**) |
| 8 | न हिनस्ति | one does not destroy [i.e., lose sight of] | fr. न *in.*; √हिंस् *7.P. pr.3rd sg.* (**5.3.h:**) |
| 10 | ततः | [and] hence | fr. ततस् *in.* (**6.19:**) |
| 12 | परां गतिं | the ultimate end [i.e., the end of संसार] | fr. परा *prn. a. f. sg. acc.* (**4.16.3:**); गति *f. sg. acc.* |
| 11 | याति | attains | fr. √या *2.P. pr.3rd sg.* |

**प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः। यः पश्यति तथात्मानमकर्तारं स पश्यति॥ २९॥**

(प्रकृत्या एव च कर्माणि, क्रियमाणानि सर्वशः। यः पश्यति तथा आत्मानम्, अकर्तारं सः पश्यति॥ )

यः च कर्माणि प्रकृत्या एव सर्वशः क्रियमाणानि, तथा आत्मानम् अ-कर्तारं पश्यति, सः पश्यति। (**13.29**)

And the one who sees actions being done in every way by प्रकृति alone and, in that way, [sees] that the self is not a doer—that one [alone] [correctly] sees.

| | | | |
|---|---|---|---|
| 1 | यः च | and the one who | fr. यद् *prn. m. sg. nom.*; च *in.* |
| 3 | कर्माणि | actions | fr. कर्मन् *n. pl. acc.* (**3.22:** & **2.92:**) |
| 6 | प्रकृत्या एव | by प्रकृति alone | fr. प्रकृति *f. sg. inst.*; एव *in.* (**6.19:**) |
| 5 | सर्वशः | in every way | fr. सर्वशस् *in.* (**6.19:**) |
| 4 | क्रियमाणानि | being done | fr. क्रियमाण *pr. ps. pt. of* √कृ *a. n. pl. acc.* (**6.5:** & **5.37.3:**) |
| 7 | तथा | [and] in that way [sees that] | fr. तथा *in.* (**6.19:**) |
| 8 | आत्मानम् | the self | fr. आत्मन् *m. sg. acc.* (**3.22:**) |
| 9 | अ-कर्तारं | is not a doer | fr. अकर्तृ *m. sg. acc.* (**3.38:**) |
| 2 | पश्यति | sees | fr. √दृश् *1.P. pr. 3rd sg.* (**5.15.6:**) |
| 10 | सः पश्यति | that one [alone] [correctly] sees | fr. तद् *prn. m. sg. nom.*; √दृश् *1.P. pr. 3rd sg.* (**5.15.6:**) |

**यदा भूतपृथग्भावमेकस्थमनुपश्यति। तत एव च विस्तारं ब्रह्म सम्पद्यते तदा॥ ३०॥**
(यदा भूतपृथग्भावम्, एकस्थम् अनुपश्यति। ततः एव च विस्तारं, ब्रह्म सम्पद्यते तदा॥ )
यदा भूत-पृथग्-भावम् एक-स्थं, ततः एव च विस्तारम् अनुपश्यति, तदा ब्रह्म सम्पद्यते। (**13.30**)
When one, according [to the teaching], sees that the [apparent] separateness of beings resolves into one and [that all these apparently separate beings] are a projection [i.e., a manifestation] from that [one] alone—then he [or she] attains [that same] ब्रह्मन् [as himself or herself].

| | | | |
|---|---|---|---|
| 1 | यदा | when | fr. यदा *in.* (**6.19:**) |
| 4 | भूत- | of beings | |
| 3 | -पृथग्-भावम् | the [apparent] separateness | fr. भूत-पृथक्-भाव *m. sg. acc.* (**2.43:**) |
| 5 | एक-स्थं | resolves into one | fr. एक-स्थ *a. m. sg. acc.* (**6.24.1:**) |
| 7 | ततः एव | from that [one] alone | fr. ततस् *in.* (**6.19:**); एव *in.* (**6.19:**) |
| 6 | च विस्तारम् | and [that all these apparently separate beings] are a projection [i.e., a manifestation] | fr. च *in.*; विस्तार *m. sg. acc.* |
| 2 | अनुपश्यति | one according [to the teaching] sees that | fr. अनु +√दृश् *1.P. pr. 3rd sg.* (**5.15.6:**) |
| 8 | तदा | then | fr. तदा *in.* (**6.19:**) |
| 10 | ब्रह्म | [that same] ब्रह्मन् [as himself or herself] | fr. ब्रह्मन् *n. sg. acc.* (**3.22:**) |
| 9 | सम्पद्यते | he [or she] attains | fr. प्र + √पद् *1.P. pr. 3rd pl.* |

**अनादित्वान्निर्गुणत्वात्परमात्मायमव्ययः। शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते॥ ३१॥**
(अनादित्वात् निर्गुणत्वात्, परमात्मा अयम् अव्ययः। शरीरस्थः अपि कौन्तेय, न करोति न लिप्यते॥ )
कौन्तेय, अन्-आदित्वात् निर्-गुणत्वात् अयम् अ-व्ययः परम-आत्मा शरीर-स्थः अपि न करोति, न लिप्यते। (**13.31**)
O अर्जुन, since it is beginningless [i.e., uncaused/un-effected] and since it is without attributes, this changeless परमात्मन् (limitless I) does not do action—even though obtaining in the body—nor is it affected [by the results of action].

| | | | |
|---|---|---|---|
| 1 | कौन्तेय | (अर्जुन) O Son of कुन्ती | fr. कौन्तेय *m. sg. voc.* |
| 2 | अन्-आदित्वात् | since it is beginningless [i.e., uncaused/uneffected] | fr. अनादित्व *n. sg. abl.* (**7.11.1:**) |
| 3 | निर्-गुणत्वात् | [and] since it is without attributes | fr. निस्-गुणत्व *n. sg. abl.* (**2.24: & .29:**) (**7.11.1:**) |

| | | | |
|---|---|---|---|
| 4 | अयम् | this | fr. इदम् *prn. m. sg. nom.* |
| 5 | अ-व्ययः | changeless | fr. अव्यय *a. m. sg. nom.* |
| 6 | परम-आत्मा | परमात्मन् (limitless I) | fr. परम-आत्मन् *m. sg. nom.* (**3.22:**) |
| 8 | शरीर-स्थः अपि | even though obtaining in the body | fr. शरीर-स्थ *a. m. sg. nom.* (**6.24.1:**); अपि *in.* |
| 7 | न करोति | does not do action | fr. न *in.*; √कृ *8.P. pr.* $3^{rd}$ *sg.* (**5.22.1:**) |
| 9 | न लिप्यते | nor is it affected [by the results of action] | fr. न *in.*; √लिप् *ps. pr.* $3^{rd}$ *sg.* |

**यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते। सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते॥३२॥**

(यथा सर्वगतं सौक्ष्म्यात्, आकाशं न उपलिप्यते। सर्वत्र अवस्थितः देहे, तथा आत्मा न उपलिप्यते॥)

यथा सर्वगतम् आकाशं सौक्ष्म्यात् न उपलिप्यते, तथा सर्वत्र देहे अवस्थितः आत्मा न उपलिप्यते। (**13.32**)

Just as the all-pervasive [element called] space is not affected [by movements of objects within space]—because it is subtle [i.e., it is innermost/pervasive; i.e., in and through and outside of objects, without itself moving]—similarly, the आत्मन्, obtaining in [each] body everywhere, is not affected.

| | | | |
|---|---|---|---|
| 1 | यथा | just as | fr. यथा *in.* (**6.19:**) |
| 2 | सर्व-गतम् | the all-pervasive | fr. सर्व-गत *a. n. sg. nom.* |
| 3 | आकाशं | [element called] space | fr. आकाश *n. sg. nom.* |
| 5 | सौक्ष्म्यात् | because it is subtle [i.e., it is innermost/pervasive; i.e., in and through and outside of those objects, without itself moving] | fr. सौक्ष्म्य *n. sg. abl.* (**7.11.1:**) |
| 4 | न उपलिप्यते | is not affected [by movements of objects within space] | fr. न *in.*; उप + √लिप् *ps. pr.* $3^{rd}$ *sg.* |
| 6 | तथा | similarly | fr. यथा *in.* (**6.19:**) |
| 10 | सर्वत्र | everywhere | fr. सर्वत्र *in.* (**6.19:**) |
| 9 | देहे | in [each] body | fr. देह *m. sg. loc.* |
| 8 | अवस्थितः | obtaining | fr. अवस्थित *pp. of* अव + √स्था *a. m. sg. nom.* (**6.6:**) |
| 7 | आत्मा | the आत्मन् | fr. आत्मन् *m. sg. nom.* (**3.22:**) |
| 11 | न उपलिप्यते | is not affected | fr. न *in.*; उप + √लिप् *ps. pr.* $3^{rd}$ *sg.* |

**यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः। क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत॥३३॥**

(यथा प्रकाशयति एकः, कृत्स्नं लोकम् इमं रविः। क्षेत्रं क्षेत्री तथा कृत्स्नं, प्रकाशयति भारत॥)

यथा एकः रविः इमं कृत्स्नं लोकं प्रकाशयति, तथा क्षेत्री कृत्स्नं क्षेत्रं प्रकाशयति, भारत। (**13.33**)

Just as the one sun illumines this entire world [yet is unaffected by it]—similarly, this one obtaining in the क्षेत्र illumines [i.e., lights up, as the conscious being, all thoughts in all minds, which thoughts alone reflect] the entire [known and inferred] क्षेत्र (field of the universe), O अर्जुन.

| | | | |
|---|---|---|---|
| 1 | यथा | just as | fr. यथा *in.* (**6.19:**) |
| 2 | एकः | the one | fr. एक *num. a. m. sg. nom.* (**4.23.a:**) |
| 3 | रविः | sun | fr. रवि *m. sg. nom.* |
| 5 | इमं कृत्स्नं | this entire | fr. इदम् *prn. m. sg. acc*; कृत्स्न *a. m. sg. acc.* |
| 6 | लोकं | world [yet is unaffected by it] | fr. लोक *m. sg. acc.* |
| 4 | प्रकाशयति | illumines | fr. प्र + √काश् *1.P. cs. pr. 3rd sg.* (**5.40:**) |
| 7 | तथा | similarly | fr. तथा *in.* (**6.19:**) |
| 8 | क्षेत्री | this one obtaining in the क्षेत्र | fr. क्षेत्रिन् *a. m. sg. nom.* (**3.15:**) |
| 10 | कृत्स्नं क्षेत्रं | the entire [known and inferred] क्षेत्र (field of the universe) | fr. कृत्स्न *a. n. sg. acc.*; क्षेत्र *n. sg. acc.* |
| 9 | प्रकाशयति | illumines [i.e., lights up, as the conscious being, all thoughts in all minds, which thoughts alone reflect] | fr. प्र + √काश् *1.P. cs. pr. 3rd sg.* (**5.40:**) |
| <u>11</u> | भारत | (अर्जुन) O Descendant of Emperor भरत, (Brilliant) Son of India | fr. भारत *m. sg. voc.* |

**क्षेत्रक्षेत्रज्ञयोरेवमन्तरं ज्ञानचक्षुषा। भूतप्रकृतिमोक्षं च ये विदुर्यान्ति ते परम्॥ ३४॥**

(क्षेत्रक्षेत्रज्ञयोः एवम्, अन्तरं ज्ञानचक्षुषा। भूतप्रकृतिमोक्षं च, ये विदुः यान्ति ते परम्॥)

ये एवं क्षेत्र-क्षेत्रज्ञयोः अन्तरं, भूत-प्रकृति-मोक्षं च ज्ञान-चक्षुषा विदुः, ते परं यान्ति। (**13.34**)

Those who thus know, through the eye of wisdom, the distinction between the क्षेत्र and the क्षेत्रज्ञ [i.e., the object and the subject—the subject being the substance of all objects, of all names and forms] and [their inherent] freedom from प्रकृति [the cause] of [all] beings—they attain the ultimate.

| | | | |
|---|---|---|---|
| 1 | ये एवं | those who thus | fr. यद् *prn. m. pl. nom.*; एवम् *in.* (**6.19:**) |
| 5 | क्षेत्र-क्षेत्रज्ञयोः | between the क्षेत्र and the क्षेत्रज्ञ [i.e., the object and the subject—the later being the substance of all objects, of all names and forms] | fr. क्षेत्र-क्षेत्रज्ञ *m. du. gen.* |
| 4 | अन्तरं | the distinction | fr. अन्तर *n. sg. acc.* |
| 8 | भूत- | of [all] beings | |
| 7 | -प्रकृति- | from प्रकृति [the cause] | |
| 6 | -मोक्षं च | and [their inherent] freedom | fr. भूत-प्रकृति-मोक्ष *m. sg. acc.*; च *in.* |
| 3 | ज्ञान-चक्षुषा | through the eye of wisdom | fr. ज्ञान-चक्षुस् *n. sg. inst.* (**3.6:** & **2.101:**) |
| 2 | विदुः | know | fr. √विद् *P. perf. 3rd pl.* (**5.28:**) |
| 9 | ते | they | fr. तद् *prn. m. pl. nom.* |
| 10 | परं यान्ति | attain the ultimate | fr. पर *n. sg. acc.* (**4.16.3:**); √या *2.P. pr. 3rd pl.* |

**ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे क्षेत्रक्षेत्रज्ञविभागयोगो नाम त्रयोदशोऽध्यायः॥१३॥**

(ओं तद् सत्। इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे क्षेत्रक्षेत्रज्ञविभागयोगः नाम त्रयोदशः अध्यायः॥)

ओं तद् सत्। इति श्रीमद्-भगवद्-गीतासु उपनिषत्सु ब्रह्म-विद्यायां योग-शास्त्रे श्री-कृष्ण-अर्जुन-संवादे क्षेत्र-क्षेत्रज्ञ-विभाग-योगः नाम त्रयः-दशः अध्यायः। (**13**)

ओं (ब्रह्मन्, the witness of all) is that [only] reality. Thus ends the thirteenth chapter, called "The Topic of the Distinction between the Field and the Knower of the Field," of the [eighteen chapters of] *Songs of the Glorious Lord*, which is [looked upon as] उपनिषद् [and whose teaching is] in [the form of] a dialogue between श्री कृष्ण and अर्जुन, [the subject matter being] a knowledge of ब्रह्मन् and योग.

| | | | |
|---|---|---|---|
| 1 | ओं | ओम् (ब्रह्मन्, the witness of all,) | fr. ओम् *in.* |
| 2 | तद् सत् | [is] that [only] reality | fr. तद् *prn. n. sg. nom.*; सत् *n. sg. nom.* |
| 3 | इति | (quote-end quote), thus ends | fr. इति *in.* |
| 12 | श्रीमद्- | of the venerable, the glorious | |
| 13 | -भगवद्- | one having [limitless] glories, Lord | |
| 11 | -गीतासु | in [i.e., of] songs | fr. श्रीमत्-भगवत्-गीता *f. pl. loc.* (**2.43:**) |
| 14 | उपनिषत्सु | [which are/is looked upon as] उपनिषद्, sacred scripture | fr. उपनिषद् *f. pl. loc.* (**6.24:**) |
| 19 | ब्रह्म- | of ब्रह्मन् (reality/सत्) | |
| 18 | -विद्यायां | [and] a knowledge | fr. ब्रह्म-विद्या *f. sg. loc.* |
| 20 | योग-शास्त्रे | [and instruction of] योग (means, discipline, etc.) | fr. योग-शास्त्र *n. sg. loc.* |
| 16 | श्री-कृष्ण- | between Lord कृष्ण | |
| 17 | -अर्जुन- | and अर्जुन | |
| 15 | -संवादे | in [the form of] a dialogue | fr. श्री-कृष्ण-अर्जुन-संवाद *n. sg. loc.* (**2.7:**) |
| 9 | क्षेत्र- | between the field | |
| 10 | -क्षेत्रज्ञ- | and the knower of the field | |
| 8 | -विभाग- | of distinction | |
| 7 | -योगः | the topic | fr. क्षेत्र-क्षेत्रज्ञ-विभाग-योग *a. m. sg. nom.* |
| 6 | नाम | by the name, called | fr. नाम *in.* |
| 4 | त्रयः-दशः | the thirteenth | fr. त्रयो-दश *ordinal a. m. sg. nom.* (**4.23.d:**) |
| 5 | अध्यायः | chapter | fr. अध्याय *m. sg. nom.* |

# अथ चतुर्दशोऽध्यायः

**श्रीभगवानुवाच।**

**परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमम्। यज्ज्ञात्वा मुनयः सर्वे परां सिद्धिमितो गताः॥१॥**

(श्रीभगवान् उवाच। परं भूयः प्रवक्ष्यामि, ज्ञानानां ज्ञानम् उत्तमम्। यद् ज्ञात्वा मुनयः सर्वे, परां सिद्धिम् इतः गताः॥)

श्री-भगवान् उवाच। ज्ञानानाम् उत्तमं परं ज्ञानं भूयः प्रवक्ष्यामि, यद् ज्ञात्वा सर्वे मुनयः इतः परां सिद्धिं गताः।

(**14.1**) The Lord said: I will again tell [you] the ultimate knowledge—the most profound of [disciplines of] knowledge—knowing which, all the sages [being released by this knowledge] from this [body] have attained the ultimate accomplishment.

| | | | |
|---|---|---|---|
| 1 | श्री-भगवान् उवाच | the Lord said | fr. श्री-भगवत् *m. sg. nom.*; √वच् *P. perf. 3rd sg.* (**5.10.3:**) |
| 4 | ज्ञानानाम् उत्तमं | the most profound of [disciplines of] knowledge | fr. ज्ञान *n. pl. gen.*; उत्तम *spv. a. n. sg. acc.* (**6.25:**) |
| 3 | परं ज्ञानं | the ultimate knowledge | fr. पर *prn. a. n. sg. acc.* (**4.16.3:**); ज्ञान *n. sg. acc.* |
| 2 | भूयः प्रवक्ष्यामि | I will again tell [you] | fr. भूयस् *in.*; प्र + √वच् *P. fut. 1st sg.* (**2.80:** & **2.101:** & **5.5.a:**) |
| 5 | यद् ज्ञात्वा | knowing which | fr. यद् *prn. n. sg. acc.*; ज्ञात्वा *in. pt. of* √ज्ञा |
| 6 | सर्वे मुनयः | all the sages | fr. सर्व *prn. a. m. pl. nom.* (**4.16.2:**); मुनि *m. pl. nom.* |
| 7 | इतः | [being released by this knowledge] from this [body] | fr. इतस् *in.* (**6.19:**) |
| 9 | परां सिद्धिं | the ultimate accomplishment | fr. परा *prn. a. f. sg. acc.* (**4.16.3:**); सिद्धि *f. sg. acc.* |
| 8 | गताः | have attained | fr. गत *pp. of* √गम् *pt. m. pl. nom.* (**6.6:**) |

**इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः। सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च॥२॥**

(इदं ज्ञानम् उपाश्रित्य, मम साधर्म्यम् आगताः। सर्गे अपि न उपजायन्ते, प्रलये न व्यथन्ति च॥)

इदं ज्ञानम् उपाश्रित्य, मम साधर्म्यम् आगताः सर्गे अपि न उपजायन्ते, प्रलये न च व्यथन्ति। (**14.2**)

Following this knowledge [i.e., teaching], they—having attained My same nature [i.e., identity with Me, timeless reality]—do not arise even at the manifestation [of a new universe], nor fall at the dissolution [of this or succeeding universes].

| | | | |
|---|---|---|---|
| 2 | इदं ज्ञानम् | this knowledge [i.e., teaching] | fr. इदम् *prn. n. sg. acc.*; ज्ञान *n. sg. acc.* |
| 1 | उपाश्रित्य | following | fr. उपाश्रित्य *in. pt. of* उप + आ + √श्रि (**6.9:**) |
| 4 | मम साधर्म्यम् | My same nature [i.e., identity with Me] | fr. अहम् *prn. sg. gen.*; साधर्म्य *n. sg. acc.* |
| 3 | आगताः | having attained | fr. आगत *pp. of* आ + √गम् *pt. m. pl. nom.* (**6.6:**) |
| 6 | सर्गे अपि | even at the manifestation [of a new universe] | fr. सर्ग *m. sg. loc.*; अपि *in.* |
| 5 | न उपजायन्ते | they do not arise | fr. न *in.*; उप + √जन् *4.Ā. pr. 3rd pl.* (**5.16.4:**) |

| | | | |
|---|---|---|---|
| 8 | प्रलये | at the dissolution [of this or succeeding universes] | fr. प्रलय *m. sg. loc.* |
| 7 | न च व्यथन्ति | nor fall | fr. न *in.*; च *in.*; √व्यथ् *4.P. pr.* $3^{rd}$ *pl.* |

**मम योनिर्महद् ब्रह्म तस्मिन्गर्भं दधाम्यहम्। सम्भवः सर्वभूतानां ततो भवति भारत॥३॥**

(मम योनिः महत् ब्रह्म, तस्मिन् गर्भं दधामि अहम्। सम्भवः सर्वभूतानां, ततः भवति भारत॥)

मम योनिः महत् ब्रह्म। तस्मिन् अहं गर्भं दधामि। ततः सर्व-भूतानां सम्भवः भवति, भारत। (**14.3**)

My womb (प्रकृति) is [not different from Me, who is] महत् ब्रह्मन्. Into that [महत् ब्रह्मन्, as the womb], I implant the seed [ईश्वर is a masculine word and प्रकृति is a feminine word; hence, the impregnation metaphor]. From that is the manifestation of all beings, O अर्जुन.

| | | | |
|---|---|---|---|
| 1 | मम योनिः | My womb (प्रकृति) | fr. अहम् *prn. sg. gen.*; योनि *f. sg. nom.* |
| 2 | महत् ब्रह्म | [is] [not different from Me–] महत् ब्रह्मन् | fr. महत् *a. n. sg. nom.* (**3.12.a:**); ब्रह्मन् *n. sg. nom.* (**3.22:**) |
| 3 | तस्मिन् | into that [महत् ब्रह्मन् as the womb] | fr. तद् *prn. n. sg. loc.* |
| 4 | अहं | I | fr. अहम् *prn. sg. nom.* |
| 5 | गर्भं दधामि | implant the seed | fr. गर्भ *m. sg. acc.*; √धा *3.P. pr.* $1^{st}$ *sg.* (**5.8.2:**) |
| 6 | ततः | from that | fr. ततस् *in.* (**6.19:**) |
| 9 | सर्व-भूतानां | of all beings | fr. सर्व-भूत *n. pl. gen.* |
| 8 | सम्भवः | the manifestation | fr. सम्भव *m. sg. nom.* |
| 7 | भवति | is | fr. √भू *1.P. pr.* $3^{rd}$ *sg.* (**5.3:** & **2.3:** & **2.71:**) |
| 10 | भारत | (अर्जुन) O (Brilliant) Son of India | fr. भारत *m. sg. voc.* |

**सर्वयोनिषु कौन्तेय मूर्तयः सम्भवन्ति याः। तासां ब्रह्म महद्योनिरहं बीजप्रदः पिता॥४॥**

(सर्वयोनिषु कौन्तेय, मूर्तयः सम्भवन्ति याः। तासां ब्रह्म महत् योनिः, अहं बीजप्रदः पिता॥)

कौन्तेय, सर्व-योनिषु याः मूर्तयः सम्भवन्ति, तासां योनिः महत् ब्रह्म, अहं बीज-प्रदः पिता। (**14.4**)

O अर्जुन, for those forms which arise in all wombs [of gods, humans, etc.], the [original] womb is महत् ब्रह्मन् [Me]. And I am [also] the father who implants the seed [which seed, being existence and conscious being, सत्यं ज्ञानं, gives प्रकृति the capacity to create].

| | | | |
|---|---|---|---|
| 1 | कौन्तेय | (अर्जुन) O Son of कुन्ती | fr. कौन्तेय *m. sg. voc.* |
| 5 | सर्व-योनिषु | in all wombs [of gods, humans, etc.] | fr. सर्व-योनि *f. pl. loc.* |
| 3 | याः मूर्तयः | forms which | fr. यद् *prn. f. pl. nom.*; मूर्ति *f. pl. nom.* |
| 4 | सम्भवन्ति | arise | fr. सम् + √भू *1.P. pr.* $3^{rd}$ *pl.* (**5.3:** & **2.3:** & **2.71:**) |
| 2 | तासां | for those | fr. तद् *prn. f. pl. gen.* |

| | | | |
|---|---|---|---|
| 6 | योनिः | the [original] womb | fr. योनि *f. sg. nom.* |
| 7 | महत् ब्रह्म | is महत् ब्रह्मन् [Me] | fr. महत् *a. n. sg. nom.* (**3.12.a:**); ब्रह्मन् *a. n. sg. nom.* (**3.22:**) |
| 8 | अहं | [and] I am [also] | fr. अहम् *prn. sg. nom.* |
| 10 | बीज-प्रदः | who implants the seed [which seed, being existence and conscious being, सत्यं ज्ञानं, gives प्रकृति the capacity to create] | fr. बीज-प्रद *a. m. sg. nom.* (**6.24.1:**) |
| 9 | पिता | the father | fr. पितृ *m. sg. nom.* (**3.38:**) |

**सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः। निबध्नन्ति महाबाहो देहे देहिनमव्ययम्॥५॥**
(सत्त्वं रजः तमः इति, गुणाः प्रकृतिसम्भवाः। निबध्नन्ति महाबाहो, देहे देहिनम् अव्ययम्॥)
महा-बाहो, सत्त्वं रजः तमः इति प्रकृति-सम्भवाः गुणाः देहे अ-व्ययं देहिनं निबध्नन्ति। (**14.5**)
O अर्जुन, the गुण-s, which exist in [i.e., constitute] प्रकृति, are [called] सत्त्व, रजस्, and तमस् and [they, apparently, like notional ropes] bind the changeless embodied one [i.e., the जीव, the क्षेत्रज्ञ] into the body.

| | | | |
|---|---|---|---|
| 1 | महा-बाहो | (अर्जुन) O Mighty Armed One | fr. महा-बाहु *m. sg. voc.* |
| 4 | सत्त्वं रजः तमः इति | are [called] सत्त्व, रजस्, [and] तमस् | fr. सत्त्व *n. sg. nom.*; रजस् *n. sg. nom.* (**3.6:**); तमस् *n. sg. nom.* (**3.6:**); इति *in.* |
| 3 | प्रकृति-सम्भवाः | which exist in [i.e., constitute] प्रकृति | fr. प्रकृति-सम्भव *a. m. pl. nom.* |
| 2 | गुणाः | the गुण-s | fr. गुण *m. pl. nom.* |
| 7 | देहे | into the body | fr. देह *m. sg. loc.* |
| 6 | अ-व्ययं देहिनं | the changeless embodied one [i.e., the जीव, the क्षेत्रज्ञ] | fr. अव्यय *a. m. sg. acc.*; देहिन् *m. sg. acc.* (**3.15:**) |
| 5 | निबध्नन्ति | [and they, apparently, like notional ropes] bind | fr. नि + √बन्ध् *9.P. pr. 3rd pl.* (**5.3.h:**) |

**तत्र सत्त्वं निर्मलत्वात्प्रकाशकमनामयम्। सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ॥६॥**

(तत्र सत्त्वं निर्मलत्वात्, प्रकाशकम् अनामयम्। सुखसङ्गेन बध्नाति, ज्ञानसङ्गेन च अनघ॥)

तत्र निर्-मलत्वात् प्रकाशकम् अन्-आमयं सत्त्वं सुख-सङ्गेन ज्ञान-सङ्गेन च बध्नाति, अन्-अघ। (**14.6**)

Among these, सत्त्व—since it is free from impurity—is illuminating and free from affliction—[yet] binds by [one's] attachment to pleasure and by [one's] attachment to knowing [i.e., attachment/identity is the problem, not the pleasure or knowledge], O अर्जुन.

| | | | |
|---|---|---|---|
| 1 | तत्र | among these | fr. तत्र *in.* (**6.19:**) |
| 3 | निर्-मलत्वात् | since it is free from impurity | fr. निस्-मलत्व *n. sg. abl.* (**2.24:** & **.29:**) (**7.11.1:**) |
| 4 | प्रकाशकम् | is illuminating | fr. प्रकाशक *a. n. sg. nom.* |
| 5 | अन्-आमयं | [and] free from affliction | fr. अनामय *a. n. sg. nom.* |
| 2 | सत्त्वं | सत्त्व | fr. सत्त्व *n. sg. nom.* |
| 7 | सुख-सङ्गेन | by [one's] attachment to pleasure | fr. सुख-सङ्ग *m. sg. inst.* |
| 8 | ज्ञान-सङ्गेन च | and by [one's] attachment to knowing | fr. ज्ञान-सङ्ग *m. sg. inst.*; च *in.* |
| 6 | बध्नाति | [yet] binds | fr. √बन्ध् *9.P. pr. 3rd sg.* (**5.3.h:**) |
| <u>9</u> | अन्-अघ | (अर्जुन) O Sinless One | fr. अनघ *m. sg. voc.* |

**रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम्। तन्निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम्॥७॥**

(रजः रागात्मकं विद्धि, तृष्णासङ्गसमुद्भवम्। तद् निबध्नाति कौन्तेय, कर्मसङ्गेन देहिनम्॥)

राग-आत्मकं रजः तृष्ण-आसङ्ग-समुद्भवं विद्धि। कौन्तेय, तद् कर्म-सङ्गेन देहिनं निबध्नाति। (**14.7**)

Know रजस्, which is of the nature of attraction [i.e., it is an impurity to the natural clarity of the सत्त्व mind—projecting virtues on things that they don't have], as born of [i.e., increased by] longing and attachment. O अर्जुन, it binds the embodied one by attachment to activity.

| | | | |
|---|---|---|---|
| 4 | राग- | of attraction [i.e., it is an impurity to the natural clarity of the सत्त्व mind—projecting virtues on things that they don't have] | |
| 3 | -आत्मकं | which is of the nature | fr. राग-आत्मक *a. n. sg. acc.* |
| 2 | रजः | रजस् | fr. रजस् *n. sg. acc.* (**3.6:**) |
| 6 | तृष्ण-आसङ्ग- | longing and attachment | |
| 5 | -समुद्भवं | as born of [i.e., increased by] | fr. तृष्ण-आसङ्ग-समुद्भव *a. n. sg. acc.* |
| 1 | विद्धि | know | fr. √विद् *1.P. impv. 2nd sg.* (**5.6.a:**) |

| | | | |
|---|---|---|---|
| 7 | कौन्तेय | (अर्जुन) O Son of कुन्ती | fr. कौन्तेय *m. sg. voc.* |
| 8 | तद् | it | fr. तद् *prn. n. sg. nom.* |
| 11 | कर्म-सङ्गेन | by attachment to activity | fr. कर्म-सङ्ग *m. sg. inst..* |
| 10 | देहिनं | the embodied one | fr. देहिन् *m. sg. acc.* (**3.15:**) |
| 9 | निबध्नाति | binds | fr. नि + √बन्ध् *9.P. pr. 3rd sg.* (**5.3.h:**) |

**तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम्। प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत॥८॥**

(तमः तु अज्ञानजं विद्धि, मोहनं सर्वदेहिनाम्। प्रमादालस्यनिद्राभिः, तद् निबध्नाति भारत॥)

तमः तु अ-ज्ञान-जं सर्व-देहिनां मोहनं विद्धि। तद् प्रमाद-आलस्य-निद्राभिः निबध्नाति, भारत। (**14.8**)

—Whereas, know तमस्—for all those identified with their body—as delusion [i.e., as the lack of discerning the difference between oneself and objects of desire] born of [i.e., perpetuated by] ignorance. It binds by carelessness, laziness, and sleepiness, O अर्जुन.

| | | | |
|---|---|---|---|
| 3 | तमः | तमस् | fr. तमस् *n. sg. acc.* |
| 1 | तु | whereas | fr. तु *in.* |
| 6 | अ-ज्ञान-जं | born of [i.e., perpetuated by] ignorance | fr. अज्ञान-ज *a. n. sg. acc.* (**6.24.3:**) |
| 4 | सर्व-देहिनां | for all who are identified with their body | fr. सर्व-देहिन् *m. pl. gen.* (**3.15:**) |
| 5 | मोहनं | [as] delusion [i.e., as the lack of discerning the difference between oneself and objects of desire] | fr. मोहन *n. sg. acc.* |
| 2 | विद्धि | know | fr. √विद् *1.P. impv. 2nd sg.* (**5.6.a:**) |
| 7 | तद् | it | fr. तद् *prn. n. sg. nom.* |
| 9 | प्रमाद- | by carelessness | |
| 10 | -आलस्य- | laziness | |
| 11 | -निद्राभिः | and sleepiness | fr. प्रमाद-आलस्य-निद्रा *f. pl. inst.* |
| 8 | निबध्नाति | binds | fr. नि + √बन्ध् *9.P. pr. 3rd sg.* (**5.3.h:**) |
| 12 | भारत | (अर्जुन) O Descendant of Emperor भरत, (Brilliant) Son of India | fr. भारत *m. sg. voc.* |

**सत्त्वं सुखे सञ्जयति रजः कर्मणि भारत। ज्ञानमावृत्य तु तमः प्रमादे सञ्जयत्युत॥९॥**

(सत्त्वं सुखे सञ्जयति, रजः कर्मणि भारत। ज्ञानम् आवृत्य तु तमः, प्रमादे सञ्जयति उत॥)

भारत, सत्त्वं सुखे सञ्जयति, रजः कर्मणि, तमः तु ज्ञानम् आवृत्य प्रमादे सञ्जयति उत। (**14.9**)

O अर्जुन, सत्त्व [as though] binds [one] into pleasure and रजस् [as though] binds [one] into activity, whereas तमस्—covering knowledge [by being an impurity to the natural clarity of the सत्त्व mind]—indeed [as though] binds [one] into carelessness.

| | | | |
|---|---|---|---|
| 1 | भारत | (अर्जुन) O (Brilliant) Son of India | fr. भारत *m. sg. voc.* |
| 2 | सत्त्वं | सत्त्व | fr. सत्त्व *n. sg. nom.* |
| 4 | सुखे | into pleasure | fr. सुख *n. sg. loc.* |
| 3 | सञ्जयति | [as though] binds [one] | fr. √सञ्ज् *P. cs. pr. 3rd sg.* |
| 5 | रजः | [and] रजस् [as though] [binds one] | fr. रजस् *n. sg. nom.* |
| 6 | कर्मणि | into activity | fr. कर्मन् *n. sg. loc.* (**3.22:**) |
| 7 | तमः तु | whereas तमस् | fr. तमस् *n. sg. nom.*; तु *in.* |
| 8 | ज्ञानम् आवृत्य | covering knowledge [by being an impurity to the natural clarity of the सत्त्व mind] | fr. ज्ञान *n. sg. acc.*; आवृत्य *in. pt. of* आ + √वृत् (**6.9:**) |
| 11 | प्रमादे | into carelessness | fr. प्रमाद *m. sg. loc.* |
| 10 | सञ्जयति | [as though] binds [one] | fr. √सञ्ज् *P. cs. pr. 3rd sg.* |
| 9 | उत | indeed | fr. उत *in.* (**6.20:**) |

**रजस्तमश्चाभिभूय सत्त्वं भवति भारत। रजः सत्त्वं तमश्चैव तमः सत्त्वं रजस्तथा॥१०॥**

(रजः तमः च अभिभूय, सत्त्वं भवति भारत। रजः सत्त्वं तमः च एव, तमः सत्त्वं रजः तथा॥)

भारत, रजः तमः च अभिभूय सत्त्वं भवति, सत्त्वं तमः च एव रजः, तथा सत्त्वं रजः [च] तमः। (**14.10**)

O अर्जुन, सत्त्व [throughout the day and one's life] arises [by] overwhelming रजस् and तमस्. रजस् arises [by overwhelming] सत्त्व and तमस्. Similarly, तमस् arises [by overwhelming] सत्त्व and रजस्.

| | | | |
|---|---|---|---|
| 1 | भारत | (अर्जुन) O (Brilliant) Son of India | fr. भारत *m. sg. voc.* |
| 5 | रजः तमः च | रजस् and तमस् | fr. रजस् *n. sg. acc.*; तमस् *n. sg. acc.*; च *in.* |
| 4 | अभिभूय | [by] overwhelming | fr. अभिभूय *in. pt. of* अभि + √भू (**6.9:**) |
| 2 | सत्त्वं | सत्त्व | fr. सत्त्व *n. sg. nom.* |
| 3 | भवति | [throughout the day and one's life] arises | fr. √भू *1.P. pr. 3rd sg.* (**5.3:** & **2.3:** & **2.71:**) |
| 7 | सत्त्वं तमः च एव | सत्त्व and तमस् | fr. सत्त्व *n. sg. acc.*; तमस् *n. sg. acc.*; च *in.*; एव *in.* |
| 6 | रजः | रजस् [arises by overwhelming] | fr. रजस् *n. sg. nom.* (**3.6:**) |

| | | | |
|---|---|---|---|
| 8 | तथा | similarly | fr. तथा *in.* (**6.19:**) |
| 10 | सत्त्वं रजः [च] | सत्त्व and रजस् | fr. सत्त्व *n. sg. acc.*; रजस् *n. sg. acc.* |
| 9 | तमः | तमस् [arises by overwhelming] | fr. तमस् *n. sg. nom.* |

**सर्वद्वारेषु देहेऽस्मिन्प्रकाश उपजायते। ज्ञानं यदा तदा विद्याद्विवृद्धं सत्त्वमित्युत॥११॥**

(सर्वद्वारेषु देहे अस्मिन्, प्रकाशः उपजायते। ज्ञानं यदा तदा विद्यात्, विवृद्धं सत्त्वम् इति उत॥)

यदा अस्मिन् देहे सर्व-द्वारेषु ज्ञानं प्रकाशः उपजायते, तदा सत्त्वं विवृद्धम् इति विद्यात् उत। (**14.11**)

When the brightness, which is knowledge, arises in all the sense organs in this body, then one should know indeed that सत्त्व has increased.

| | | | |
|---|---|---|---|
| 1 | यदा | when | fr. यदा *in.* (**6.19:**) |
| 6 | अस्मिन् देहे | in this body | fr. इदम् *prn. m. sg. loc.*; देह *m. sg. loc.* |
| 5 | सर्व-द्वारेषु | in all the sense organs | fr. सर्व-द्वार *n. pl. loc.* |
| 3 | ज्ञानं | which is knowledge | fr. ज्ञान *n. sg. nom.* |
| 2 | प्रकाशः | the brightness | fr. प्रकाश *m. sg. nom.* |
| 4 | उपजायते | arises | fr. उप + √जन् *4.Ā. pr.* 3$^{rd}$ *sg.* (**5.16.4:**) |
| 7 | तदा | then | fr. तदा *in.* (**6.19:**) |
| 9 | सत्त्वं | सत्त्व | fr. सत्त्व *n. sg. acc.* |
| 10 | विवृद्धम् | has increased | fr. विवृद्ध *pp. of* वि + √वृध् *a. n. sg. acc.* (**2.76:** & **.78:**) |
| 8 | इति विद्यात् उत | one should know indeed that | fr. इति *in.*; √विद् *2.P. pot.* 3$^{rd}$ *sg.* (**7.25.1.d:**); उत *in.* (**6.20:**) |

**लोभः प्रवृत्तिरारम्भः कर्मणामशमः स्पृहा। रजस्येतानि जायन्ते विवृद्धे भरतर्षभ॥१२॥**

(लोभः प्रवृत्तिः आरम्भः, कर्मणाम् अशमः स्पृहा। रजसि एतानि जायन्ते, विवृद्धे भरतर्षभ॥)

लोभः, प्रवृत्तिः, कर्मणाम् आरम्भः, अ-शमः, स्पृहा — एतानि रजसि विवृद्धे जायन्ते, भरत-ऋषभ। (**14.12**)

Greed, [physical] restlessness, कर्मन् (action that binds), [mental] restlessness, attraction—these arise when रजस् has increased, O अर्जुन.

| | | | |
|---|---|---|---|
| 1 | लोभः | greed | fr. लोभ *m. sg. nom.* |
| 2 | प्रवृत्तिः | [physical] restlessness | fr. प्रवृत्ति *f. sg. nom.* |
| 3 | कर्मणाम् आरम्भः | कर्मन् (action that binds), the undertaking of action | fr. कर्मन् *n. pl. gen.* (**3.22:** & **2.92:**); आरम्भ *m. sg. nom.* |
| 4 | अ-शमः | [mental] restlessness | fr. अशम *m. sg. nom.* |
| 5 | स्पृहा | attraction | fr. स्पृहा *f. sg. nom.* |

| | | | |
|---|---|---|---|
| 6 | एतानि | these | fr. एतद् *prn. m. pl. nom.* |
| 8 | रजसि विवृद्धे | when रजस् has increased | fr. रजस् *n. sg. loc.* (**3.6:**); विवृद्ध *pp. of* वि + √वृध् *pt. n. sg. loc.* (**2.76:** & **.78:**) (**7.14.1:**) |
| 7 | जायन्ते | arise | fr. √जन् *4.Ā. pr. 3rd pl.* (**5.16.4:**) |
| 9 | भरत-ऋषभ | (अर्जुन) O Prominent Among the Descendants of भरत | fr. भरत-ऋषभ *m. sg. voc.* |

**अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च। तमस्येतानि जायन्ते विवृद्धे कुरुनन्दन॥१३॥**

(अप्रकाशः अप्रवृत्तिः च, प्रमादः मोहः एव च। तमसि एतानि जायन्ते, विवृद्धे कुरुनन्दन॥)

अ-प्रकाशः अ-प्रवृत्तिः च, प्रमादः मोहः एव च — एतानि तमसि विवृद्धे जायन्ते, कुरु-नन्दन। (**14.13**)

Dullness (here described as a darkness over the mind), absence of [physical] activity, carelessness, and delusion—these arise when तमस् has increased, O अर्जुन.

| | | | |
|---|---|---|---|
| 1 | अ-प्रकाशः | dullness [here described as a darkness over the mind] | fr. अप्रकाश *m. sg. nom.* |
| 2 | अ-प्रवृत्तिः च | [and] absence of [physical] activity | fr. अप्रवृत्ति *f. sg. nom.*; च *in.* |
| 3 | प्रमादः | carelessness | fr. प्रमाद *m. sg. nom.* |
| 4 | मोहः एव च | and delusion | fr. मोह *m. sg. nom.*; एव *in.* (**6.19:**); च *in.* |
| 5 | एतानि | these | fr. एतद् *prn. m. pl. nom.* |
| 7 | तमसि विवृद्धे | when तमस् has increased | fr. तमस् *n. sg. loc.* (**3.6:**); विवृद्ध *pp. of* वि + √वृध् *pt. n. sg. loc.* (**2.76:** & **.78:**) (**7.14.1:**) |
| 6 | जायन्ते | arise | fr. √जन् *4.Ā. pr. 3rd pl.* (**5.16.4:**) |
| 8 | कुरु-नन्दन | (अर्जुन) O Joy of the कुरु People | fr. कुरु-नन्दन *m. sg. voc.* |

**यदा सत्त्वे प्रवृद्धे तु प्रलयं याति देहभृत्। तदोत्तमविदां लोकानमलान्प्रतिपद्यते॥१४॥**

(यदा सत्त्वे प्रवृद्धे तु, प्रलयं याति देहभृत्। तदा उत्तमविदां लोकान्, अमलान् प्रतिपद्यते॥)

यदा तु सत्त्वे प्रवृद्धे देह-भृत् प्रलयं याति, तदा उत्तम-विदाम् अ-मलान् लोकान् प्रतिपद्यते। (**14.14**)

But upon सत्त्व being predominant, when an embodied one dies, that one goes to the virtuous worlds of those who know the most exalted [i.e., the heavens].

| | | | |
|---|---|---|---|
| 1 | यदा तु | but when | fr. यदा *in.* (**6.19:**); तु *in.* |
| 2 | सत्त्वे प्रवृद्धे | upon सत्त्व being predominant | fr. सत्त्व *n. sg. loc.*; प्रवृद्ध *pp. of* प्र + √वृध् *pt. n. sg. loc.* (**2.76:** & **.78:**) (**7.14.1:**) |
| 3 | देह-भृत् | the embodied one | fr. देह-भृत् *m. sg. nom.* (**6.24.2:** & **3.5:**) |
| 4 | प्रलयं याति | dies (goes to [physical] dissolution) | fr. प्रलय *m. sg. acc.*; √या *2.P. pr. 3rd sg.* (**7.8.2:**) |

| | | | |
|---|---|---|---|
| 5 | तदा | then | fr. तदा *in.* (**6.19:**) |
| 9 | उत्तम-विदाम् | of those who know the most exalted | fr. उत्तम-विद् *m. pl. gen.* (**6.24:** & **3.6:**) |
| 7 | अ-मलान् | to the virtuous | fr. अमल *a. m. pl. acc.* |
| 8 | लोकान् | [subtle] worlds | fr. लोक *m. pl. acc.* |
| 6 | प्रतिपद्यते | one goes | fr. प्रति + √पद् *4.Ā. pr. 3rd sg.* |

**रजसि प्रलयं गत्वा कर्मसङ्गिषु जायते। तथा प्रलीनस्तमसि मूढयोनिषु जायते॥१५॥**

(रजसि प्रलयं गत्वा, कर्मसङ्गिषु जायते। तथा प्रलीनः तमसि, मूढयोनिषु जायते॥)

रजसि प्रलयं गत्वा कर्म-सङ्गिषु जायते। तथा तमसि प्रलीनः मूढ-योनिषु जायते। (**14.15**)

Upon रजस् [being predominant], after dying, one is born among those committed to [the results of] actions [i.e., born among humans]. Similarly, upon तमस् [being predominant], having died, one is born in wombs of those who lack discriminative faculties [i.e., born among animals, plants, etc.].

| | | | |
|---|---|---|---|
| 1 | रजसि | upon रजस् [being predominant] | fr. रजस् *n. sg. loc.* (**3.6:**) (**7.13.1.h:**) |
| 2 | प्रलयं गत्वा | after dying | fr. प्रलय *m. sg. acc.*; गत्वा *in. pt. of* √गम् (**6.9:** & **.6:**) (**7.19:** & **7.8.2:**) |
| 4 | कर्म-सङ्गिषु | among those committed to [the results of] actions [i.e., among humans] | fr. कर्म-सङ्गिन् *a. m. pl. loc.* (**3.15:**) (**7.13.1.a:**) |
| 3 | जायते | one is born | fr. √जन् *4.Ā. pr. 3rd sg.* (**5.16.4:**) |
| 5 | तथा | similarly | fr. तदा *in.* (**6.19:**) |
| 6 | तमसि | upon तमस् [being predominant] | fr. तमस् *n. sg. loc.* (**3.6:**) (**7.13.1.h:**) |
| 7 | प्रलीनः | having died | fr. प्रलीन *pp. of* प्र + √ली *a. m. sg. nom.* (**6.6:**) |
| 9 | मूढ-योनिषु | in wombs of those who lack discriminative faculties [i.e., among animals, plants, etc.] | fr. मूढ-योनि *f. pl. loc.* |
| 8 | जायते | one is born | fr. √जन् *4.Ā. pr. 3rd sg.* (**5.16.4:**) |

**कर्मणः सुकृतस्याहुः सात्त्विकं निर्मलं फलम्। रजसस्तु फलं दुःखमज्ञानं तमसः फलम्॥१६॥**

(कर्मणः सुकृतस्य आहुः, सात्त्विकं निर्मलं फलम्। रजसः तु फलं दुःखम्, अज्ञानं तमसः फलम्॥)

सु-कृतस्य कर्मणः निर्-मलं सात्त्विकं फलम् [इति] आहुः, रजसः तु दुःखं फलं, तमसः अ-ज्ञानं फलम्। (**14.16**)

They say that, for virtuous action, the result—[being] connected to सत्त्व—is free from impurity; but for रजस् [cutting corners to get results], the result is pain; and for तमस्, the result is ignorance [i.e., the inability to get out of ignorance—birth as an animal, etc.].

| | | | |
|---|---|---|---|
| 2 | सु-कृतस्य | for virtuous | fr. सु-कृत *n. sg. gen.* |
| 4 | कर्मणः | action | fr. कर्मन् *n. sg. gen.* (**3.22:**) |
| 7 | निर्-मलं | [is] free from impurity | fr. निस्-मल *a. n. sg. nom.* (**2.24:** & **.29:**) |
| 6 | सात्त्विकं | [being] connected to सत्त्व | fr. सात्त्विक *a. n. sg. nom.* |
| 5 | फलम् | the result | fr. फल *n. sg. nom.* |
| 1 | [इति] आहुः | they say that | fr. √अह् *P. perf. 3rd pl.* (**5.8.5:**) |
| 8 | रजसः तु | but for रजस् [cutting corners to get results] | fr. रजस् *n. sg. gen.* (**3.6:**); तु *in.* |
| 10 | दुःखं | [is] pain | fr. दुःख *n. sg. nom.* |
| 9 | फलं | the result | fr. फल *n. sg. nom.* |
| 11 | तमसः | [and] for तमस् | fr. तमस् *n. sg. gen.* (**3.6:**) |
| 13 | अ-ज्ञानं | [is] ignorance [i.e., the inability to get out of ignorance—birth as an animal, etc.] | fr. अज्ञान *n. sg. nom.* |
| 12 | फलम् | the result | fr. फल *n. sg. nom.* |

**सत्त्वात्सञ्जायते ज्ञानं रजसो लोभ एव च। प्रमादमोहौ तमसो भवतोऽज्ञानमेव च॥१७॥**

(सत्त्वात् सञ्जायते ज्ञानं, रजसः लोभः एव च। प्रमादमोहौ तमसः, भवतः अज्ञानम् एव च॥)

सत्त्वात् ज्ञानं सञ्जायते, रजसः लोभः एव च। तमसः प्रमाद-मोहौ भवतः अ-ज्ञानम् एव च। (**14.17**)

From सत्त्व is born knowledge and from रजस् is only greed. From तमस् are born carelessness and delusion, and also [continuance in] ignorance.

| | | | |
|---|---|---|---|
| 1 | सत्त्वात् | from सत्त्व | fr. सत्त्व *n. sg. abl.* |
| 3 | ज्ञानं | knowledge | fr. ज्ञान *n. sg. nom.* |
| 2 | सञ्जायते | is born | fr. सम् + √जन् *4.Ā. pr. 3rd sg.* (**2.55:** & **5.16.4:**) |
| 4 | रजसः | [and] from रजस् [is] | fr. रजस् *n. sg. abl.* (**3.6:**) |
| 5 | लोभः एव च | [and] only greed | fr. लोभ *m. sg. nom.*; एव *in.* (**6.19:**); च *in.* |

| | | | |
|---|---|---|---|
| 6 | तमसः | from तमस् | fr. तमस् *n. sg. abl.* (**3.6:**) |
| 8 | प्रमाद-मोहौ | carelessness and delusion | fr. प्रमाद-मोह *m. du. nom.* |
| 7 | भवतः | are born | fr. √भू *1.P. pr. 3rd du.* (**5.5:**) |
| 9 | अ-ज्ञानम् एव च | and also [continuance in] ignorance | fr. अज्ञान *n. sg. nom.*; एव *in.* (**6.19:**); च *in.* |

**ऊर्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः। जघन्यगुणवृत्तस्था अधो गच्छन्ति तामसाः॥१८॥**
(ऊर्ध्वं गच्छन्ति सत्त्वस्थाः, मध्ये तिष्ठन्ति राजसाः। जघन्यगुणवृत्तस्थाः, अधः गच्छन्ति तामसाः॥)
सत्त्व-स्थाः ऊर्ध्वं गच्छन्ति। राजसाः मध्ये तिष्ठन्ति। जघन्य-गुण-वृत्त-स्थाः तामसाः अधः गच्छन्ति। (**14.18**)
Those who live a life [predominantly] of सत्त्व go up [i.e., get birth in heaven]. Those predominantly रजस् stay in the middle [i.e., get human birth]. Those predominantly तमस्, who are situated in the condition of this bottom गुण, go down [i.e., get a lower birth].

| | | | |
|---|---|---|---|
| 1 | सत्त्व-स्थाः | those who live a life [predominantly] of सत्त्व | fr. सत्त्व-स्थ *a. m. pl. nom.* (**6.24.1:**) |
| 3 | ऊर्ध्वं | up [i.e., get birth in heaven] | fr. ऊर्ध्वम् *in.* |
| 2 | गच्छन्ति | go | fr. √गम् *1.P. pr. 3rd pl.* (**5.15.6:**) |
| 4 | राजसाः | those predominantly रजस् | fr. राजस *a. m. pl. nom.* |
| 6 | मध्ये | in the middle [i.e., get human birth] | fr. मध्ये *in.* |
| 5 | तिष्ठन्ति | stay | fr. √स्था *1.P. pr. 3rd pl.* (**5.15.4:**) |
| 9 | जघन्य-गुण- | of this bottom गुण | |
| 8 | -वृत्त-स्थाः | who are situated in the condition | fr. जघन्य-गुण-वृत्त-स्थ *a. m. pl. nom.* (**6.24.1:**) |
| 7 | तामसाः | those predominantly तमस् | fr. तामस *a. m. pl. nom.* |
| 11 | अधः | down [i.e., get a lower birth] | fr. अधस् *in.* |
| 10 | गच्छन्ति | go | fr. √गम् *1.P. pr. 3rd pl.* (**5.15.6:**) |

**नान्यं गुणेभ्यः कर्तारं यदा द्रष्टानुपश्यति। गुणेभ्यश्च परं वेत्ति मद्भावं सोऽधिगच्छति॥१९॥**

(न अन्यं गुणेभ्यः कर्तारं, यदा द्रष्टा अनुपश्यति। गुणेभ्यः च परं वेत्ति, मद्भावं सः अधिगच्छति॥)

यदा द्रष्टा न गुणेभ्यः अन्यं कर्तारम् अनुपश्यति, गुणेभ्यः च परं वेत्ति, [तदा] सः मद्-भावम् अधिगच्छति। (**14.19**)

When the seer sees [according to the teaching] that there is not a doer other than the गुण-s and knows [the self] as beyond the गुण-s, [then] that one attains My nature [called मोक्ष].

| | | | |
|---|---|---|---|
| 1 | यदा | when | fr. यदा *in.* (**6.19:**) |
| 2 | द्रष्टा | the seer | fr. द्रष्टृ *m. sg. nom.* (**3.38:**) |
| 4 | न | that there is not | fr. न *in.* |
| 7 | गुणेभ्यः | than the गुण-s | fr. गुण *m. pl. abl.* |
| 6 | अन्यं | other | fr. अन्य *prn. a. m. sg. acc.* (**4.16.1:**) |
| 5 | कर्तारम् | a doer | fr. कर्तृ *m. sg. acc.* (**3.38:**) |
| 3 | अनुपश्यति | sees [according to the teaching] | fr. अनु + √दृश् *1.P. pr. 3rd sg.* (**5.15.6:**) |
| 10 | गुणेभ्यः च | the गुण-s | fr. गुण *m. pl. abl.*; च *in.* |
| 9 | परं | as beyond | fr. पर *prn. a. m. sg. acc.* (**4.16.3:**) |
| 8 | वेत्ति | and knows [the self] | fr. √विद् *2.P. pr. 3rd sg.* (**5.3:** & **2.42:**) |
| 11 | [तदा] सः | [then] that one | fr. तद् *prn. m. sg. nom.* |
| 13 | मद्-भावम् | My nature [called मोक्ष] | fr. मद्-भाव *m. sg. acc.* |
| <u>12</u> | अधिगच्छति | attains | fr. अधि + √गम् *1.P. pr. 3rd sg.* (**5.15.6:**) |

**गुणानेतानतीत्य त्रीन्देही देहसमुद्भवान्। जन्ममृत्युजरादुःखैर्विमुक्तोऽमृतमश्नुते॥२०॥**

(गुणान् एतान् अतीत्य त्रीन्, देही देहसमुद्भवान्। जन्ममृत्युजरादुःखैः, विमुक्तः अमृतम् अश्नुते॥)

एतान् देह-समुद्भवान् त्रीन् गुणान् अतीत्य, जन्म-मृत्यु-जरा-दुःखैः विमुक्तः देही अ-मृतम् अश्नुते। (**14.20**)

Transcending these three गुण-s that give rise to the body—and freed from birth, death, ageing, and sorrow [i.e., guilt and hurt]—the embodied one attains immortality.

| | | | |
|---|---|---|---|
| 2 | एतान् | these | fr. एतद् *prn. m. pl. acc.* |
| 4 | देह-समुद्भवान् | that give rise to the body | fr. देह-समुद्भव *a. m. pl. acc.* |
| 3 | त्रीन् गुणान् | three गुण-s | fr. त्रि *num. a. m. pl. acc.* (**4.23.a:**); गुण *m. pl. acc.* |
| 1 | अतीत्य | transcending | fr. अतीत्य *in. pt. of* अति + √इ (**6.9:**) |

| | | | |
|---|---|---|---|
| 6 | जन्म-मृत्यु- | from birth death | |
| 7 | -जरा-दुःखैः | ageing and sorrow [i.e., guilt and hurt] | fr. जन्म-मृत्यु-जरा-दुःख *n. pl. inst.* (**7.9.11:**) |
| 5 | विमुक्तः | [and] freed | fr. विमुक्त *pp. of* वि + √मुच् *a. m. sg. nom.* (**2.80:**) |
| 8 | देही | the embodied one | fr. देहिन् *m. sg. nom.* (**3.15:**). |
| 10 | अ-मृतम् | immortality | fr. अमृत *pp. of* √मृ *n. sg. acc.* |
| 9 | अश्नुते | attains | fr. √अश् *5.Ā. pr. 3rd sg.* (**5.3:**) |

**अर्जुन उवाच।**
**कैर्लिङ्गैस्त्रीन्गुणानेतानतीतो भवति प्रभो। किमाचारः कथं चैतांस्त्रीन्गुणानतिवर्तते॥ २१॥**
(अर्जुनः उवाच। कैः लिङ्गैः त्रीन् गुणान् एतान्, अतीतः भवति प्रभो। किमाचारः कथं च एतान्, त्रीन् गुणान् अतिवर्तते॥ )
अर्जुनः उवाच। कैः लिङ्गैः एतान् त्रीन् गुणान् अतीतः भवति, प्रभो। किम्-आचारः। कथं च एतान् त्रीन् गुणान् अतिवर्तते। (**14.21**)
अर्जुन said: By what indications is [it known that] one has transcended these three गुण-s, O Lord? What is [that one's] conduct? And how does one transcend these three गुण-s?

| | | | |
|---|---|---|---|
| 1 | अर्जुनः उवाच | अर्जुन said | fr. अर्जुन *m. sg. nom.*; √वच् *P. perf. 3rd sg.* (**5.10.3:**) |
| 2 | कैः लिङ्गैः | by what indications? | fr. किम् *prn. n. pl. inst.*; लिङ्ग *n. pl. inst.* |
| 5 | एतान् | these | fr. एतद् *m. pl. acc.* |
| 6 | त्रीन् गुणान् | three गुण-s | fr. त्रि *num. a. m. pl. acc.* (**4.23.a:**); गुण *m. pl. acc.* |
| 4 | अतीतः | one has transcended | fr. अतीत *pp. of* अति + √इ *a. m. sg. nom.* |
| 3 | भवति | is [it known that] | fr. √भू *1.P. pr. 3rd sg.* (**5.3:** & **2.3:** & **2.71:**) |
| 7 | प्रभो | O Lord | fr. प्रभु *m. sg. voc.* |
| 8 | किम्-आचारः | what is [that one's] conduct? | fr. किम्-आचार *m. sg. nom.* |
| 9 | कथं च | and how? | fr. कथम् *in.* (**6.19:**); च *in.* |
| 11 | एतान् | these | fr. एतद् *prn. m. pl. acc.* |
| 12 | त्रीन् गुणान् | three गुण-s | fr. त्रि *num. a. m. pl. acc.* (**4.23.a:**); गुण *m. pl. acc.* |
| 10 | अतिवर्तते | does one transcend | fr. अति + √वृत् *1.Ā. pr. 3rd sg.* |

**श्रीभगवानुवाच।**

**प्रकाशं च प्रवृत्तिं च मोहमेव च पाण्डव। न द्वेष्टि सम्प्रवृत्तानि न निवृत्तानि काङ्क्षति॥२२॥**

**उदासीनवदासीनो गुणैर्यो न विचाल्यते। गुणा वर्तन्त इत्येव योऽवतिष्ठति नेङ्गते॥२३॥**

**समदुःखसुखः स्वस्थः समलोष्टाश्मकाञ्चनः। तुल्यप्रियाप्रियो धीरस्तुल्यनिन्दात्मसंस्तुतिः॥२४॥**

**मानापमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः। सर्वारम्भपरित्यागी गुणातीतः स उच्यते॥२५॥**

(श्रीभगवान् उवाच। प्रकाशं च प्रवृत्तिं च, मोहम् एव च पाण्डव। न द्वेष्टि सम्प्रवृत्तानि, न निवृत्तानि काङ्क्षति॥
उदासीनवत् आसीनः, गुणैः यः न विचाल्यते। गुणाः वर्तन्ते इति एव, यः अवतिष्ठति न इङ्गते॥
समदुःखसुखः स्वस्थः, समलोष्टाश्मकाञ्चनः। तुल्यप्रियाप्रियः धीरः, तुल्यनिन्दात्मसंस्तुतिः।
मानापमानयोः तुल्यः, तुल्यः मित्रारिपक्षयोः। सर्वारम्भपरित्यागी, गुणातीतः सः उच्यते॥)

श्री-भगवान् उवाच। पाण्डव, [यः] प्रकाशं च प्रवृत्तिं च मोहम् एव च सम्प्रवृत्तानि न द्वेष्टि, निवृत्तानि न काङ्क्षति, यः उदासीनवत् आसीनः गुणैः न विचाल्यते, यः "गुणाः वर्तन्ते" इति एव अवतिष्ठति, न इङ्गते, सम-दुःख-सुखः, स्व-स्थः, सम-लोष्ट-अश्म-काञ्चनः, तुल्य-प्रिय-अ-प्रियः, धीरः, तुल्य-निन्दा-आत्म-संस्तुतिः, मान-अपमानयोः तुल्यः, मित्र-अरि-पक्षयोः तुल्यः, सर्व-आरम्भ-परित्यागी — सः गुण-अतीतः उच्यते। (**14.22-25**)

The Lord said: O अर्जुन, Brightness, [attachment-based] activity, and, indeed, delusion—the one who is not displeased [when they] wax, nor longs for [them when they] wane [throughout the day and one's life]; who, remaining seemingly indifferent, is not disturbed by the गुण-s; who abides—[knowing] indeed that the गुण-s act—and does not waiver [from this knowledge]; who is the same in pleasure and pain [and] abides in the self; for whom a lump of clay, a stone, and gold are [transcended as] the same; for whom the pleasant and the unpleasant are [objectively viewed] the same [way]; who is wise; for whom censure and praise of the self are alike [addressing only the mind or body—as the आत्मन् cannot be flattered nor damaged by any misconception of it]; who is the same in respect and disrespect [which express only the others' understanding and value structure, unrelated to the self]; the same regarding the side of a friend or an enemy [seeing neither as friend nor enemy]; and who has completely renounced [doership in] all activities—that one is called गुणातीत (beyond the गुण-s).

| | | | |
|---|---|---|---|
| 1 | श्री-भगवान् उवाच | the Lord said | fr. श्री-भगवत् *m. sg. nom.*; √वच् *P. perf. 3rd sg.* (**5.10.3:**) |
| 2 | पाण्डव | (अर्जुन) O Son of King पाण्डु | fr. पाण्डव *m. sg. voc.* |
| 3 | प्रकाशं च | [and] brightness | fr. प्रकाश *m. sg. acc.*; च *in.* |
| 4 | प्रवृत्तिं च | [and] [attachment based] activity | fr. प्रवृत्ति *f. sg. acc.*; च *in.* |
| 5 | मोहम् एव च | and indeed delusion | fr. मोह *m. sg. acc.*; एव *in.* (**6.19:**); च *in.* |
| 7 | सम्प्रवृत्तानि | [when they] wax | fr. सम्प्रवृत्त *pp. of* सम् + प्र +√वृत् *a. n. pl. acc.* |
| 6 | न द्वेष्टि | [the one who] is not displeased [at] | fr. न *in.*; √द्विष् *2.P. pr. 3rd sg.* (**2.88:**) |

| | | | |
|---|---|---|---|
| 9 | निवृत्तानि | [them when they] wane [throughout the day and one's life] | fr. निवृत्त *pp. of* नि +√वृत् *a. n. pl. acc.* |
| 8 | न काङ्क्षति | nor longs for | fr. न *in.*; √काङ्क्ष् *1.P. pr. 3rd sg.* |
| 10 | यः | who | fr. यद् *prn. m. sg. nom.* |
| 12 | उदासीनवत् | seemingly indifferent | fr. उदासीनवत् *in.* (**6.19:**) |
| 11 | आसीनः | remaining | fr. आसीन *pr. mid. pt. of* √आस् *a. m. sg. nom.* (**6.5:** *irreg.* ◦ईन *for* ◦आन) |
| 14 | गुणैः | by the गुण-s | fr. गुण *m. pl. inst.* |
| 13 | न विचाल्यते | is not disturbed | fr. न *in.*; वि + √चल् *Ā. cs. ps. pr. 3rd sg.* |
| 15 | यः | who | fr. यद् *prn. m. sg. nom.* |
| 18 | गुणाः वर्तन्ते | the गुण-s act | fr. गुण *m. pl. nom.*; √वृत् *1.Ā. pr. 3rd pl.* |
| 17 | इति एव | [knowing] indeed that | fr. इति *in.*; एव *in.* (**6.19:**) |
| 16 | अवतिष्ठति | abides | fr. अव + √स्था *1.P. pr. 3rd sg.* (**5.15.4:**) |
| 19 | न इङ्गते | [and] does not waiver [from this knowledge] | fr. न *in.*; √इङ्ग् *1.Ā. pr. 3rd sg.* |
| 20 | सम-दुःख-सुखः | who is the same in pleasure and pain | fr. सम-दुःख-सुख *a. m. sg. nom.* |
| 21 | स्व-स्थः | [and] abides in oneself | fr. स्व-स्थ *a. m. sg. nom.* (**6.24.1:**) |
| 25 | सम- | are [transcended as] the same | |
| 22 | -लोष्ट- | for whom a lump of clay | |
| 23 | -अश्म- | a stone | |
| 24 | -काञ्चनः | and gold | fr. सम-लोष्ट-अश्म-काञ्चन *a. m. sg. nom.* |
| 27 | तुल्य- | are [objectively viewed] the same [way] | |
| 26 | -प्रिय-अ-प्रियः | for whom the pleasant and the unpleasant | fr. तुल्य-प्रिय-अप्रिय *a. m. sg. nom.* |
| 28 | धीरः | who is wise | fr. धीर *a. m. sg. nom.* |
| 31 | तुल्य- | are alike | |
| 29 | -निन्दा- | for whom censure | |
| 30 | -आत्म-संस्तुतिः | and praise of the self | fr. तुल्य-निन्दा-आत्म-संस्तुति *a. m. sg. nom.* |
| 33 | मान-अपमानयोः | in respect and disrespect | fr. मान-अपमान *m. du. loc.* (**7.13.1.h:**) |
| 32 | तुल्यः | [who is] the same | fr. तुल्य *a. m. sg. nom.* |

| | | | |
|---|---|---|---|
| 36 | मित्र-अरि- | of a friend or an enemy | |
| 35 | -पक्षयोः | regarding the side[s] | fr. मित्र-अरि-पक्ष *m. du. loc.* (**7.13.2.b:**) |
| 34 | तुल्यः | the same | fr. तुल्य *a. m. sg. nom.* |
| 38 | सर्व-आरम्भ- | [doership in] all activities | |
| 37 | -परित्यागी | [and] who has completely renounced | fr. सर्व-आरम्भ-परित्यागिन् *a. m. sg. nom.* |
| 39 | सः | that one | fr. तद् *prn. m. sg. nom.* |
| 41 | गुण-अतीतः | गुणातीत (beyond the गुण-s) | fr. गुण *a. m. sg. nom.* |
| 40 | उच्यते | is called | fr. √वच् *ps. pr. 3rd sg.* (**5.37.6:** & **2.3.a:**) |

**मां च योऽव्यभिचारेण भक्तियोगेन सेवते। स गुणान्समतीत्यैतान्ब्रह्मभूयाय कल्पते॥ २६॥**

(मां च यः अव्यभिचारेण, भक्तियोगेन सेवते। सः गुणान् समतीत्य एतान्, ब्रह्मभूयाय कल्पते॥ )

यः च माम् अ-व्यभिचारेण भक्ति-योगेन सेवते, सः एतान् गुणान् समतीत्य ब्रह्म-भूयाय कल्पते। (**14.26**)

The one who seeks Me with unswerving devotion [i.e., commitment to attain Me through this teaching]—that one transcends these गुण-s, [i.e.,] becomes fit for being ब्रह्मन्.

| | | | |
|---|---|---|---|
| 1 | यः च | the one who | fr. यद् *prn. m. sg. nom.*; च *in.* |
| 3 | माम् | Me | fr. अहम् *prn. sg. acc.* |
| 4 | अ-व्यभिचारेण | with unswerving | fr. अव्यभिचार *m. sg. inst.* (**2.92:**) |
| 5 | भक्ति-योगेन | devotion [i.e., commitment to attain Me through this teaching] | fr. भक्ति-योग *m. sg. inst.* |
| 2 | सेवते | seeks | fr. √सेव् *1.Ā. pr. 3rd sg.* |
| 6 | सः | that one | fr. तद् *prn. m. sg. nom.* |
| 8 | एतान् गुणान् | these गुण-s | fr. एतद् *prn. m. pl. acc.*; एतद् *m. pl. acc.* |
| 7 | समतीत्य | transcends | fr. समतीत्य *in. pt. of* सम् + अति + √इ (**6.9:**) |
| 10 | ब्रह्म-भूयाय | for being ब्रह्मन् | fr. ब्रह्म-भूय *n. sg. dat.* (**7.10.B.1:**) |
| 9 | कल्पते | [i.e.] becomes fit | fr. √क्लृप् *1.Ā. pr. 3rd sg.* (**5.3:** & **2.3:**) |

**ब्रह्मणो हि प्रतिष्ठाहममृतस्याव्ययस्य च। शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य च॥ २७॥**
(ब्रह्मणः हि प्रतिष्ठा अहम्, अमृतस्य अव्ययस्य च। शाश्वतस्य च धर्मस्य, सुखस्य ऐकान्तिकस्य च॥ )
अ-मृतस्य हि (=यस्मात्), अ-व्ययस्य च, शाश्वतस्य, धर्मस्य च, सुखस्य, ऐकान्तिकस्य च ब्रह्मणः प्रतिष्ठा अहम्। (**14.27**)
—Because I [the "I" which is क्षेत्रज्ञ and is महेश्वर] am the प्रतिष्ठा (basis) of [knowing and, thus, of being that] ब्रह्मन्—which is deathless, changeless, ever the same; [is] धर्म (that which supports); is fulfillment; and is unfailing [i.e., not subject to negation].

| | | | |
|---|---|---|---|
| 5 | अ-मृतस्य | which is deathless | fr. अमृत *pp. of* √मृ *a. n. sg. gen.* |
| 1 | हि (=यस्मात्) | because | fr. हि *in.* |
| 6 | अ-व्ययस्य च | [and] changeless | fr. अव्यय *n. sg. gen.*; च *in.* |
| 7 | शाश्वतस्य | ever the same | fr. शाश्वत *a. n. sg. gen.* |
| 8 | धर्मस्य च | [and] [is] धर्म (that which supports) | fr. धर्म *m. sg. gen.*; च *in.* |
| 9 | सुखस्य | [is] fulfillment | fr. सुख *n. sg. gen.* |
| 10 | ऐकान्तिकस्य च | and [is] unfailing [i.e., not subject to negation] | fr. ऐकान्तिक *a. n. sg. gen.*; च *in.* |
| 4 | ब्रह्मणः | of [knowing and, thus, being that] ब्रह्मन् | fr. ब्रह्मन् *n. sg. gen.* (**3.22:**) |
| 3 | प्रतिष्ठा | the प्रतिष्ठा (basis) | fr. प्रतिष्ठा *f. sg. nom.* |
| 2 | अहं | I [the "I" which is क्षेत्रज्ञ and is महेश्वर] [am] | fr. अहम् *prn. sg. nom.* |

**ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे गुणत्रयविभागयोगो नाम चतुर्दशोऽध्यायः॥१४॥**

(ओं तद् सत्। इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे गुणत्रयविभागयोगः नाम चतुर्दशः अध्यायः॥)

ओं तद् सत्। इति श्रीमद्-भगवद्-गीतासु उपनिषत्सु ब्रह्म-विद्यायां योग-शास्त्रे श्री-कृष्ण-अर्जुन-संवादे गुण-त्रय-विभाग-योगः नाम चतुर्-दशः अध्यायः। (**14**)

ओं (ब्रह्मन्, the witness of all) is that [only] reality. Thus ends the fourteenth chapter, called "The Topic of the Distinction of the Three गुण-s," of the [eighteen chapters of] *Songs of the Glorious Lord*, which is [looked upon as] उपनिषद् [and whose teaching is] in [the form of] a dialogue between श्री कृष्ण and अर्जुन, [the subject matter being] a knowledge of ब्रह्मन् and योग.

| | | | |
|---|---|---|---|
| 1 | ओं | ओम् (ब्रह्मन्, the witness of all,) | fr. ओम् *in.* |
| 2 | तद् सत् | [is] that [only] reality | fr. तद् *prn. n. sg. nom.*; सत् *n. sg. nom.* |
| 3 | इति | (quote-end quote), thus ends | fr. इति *in.* |
| 11 | श्रीमद्- | of the venerable, the glorious | |
| 12 | -भगवद्- | one having [limitless] glories, Lord | |
| 10 | -गीतासु | in [i.e., of] songs | fr. श्रीमत्-भगवत्-गीता *f. pl. loc.* (**2.43:**) |
| 13 | उपनिषत्सु | [which are/is looked upon as] उपनिषद्, sacred scripture | fr. उपनिषद् *f. pl. loc.* (**6.24:**) |
| 18 | ब्रह्म- | of ब्रह्मन् (reality/सत्) | |
| 17 | -विद्यायां | [and] a knowledge | fr. ब्रह्म-विद्या *f. sg. loc.* |
| 19 | योग-शास्त्रे | [and instruction of] योग (means, discipline, etc.) | fr. योग-शास्त्र *n. sg. loc.* |
| 15 | श्री-कृष्ण- | between Lord कृष्ण | |
| 16 | -अर्जुन- | and अर्जुन | |
| 14 | -संवादे | in [the form of] a dialogue | fr. श्री-कृष्ण-अर्जुन-संवाद *n. sg. loc.* (**2.7:**) |
| 9 | गुण-त्रय- | of the three गुण-s | |
| 8 | -विभाग- | of the division | |
| 7 | -योगः | the topic | fr. गुण-त्रय-विभाग-योग *a. m. sg. nom.* |
| 6 | नाम | by the name, called | fr. नाम *in.* |
| 4 | चतुर्-दशः | the fourteenth | fr. चतुर्-दश *ordinal a. m. sg. nom.* |
| 5 | अध्यायः | chapter | fr. अध्याय *m. sg. nom.* |

# अथ पञ्चदशोऽध्यायः

**श्रीभगवानुवाच।**

**ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम्। छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित्॥१॥**

(श्रीभगवान् उवाच। ऊर्ध्वमूलम् अधःशाखम्, अश्वत्थं प्राहुः अव्ययम्। छन्दांसि यस्य पर्णानि, यः तं वेद सः वेदविद्॥)

श्री-भगवान् उवाच। ऊर्ध्व-मूलम् [उत्कृष्ट-मूलम् इत्यर्थः], अधः-शाखम् [निकृष्ट-शाखम् इत्यर्थः], अ-व्ययम् अश्वत्थं प्राहुः, छन्दांसि यस्य पर्णानि। यः तं वेद, सः वेद-विद्। (**15.1**)

The Lord said: They say of the imperishable अश्वत्थ tree [i.e., संसार] that its [tap]root is ऊर्ध्व (superior) [i.e., grounded out of sight in the अव्यक्त ब्रह्मन्], its branches are अधस् (inferior) [i.e., within time–space], and its leaves are the वेद-s. The one who knows that is one who is a knower of the वेद.

| | | | |
|---|---|---|---|
| 1 | श्री-भगवान् उवाच | the Lord said | fr. श्री-भगवत् *m. sg. nom.*; √वच् *P. perf. 3rd sg.* (**5.10.3:**) |
| 6 | ऊर्ध्व- | is superior [i.e., grounded out of sight in the अव्यक्त ब्रह्मन्] | |
| 5 | -मूलम् | [that] its [tap]root | fr. ऊर्ध्व-मूल *a. m. sg. acc.* |
| 8 | अधः- | are inferior [i.e., within time-space] | |
| 7 | -शाखम् | its branches | fr. अधस्-शाख *a. m. sg. acc.* (**2.24:**) |
| 3 | अ-व्ययम् | the imperishable | fr. अव्यय *a. m. sg. acc.* |
| 4 | अश्वत्थं | अश्वत्थ tree [i.e., संसार] | fr. अश्वत्थ *m. sg. acc.* |
| 2 | प्राहुः | they say of | fr. प्र + √अह् *P. perf. 3rd pl.* (**5.8.5:**) |
| 10 | छन्दांसि | [are] the वेद-s | fr. छन्दस् *n. pl. acc.* (**3.6.i:**) |
| 9 | यस्य पर्णानि | [and] its leaves | fr. यद् *prn. m. sg. gen.*; पर्ण *n. pl. acc.* |
| 11 | यः | the one who | fr. यद् *prn. m. sg. nom.* |
| 12 | तं वेद | knows that | fr. तद् *prn. m. sg. acc.*; √विद् *P. perf. 3rd sg.* (**5.28:**) |
| 13 | सः वेद-विद् | [is] one who is a knower of the वेद | fr. तद् *prn. m. sg. nom.*; वेद-विद् *a. m. sg. nom.* (**6.24:**) |

**अधश्चोर्ध्वं प्रसृतास्तस्य शाखा गुणप्रवृद्धा विषयप्रवालाः।**
**अधश्च मूलान्यनुसन्ततानि कर्मानुबन्धीनि मनुष्यलोके॥२॥**

(अधः च ऊर्ध्वं प्रसृताः तस्य शाखाः, गुणप्रवृद्धाः विषयप्रवालाः। अधः च मूलानि अनुसन्ततानि, कर्मानुबन्धीनि मनुष्यलोके॥)

तस्य शाखाः अधः ऊर्ध्वं च प्रसृताः, गुण-प्रवृद्धाः, विषय-प्रवालाः। अधः च अनुसन्ततानि मूलानि मनुष्य-लोके कर्म-अनुबन्धीनि। (**15.2**)

Its branches [i.e., bodies] extend अधस् (below) [i.e., as humans, etc.] and ऊर्ध्व (above) [i.e., as celestial beings], are nourished by the गुण-s, and their buds [for new bodies] are the objects [in the world]. The अधस् (downward) [i.e., connected with humans] [secondary] roots spread out [from the taproot], connect to [past] कर्मन् [inciting new कर्मन्] in the world of humans.

| | | | |
|---|---|---|---|
| 1 | तस्य शाखाः | its branches [i.e., bodies] | fr. तद् *prn. m. sg. gen.*; शाखा *f. pl. nom.* |
| 3 | अधः | below [i.e., as humans, etc.] | fr. अधस् *in.* (**6.16:**) |
| 4 | ऊर्ध्वं च | and above [i.e., as celestial beings] | fr. ऊर्ध्वम् *in.* (**6.16:**); च *in.* |
| 2 | प्रसृताः | extend | fr. प्रसृता *pp. of* प्र + √सृ *pt. f. pl. nom.* |
| 5 | गुण-प्रवृद्धाः | [are] nourished by the गुण-s | fr. गुण-प्रवृद्धा *a. f. pl. nom.* |
| 6 | विषय-प्रवालाः | [and] their buds [for new bodies] are the objects [in the world] | fr. विषय-प्रवाला *a. f. pl. nom.* |
| 7 | अधः च | the downward [i.e., connected with humans] | fr. अधस् *in.* (**6.16:**); च *in.* |
| 9 | अनुसन्ततानि | spread out [from the tap root] | fr. अनुसन्तत *pp. of* अनु + सम् + √तन् *pt. n. pl. nom.* (**6.6:** & **2.55:**) |
| 8 | मूलानि | [secondary] roots | fr. मूल *n. pl. nom.* |
| 11 | मनुष्य-लोके | in the world of humans | fr. मनुष्य-लोक *m. sg. loc.* |
| <u>10</u> | कर्म-अनुबन्धीनि | connect to [past] कर्मन् [inciting new कर्मन्] | fr. कर्म-अनुबन्धिन् *a. n. pl. nom.* (**3.15.c:**) |

न रूपमस्येह तथोपलभ्यते नान्तो न चादिर्न च सम्प्रतिष्ठा।
अश्वत्थमेनं सुविरूढमूलमसङ्गशस्त्रेण दृढेन छित्त्वा॥३॥
ततः पदं तत्परिमार्गितव्यं यस्मिन्गता न निवर्तन्ति भूयः।
तमेव चाद्यं पुरुषं प्रपद्ये यतः प्रवृत्तिः प्रसृता पुराणी॥४॥

(न रूपम् अस्य इह तथा उपलभ्यते, न अन्तः न च आदिः न च सम्प्रतिष्ठा। अश्वत्थम् एनं सुविरूढमूलम्, असङ्गशस्त्रेण दृढेन छित्त्वा॥
ततः पदं तद् परिमार्गितव्यं, यस्मिन् गताः न निवर्तन्ति भूयः। तम् एव च आद्यं पुरुषं प्रपद्ये, यतः प्रवृत्तिः प्रसृता पुराणी॥)

इह तथा अस्य रूपं न उपलभ्यते, न अन्तः, न च आदिः, न च सम्प्रतिष्ठा। सु-विरूढ-मूलम् एनम् अश्वत्थं दृढेन अ-सङ्ग-शस्त्रेण छित्त्वा, ततः यस्मिन् गताः भूयः न निवर्तन्ति, तद् पदं परिमार्गितव्यम्। "यतः पुराणी प्रवृत्तिः प्रसृता, तम् एव च आद्यं पुरुषं प्रपद्ये" [इति]। (**15.3-4**)

As [described] here, its essential nature is not perceived—neither [its] end, beginning, nor middle [i.e., all of its perceived substantiality, upon further questioning, dissolves into ephemeral, contingent forms that "exist" only in name, none of which are its essential nature]. With a firm ax that is detachment, [first] cut [attachment to] this अश्वत्थ tree whose roots are well entrenched. Then that attainment is to be sought [i.e., inquired into] in which, having attained, they [the seekers] do not return again [by making this commitment]: "I surrender to that very पुरुष who is the origin from which [this] ancient manifestation is projected."

| | | | |
|---|---|---|---|
| 1 | इह तथा | as [described] here | fr. इह *in.* (**6.19:**); तथा *in.* (**6.19:**) |
| 2 | अस्य रूपं | its essential nature | fr. इदम् *prn. m. sg. gen.*; रूप *n. sg. nom.* |
| 3 | न उपलभ्यते | is not perceived | fr. न *in.*; उप + √लभ् *ps. pr. 3rd sg.* |
| 4 | न अन्तः | neither [its] end | fr. न *in.*; अन्त *m. sg. nom.* |
| 5 | न च आदिः | [nor] beginning | fr. न *in.*; च *in.*; आदि *m. sg. nom.* |
| 6 | न च सम्प्रतिष्ठा | nor middle | fr. न *in.*; च *in.*; सम्प्रतिष्ठा *f. sg. nom.* |
| 13 | सु-विरूढ- | are well-entrenched | |
| 12 | -मूलम् | whose roots | fr. सुविरूढ-मूल *a. m. sg. acc.* |
| 11 | एनम् अश्वत्थं | this अश्वत्थ tree [to संसार] | fr. एनद् *prn. m. sg. acc.* (**4.10:**); अश्वत्थ *m. sg. acc.* |
| 7 | दृढेन | with a firm | fr. दृढ *pp. of* √दृह् *a. n. sg. inst.* (**2.111:**) |
| 9 | अ-सङ्ग- | that is detachment | |
| 8 | -शस्त्रेण | ax | fr. असङ्ग-शस्त्र *n. sg. inst.* |
| 10 | छित्त्वा | [first] cut [attachment to] | fr. छित्त्वा *in. pt. of* √छिद् (**2.42:**) |

| | | | |
|---|---|---|---|
| 14 | ततः | then | fr. ततस् *in.* (**6.19:**) |
| 17 | यस्मिन् | in which | fr. यद् *prn. n. sg. loc.* |
| 18 | गताः | having attained | fr. गत *pp. of* √गम् *pt. m. pl. nom.* (**6.6:**) |
| 20 | भूयः | again | fr. भूयस् *in.* |
| 19 | न निवर्तन्ति | they [the seekers] do not return | fr. न *in.*; नि + √वृत् *1.P. pr. 3rd pl.* |
| 15 | तद् पदं | that attainment | fr. तद् *prn. n. sg. nom.*; पद *n. sg. nom.* |
| 16 | परिमार्गितव्यम् | is to be sought [i.e., inquired into] | fr. परिमार्गितव्य *pot. ps. pt. of den. fr.* मार्ग *pt. n. sg. nom.* (**6.8:**) |
| 25 | यतः | from which | fr. यतस् *in.* (**6.19:**) |
| 26 | पुराणी | [this] ancient | fr. पुराणी *a. f. sg. nom.* |
| 27 | प्रवृत्तिः | manifestation | fr. प्रवृत्ति *f. sg. nom.* |
| 28 | प्रसृता | is projected | fr. प्रसृता *pp. of* प्र + √सृ *pt. f. sg. nom.* |
| 23 | तम् एव च | to that very | fr. तद् *prn. m. sg. acc.*; एव *in.* (**6.19:**); च *in.* |
| 24 | आद्यं पुरुषं | पुरुष who is the origin | fr. आद्य *n. sg. acc.*; पुरुष *m. sg. acc.* |
| 22 | प्रपद्ये | I surrender | fr. प्र + √पद् *4.Ā. pr. 1st sg.* |
| 21 | [इति] | [by making this commitment:] | |

**निर्मानमोहा जितसङ्गदोषा अध्यात्मनित्या विनिवृत्तकामाः।**
**द्वन्द्वैर्विमुक्ताः सुखदुःखसञ्ज्ञैर्गच्छन्त्यमूढाः पदमव्ययं तत्॥५॥**

(निर्मानमोहाः जितसङ्गदोषाः, अध्यात्मनित्याः विनिवृत्तकामाः। द्वन्द्वैः विमुक्ताः सुखदुःखसञ्ज्ञैः, गच्छन्ति अमूढाः पदम् अव्ययं तद्।)

निर्-मान-मोहाः, जित-सङ्ग-दोषाः, अध्यात्म-नित्याः, विनिवृत्त-कामाः, सुख-दुःख-सञ्ज्ञैः द्वन्-द्वैः विमुक्ताः, अ-मूढाः तद् अ-व्ययं पदं गच्छन्ति। (**15.5**)

Free from demanding respect and from delusion, having conquered the fault of attachment, always focused on the [limitless] I, whose requirements have completely gone, freed from the pairs of opposites known as pleasure and pain—[those who are] undeluded attain that imperishable attainment.

| | | | |
|---|---|---|---|
| 1 | निर्-मान-मोहाः | free from demanding respect and from delusion | fr. निस्-मान-मोह *a. m. pl. nom.* (**2.24:** & **.29:**) |
| 2 | जित-सङ्ग-दोषाः | having conquered the fault of attachment | fr. जित-सङ्ग-दोष *a. m. pl. nom.* |
| 3 | अध्यात्म-नित्याः | always focused on the [limitless] I | fr. अद्यात्म-नित्य *a. m. pl. nom.* |
| 4 | विनिवृत्त-कामाः | whose requirements have completely gone | fr. विनिवृत्त-काम *a. m. pl. nom.* |
| 7 | सुख-दुःख-सञ्ज्ञैः | known as pleasure and pain | fr. सुख-दुःख-सञ्ज्ञ *a. n. pl. inst.* (**6.24.1:**) |
| 6 | द्वन्-द्वैः | from the pairs of opposites | fr. द्वन्द्व *n. pl. inst.* |
| 5 | विमुक्ताः | freed | fr. विमुक्त *pp. of* वि + √मुच् *a. m. pl. nom.* (**2.80:**) |

| | | | |
|---|---|---|---|
| 8 | अ-मूढाः | [those who are] undeluded | fr. अमूढ *pp. of* √मुह् *a. m. pl. nom.* (**2.107:**) |
| 10 | तद् अ-व्ययं | that imperishable | fr. तद् *prn. n. sg. acc.*; अव्यय *a. n. sg. acc.* |
| 11 | पदं | attainment | fr. पद *n. sg. acc.* |
| 9 | गच्छन्ति | attain | fr. √गम् *1.P. pr. 3rd pl.* (**5.15.6:**) |

**न तद्भासयते सूर्यो न शशाङ्को न पावकः। यद्गत्वा न निवर्तन्ते तद्धाम परमं मम॥६॥**
(न तद् भासयते सूर्यः, न शशाङ्कः न पावकः। यद् गत्वा न निवर्तन्ते, तद् धाम परमं मम॥)
न सूर्यः न शश-अङ्कः न पावकः तद् भासयते, यद् गत्वा न निवर्तन्ते। तद् मम परमं धाम। (**15.6**)
Neither the sun, nor moon, nor fire illumines that [because that limitless conscious being instead illumines these sources of light] which, having gained, they [the undeluded] do not return. That is the limitless abode of Me.

| | | | |
|---|---|---|---|
| 1 | न सूर्यः | neither the sun | fr. न *in.*; सूर्य *m. sg. nom.* |
| 2 | न शश-अङ्कः | nor moon | fr. न *in.*; शश-अङ्क *m. sg. nom.* |
| 3 | न पावकः | nor fire | fr. न *in.*; पावक *m. sg. nom.* |
| 5 | तद् | that | fr. तद् *prn. n. sg. acc.* |
| 4 | भासयते | illumines | fr. √भास् *Ā. cs. pr. 3rd sg.* |
| 6 | यद् गत्वा | which having gained | fr. यद् *prn. n. sg. acc.*; गत्वा *in. pt. of* √गम् (**6.9:** & **.6:**) |
| 7 | न निवर्तन्ते | they [the undeluded] do not return | fr. न *in.*; नि + √वृत् *1.Ā. pr. 3rd pl.* |
| 8 | तद् | that [is] | fr. तद् *prn. n. sg. nom.* |
| 11 | मम | of Me | fr. अहम् *prn. sg. gen.* |
| 9 | परमं | the limitless | fr. परम *spv. a. n. sg. nom.* |
| 10 | धाम | abode | fr. धामन् *n. sg. nom.* (**3.22:**) |

**ममैवांशो जीवलोके जीवभूतः सनातनः। मनःषष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति॥ ७॥**
(मम एव अंशः जीवलोके, जीवभूतः सनातनः। मनःषष्ठानि इन्द्रियाणि, प्रकृतिस्थानि कर्षति॥)
मम एव अंशः सना-तनः जीव-लोके जीव-भूतः प्रकृति-स्थानि मनः-षष्ठानि इन्द्रियाणि कर्षति। (**15.7**)
An aspect of Me alone, eternal and in the form of a जीव (an individual)—within [this] world having [many such] जीव-s—draws [to itself, as the conscious-being-reflected] the [subtle] [five] senses, with the mind as the sixth, [all of] which abide in प्रकृति.

| | | | |
|---|---|---|---|
| 2 | मम एव | of Me alone | fr. अहम् *prn. sg. gen.*; एव *in.* (**6.19:**) |
| 1 | अंशः | an aspect | fr. अंश *m. sg. nom.* |
| 3 | सना-तनः | eternal | fr. सनातन *a. m. sg. nom.* |
| 5 | जीव-लोके | within [this] world having [many such] जीव-s | fr. जीव-लोक *m. sg. loc.* |
| 4 | जीव-भूतः | [and] in the form of a जीव (an individual) | fr. जीव-भूत *a. m. sg. nom.* |
| 9 | प्रकृति-स्थानि | [all of] which abide in प्रकृति | fr. प्रकृति-स्थ *a. n. pl. acc.* (**6.24.1:**) |
| 8 | मनः-षष्ठानि | with the mind as the sixth | fr. मनस्-षष्ठ *a. n. pl. acc.* (**2.24:**) |
| 7 | इन्द्रियाणि | the [subtle] [five] senses | fr. इन्द्रिय *n. pl. acc.* |
| <u>6</u> | कर्षति | draws [to itself, as the conscious-being-reflected] | fr. √कृष् *1.P. pr. 3rd sg.* |

**शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः। गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात्॥ ८॥**
(शरीरं यद् अवाप्नोति, यद् च अपि उत्क्रामति ईश्वरः। गृहीत्वा एतानि संयाति, वायुः गन्धान् इव आशयात्॥)
यद् ईश्वरः शरीरम् अवाप्नोति, यद् च अपि उत्क्रामति, एतानि गृहीत्वा संयाति, वायुः आशयात् गन्धान् इव। (**15.8**)
When the Lord [in the form of a जीव] obtains a [gross] body and, indeed, when that one departs [i.e., the body dies], [then]—gathering these [the subtle senses and mind]—that one departs like the wind, [having gathered] the [subtle] fragrances from their seat [i.e., from flowers].

| | | | |
|---|---|---|---|
| 1 | यद् | when | fr. यद् *in.* |
| 2 | ईश्वरः | the Lord [in the form of a जीव] | fr. ईश्वर *m. sg. nom.* |
| 4 | शरीरम् | a [gross] body | fr. शरीर *n. sg. acc.* |
| 3 | अवाप्नोति | obtains | fr. अव + √आप् *5.P. pr. 3rd sg.* |
| 5 | यद् च अपि | and indeed when | fr. यद् *in.*; च *in.*; अपि *in.* |
| 6 | उत्क्रामति | that one departs [i.e., the body dies] | fr. उद् + √क्रम् *1.P. pr. 3rd sg.* (**5.15.1:**) |
| 8 | एतानि | these [the subtle senses and mind] | fr. एतद् *prn.. n. pl. acc.* |
| 7 | गृहीत्वा | [then] gathering | fr. गृहीत्वा *in. pt. of* √ग्रह् (**6.9:**) |
| 9 | संयाति | that one departs | fr. सम् + √या *2.P. pr. 3rd sg.* (**2.54:**) |

| | | | |
|---|---|---|---|
| 11 | वायुः | the wind | fr. वायु *m. sg. nom.* |
| 13 | आशयात् | from their seat [i.e., from flowers] | fr. आशय *m. sg. abl.* |
| 12 | गन्धान् | [having gathered] the [subtle] fragrances | fr. गन्ध *m. pl. acc.* |
| 10 | इव | like | fr. इव *in.* (**6.19:**) |

**श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च। अधिष्ठाय मनश्चायं विषयानुपसेवते॥९॥**
(श्रोत्रं चक्षुः स्पर्शनं च, रसनं घ्राणम् एव च। अधिष्ठाय मनः च अयं, विषयान् उपसेवते॥)
श्रोत्रं, चक्षुः, स्पर्शनं, रसनं च, घ्राणम् एव च, मनः च अधिष्ठाय, अयं [ईश्वरः जीवभूतः] विषयान् उपसेवते। (**15.9**)
Presiding over [by giving सत्य-ज्ञान (conscious being) to] [the subtle functions of] hearing, vision, touching, taste, and smelling—and the mind—this [Lord, in the form of the individual] experiences the sense objects.

| | | | |
|---|---|---|---|
| 2 | श्रोत्रं | [the subtle functions of] hearing | fr. श्रोत्र *n. sg. acc.* |
| 3 | चक्षुः | vision | fr. चक्षुस् *n. sg. acc.* (**3.6:**) |
| 4 | स्पर्शनं | touching | fr. स्पर्शन *n. sg. acc.* |
| 5 | रसनं च | taste | fr. रसन *n. sg. acc.*; च *in.* |
| 6 | घ्राणम् एव च | and smelling | fr. घ्राण *n. sg. acc.*; एव *in.* (**6.19:**); च *in.* |
| 7 | मनः च | and the mind | fr. मनस् *n. sg. acc.* (**3.6:**); च *in.* |
| 1 | अधिष्ठाय | presiding over [by giving सत्य-ज्ञान (conscious-being) to] | fr. अधिष्ठाय *in. pt. of* अधि + √स्था (**2.101:**) |
| 8 | अयं [ईश्वरः जीवभूतः] | this [Lord, in the form of the individual] | fr. इदम् *prn. m. sg. nom.* |
| 10 | विषयान् | the sense objects | fr. विषय *m. pl. acc.* |
| 9 | उपसेवते | experiences | fr. उप + √सेव् *1.Ā. pr. 3rd sg.* |

**उत्क्रामन्तं स्थितं वापि भुञ्जानं वा गुणान्वितम्। विमूढा नानुपश्यन्ति पश्यन्ति ज्ञानचक्षुषः॥१०॥**

(उत्क्रामन्तं स्थितं वा अपि, भुञ्जानं वा गुणान्वितम्। विमूढाः न अनुपश्यन्ति, पश्यन्ति ज्ञानचक्षुषः॥)

विमूढाः उत्क्रामन्तं स्थितं वा अपि, भुञ्जानं गुण-अन्वितं वा न अनुपश्यन्ति। ज्ञान-चक्षुषः पश्यन्ति। (**15.10**)

The deluded do not see [i.e., do not understand according to the teaching] [the Lord in the form of the individual] who departs or even remains [in the body], who is experiencing and is endowed with the गुण-s. Those who have the vision that is [this] knowledge do see.

| | | | |
|---|---|---|---|
| 1 | विमूढाः | the deluded | fr. विमूढ *pp. of* वि + √मुह् *a. m. pl. nom.* (**2.107:**) |
| 3 | उत्क्रामन्तं | [the Lord in the form of the individual] who departs | fr. उत्क्रामत् *pr. pt. of* उद् + √क्रम् *a. m. sg. acc.* (**5.15.1:** & **2.24:**) |
| 4 | स्थितं वा अपि | or even remains [in the body] | fr. स्थित *pp. of* √स्था *a. m. sg. acc.* (**6.6:**); वा *in.*; अपि *in.* |
| 5 | भुञ्जानं | who is experiencing | fr. भुञ्जान *pr. mid. pt. of* √भुज् *a. m. sg. acc.* (**6.5:**) |
| 6 | गुण-अन्वितं वा | and is endowed with the गुण-s | fr. गुण-अन्वित *a. m. sg. acc.*; वा *in.* |
| 2 | न अनुपश्यन्ति | do not see [i.e., do not understand according to the teaching] | fr. न *in.*; अनु + √दृश् *1.P. pr. 3rd pl.* (**5.15.6:**) |
| 7 | ज्ञान-चक्षुषः | those who have the vision that is [this] knowledge | fr. ज्ञान-चक्षुस् *a. m. pl. nom.* (**3.6:** & **2.101:**) |
| 8 | पश्यन्ति | do see | fr. √दृश् *1.P. pr. 3rd pl.* (**5.15.6:**) |

**यतन्तो योगिनश्चैनं पश्यन्त्यात्मन्यवस्थितम्। यतन्तोऽप्यकृतात्मानो नैनं पश्यन्त्यचेतसः॥११॥**

(यतन्तः योगिनः च एनं, पश्यन्ति आत्मनि अवस्थितम्। यतन्तः अपि अकृतात्मानः, न एनं पश्यन्ति अचेतसः॥)

यतन्तः योगिनः च एनम् आत्मनि अवस्थितं पश्यन्ति। यतन्तः अपि अ-कृत-आत्मानः अ-चेतसः [च] एनं न पश्यन्ति। (**15.11**)

[Also] योगिन्-s who strive [i.e., who contemplate to remove obstacles to knowing] see this [limitless] one abiding in themselves [i.e., in the intellect as the I]. [But], though striving, those whose minds are not ready and are not discerning do not see it [the limitless I].

| | | | |
|---|---|---|---|
| 2 | यतन्तः | who strive [i.e., who contemplate to remove obstacles to knowing] | fr. यतत् *pr. pt. of* √यत् *a. m. pl. nom.* (**3.12:**) |
| 1 | योगिनः च | [also] योगिन्-s | fr. योगिन् *m. pl. nom.* (**3.15:**); च *in.* |
| 4 | एनम् | this [limitless] one | fr. एनद् *prn. m. sg. acc.* (**4.10:**) |
| 6 | आत्मनि | in themselves [i.e., in the intellect as the I] | fr. आत्मन् *m. sg. loc.* (**3.22:**) |
| 5 | अवस्थितं | abiding | fr. अवस्थित *pp. of* अव + √स्था *a. m. sg. acc.* (**6.6:**) |
| 3 | पश्यन्ति | see | fr. √दृश् *1.P. pr. 3rd pl.* (**5.15.6:**) |

| | | | |
|---|---|---|---|
| 7 | यतन्तः अपि | [but] though striving | fr. यतत् *pr. pt. of* √यत् *a. m. pl. nom.* (**3.12:**); अपि *in.* |
| 9 | अ-कृत- | are not ready | |
| 8 | -आत्मानः | those whose minds | fr. अकृत-आत्मन् *a. m. pl. nom.* (**3.22:**) |
| 10 | अ-चेतसः [च] | [and] are not discerning | fr. अचेतस् *a. m. pl. nom.* (**3.6:**) |
| 12 | एनं | it [the limitless I] | fr. एनद् *prn. m. sg. acc.* (**4.10:**) |
| 11 | न पश्यन्ति | do not see | fr. न *in.*; √दृश् *1.P. pr. 3rd pl.* (**5.15.6:**) |

**यदादित्यगतं तेजो जगद्भासयतेऽखिलम्। यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम्॥१२॥**

(यद् आदित्यगतं तेजः, जगत् भासयते अखिलम्। यद् चन्द्रमसि यद् च अग्नौ, तद् तेजः विद्धि मामकम्॥ )

यद् आदित्य-गतं तेजः अ-खिलं जगत् भासयते, यद् चन्द्रमसि, यद् च अग्नौ — तद् तेजः मामकं विद्धि। (**15.12**)

The brilliance which, obtaining in the sun, illumines the entire world—which is in the moon and which is in fire—know that brilliance as Mine.

| | | | |
|---|---|---|---|
| 2 | यद् | which | fr. यद् *prn. n. sg. nom.* |
| 3 | आदित्य-गतं | obtaining in the sun | fr. आदित्य-गत *a. n. sg. nom.* |
| 1 | तेजः | the brilliance | fr. तेजस् *n. sg. nom.* (**3.6:**) |
| 5 | अ-खिलं जगत् | the entire world | fr. अखिल *a. n. sg. acc.*; जगत् *n. sg. acc.* (**3.5:**) |
| 4 | भासयते | illumines | fr. √भास् *Ā. cs. pr. 3rd sg.* |
| 6 | यद् | which [is] | fr. यद् *prn. n. sg. nom.* |
| 7 | चन्द्रमसि | in the moon | fr. चन्द्रमस् *m. sg. loc.* (**3.6:**) |
| 8 | यद् च | and which [is] | fr. यद् *prn. n. sg. acc.*; च *in.* |
| 9 | अग्नौ | in fire | fr. अग्नि *m. sg. loc.* (**3.29.c:**) |
| 11 | तद् तेजः | that brilliance | fr. तद् *prn. n. sg. acc.*; तजस् *n. sg. acc.* |
| 12 | मामकं | [as] Mine | fr. मामक *a. m. sg. acc.* (**4.15:**) |
| 10 | विद्धि | know | fr. √विद् *2.P. impv. 2nd sg.* (**5.6.a:**) |

**गामाविश्य च भूतानि धारयाम्यहमोजसा। पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः॥१३॥**

(गाम् आविश्य च भूतानि, धारयामि अहम् ओजसा। पुष्णामि च ओषधीः सर्वाः, सोमः भूत्वा रसात्मकः॥)

अहं च गाम् आविश्य भूतानि ओजसा धारयामि। रस-आत्मकः च सोमः भूत्वा सर्वाः ओषधीः पुष्णामि। (**15.13**)

Having entered the earth [as the brilliance from the sun], I sustain with My strength all beings. And being the extracted juice in the form of sap [from the earth], I nourish all plants [hence, I am the food].

| | | | |
|---|---|---|---|
| 3 | अहं च | [and] I | fr. अहम् *prn. sg. nom.*; च *in.* |
| 2 | गाम् | the earth [as the brilliance from the sun] | fr. गो *f. sg. acc.* (**3.41:**) |
| 1 | आविश्य | having entered | fr. आविश्य *in. pt. of* आ + √विश् |
| 6 | भूतानि | [all] beings | fr. भूत *pp. of* √भू *n. pl. acc.* |
| 5 | ओजसा | with [My] strength, energy | fr. ओजस् *n. sg. inst.* (**3.6:**) |
| 4 | धारयामि | sustain | fr. √धृ *1.P. cs. pr. 1st sg.* (**5.40:** & **5.5.a:**) |
| 9 | रस-आत्मकः च | in the form of sap [from the earth] | fr. रस-आत्मक *a. m. sg. nom.* (**6.39:**); च *in.* |
| 8 | सोमः | the extracted juice | fr. सोम *m. sg. nom.* |
| 7 | भूत्वा | [and] being | fr. भूत्वा *in. pt. of* √भू |
| 11 | सर्वाः ओषधीः | all plants [hence, I am the food] | fr. सर्व *prn. a. f. pl. acc.* (**4.16.2:**); ओषधि *f. pl. acc.* |
| 10 | पुष्णामि | I nourish | fr. √पुष् *9.P. pr. 1st sg.* (**5.3:** & **2.92:** & **5.5.a:**) |

**अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः। प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम्॥१४॥**

(अहं वैश्वानरः भूत्वा, प्राणिनां देहम् आश्रितः। प्राणापानसमायुक्तः, पचामि अन्नं चतुर्विधम्॥)

अहं प्राणिनां देहम् आश्रितः प्राण-अपान-समायुक्तः वैश्वा-नरः भूत्वा चतुर्-विधम् अन्नं पचामि। (**15.14**)

Being the digestive fire, obtaining in the body of living beings, and united with [i.e., stoked by] exhalation and inhalation, I cook [inside the body] the four kinds of food [drunk, chewed, licked, and sucked].

| | | | |
|---|---|---|---|
| 8 | अहं | I | fr. अहम् *prn. sg. nom.* |
| 5 | प्राणिनां | of living beings | fr. प्राणिन् *m. pl. gen.* (**3.15:**) |
| 4 | देहम् | the body | fr. देह *m. sg. acc.* |
| 3 | आश्रितः | obtaining in | fr. आश्रित *pp. of* आ + √श्रि *a. m. sg. nom.* |
| 7 | प्राण-अपान- | exhalation and inhalation | |
| 6 | -समायुक्तः | [and] united with [i.e., stoked by] | fr. प्राण-अपान-समायुक्त *a. m. sg. nom.* |
| 2 | वैश्वा-नरः | the digestive fire | fr. वैश्वा-नर *m. sg. nom.* |
| 1 | भूत्वा | being | fr. भूत्वा *in. pt. of* √भू |

| | | | |
|---|---|---|---|
| 10 | चतुर्-विधम् | the four kinds of | fr. चतुर्-विध *a. n. sg. acc.* |
| 11 | अन्नं | food [drunk, chewed, licked, and sucked] | fr. अन्न *n. sg. acc.* |
| 9 | पचामि | cook [inside the body] | fr. √पच् *1.P. pr. 1st sg.* (**5.5.a:**) |

**सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च।**
**वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाहम्॥१५॥**

(सर्वस्य च अहं हृदि सन्निविष्टः, मत्तः स्मृतिः ज्ञानम् अपोहनं च। वेदैः च सर्वैः अहम् एव वेद्यः, वेदान्तकृत् वेदविद् एव च अहम्॥)

अहं च सर्वस्य हृदि सन्निविष्टः। मत्तः स्मृतिः ज्ञानम् अपोहनं च। सर्वैः वेदैः च अहम् एव वेद्यः। अहम् एव वेद-अन्त-कृत् वेद-विद् च। (**15.15**)

And I am present [as the conscious being] in everyone's intellect [energized by Me as the digested food]. From Me are memory, knowledge, and forgetting [a necessity for dropping invalid notions]. I alone am to be known through all the वेद-s. I alone am the author of the वेद-s [including their Vedanta] and the one who comes to know the वेद-s.

| | | | |
|---|---|---|---|
| 1 | अहं च | and I am | fr. अहम् *prn. sg. nom.*; च *in.* |
| 3 | सर्वस्य हृदि | in everyone's intellect [energized by Me as the digested food] | fr. सर्व *prn. a. sg. gen.* (**4.16.2:**); हृद् *n. sg. loc.* (**3.6:**) |
| 2 | सन्निविष्टः | present [as the conscious being] | fr. सन्निविष्ट *pp. of* सम् + नि + √विश् *pt. m. sg. nom.* (**2.85:** & **.55:**) |
| 4 | मत्तः | from Me [are] | fr. मत्तस् *in.* (**2.4:** & **2.24:** & **6.19:**) |
| 5 | स्मृतिः | memory | fr. स्मृति *f. sg. nom.* |
| 6 | ज्ञानम् | knowledge | fr. ज्ञान *n. sg. nom.* |
| 7 | अपोहनं च | and forgetting [a necessity for dropping invalid notions] | fr. अपोहन *n. sg. nom.*; च *in.* |
| 10 | सर्वैः वेदैः च | through all the वेद-s | fr. सर्व *prn. a. m. pl. inst.* (**4.16.2:**); वेद *m. pl. inst.*; च *in.* |
| 8 | अहम् एव | I alone [am] | fr. अहम् *prn. sg. nom.*; एव *in.* (**6.19:**) |
| 9 | वेद्यः | to be known | fr. वेद्य *pot. ps. pt. of* √विद् *a. m. sg. nom.* (**6.8:**) |
| 11 | अहम् एव | I alone [am] | fr. अहम् *prn. sg. nom.*; एव *in.* (**6.19:**) |
| 13 | वेद-अन्त- | of the वेद-s [including its Vedanta] | |
| 12 | -कृत् | the author | fr. वेदान्त-कृत् *a. m. sg. nom.* (**6.24.2:** & **3.5:**) |
| 14 | वेद-विद् च | and the one who comes to know the वेद-s | fr. वेद-विद् *a. m. sg. nom.* (**6.24: & 3.6:**); च *in.* |

**द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च। क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते॥१६॥**

(द्वौ इमौ पुरुषौ लोके, क्षरः च अक्षरः एव च। क्षरः सर्वाणि भूतानि, कूटस्थः अक्षरः उच्यते॥)

लोके इमौ द्वौ पुरुषौ — क्षरः च अ-क्षरः एव च। सर्वाणि भूतानि क्षरः, कूट-स्थः अ-क्षरः उच्यते। (**15.16**)

Within the world, there are two पुरुष-s [i.e., two aspects of the पुरुष]: the perishable and the imperishable. All beings [i.e., all things] are the perishable, and कूट-स्थ (what remains immutable and in the form of deception; i.e., अव्यक्त or माया) is called the imperishable.

| | | | |
|---|---|---|---|
| 1 | लोके | within the world | fr. लोक *m. sg. loc.* |
| 2 | इमौ द्वौ | there [are] two | fr. इदम् *m. du. nom.* (**4.8:**); द्व *a. m. du. nom.* (**4.25:**) |
| 3 | पुरुषौ | पुरुष-s [i.e., two aspects of the पुरुष] | fr. पुरुष *m. du. nom.* |
| 4 | क्षरः च | (and) the perishable | fr. क्षर *a. m. sg. nom.*; च *in.* |
| 5 | अ-क्षरः एव च | and the imperishable | fr. अक्षर *a. m. sg. nom.*; एव *in.* (**6.19:**); च *in.* |
| 6 | सर्वाणि भूतानि | all beings [i.e., all things] | fr. सर्व *prn. a. n. pl. nom.* (**4.16.2:**); भूत *pp. of* √भू *n. pl. nom.* |
| 7 | क्षरः | [are] the perishable | fr. क्षर *a. m. sg. nom.* |
| 8 | कूट-स्थः | [and] कूटस्थ (what remains immutable and in the form of deception; i.e., अव्यक्त or माया) | fr. कूट-स्थ *a. m. sg. nom.* (**6.24.1:**) |
| 10 | अ-क्षरः | the imperishable | fr. अक्षर *a. m. sg. nom.* |
| 9 | उच्यते | is called | fr. √वच् *ps. pr. 3rd sg.* (**5.37.6: & 2.3.a:**) |

**उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः। यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः॥१७॥**

(उत्तमः पुरुषः तु अन्यः, परमात्मा इति उदाहृतः। यः लोकत्रयम् आविश्य, बिभर्ति अव्ययः ईश्वरः॥)

अन्यः तु उत्तमः पुरुषः परम-आत्मा इति उदाहृतः, यः अ-व्ययः ईश्वरः लोक-त्रयम् आविश्य बिभर्ति। (**15.17**)

Whereas, there is another उत्तम (transcendent) पुरुष [that includes the other two] called परमात्मन् (the limitless self), who is the changeless Lord that, pervading the three worlds, sustains [all this which is this perishable and imperishable].

| | | | |
|---|---|---|---|
| 1 | अन्यः तु | whereas [there is] another | fr. अन्य *prn. a. m. sg. nom.* (**4.16.1:**); तु *in.* |
| 2 | उत्तमः पुरुषः | उत्तम (transcendent) पुरुष [that includes the other two] | fr. उत्तम *spv. a. m. sg. nom.* (**6.25:**); पुरुष *m. sg. nom.* |
| 4 | परम-आत्मा इति | परमात्मन् (the limitless self) | fr. परम-आत्मन् *m. sg. nom.* (**3.22:**); इति *in.* |
| 3 | उदाहृतः | called | fr. उदाहृत *pp. of* उद् + आ + √हृ *pt. m. sg. nom.* |

| | | | |
|---|---|---|---|
| 5 | यः अ-व्ययः | who [is] the changeless | fr. यद् *prn. m. sg. nom.*; अव्यय *a. m. sg. nom.* |
| 6 | ईश्वरः | Lord [that] | fr. ईश्वर *m. sg. nom.* |
| 8 | लोक-त्रयम् | the three worlds | fr. लोक-त्रय *n. sg. acc.* (**4.30:**) |
| 7 | आविश्य | pervading | fr. आविश्य *in. pt. of* आ + √विश् (**6.9:**) |
| 9 | बिभर्ति | sustains [all this which is this perishable and imperishable] | fr. √भृ *3.P. pr. 3rd sg.* (**5.3: & .8.2:**) |

**यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः। अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः॥१८॥**

(यस्मात् क्षरम् अतीतः अहम्, अक्षरात् अपि च उत्तमः। अतः अस्मि लोके वेदे च, प्रथितः पुरुषोत्तमः॥)

यस्मात् अहं क्षरम् अतीतः, अ-क्षरात् अपि च उत्तमः, अतः लोके वेदे च पुरुष-उत्तमः [इति] प्रथितः अस्मि। (**15.18**)

Because I am beyond the perishable [पुरुष] and also उत्तम (transcendent)—even to the imperishable [पुरुष]—therefore, among people [in popular literature] and in the वेद, I am renowned as पुरुषोत्तम (the being who transcends).

| | | | |
|---|---|---|---|
| 1 | यस्मात् | because | fr. यस्मात् *in.* |
| 2 | अहं | I [am] | fr. अहम् *prn. sg. nom.* |
| 3 | क्षरम् अतीतः | beyond the perishable [पुरुष] | fr. क्षर *a. m. sg. acc.*; अतीत *pp. of* अति + √इ *a. m. sg. nom.* |
| 5 | अ-क्षरात् | to the imperishable [पुरुष] | fr. अक्षर *a. m. sg. abl.* |
| 4 | अपि च उत्तमः | and also उत्तम (transcendent) even | fr. अपि *in.*; च *in.*; उत्तम *spv. a. m. sg. nom.* (**6.25:**) |
| 6 | अतः | therefore | fr. अतस् *in.* (**6.19:**) |
| 7 | लोके | among people [in popular literature] | fr. लोक *m. sg. loc.* |
| 8 | वेदे च | and in the वेद | fr. वेद *m. sg. loc.*; च *in.* |
| 11 | पुरुष-उत्तमः [इति] | as पुरुषोत्तम (the being who transcends) | fr. पुरुष-उत्तम *m. sg. nom.* (**7.7.1:**) |
| 10 | प्रथितः | renowned | fr. प्रथित *pp. of* √प्रथ् *pt. m. sg. nom.* (**6.6:**) |
| 9 | अस्मि | I am | fr. √अस् *2.P. pr. 1st sg.* |

**यो मामेवमसम्मूढो जानाति पुरुषोत्तमम्। स सर्वविद्भजति मां सर्वभावेन भारत॥१९॥**

(यः माम् एवम् असम्मूढः, जानाति पुरुषोत्तमम्। सः सर्वविद् भजति मां, सर्वभावेन भारत॥)

यः एवम् अ-सम्मूढः मां पुरुष-उत्तमं जानाति, सः सर्व-विद् सर्व-भावेन मां भजति, भारत। (**15.19**)

Being without delusion [through this teaching], the one who thus knows [the meaning of] Me as पुरुषोत्तम—that one becomes the knower of all [by knowing Me, the reality of all], [and thus] attains Me, because of being [identical to the Lord, to] all, O अर्जुन.

| | | | |
|---|---|---|---|
| 2 | यः एवम् | the one who thus | fr. यद् *prn. m. sg. nom.*; एवम् *in.* (**6.19:**) |
| 1 | अ-सम्मूढः | being without delusion [through this teaching] | fr. असम्मूढ *pp. of* सम् + √मुह् *a. m. sg. nom.* (**2.107:**) |
| 4 | मां | Me | fr. अहम् *prn. sg. acc.* |
| 5 | पुरुष-उत्तमं | as पुरुषोत्तम | fr. पुरुष-उत्तम *m. sg. acc.* |
| 3 | जानाति | knows [the meaning of] | fr. √ज्ञा *9.P. pr. 3rd sg.* (**5.23.2:** & **5.3:**) |
| 6 | सः | that one becomes | fr. तद् *prn. m. sg. nom.* |
| 7 | सर्व-विद् | the knower of all [by knowing Me, the reality of all] | fr. सर्व-विद् *m. sg. nom.* (**6.24:**) |
| 10 | सर्व-भावेन | because of being [identical to the Lord, to] all | fr. सर्व-भाव *m. sg. inst.* |
| 9 | मां | Me | fr. अहम् *prn. sg. acc.* |
| 8 | भजति | [and thus] attains | fr. √भज् *1.P. pr. 3rd sg.* |
| 11 | भारत | (अर्जुन) O (Brilliant) Son of India | fr. भारत *m. sg. voc.* |

**इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ। एतद्बुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारत॥२०॥**

(इति गुह्यतमं शास्त्रम्, इदम् उक्तं मया अनघ। एतद् बुद्ध्वा बुद्धिमान् स्यात्, कृतकृत्यः च भारत॥)

इति मया इदं गुह्यतमं शास्त्रम् उक्तम्, अन्-अघ। एतद् बुद्ध्वा बुद्धिमान् कृत-कृत्यः च स्यात्, भारत। (**15.20**)

Thus, I have told this most secret [i.e., secret in terms of sanctity, value, and by appearing to be difficult to understand] teaching, O Sinless One. Knowing this, one becomes one who has [made best use of one's] intellect and has done what is to be done, O अर्जुन.

| | | | |
|---|---|---|---|
| 1 | इति | thus | fr. इति *in.* (**6.20:**) |
| 2 | मया | I | fr. अहम् *prn. sg. inst.* (**7.7:**) |
| 4 | इदं | this | fr. इदम् *prn. n. sg. nom.* |
| 5 | गुह्यतमं | most secret [i.e., secret in terms of sanctity, value, and by appearing to be difficult to understand] | fr. गुह्यतम *spv. a. n. sg. nom.* (**6.25:**) |
| 6 | शास्त्रम् | teaching | fr. शास्त्र *n. sg. nom.* |
| 3 | उक्तम् | have told | fr. उक्त *pp. of* √वच् *pt. n. sg. nom.* (**6.6:** & **2.3.a:** & **2.80:**) |

| | | | |
|---|---|---|---|
| 7 | अन्-अघ | O Sinless One | fr. अनघ *m. sg. voc.* |
| 8 | एतद् बुद्ध्वा | knowing this | fr. एतद् *prn. n. sg. acc.*; बुद्ध्वा *in. pt. of* √बुध् (**2.76:** & **.78:**) |
| 10 | बुद्धिमान् | one who has [made best use of one's] intellect | fr. बुद्धिमत् *a. m. sg. nom.* (**3.13.a:**) |
| 11 | कृत- | and who has done | |
| 12 | -कृत्यः च | what is to be done | fr. कृत-कृत्य *a. m. sg. nom.*; च *in.* |
| 9 | स्यात् | one becomes | fr. √अस् *2.P. pot. 3rd sg.* (**5.19.4:**) |
| 13 | भारत | (अर्जुन) O (Brilliant) Son of India | fr. भारत *m. sg. voc.* |

**ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे पुरुषोत्तमयोगो नाम पञ्चदशोऽध्यायः॥१५॥**

(ओं तद् सत्। इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे पुरुषोत्तमयोगः नाम पञ्चदशः अध्यायः॥)

ओं तद् सत्। इति श्रीमद्-भगवद्-गीतासु उपनिषत्सु ब्रह्म-विद्यायां योग-शास्त्रे श्री-कृष्ण-अर्जुन-संवादे पुरुष-उत्तम-योगः नाम पञ्च-दशः अध्यायः। (**15**)

ओं (ब्रह्मन्, the witness of all) is that [only] reality. Thus ends the fifteenth chapter, called "The Topic of the Being Who Transcends," of the [eighteen chapters of] *Songs of the Glorious Lord*, which is [looked upon as] उपनिषद् [and whose teaching is] in [the form of] a dialogue between श्री कृष्ण and अर्जुन, [the subject matter being] a knowledge of ब्रह्मन् and योग.

| | | | |
|---|---|---|---|
| 1 | ओं | ओम् (ब्रह्मन्, the witness of all,) | fr. ओम् *in.* |
| 2 | तद् सत् | [is] that [only] reality | fr. तद् *prn. n. sg. nom.*; सत् *n. sg. nom.* |
| 3 | इति | (quote-end quote), thus ends | fr. इति *in.* |
| 10 | श्रीमद्- | of the venerable, the glorious | |
| 11 | -भगवद्- | one having [limitless] glories, Lord | |
| 9 | -गीतासु | in [i.e., of] songs | fr. श्रीमत्-भगवत्-गीता *f. pl. loc.* (**2.43:**) |
| 12 | उपनिषत्सु | [which are/is looked upon as] उपनिषद्, sacred scripture | fr. उपनिषद् *f. pl. loc.* (**6.24:**) |
| 17 | ब्रह्म- | of ब्रह्मन् (reality/सत्) | |
| 16 | -विद्यायां | [and] a knowledge | fr. ब्रह्म-विद्या *f. sg. loc.* |
| 18 | योग-शास्त्रे | [and instruction of] योग (means, discipline, etc.) | fr. योग-शास्त्र *n. sg. loc.* |
| 14 | श्री-कृष्ण- | between Lord कृष्ण | |
| 15 | -अर्जुन- | and अर्जुन | |
| 13 | -संवादे | in [the form of] a dialogue | fr. श्री-कृष्ण-अर्जुन-संवाद *n. sg. loc.* (**2.7:**) |

| | | | |
|---|---|---|---|
| 8 | पुरुष-उत्तम- | of the being who transcends | |
| 7 | -योगः | the topic | fr. पुरुष-उत्तम-योग *a. m. sg. nom.* |
| 6 | नाम | by the name, called | fr. नाम *in.* |
| 4 | पञ्च-दशः | the fifteenth | fr. पञ्च-दश *ordinal a. m. sg. nom.* |
| 5 | अध्यायः | chapter | fr. अध्याय *m. sg. nom.* |

# अथ षोडशोऽध्यायः

**श्रीभगवानुवाच।**

**अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः। दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम्॥१॥**

**अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम्। दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम्॥२॥**

**तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता। भवन्ति सम्पदं दैवीमभिजातस्य भारत॥३॥**

(श्रीभगवान् उवाच। अभयं सत्त्वसंशुद्धिः, ज्ञानयोगव्यवस्थितिः। दानं दमः च यज्ञः च, स्वाध्यायः तपः आर्जवम्॥
अहिंसा सत्यम् अक्रोधः, त्यागः शान्तिः अपैशुनम्। दया भूतेषु अलोलुप्त्वं, मार्दवं ह्रीः अचापलम्॥
तेजः क्षमा धृतिः शौचम्, अद्रोहः नातिमानिता। भवन्ति सम्पदं दैवीम्, अभिजातस्य भारत॥)

श्री-भगवान् उवाच। अ-भयं, सत्त्व-संशुद्धिः, ज्ञान-योग-व्यवस्थितिः, दानं, दमः च, यज्ञः च, स्व-अध्यायः, तपः, आर्जवम्, अ-हिंसा, सत्यम्, अ-क्रोधः, त्यागः, शान्तिः, अ-पैशुनं, भूतेषु दया, अ-लोलुप्त्वं, मार्दवं, ह्रीः, अ-चापलं, तेजः, क्षमा, धृतिः, शौचम्, अ-द्रोहः, न-अतिमानिता — दैवीं सम्पदम् अभिजातस्य भवन्ति, भारत। (**16.1-3**)

The Lord said: Freedom from fear, purity of mind, steadiness in [i.e., commitment to] knowledge and its contemplation, charity, mastery over the [ways of] behavior, performing [daily] यज्ञ [prayers, etc.], reciting to oneself the वेद texts, prayerful discipline, straightforwardness, harmlessness, truthfulness, resolution of anger, renunciation, clarity, अपैशुन (not exposing defects of one person to another), compassion toward living beings, अलोलुप्त्वं (absence of agitation of the senses in the presence of objects), gentleness, modesty, absence of [meaningless] physical agitation, brilliance [expressed as self-confidence], accommodation [i.e., patience and understanding], resolve, cleanliness, absence of malice, absence of demanding respect from others—[these] are there for one born to the wealth of a देव, O अर्जुन.

| | | | |
|---|---|---|---|
| 1 | श्री-भगवान् उवाच | the Lord said | fr. श्री-भगवत् *m. sg. nom.*; √वच् *P. perf. 3rd sg.* (**5.10.3:**) |
| 2 | अ-भयं | freedom from fear | fr. अभय *n. sg. nom.* |
| 3 | सत्त्व-संशुद्धिः | purity of mind | fr. सत्त्व-संशुद्धि *f. sg. nom.* |
| 5 | ज्ञान-योग- | knowledge and its contemplation | |
| 4 | -व्यवस्थितिः | steadiness in [i.e., commitment to] | fr. ज्ञान-योग-व्यवस्थिति *f. sg. nom.* |
| 6 | दानं | charity | fr. दान *n. sg. nom.* |
| 7 | दमः च | [and] mastery over the [ways of] behavior | fr. दम *m. sg. nom.*; च *in.* |
| 8 | यज्ञः च | [and] performing [daily] यज्ञ [prayers, etc.] | fr. यज्ञ *m. sg. nom.*; च *in.* |
| 9 | स्व-अध्यायः | reciting to oneself the वेद texts | fr. स्व-अध्याय *m. sg. nom.* |
| 10 | तपः | prayerful discipline | fr. तपस् *n. sg. nom.* (**3.6:**) |
| 11 | आर्जवम् | straightforwardness | fr. आर्जव *n. sg. nom.* |

| | | | |
|---|---|---|---|
| 12 | अ-हिंसा | harmlessness | fr. अहिंसा *f. sg. nom.* |
| 13 | सत्यम् | truthfulness | fr. सत्य *n. sg. nom.* |
| 14 | अ-क्रोधः | resolution of anger | fr. अक्रोध *m. sg. nom.* |
| 15 | त्यागः | renunciation | fr. त्याग *m. sg. nom.* |
| 16 | शान्तिः | clarity | fr. शान्ति *f. sg. nom.* |
| 17 | अ-पैशुनं | not exposing defects of one person to another | fr. अपौशुन *n. sg. nom.* |
| 18 | भूतेषु दया | compassion towards living beings | fr. भूत *pp. of* √भू *n. pl. loc.*; दया *f. sg. nom.* |
| 19 | अ-लोलुप्त्वं | absence of agitation of the senses in the presence of objects | fr. अलोलुप्त्व *n. sg. nom.* |
| 20 | मार्दवं | gentleness | fr. मार्दव *n. sg. nom.* |
| 21 | ह्रीः | modesty | fr. ह्री *f. sg. nom.* |
| 22 | अ-चापलं | absence of [meaningless] physical agitation | fr. अचापल *n. sg. nom.* |
| 23 | तेजः | brilliance [expressed as self-confidence] | fr. तेजस् *n. sg. nom.* (**3.6:**) |
| 24 | क्षमा | accommodation [i.e., patience and understanding] | fr. क्षमा *f. sg. nom.* |
| 25 | धृतिः | resolve | fr. धृति *f. sg. nom.* |
| 26 | शौचम् | cleanliness | fr. शौच *n. sg. nom.* |
| 27 | अ-द्रोहः | absence of malice | fr. अद्रोह *m. sg. nom.* |
| 28 | न-अतिमानिता | absence of demanding respect from others | fr. न-अतिमानिता *f. sg. nom.* (**6.33:**) |
| 32 | दैवीं | of a देव | fr. दैवी *a. f. sg. acc.* |
| 31 | सम्पदम् | to the wealth | fr. सम्पद् *f. sg. acc.* (**3.6:**) (**7.8.5:**) |
| 30 | अभिजातस्य | for one born | fr. अभिजात *pp. of* अभि + √जन् *a. m. sg. gen.* (**6.6:** *irreg., cf.* **5.16.4:**) |
| 29 | भवन्ति | [these] are there | fr. √भू *1.P. pr. 3rd pl.* (**5.3:** & **2.3:** & **2.71:**) |
| <u>33</u> | भारत | (अर्जुन) O (Brilliant) Son of India | fr. भारत *m. sg. voc.* |

**दम्भो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च। अज्ञानं चाभिजातस्य पार्थ सम्पदमासुरीम्॥ ४॥**

(दम्भः दर्पः अभिमानः च, क्रोधः पारुष्यम् एव च। अज्ञानं च अभिजातस्य, पार्थ सम्पदम् आसुरीम्॥)

पार्थ, दम्भः दर्पः अभिमानः च, क्रोधः पारुष्यम् एव च, अ-ज्ञानं च — आसुरीं सम्पदम् अभिजातस्य। (**16.4**)

O अर्जुन, hypocrisy, arrogance [i.e., not understanding the factors responsible for what one has, thinking "I am responsible for these"], demanding respect from others, anger, harshness and lack of discernment—[these] are there for one born to the wealth of an असुर.

| | | | |
|---|---|---|---|
| 1 | पार्थ | (अर्जुन) O Son of पृथा | fr. पार्थ *m. sg. voc.* |
| 2 | दम्भः | hypocrisy | fr. दम्भ *m. sg. nom.* |
| 3 | दर्पः | arrogance [i.e., not understanding the factors responsible for what one has, thinking "I am responsible for these"] | fr. दर्प *m. sg. nom.* |
| 4 | अभिमानः च | [and] demanding respect from others | fr. अभिमान *m. sg. nom.*; च *in.* |
| 5 | क्रोधः | anger | fr. क्रोध *m. sg. nom.* |
| 6 | पारुष्यम् एव च | [and] harshness | fr. पारुष्य *n. sg. nom.*; एव *in.* (**6.19:**); च *in.* |
| 7 | अ-ज्ञानं च | and lack of discernment | fr. अज्ञान *n. sg. nom.*; च *in.* |
| 10 | आसुरीं | of an असुर | fr. आसुरी *a. f. sg. acc.* |
| 9 | सम्पदम् | to the wealth | fr. सम्पद् *f. sg. acc.* (**3.6:**) (**7.8.5:**) |
| 8 | अभिजातस्य | [these] [are there] for one born | fr. अभिजात *pp. of* अभि + √जन् *a. m. sg. gen.* (**6.6:** *irreg., cf.* **5.16.4:**) |

**दैवी सम्पद्विमोक्षाय निबन्धायासुरी मता। मा शुचः सम्पदं दैवीमभिजातोऽसि पाण्डव॥ ५॥**

(दैवी सम्पत् विमोक्षाय, निबन्धाय आसुरी मता। मा शुचः सम्पदं दैवीम्, अभिजातः असि पाण्डव॥)

दैवी सम्पत् विमोक्षाय, आसुरी निबन्धाय मता। मा शुचः, दैवीं सम्पदम् अभिजातः असि, पाण्डव। (**16.5**)

The wealth [i.e., disposition] of a देव (worthy person) is considered [to lead] to freedom and of an असुर (unworthy person) to bondage. Do not worry; you are born to the wealth of a देव, O अर्जुन.

| | | | |
|---|---|---|---|
| 2 | दैवी | of a देव (worthy person) | fr. दैवी *a. f. sg. nom.* |
| 1 | सम्पत् | the wealth [i.e., disposition] | fr. सम्पद् *f. sg. nom.* (**3.6.a:**) |
| 4 | विमोक्षाय | [to lead] to freedom | fr. विमोक्ष *m. sg. dat.* (**7.10.B:**) |
| 5 | आसुरी | [and] of an असुर (unworthy person) | fr. आसुरी *a. f. sg. nom.* |
| 6 | निबन्धाय | to bondage | fr. निबन्ध *m. sg. dat.* (**7.10.B:**) |
| 3 | मता | is considered | fr. मता *pp. of* √मन् *pt. f. sg. nom.* (**6.6:**) |

| | | | |
|---|---|---|---|
| 7 | मा शुचः | do not worry | fr. मा *in.*; √शुच् *P.* अ-*Aorist 2nd sg.* (**5.30.2.a:**) (**7.22.4:**) |
| 11 | दैवीं | of a देव | fr. दैवी *a. f. sg. acc.* |
| 10 | सम्पदम् | to the wealth | fr. सम्पद् *f. sg. acc.* (**3.6:**) (**7.8.5:**) |
| 9 | अभिजातः | born | fr. अभिजात *pp. of* अभि + √जन् *a. m. sg. gen.* (**6.6:** *irreg., cf.* **5.16.4:**) |
| 8 | असि | you are | fr. √अस् *2.P. pr. 2nd sg.* (**5.19.4:**) |
| 12 | पाण्डव | (अर्जुन) O Son of King पाण्डु | fr. पाण्डव *m. sg. voc.* |

**द्वौ भूतसर्गौ लोकेऽस्मिन्दैव आसुर एव च। दैवो विस्तरशः प्रोक्त आसुरं पार्थ मे शृणु॥६॥**

(द्वौ भूतसर्गौ लोके अस्मिन्, दैवः आसुरः एव च। दैवः विस्तरशः प्रोक्तः, आसुरं पार्थ मे शृणु॥)

अस्मिन् लोके द्वौ भूत-सर्गौ दैवः आसुरः एव च। पार्थ, दैवः विस्तरशः प्रोक्तः, आसुरं मे शृणु। (**16.6**)

In this world, there are two manifestations of [human] beings—the दैव (the worthy, who go with धर्म) and the आसुर (the unworthy, who fight against धर्म). O अर्जुन, the worthy has been told in detail. [Now] listen to Me about the unworthy.

| | | | |
|---|---|---|---|
| 1 | अस्मिन् लोके | in this world | fr. इदम् *prn. m. sg. loc.*; लोक *m. sg. loc.* |
| 2 | द्वौ भूत-सर्गौ | there are two manifestations of [human] beings | fr. द्व *num. a. m. du. nom.*; भूत-सर्ग *m. du. nom.* |
| 3 | दैवः | the दैव (the worthy, who go with धर्म) | fr. दैव *a. m. sg. nom.* |
| 4 | आसुरः एव च | and the आसुर (the unworthy, who fight against धर्म) | fr. आसुर *a. m. sg. nom.*; एव *in.* (**6.19:**); च *in.* |
| 5 | पार्थ | (अर्जुन) O Son of पृथा | fr. पार्थ *m. sg. voc.* |
| 6 | दैवः | the worthy | fr. दैव *a. m. sg. nom.* |
| 8 | विस्तरशः | in detail | fr. विस्तारशस् *in.* (**6.19:**) |
| 7 | प्रोक्तः | has been told | fr. प्रोक्त *pp. of* प्र + √वच् *pt. m. sg. nom.* (**6.6:** & **2.3.a:** & **2.80:**) |
| 11 | आसुरं | about the unworthy | fr. आसुर *a. m. sg. acc.* |
| 10 | मे | to Me | fr. अहम् *prn. sg. gen.* (**7.12.1.c:**) |
| 9 | शृणु | [now] listen | fr. √श्रु *5.P. impv. 2nd sg.* (**5.3:**) |

**प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः। न शौचं नापि चाचारो न सत्यं तेषु विद्यते॥७॥**

(प्रवृत्तिं च निवृत्तिं च, जनाः न विदुः आसुराः। न शौचं न अपि च आचारः, न सत्यं तेषु विद्यते॥)

आसुराः जनाः प्रवृत्तिं च निवृत्तिं च न विदुः। तेषु न शौचं, न अपि आचारः, न च सत्यं विद्यते। (**16.7**)

People who are unworthy do not know [adaptive] pursuit or [adaptive] withdrawal. In them there is no [inner] cleanliness, no [adaptive] conduct nor truth.

| | | | |
|---|---|---|---|
| 2 | आसुराः | who are unworthy | fr. आसुर *a. m. pl. nom.* |
| 1 | जनाः | people | fr. जन *m. pl. nom.* |
| 4 | प्रवृत्तिं च | [adaptive] pursuit | fr. प्रवृत्ति *f. sg. acc.*; च *in.* |
| 5 | निवृत्तिं च | or [adaptive] withdrawal | fr. निवृत्ति *f. sg. acc.*; च *in.* |
| 3 | न विदुः | do not know | fr. न *in.*; √विद् *P. perf.* $3^{rd}$ *pl.* (**5.28:**) |
| 6 | तेषु | in them | fr. तद् *prn. m. pl. loc.* |
| 8 | न शौचं | no [inner] cleanliness | fr. न *in.*; शौच *n. sg. nom.* |
| 9 | न अपि आचारः | no [adaptive] conduct | fr. न *in.*; अपि *in.*; आचार *m. sg. nom.* |
| 10 | न च सत्यं | nor truth | fr. न *in.*; च *in.*; सत्य *n. sg. nom.* |
| 7 | विद्यते | there is | fr. √विद् *ps. pr.* $3^{rd}$ *sg.* |

**असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम्। अपरस्परसम्भूतं किमन्यत्कामहैतुकम्॥८॥**

(असत्यम् अप्रतिष्ठं ते, जगत् आहुः अनीश्वरम्। अपरस्परसम्भूतं, किम् अन्यद् कामहैतुकम्॥)

जगत् अ-सत्यम्, अ-प्रतिष्ठम्, अन्-ईश्वरम्, काम-हैतुकम् अपरस्-पर-सम्भूतं किम् अन्यद् [इति] ते आहुः। (**16.8**)

—They say [that] people are untruthful [because they themselves are untruthful], are without [an ethical] basis [because they are without one], are godless [because they are], and are born of mutual union [of male and female] due to lust [not due to their कर्म-फल]—nothing else.

| | | | |
|---|---|---|---|
| 2 | जगत् | people | fr. जगत् *n. sg. nom.* (**3.5:**) (**7.4.1:**) |
| 3 | अ-सत्यम् | are untruthful | fr. असत्य *n. n. sg. nom.* |
| 4 | अ-प्रतिष्ठम् | are without [an ethical] basis | fr. अप्रतिष्ठ *a. n. sg. nom.* |
| 5 | अन्-ईश्वरम् | are godless | fr. अनीश्वर *a. n. sg. nom.* |
| 8 | काम-हैतुकम् | due to lust | fr. काम-हैतुक *a. n. sg. nom.* |
| 7 | अपरस्-पर- | of mutual union [of male and female] | |
| 6 | -सम्भूतं | [and] are born | fr. अपर-स्-पर-सम्भूत *a. n. sg. nom.* (**2.24:** & **.26:**) |
| 9 | किम् अन्यद् | what else? nothing else | fr. किम् *prn. n. sg. nom.*; अन्य *prn. a. n. sg. nom.* (**4.16.1:**) |
| 1 | [इति] ते आहुः | they say [that] | fr. तद् *prn. m. pl. nom.*; √अह् *P. perf.* $3^{rd}$ *pl.* (**5.8.5:**) |

**एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः। प्रभवन्त्युग्रकर्माणः क्षयाय जगतोऽहिताः॥९॥**

(एतां दृष्टिम् अवष्टभ्य, नष्टात्मानः अल्पबुद्धयः। प्रभवन्ति उग्रकर्माणः, क्षयाय जगतः अहिताः॥)

एतां दृष्टिम् अवष्टभ्य, नष्ट-आत्मानः, अल्प-बुद्धयः, उग्र-कर्माणः, अ-हिताः जगतः क्षयाय प्रभवन्ति। (**16.9**)

Having recourse to this view [where there is no personal responsibility toward others or for oneself], [thus] whose intellects are lost, [thus] whose minds are limited [to sense pursuits], who are of cruel actions—[these] enemies are set for destroying the world.

| | | | |
|---|---|---|---|
| 2 | एतां दृष्टिम् | to this view [where there is no personal responsibility towards others or for oneself] | fr. एतद् *prn. f. sg. acc.*; दृष्टि *f. sg. acc.* |
| 1 | अवष्टभ्य | having recourse | fr. अवष्टभ्य *in. pt.* अव + √स्थभ् (*w/ irreg. application of* **2.101:**) |
| 3 | नष्ट-आत्मानः | [thus] whose intellects are lost | fr. नष्ट-आत्मन् *a. m. pl. nom.* (**3.22:**) |
| 4 | अल्प-बुद्धयः | [thus] whose minds are limited [to sense pursuits] | fr. अल्प-बुद्धि *a. m. pl. nom.* |
| 5 | उग्र-कर्माणः | who are of cruel actions | fr. उग्र-कर्मन् *a. m. pl. nom.* (**3.22:** & **2.92:**) |
| 6 | अ-हिताः | [these] enemies | fr. अहित *pp. of* √धा *m. pl. nom.* (**6.6:**) |
| 9 | जगतः | the world | fr. जगत् *n. sg. gen.* (**3.5:**) |
| 8 | क्षयाय | for destroying | fr. क्षय *m. sg. dat.* (**7.10.B.1.a:**) |
| 7 | प्रभवन्ति | are set | fr. प्र + √भू *1.P. pr. 3rd pl.* (**5.3:** & **2.3:** & **2.71:**) |

**काममाश्रित्य दुष्पूरं दम्भमानमदान्विताः। मोहाद्गृहीत्वासद्ग्राहान्प्रवर्तन्तेऽशुचिव्रताः॥१०॥**

(कामम् आश्रित्य दुष्पूरं, दम्भमानमदान्तिताः। मोहात् गृहीत्वा असद्ग्राहान्, प्रवर्तन्ते अशुचिव्रताः॥)

दुष्-पूरं कामम् आश्रित्य, दम्भ-मान-मद-अन्तिताः, मोहात् अ-सद्-ग्राहान् गृहीत्वा, अ-शुचि-व्रताः प्रवर्तन्ते। (**16.10**)

Taking to desire that is insatiable; filled with hypocrisy, demands for respect, and with arrogance; assuming improper understandings due to delusion; and with unworthy vows, they keep going [in संसार].

| | | | |
|---|---|---|---|
| 3 | दुष्-पूरं | that is insatiable | fr. दुस्-पूर *a. m. sg. acc.* (*irreg. sandhi before* प्, *perhaps influenced by* **2.101:** *and/or the root* √दुष् *from which* दुस् *is derived*) |
| 2 | कामम् | desire | fr. काम *m. sg. acc.* |
| 1 | आश्रित्य | taking to | fr. आश्रित्य *in. pt. of* आ + √श्रि (**6.9:**) |
| 5 | दम्भ- | with hypocrisy | |
| 6 | -मान- | demands for respect | |
| 7 | -मद- | and with arrogance | |
| 4 | -अन्तिताः | filled | fr. दम्भ-मान-मद-अन्तित *a. m. pl. nom.* |

| | | | |
|---|---|---|---|
| 10 | मोहात् | due to delusion | fr. मोह *m. sg. abl.* |
| 9 | अ-सद्-ग्राहान् | improper understandings | fr. असत्-ग्राह *m. pl. acc.* (**2.43:**) |
| 8 | गृहीत्वा | assuming | fr. गृहीत्वा *in. pt. of* √ग्रह् (**6.9:**) |
| 11 | अ-शुचि- | and with unworthy | |
| 12 | -व्रताः | vows | fr. अशुचि-व्रत *a. m. pl. nom.* |
| <u>13</u> | प्रवर्तन्ते | they keep going [in संसार] | fr. प्र + √वृत् *1.Ā. pr. 3rd pl.* |

**चिन्तामपरिमेयां च प्रलयान्तामुपाश्रिताः। कामोपभोगपरमा एतावदिति निश्चिताः॥११॥**
**आशापाशशतैर्बद्धाः कामक्रोधपरायणाः। ईहन्ते कामभोगार्थमन्यायेनार्थसञ्चयान्॥१२॥**

(चिन्ताम् अपरिमेयां च, प्रलयान्ताम् उपाश्रिताः। कामोपभोगपरमाः, एतावत् इति निश्चिताः॥
आशापाशशतैः बद्धाः, कामक्रोधपरायणाः। ईहन्ते कामभोगार्थम्, अन्यायेन अर्थसञ्चयान्॥)

प्रलय-अन्तां च अ-परिमेयां चिन्ताम् उपाश्रिताः, काम-उपभोग-परमाः, "एतावत्" इति निश्चिताः, आशा-पाश-शतैः बद्धाः, काम-क्रोध-पर-अयणाः, काम-भोग-अर्थम् अ-न्यायेन अर्थ-सञ्चयान् ईहन्ते। (**16.11-12**)

Committed to innumerable worries [over their possessions], which last till death; having consumption of objects of desire as the ultimate; having concluded that [life] is "only this much" [i.e., having a philosophy that life is only for consumption]; bound by hundreds of fetters that are anticipations; having as their goal [more and more exaggerated] requirements and anger [to control others]—they engage in accumulating wealth for the enjoyment of objects of desire through inappropriate means.

| | | | |
|---|---|---|---|
| 4 | प्रलय-अन्ताम् च | (and) which last till death | fr. प्रलय-अन्ता *a. f. sg. acc.*; च *in.* |
| 2 | अ-परिमेयां | to innumerable | fr. अपरिमेया *pot. ps. pt. of* परि + √मा *a. f. sg. acc.* (**6.8:**) |
| 3 | चिन्ताम् | worry/worries [over their possessions] | fr. चिन्ता *f. sg. acc.* |
| 1 | उपाश्रिताः | committed | fr. उपाश्रित *pp. of* उप + आ + √श्रि *a. m. pl. nom.* |
| 5 | काम-उपभोग- | having consumption of objects of desire | |
| 6 | -परमाः | as the ultimate | fr. काम-उपभोग-परम *a. m. pl. nom.* |
| 8 | एतावत् इति | that [life] is "only this much" [i.e., having a philosophy that life is only for consumption] | fr. एतावत् *a. n. sg. nom.*; इति *in.* |
| 7 | निश्चिताः | having concluded | fr. निश्चित *pp. of* निस् + √चि *a. m. pl. nom.* (**2.24:** & **.27:**) |
| 11 | आशा- | that are anticipations | |
| 10 | -पाश-शतैः | by hundreds of fetters | fr. आशा-पाश-शत *n. pl. inst.* |
| 9 | बद्धाः | bound | fr. बद्ध *pp. of* √बुध् *a. m. pl. nom.* (**6.6:** & **2.76:** & **2.78:**) |

| | | | |
|---|---|---|---|
| 13 | काम-क्रोध- | [more and more exaggerated] requirements and anger [to control others] | |
| 12 | -पर-अयणाः | having as their goal | fr. काम-क्रोध-पर-अयण *a. m. pl. nom.* |
| 16 | काम-भोग-अर्थम् | for the enjoyment of objects of desire | fr. काम-भोग-अर्थम् *in.* (**6.32:**) |
| 17 | अ-न्यायेन | through inappropriate means | fr. अन्याय *m. sg. inst.* |
| 15 | अर्थ-सञ्चयान् | accumulating wealth | fr. अर्थ-सञ्चय *m. pl. acc.* |
| 14 | ईहन्ते | they engage in | fr. √ईह् *1.Ā. pr. 3rd pl.* |

| 7 | फलम् | for a [later] result [i.e., for पुण्य] | fr. फल *n. sg. acc.* |
| 6 | उद्दिश्य वा पुनः | or on the other hand with a view | fr. उद्दिश्य *in. pt. of* उद् + √दिश् (**6.17:**); वा *in.*; पुनर् *in.* |
| 8 | परिक्लिष्टं च | and is fraught with pain [i.e., a sense of loss at the cost of the charity] | fr. परिक्लिष्ट *pp. of* परि + √क्लिश् *a. n. sg. nom.* (**2.85:**); च *in.* |
| 3 | यद् | which, that | fr. यद् *prn. n. sg. nom.* |
| 4 | दीयते | is given | fr. √दा *ps. pr. 3rd sg.* (**5.37.1:**) |
| 9 | तद् | that | fr. तद् *prn. n. sg. nom.* |
| 2 | दानं | charity | fr. दान *n. sg. nom.* |
| 11 | राजसं | predominately रजस् | fr. राजस *a. n. sg. nom.* (**7.7.1:**) |
| 10 | स्मृतम् | is held to be | fr. स्मृत *pp. of* √स्मृ *pt. n. sg. nom.* |

**अदेशकाले यद्दानमपात्रेभ्यश्च दीयते। असत्कृतमवज्ञातं तत्तामसमुदाहृतम्॥ २२॥**

(अदेशकाले यद् दानम्, अपात्रेभ्यः च दीयते। असत्कृतम् अवज्ञातं, तद् तामसम् उदाहृतम्॥ )

अ-देश-काले अ-पात्रेभ्यः च, अ-सत्-कृतम् अवज्ञातं यद् दानं दीयते, तद् तामसम् उदाहृतम्। (**17.22**)

Charity that is given at the wrong [or inauspicious] place or time, to those who are not worthy [e.g., fools or thieves], [that is given] without expressing respect or with contempt—that is said to be predominately तमस्.

| | | | |
|---|---|---|---|
| 3 | अ-देश-काले | at the wrong [or inauspicious] place or time | fr. अ-देश-काल *m. sg. loc.* |
| 4 | अ-पात्रेभ्यः च | to those who are not worthy [e.g., fools or thieves] | fr. अपात्र *n. pl. dat.* (**7.10.A.1:**); च *in.* |
| 5 | अ-सत्-कृतम् | [that is given] without expressing respect | fr. असत्-कृत *a. n. sg. nom.* |
| 6 | अवज्ञातं | [or] with contempt | fr. अवज्ञात *pp. of* अव + √ज्ञा *a. n. sg. nom.* (**6.6:**) |
| 1 | यद् दानं | charity that | fr. यद् *prn. n. sg. nom.*; दान *n. sg. nom.* |
| 2 | दीयते | is given | fr. √दा *ps. pr. 3rd sg.* (**5.37.1:**) |
| 7 | तद् | that | fr. तद् *prn. n. sg. nom.* |
| 9 | तामसम् | predominately तमस् | fr. तामस *a. n. sg. nom.* (**7.7.1:**) |
| 8 | उदाहृतम् | is said to be | fr. उदाहृत *pp. of* उद् + आ + √हृ *pt. n. sg. nom.* |

**ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः। ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा॥ २३॥**

(ओं तद् सत् इति निर्देशः, ब्रह्मणः त्रिविधः स्मृतः। ब्राह्मणाः तेन वेदाः च, यज्ञाः च विहिताः पुरा॥ )

"ओं तद् सत्" इति ब्रह्मणः त्रि-विधः निर्देशः स्मृतः। तेन ब्राह्मणाः वेदाः च यज्ञाः च पुरा विहिताः। (**17.23**)

"ओं तद् सत्" is considered the threefold expression [revealing] ब्रह्मन्. Through that [expression], the ब्राह्मण-s [i.e., all people; hence, all creatures—since जीव-s require various embodiments], the [four] वेद-s, and यज्ञ-s were formed in the beginning [of each cycle, by Lord ब्रह्मा].

| | | | |
|---|---|---|---|
| 1 | ओं तद् सत् इति | "ओम् तद् सत्" | fr. ओम् *in.*; तद् *prn. n. sg. nom.*; सत् *n. sg. nom..*; इति *in.* |
| 5 | ब्रह्मणः | ब्रह्मन् | fr. ब्रह्मन् *n. sg. gen.* (**3.22:** & **2.92:**) |
| 3 | त्रि-विधः | the threefold | fr. त्रि-विध *a. m. sg. nom.* |
| 4 | निर्देशः | expression [revealing] | fr. निर्देश *m. sg. nom.* |
| 2 | स्मृतः | is considered | fr. स्मृत *pp. of* √स्मृ *pt. m. sg. nom.* |
| 6 | तेन | through that [expression] | fr. तद् *m. sg. inst.* |
| 7 | ब्राह्मणाः | the ब्राह्मण-s [i.e., all people, hence all creatures] | fr. ब्राह्मण *m. pl. nom.* |
| 8 | वेदाः च | the [four] वेद-s | fr. वेद *m. pl. nom.*; च *in.* |
| 9 | यज्ञाः च | and यज्ञ-s | fr. यज्ञ *m. pl. nom.*; च *in.* |
| 11 | पुरा | in the beginning [of each cycle, by Lord ब्रह्मा] | fr. पुरा *in.* (**6.16:**) |
| 10 | विहिताः | were formed | fr. विहित *pp. of* वि + √धा *pt. m. pl. nom.* (**6.6:** *irreg.*) |

**तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः। प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम्॥ २४॥**

(तस्मात् ओम् इति उदाहृत्य, यज्ञदानतपःक्रियाः। प्रवर्तन्ते विधानोक्ताः, सततं ब्रह्मवादिनाम्॥ )

तस्मात् "ओम्" इति उदाहृत्य ब्रह्म-वादिनां विधान-उक्ताः यज्ञ-दान-तपः-क्रियाः स-ततं प्रवर्तन्ते। (**17.24**) —Therefore, for those who know the वेद-s, activities—[such as] rituals, charity, and prayerful disciplines mentioned in [scriptural] injunctions—are always begun [by first] uttering "ओम्" (considered a purifying sound).

| | | | |
|---|---|---|---|
| 1 | तस्मात् | therefore | fr. तस्मात् *in.* |
| 8 | ओम् | "ओम्" (considered a purifying sound) | fr. ओम् *in.* |
| 7 | इति उदाहृत्य | [by first] uttering | fr. इति *in.*; उदाहृत्य *in. pt. of* उद् + आ + √हृ (**6.9:**) |
| 2 | ब्रह्म-वादिनां | for those who know the वेद-s | fr. ब्रह्म-वादिन् *a. m. pl. gen.* (**3.15:**) (**7.19:**) |
| 5 | विधान-उक्ताः | mentioned in [scriptural] injunctions | fr. विधान-उक्ता *a. f. pl. nom.* |
| 4 | यज्ञ-दान-तपः- | rituals, charity and prayerful disciplines | |
| 3 | -क्रियाः | [all] activities [such as] | fr. यज्ञ-दान-तपस्-क्रिया *f. pl. nom.* |
| 6 | स-ततं प्रवर्तन्ते | are always begun | fr. स-ततम् *in.*; प्र + √वृत् *1.Ā. pr. 3rd pl.* |

**तदित्यनभिसन्धाय फलं यज्ञतपःक्रियाः। दानक्रियाश्च विविधाः क्रियन्ते मोक्षकाङ्क्षिभिः॥ २५॥**

(तद् इति अनभिसन्धाय, फलं यज्ञतपःक्रियाः। दानक्रियाः च विविधाः, क्रियन्ते मोक्षकाङ्क्षिभिः॥)

"तद्" इति फलम् अन्-अभिसन्धाय मोक्ष-काङ्क्षिभिः विविधाः यज्ञ-तपः-क्रियाः दान-क्रियाः च क्रियन्ते। (**17.25**)

[Uttering] "तद्" ("that," also purifying when it refers to ब्रह्मन् in expressions such as "ओं तद् सत्"), those who [only] desire complete freedom perform various activities—[such as] यज्ञ, तपस्, and दान—without requiring [the particular activity's limited] result.

| | | | |
|---|---|---|---|
| 1 | तद् इति | [uttering] "तद्" ("that," also purifying when it refers to ब्रह्मन्) | fr. तद् *prn. n. sg. nom.*; इति *in.* |
| 8 | फलम् | [the particular activity's limited] result | fr. फल *n. sg. acc.* (**7.19:**) |
| 7 | अन्-अभिसन्धाय | without requiring | fr. अनभिसन्धाय *in. pt. of* अभि + सम् + √धा (**2.55:**) |
| 2 | मोक्ष-काङ्क्षिभिः | [by] those who [only] desire complete freedom | fr. मोक्ष-काङ्क्षिन् *a. m. pl. inst.* (**3.15:**) (**7.19:**) |
| 4 | विविधाः | various | fr. विविधा *a. f. pl. nom.* |
| 5 | यज्ञ-तपः-क्रियाः | activities [such as] यज्ञ, तपस् | fr. यज्ञ-तपस्-क्रिया *f. pl. nom.* (**2.24:**) |
| 6 | दान-क्रियाः च | and [activities of] दान | fr. दान-क्रिया *f. pl. nom.*; च *in.* |
| <u>3</u> | क्रियन्ते | [are] perform[ed] | fr. √कृ *ps. pr. 3rd pl.* (**5.37.3:**) |

**सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते। प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते॥ २६॥**

(सद्भावे साधुभावे च, सत् इति एतद् प्रयुज्यते। प्रशस्ते कर्मणि तथा, सच्छब्दः पार्थ युज्यते॥)

पार्थ, "सत्" इति एतद् सद्-भावे साधु-भावे च प्रयुज्यते, तथा सच्-छब्दः प्रशस्ते कर्मणि युज्यते। (**17.26**)

O अर्जुन, this [word] "सत्" [also a purifying sound that in its various forms, from the root अस् ("to exist"), refers to existence, which is but ब्रह्मन्] is used in the sense of "being existent" and "being good." Similarly, the word "सत्" is used in the sense of "sacred action."

| | | | |
|---|---|---|---|
| 1 | पार्थ | (अर्जुन) O Son of पृथा | fr. पार्थ *m. sg. voc.* |
| 3 | सत् इति | [word] "सत्" [also a purifying sound] | fr. सत् *n. sg. nom.*; इति *in.* |
| 2 | एतद् | this | fr. एतद् *prn. n. sg. nom.* |
| 5 | सद्-भावे | in the sense of "being existent" | fr. सत्-भाव *m. sg. loc.* (**2.43:**) (**7.13.1.g:**) |
| 6 | साधु-भावे च | and "being good" | fr. साधु-भाव *m. sg. loc.* (**7.13.1.g:**); च *in.* |
| 4 | प्रयुज्यते | is used | fr. प्र + √युज् *ps. pr. 3rd sg.* |

| | | | |
|---|---|---|---|
| 7 | तथा | similarly | fr. तथा *in.* (**6.19:**) |
| 8 | सच्-छब्दः | the word "सत्" | fr. सत्-शब्द *m. sg. nom.* (**2.45: & .56:**) |
| 10 | प्रशस्ते | in the sense of "sacred | fr. प्रशस्त *pp. of* प्र + √शंस् *a. n. sg. loc.* (**6.6:**) |
| 11 | कर्मणि | action" | fr. कर्मन् *n. sg. loc.* (**7.13.1.g:**) |
| 9 | युज्यते | is used | fr. √युज् *ps. pr. 3rd sg.* |

**यज्ञे तपसि दाने च स्थितिः सदिति चोच्यते। कर्म चैव तदर्थीयं सदित्येवाभिधीयते।। २७।।**

(यज्ञे तपसि दाने च, स्थितिः सत् इति च उच्यते। कर्म च एव तदर्थीयं, सत् इति एव अभिधीयते।। )

यज्ञे तपसि दाने च स्थितिः "सत्" इति उच्यते च, तद्-अर्थीयं च कर्म एव "सत्" इति एव अभिधीयते। (**17.27**)

A स्थिति (pursuit or commitment, with श्रद्धा) toward यज्ञ, तपस्, or दान is also called "सत्" [i.e., a "proper" pursuit] and, indeed, [any] action that is for the sake of तद् (that [Lord], as in the expression, तत् त्वम् असि "That [Lord] you are") is called "सत्."

| | | | |
|---|---|---|---|
| 2 | यज्ञे | towards यज्ञ | fr. यज्ञ *m. sg. loc.* (**7.13.2.c:**) |
| 3 | तपसि | तपस् | fr. तपस् *n. sg. loc.* (**7.13.2.c:**) |
| 4 | दाने च | and दान | fr. दान *n. sg. loc.* (**7.13.2.c:**); च *in.* |
| 1 | स्थितिः | a स्थिति (pursuit or commitment – with श्रद्धा) | fr. स्थिति *f. sg. nom.* |
| 6 | सत् इति | "सत्" [i.e., a "proper" pursuit] | fr. सत् *n. sg. nom.*; इति *in.* |
| 5 | उच्यते च | is also called | fr. √वच् *ps. pr.3rd sg.* (**5.37.6: & 2.3.a:**); च *in.* |
| 8 | तद्-अर्थीयं च | that is for the sake of तद् (that [Lord], as in the expression, तत् त्वम् असि "That [Lord] you are") | fr. तद्-अर्थीय *a. n. sg. nom.*; च *in.* |
| 7 | कर्म एव | and indeed [any] action | fr. कर्मन् *n. sg. nom.* (**3.22:**); एव *in.* (**6.19:**) |
| 10 | सत् इति | "सत्" | fr. सत् *n. sg. nom.*; इति *in.* |
| 9 | एव अभिधीयते | is [indeed] called | fr. एव *in.* (**6.19:**); अभि + √धा *ps. pr.3rd sg.* (**5.37.1:**) |

**अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत्। असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह॥ २८॥**

(अश्रद्धया हुतं दत्तं, तपः तप्तं कृतं च यद्। असत् इति उच्यते पार्थ, न च तद् प्रेत्य नो इह॥)

पार्थ, अ-श्रद्धया हुतं दत्तं तपः तप्तं च यद् कृतम् "अ-सत्" इति उच्यते, तद् न [अस्ति] च प्रेत्य नो इह। (**17.28**)

O अर्जुन, whatever offering, charity, or discipline is done without श्रद्धा is said to be "असत्" [i.e., as good as not done]; [since] after death it [i.e., the action in the form of कर्म-फल] is not, nor [is it] here [in this life] [i.e., it only amounts to a loss of effort and cost].

| | | | |
|---|---|---|---|
| 1 | पार्थ | (अर्जुन) O Son of पृथा | fr. पार्थ *m. sg. voc.* |
| 7 | अ-श्रद्धया | without श्रद्धा | fr. अश्रद्धा *f. sg. inst.* |
| 3 | हुतं | offering | fr. हुत *pp. of* √हु *n. sg. nom.* |
| 4 | दत्तं | charity | fr. दत्त *pp. of* √दा *n. sg. nom.* (**6.6:** *irreg.*) |
| 5 | तपः तप्तं च | or discipline | fr. तपस् *n. sg. nom.*; तप्त *pp. of* √तप् *a. n. sg. nom.*; च *in.* |
| 2 | यद् | whatever | fr. यद् *prn. n. sg. nom.* |
| 6 | कृतम् | is done | fr. कृत *pp. of* √कृ *a. n. sg. nom.* |
| 9 | अ-सत् इति | "असत्" [i.e., as good as not done] | fr. सत् *n. sg. nom.*; इति *in.* |
| 8 | उच्यते | is said to be | fr. √वच् *ps. pr.3rd sg.* (**5.37.6: & 2.3.a:**) |
| 11 | तद् | it [i.e., the action in the form of कर्म-फल] | fr. तद् *prn. n. sg. nom.* |
| 12 | न [अस्ति] च | is not | fr. न *in.*; च *in.* |
| 10 | प्रेत्य | [since] after death | fr. प्रेत्य *in. pt. of* प्र + √इ (**7.19:**) |
| 13 | नो इह | nor [is it] here [in this life] [i.e., it only amounts to a loss of effort and cost] | fr. नो *in.* (**6.20:**); इह *in.* (**6.19:**) |

**ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे श्रद्धात्रयविभागयोगो नाम सप्तदशोऽध्यायः॥१७॥**

(ओं तद् सत्। इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे श्रद्धात्रयविभागयोगः नाम सप्तदशः अध्यायः॥)

ओं तद् सत्। इति श्रीमद्-भगवद्-गीतासु उपनिषत्सु ब्रह्म-विद्यायां योग-शास्त्रे श्री-कृष्ण-अर्जुन-संवादे श्रद्-धा-त्रय-विभाग-योगः नाम सप्त-दशः अध्यायः। (**17**)

ओं (ब्रह्मन्, the witness of all) is that [only] reality. Thus ends the seventeenth chapter, called "The Topic of the Distinction of the Three श्रद्धा-s," of the [eighteen chapters of] *Songs of the Glorious Lord*, which is [looked upon as] उपनिषद् [and whose teaching is] in [the form of] a dialogue between श्री कृष्ण and अर्जुन, [the subject matter being] a knowledge of ब्रह्मन् and योग.

| | | | |
|---|---|---|---|
| 1 | ओं | ओम् (ब्रह्मन्, the witness of all,) | fr. ओम् *in.* |
| 2 | तद् सत् | [is] that [only] reality | fr. तद् *prn. n. sg. nom.*; सत् *n. sg. nom.* |
| 3 | इति | (quote-end quote), thus ends | fr. इति *in.* |
| 11 | श्रीमद्- | of the venerable, the glorious | |
| 12 | -भगवद्- | one having [limitless] glories, Lord | |
| 10 | -गीतासु | in [i.e., of] songs | fr. श्रीमत्-भगवत्-गीता *f. pl. loc.* (**2.43:**) |
| 13 | उपनिषत्सु | [which are/is looked upon as] उपनिषद्, sacred scripture | fr. उपनिषद् *f. pl. loc.* (**6.24:**) |
| 18 | ब्रह्म- | of ब्रह्मन् (reality/सत्) | |
| 17 | -विद्यायां | [and] a knowledge | fr. ब्रह्म-विद्या *f. sg. loc.* |
| 19 | योग-शास्त्रे | [and instruction of] योग (means, discipline, etc.) | fr. योग-शास्त्र *n. sg. loc.* |
| 15 | श्री-कृष्ण- | between Lord कृष्ण | |
| 16 | -अर्जुन- | and अर्जुन | |
| 14 | -संवादे | in [the form of] a dialogue | fr. श्री-कृष्ण-अर्जुन-संवाद *n. sg. loc.* |
| 9 | श्रद्-धा-त्रय- | into the three श्रद्धा-s | |
| 8 | -विभाग- | of the division | |
| 7 | -योगः | the topic | fr. श्रद्धा-त्रय-विभाग-योग *a. m. sg. nom.* |
| 6 | नाम | by the name, called | fr. नाम *in.* |
| 4 | सप्त-दशः | the seventeenth | fr. सप्त-दश *ordinal a. m. sg. nom.* |
| 5 | अध्यायः | chapter | fr. अध्याय *m. sg. nom.* |

# अथाष्टादशोऽध्यायः

**अर्जुन उवाच।**

**सन्न्यासस्य महाबाहो तत्त्वमिच्छामि वेदितुम्। त्यागस्य च हृषीकेश पृथक्केशिनिषूदन॥१॥**

(अर्जुनः उवाच। सन्न्यासस्य महाबाहो, तत्त्वम् इच्छामि वेदितुम्। त्यागस्य च हृषीकेश, पृथक् केशिनिषूदन॥)

अर्जुनः उवाच। हृषीक-ईश महा-बाहो केशि-निषूदन, सन्न्यासस्य त्यागस्य च पृथक् तत्त्वं वेदितुम् इच्छामि। (**18.1**)

अर्जुन said: O कृष्ण, Great Warrior and Slayer of [the Demon] केशिन्, I want to know distinctly the truth of [i.e., the difference between] सन्न्यास and त्याग (both terms mean "renunciation" and are used both separately and seemingly interchangeably by Lord कृष्ण in this teaching).

| | | | |
|---|---|---|---|
| 1 | अर्जुनः उवाच | अर्जुन said | fr. अर्जुन *m. sg. nom.*; √वच् *P. perf. 3rd sg.* (**5.10.3:**) |
| 2 | हृषीक-ईश | (कृष्ण) O Lord of the Senses | fr. हृषीकेश *m. sg. voc.* |
| 3 | महा-बाहो | (कृष्ण) O Great Warrior | fr. महा-बाहु *m. sg. voc.* |
| 4 | केशि-निषूदन | (कृष्ण) O Slayer of the [Demon] केशिन् | fr. केशि-निषूदन *m. sg. voc.* |
| 9 | सन्न्यासस्य | of [the difference between] सन्न्यास | fr. सन्न्यास *m. sg. gen.* |
| 10 | त्यागस्य च | and त्याग | fr. त्याग *m. sg. gen.*; च *in.* |
| 7 | पृथक् | distinctly | fr. पृथक् *in.* |
| 8 | तत्त्वं | the truth | fr. तत्त्व *n. sg. acc.* |
| 6 | वेदितुम् | to know | fr. वेदितुम् *inf. of* √विद् *in.* (**6.10:**) |
| 5 | इच्छामि | I want | fr. √इष् *6.P. pr. 1st sg.* (**5.17.3:** & **5.5.a:**) |

**श्रीभगवानुवाच।**

**काम्यानां कर्मणां न्यासं सन्न्यासं कवयो विदुः। सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः॥२॥**

(श्रीभगवान् उवाच। काम्यानां कर्मणां न्यासं, सन्न्यासं कवयः विदुः। सर्वकर्मफलत्यागं, प्राहुः त्यागं विचक्षणाः॥)

श्री-भगवान् उवाच। कवयः काम्यानां कर्मणां न्यासं सन्न्यासं विदुः। विचक्षणाः सर्व-कर्म-फल-त्यागं त्यागं प्राहुः। (**18.2**)

The Lord said: Sages know renunciation of [all] कर्मन्-s backed by desire to be सन्न्यास [i.e., the lifestyle and, especially, the knowledge "I am not the doer"]. The wise [also] say that renunciation of the फल (the result) of all actions [i.e., कर्म-योग as also taught here] is त्याग.

| | | | |
|---|---|---|---|
| 1 | श्री-भगवान् उवाच | the Lord said | fr. श्री-भगवत् *m. sg. nom.*; √वच् *P. perf. 3rd sg.* (**5.10.3:**) |
| 2 | कवयः | sages | fr. कवि *m. sg. nom.* |
| 6 | काम्यानां | backed by desire | fr. काम्य *a. n. pl. gen.* |
| 5 | कर्मणां | of [all] कर्मन्-s | fr. कर्मन् *n. pl. gen.* (**3.22:**) |
| 4 | न्यासं | renunciation | fr. न्यास *m. sg. acc.* |
| 7 | सन्न्यासं | to be सन्न्यास [i.e., the lifestyle, but especially the knowledge "I am not the doer"] | fr. सन्न्यास *m. sg. acc.* |
| 3 | विदुः | know | fr. √विद् *P. perf. 3rd pl.* (**5.28:**) |
| 8 | विचक्षणाः | the wise | fr. विचक्षण *a. m. pl. nom.* |
| 11 | सर्व-कर्म- | of all actions [i.e., कर्म-योग as also taught here] | |
| 10 | -फल-त्यागं | renunciation of the फल (the result) | fr. सर्व-कर्म-फल-त्याग *m. sg. acc.* |
| 12 | त्यागं | [is] त्याग | fr. त्याग *m. sg. acc.* |
| 9 | प्राहुः | [also] say that | fr. प्र + √अह् *P. perf. 3rd pl.* (**5.8.5:** & **5.28:**) |

**त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः। यज्ञदानतपःकर्म न त्याज्यमिति चापरे॥३॥**

(त्याज्यं दोषवत् इति एके, कर्म प्राहुः मनीषिणः। यज्ञदानतपःकर्म, न त्याज्यम् इति च अपरे।)

एके मनीषिणः "कर्म दोषवत् त्याज्यम्" इति प्राहुः। अपरे च "यज्ञ-दान-तपः-कर्म न त्याज्यम्" इति। (**18.3**)

[Now] some learned people say that [all] कर्मन्-s are defective [and thus] to be renounced [i.e., कर्म-योग is not accepted, so सन्न्यास lifestyle alone is for those desiring मोक्ष]. But others think that यज्ञ, दान, and तपस् कर्मन् are not to be renounced [i.e., कर्म-योग is accepted].

| | | | |
|---|---|---|---|
| 1 | एके | [now] some | fr. एक *prn. a. m. pl. nom.* (**4.16.2:**) |
| 2 | मनीषिणः | learned people | fr. मनीषिन् *m. pl. nom.* (**3.15:** & **2.92:**) |
| 4 | कर्म | [all] कर्मन् [-s] | fr. कर्मन् *n. sg. acc.* |
| 5 | दोषवत् | [is/are] defective | fr. दोषवत् *a. n. sg. acc.* (**3.13:**) |
| 6 | त्याज्यम् | [and thus] to be renounced [i.e., कर्म-योग is not accepted, so सन्न्यास lifestyle alone is there for those desiring मोक्ष] | fr. त्याज्य *pot. ps. pt. of* √त्यज् *a. n. sg. acc.* (**6.8:**) |
| 3 | इति प्राहुः | say that | fr. इति *in.*; प्र + √अह् *P. perf.* $3^{rd}$ *pl.* (**5.8.5:** & **5.28:**) |
| 7 | अपरे च | but others | fr. अपर *prn. a. m. pl. nom.* (**4.16.3:**); च *in.* |
| 9 | यज्ञ-दान-तपः- | यज्ञ, दान and तपस् | |
| 10 | -कर्म | कर्मन् | fr. यज्ञ-दान-तपस्-कर्मन् *n. sg. nom.* (**2.24:** & **3.22:**) |
| 11 | न त्याज्यम् | [is/are] not to be renounced [i.e., कर्म-योग is accepted] | fr. इति *in.*; त्याज्य *pot. ps. pt. of* √त्यज् *a. n. sg. nom.* (**6.8:**) (**7.7.2:**) |
| 8 | इति | [think that] | fr. इति *in.* |

**निश्चयं शृणु मे तत्र त्यागे भरतसत्तम। त्यागो हि पुरुषव्याघ्र त्रिविधः सम्प्रकीर्तितः॥४॥**

(निश्चयं शृणु मे तत्र, त्यागे भरतसत्तम। त्यागः हि पुरुषव्याघ्र, त्रिविधः सम्प्रकीर्तितः॥)

तत्र त्यागे मे निश्चयं शृणु, भरत-सत्तम। पुरुष-व्याघ्र, त्यागः हि त्रि-विधः सम्प्रकीर्तितः। (**18.4**)

In regard to त्याग [i.e., कर्म-योग in the previous verse], listen to My conclusion, O अर्जुन. [Since the preceding two opinions are both right and wrong, more needs to be said.] O Fearless Amongst Men, त्याग (renunciation) indeed is well said to be threefold.

| | | | |
|---|---|---|---|
| 1 | तत्र त्यागे | in regard to त्याग [i.e., कर्म-योग in the previous verse] | fr. तत्र *in.*; त्याग *m. sg. loc.* (**7.13.2.b:**) |
| 3 | मे | to My | fr. अहम् *prn. sg. gen.* |
| 4 | निश्चयं | conclusion | fr. निश्चय *m. sg. acc.* |
| 2 | शृणु | listen | fr. √श्रु *5.P. impv.* $2^{nd}$ *sg.* (**5.21.3:**) |
| 5 | भरत-सत्तम | (अर्जुन) O Best Among the Descendants of भरत | fr. भरत-सत्तम *m. sg. voc.* |

| | | | |
|---|---|---|---|
| 6 | पुरुष-व्याघ्र | (अर्जुन) O Fearless [*lit.* “tiger-like”] Amongst Men | fr. पुरुष-व्याघ्र *m. sg. voc.* |
| 7 | त्यागः हि | त्याग (renunciation) indeed | fr. त्याग *m. sg. nom.*; हि *in.* |
| 9 | त्रि-विधः | to be threefold | fr. त्रि-विध *a. m. sg. nom.* |
| 8 | सम्प्रकीर्तितः | is well said | fr. सम्प्रकीर्तित *pp. of* सम् + प्र + √कीर्त् *pt. m. sg. nom.* (**6.6:**) |

**यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत्। यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्॥५॥**
(यज्ञदानतपःकर्म, न त्याज्यं कार्यम् एव तद्। यज्ञः दानं तपः च एव, पावनानि मनीषिणाम्॥)
यज्ञ-दान-तपः-कर्म न त्याज्यं, तद् कार्यम् एव। यज्ञः दानं तपः च एव मनीषिणां पावनानि। (**18.5**)
यज्ञ, दान, and तपस् कर्मन् are not to be renounced [but], indeed, to be done. यज्ञ, दान, and तपस् are indeed purifying for discerning people. [For those who consider themselves doers, subject to injunction and needing purification, कर्म-योग is a means to मोक्ष.]

| | | | |
|---|---|---|---|
| 1 | यज्ञ-दान-तपः- | यज्ञ, दान and तपस् | |
| 2 | -कर्म | कर्मन् | fr. यज्ञ-दान-तपस्-कर्मन् *n. sg. nom.* (**2.24:** & **3.22:**) |
| 3 | न त्याज्यं | [is/are] not to be renounced | fr. न *in.*; त्याज्य *pot. ps. pt. of* √त्यज् *a. n. sg. nom.* (**6.8:**) |
| 4 | तद् | [but] [it/they] | fr. तद् *n. sg. nom.* |
| 5 | कार्यम् एव | indeed [are] to be done | fr. कार्य *pot. ps. pt. of* √कृ *a. n. sg. nom.* (**6.8:**); एव *in.* (**6.19:**) |
| 6 | यज्ञः दानं | यज्ञ, दान | fr. यज्ञ *m. sg. nom.*; दान *n. sg. nom.* |
| 7 | तपः च एव | and तपस् [are] indeed | fr. तपस् *n. sg. nom.* (**3.6:**); च *in.*; एव *in.* (**6.19:**) |
| 9 | मनीषिणां | for discerning people [i.e., for those who consider themselves doers, subject to injunction and needing purification, कर्म-योग is a means to मोक्ष] | fr. मनीषिन् *m. pl. gen.* (**3.15:** & **2.92:**) |
| 8 | पावनानि | purifying | fr. पावन *a. n. pl. nom.* |

**एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च। कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम्॥६॥**

(एतानि अपि तु कर्माणि, सङ्गं त्यक्त्वा फलानि च। कर्तव्यानि इति मे पार्थ, निश्चितम् मतम् उत्तमम्॥)

पार्थ, एतानि कर्माणि अपि तु सङ्गं फलानि च त्यक्त्वा कर्तव्यानि इति मे निश्चितम् उत्तमं मतम्। (**18.6**)

But, O अर्जुन, even these [three] कर्मन्-s are to be done having renounced attachment [to कर्मन्-s] and [their limited] फल [i.e., done without identification with them as "my actions" and with the attitude of कर्म-योग]. This is My decided and final vision.

| | | | |
|---|---|---|---|
| 2 | पार्थ | (अर्जुन) O Son of पृथा | fr. पार्थ *m. sg. voc.* |
| 4 | एतानि | these [three] | fr. एतद् *prn. n. pl. nom.* |
| 5 | कर्माणि | कर्मन्-s | fr. कर्मन् *n. pl. nom.* (**3.22:** & **2.92:**) |
| 3 | अपि | even | fr. अपि *in.* |
| 1 | तु | but | fr. तु *in.* |
| 8 | सङ्गं | attachment [to actions] | fr. सङ्ग *m. sg. acc.* |
| 9 | फलानि च | and [their limited] फल [i.e., done without identification with them as "my actions" and with the attitude of कर्म-योग] | fr. फल *n. pl. acc.*; च *in.* |
| 7 | त्यक्त्वा | having renounced | fr. त्यक्त्वा *in. pt. of* √त्यज् (**2.81:**) |
| 6 | कर्तव्यानि | are to be done | fr. कर्तव्य *pot. ps. pt. of* √कृ *a. n. pl. nom.* (**6.8:**) |
| 10 | इति | [this is] | fr. इति *in.* |
| 11 | मे | My | fr. अहम् *prn. sg. gen.* |
| 12 | निश्चितम् | decided | fr. निश्चित *pp. of* निस् + √चि *a. n. sg. nom.* (**2.24:** & **.27:**) |
| 13 | उत्तमं | [and] final | fr. उत्तम *spc. a. n. sg. nom.* (**6.25:**) |
| 14 | मतम् | vision | fr. मत *pp. of* √मन् *n. sg. nom.* (**6.6:**) |

**नियतस्य तु सन्न्यासः कर्मणो नोपपद्यते। मोहात्तस्य परित्यागस्तामसः परिकीर्तितः॥७॥**
(नियतस्य तु सन्न्यासः, कर्मणः न उपपद्यते। मोहात् तस्य परित्यागः, तामसः परिकीर्तितः॥)
नियतस्य कर्मणः तु सन्न्यासः न उपपद्यते, मोहात् तस्य परित्यागः तामसः परिकीर्तितः। (**18.7**)
—Whereas सन्न्यास (renunciation) of enjoined कर्मन् [i.e., the lifestyle of सन्न्यास for one who is still deluded about the nature of oneself] is not proper [because] परित्याग (renunciation; i.e., simply nondoing) of that [कर्मन्] out of delusion is said to be predominately तमस्.

| | | | |
|---|---|---|---|
| 2 | नियतस्य | of enjoined | fr. नियत *pp. of* नि + √यम् *a. n. sg. gen.* (**6.6:**) |
| 3 | कर्मणः | कर्मन् [i.e., the lifestyle of सन्न्यास for one who is still deluded about the nature of oneself] | fr. कर्मन् *n. sg. gen.* (**3.22:** & **2.92:**) |
| 1 | तु सन्न्यासः | whereas सन्न्यास (renunciation) | fr. तु *in.*; सन्न्यास *m. sg. nom.* |
| 4 | न उपपद्यते | is not proper | fr. न *in.*; उप + √पद् *4.Ā. pr. 3rd sg.* |
| 7 | मोहात् | out of delusion | fr. मोह *m. sg. abl.* |
| 6 | तस्य | of that [कर्मन्] | fr. तद् *prn. n. sg. gen.* |
| 5 | परित्यागः | [because] renunciation [i.e., simply nondoing] | fr. परित्याग *m. sg. nom.* |
| 9 | तामसः | predominately तमस् | fr. तामस *a. m. sg. nom.* |
| 8 | परिकीर्तितः | is said to be | fr. परिकीर्तित *pp. of* परि + √कीर्त् *pt. m. sg. nom.* (**6.6:**) |

**दुःखमित्येव यत्कर्म कायक्लेशभयात्त्यजेत्। स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत्॥८॥**
(दुःखम् इति एव यद् कर्म, कायक्लेशभयात् त्यजेत्। सः कृत्वा राजसं त्यागं, न एव त्यागफलं लभेत्॥)
यद् दुःखम् इति एव काय-क्लेश-भयात् कर्म त्यजेत्, सः राजसं त्यागं कृत्वा त्याग-फलं न एव लभेत्। (**18.8**)
If one were to renounce कर्मन् [i.e., take सन्न्यास] out of fear of affliction to the body [thinking it to be] painful—after doing [this] predominately रजस् renunciation—that one would indeed not gain [any] result of that renunciation.

| | | | |
|---|---|---|---|
| 1 | यद् | if | fr. यद् *in.* (**6.20:**) |
| 6 | दुःखम् इति एव | [thinking it to be] painful | fr. दुःख *n. sg. nom.* (**7.7.2:**); इति *in.*; एव *in.* (**6.19:**) |
| 5 | काय-क्लेश- | of affliction to the body | |
| 4 | -भयात् | out of fear | fr. काय-क्लेश-भय *n. sg. abl.* |
| 3 | कर्म | कर्मन् [i.e., take सन्न्यास] | fr. कर्मन् *n. sg. acc.* (**3.22:**) |
| 2 | त्यजेत् | one were to renounce | fr. √त्यज् *1.P. pot. 3rd sg.* |

| | | | |
|---|---|---|---|
| 10 | सः | that one | fr. तद् *prn. m. sg. nom.* |
| 8 | राजसं | [this] predominately रजस् | fr. राजस *a. m. sg. acc.* |
| 9 | त्यागं | renunciation | fr. त्याग *m. sg. acc.* |
| 7 | कृत्वा | after doing | fr. कृत्वा *in. pt. of* √कृ (**7.19:**) |
| 12 | त्याग-फलं | [any] result of [that] renunciation | fr. त्याग-फल *n. sg. acc.* |
| 11 | न एव लभेत् | would indeed not gain | fr. न *in.*; एव *in.* (**6.19:**); √लभ् *1.P. pot. 3rd sg.* |

**कार्यमित्येव यत्कर्म नियतं क्रियतेऽर्जुन। सङ्गं त्यक्त्वा फलं चैव स त्यागः सात्त्विको मतः॥९॥**

(कार्यम् इति एव यद् कर्म, नियतं क्रियते अर्जुन। सङ्गं त्यक्त्वा फलं च एव, सः त्यागः सात्त्विकः मतः॥)

अर्जुन, यद् सङ्गं फलं च एव त्यक्त्वा नियतं कर्म "कार्यम्" इति एव क्रियते, सः त्यागः सात्त्विकः मतः। (**18.9**)

O अर्जुन, if—renouncing both attachment [to it] and [its] result [i.e., as कर्म-योग]—enjoined कर्मन् is performed as simply what is to be done, [then] that त्याग (renunciation) is considered predominately सत्त्व.

| | | | |
|---|---|---|---|
| 1 | अर्जुन | O अर्जुन | fr. अर्जुन *m. sg. voc.* |
| 2 | यद् | if | fr. यद् *in.* (**6.20:**) |
| 4 | सङ्गं | both attachment [to it] | fr. सङ्ग *m. sg. acc.* |
| 5 | फलं च एव | and [its] result [i.e., as कर्म-योग] | fr. फल *n. sg. acc.*; च *in.*; एव *in.* (**6.19:**) |
| 3 | त्यक्त्वा | renouncing | fr. त्यक्त्वा *in. pt. of* √त्यज् (**2.81:**) |
| 6 | नियतं | enjoined | fr. नियत *pp. of* नि + √यम् *a. n. sg. nom.* (**6.6:**) |
| 7 | कर्म | कर्मन् | fr. कर्मन् *n. sg. nom.* (**3.22:**) |
| 9 | कार्यम् इति एव | as simply what is to be done | fr. कार्य *pot. ps. pt. of* √कृ *a. n. sg. nom.* (**6.8:**) (**7.7.2:**); इति *in.*; एव *in.* (**6.19:**) |
| 8 | क्रियते | is performed | fr. √कृ *ps. pr. 3rd sg.* (**5.37.3:**) |
| 10 | सः त्यागः | [then] that त्याग (renunciation) | fr. तद् *prn. m. sg. nom.*; त्याग *m. sg. nom.* |
| 12 | सात्त्विकः | predominately सत्त्व | fr. सात्त्विक *a. m. sg. nom.* |
| 11 | मतः | is considered | fr. मत *pp. of* √मन् *pt. m. sg. nom.* (**6.6:**) |

**न द्वेष्ट्यकुशलं कर्म कुशले नानुषज्जते। त्यागी सत्त्वसमाविष्टो मेधावी छिन्नसंशयः॥१०॥**

(न द्वेष्टि अकुशलं कर्म, कुशले न अनुषज्जते। त्यागी सत्त्वसमाविष्टः, मेधावी छिन्नसंशयः॥)

सत्त्व-समाविष्टः मेधावी छिन्न-संशयः त्यागी अ-कुशलं कर्म न द्वेष्टि, कुशले न अनुषज्जते। (**18.10**)

The renunciate [whether a कर्म-योगिन् like King जनक or a सन्न्यासिन्] who is endowed with clarity of mind, [thus] who has gained knowledge, and whose doubts have been resolved is not displeased at inauspicious action, nor attached to auspicious [action].

| | | | |
|---|---|---|---|
| 3 | सत्त्व- | with clarity of mind | |
| 2 | -समाविष्टः | who is endowed | fr. सत्त्व-समाविष्ट *a. m. sg. nom.* |
| 4 | मेधावी | [thus] who has gained knowledge | fr. मेधाविन् *a. m. sg. nom.* (**3.15:**) |
| 6 | छिन्न- | have been resolved | |
| 5 | -संशयः | [and] whose doubts | fr. छिन्न-संशय *a. m. sg. nom.* |
| 1 | त्यागी | the renunciate [whether a कर्म-योगिन् like King जनक or a सन्न्यासिन्] | fr. त्यागिन् *a. m. sg. nom.* (**3.15:**) |
| 8 | अ-कुशलं | at inauspicious | fr. अकुशल *a. n. sg. acc.* |
| 9 | कर्म | action | fr. कर्मन् *n. sg. acc.* (**3.22:**) |
| 7 | न द्वेष्टि | is not displeased | fr. न *in.*; √द्विष् *2.P. pr. 3rd sg.* (**2.88:**) |
| 11 | कुशले | to auspicious [action] | fr. कुशल *a. n. sg. loc.* (**7.13.1.e:**) |
| 10 | न अनुषज्जते | nor is attached | fr. न *in.*; अनु + √सज्ज् *ps. pr. 3rd sg.* (**2.101:** & *assimilation [back?] from Prākṛta*) |

**न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः। यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते॥११॥**

(न हि देहभृता शक्यं, त्यक्तुं कर्माणि अशेषतः। यः तु कर्मफलत्यागी, सः त्यागी इति अभिधीयते॥)

देह-भृता हि (=यस्मात्) कर्माणि अशेषतः त्यक्तुं न शक्यम्, यः तु कर्म-फल-त्यागी, सः त्यागी इति अभिधीयते। (**18.11**)

Because one who has [the judgment that one is] the body is not able to completely renounce [all] action, [then] that one—who indeed renounces [at least] the result of actions [i.e., a beginning कर्म-योगिन्]—is called a त्यागिन् (renunciate).

| | | | |
|---|---|---|---|
| 2 | देह-भृता | one who has [the judgment that one is] the body | fr. देह-भृत् *a. m. sg. inst.* (**6.24.2:** & **3.5:**) (**7.7:**) |
| 1 | हि (=यस्मात्) | because | fr. हि *in.* |
| 6 | कर्माणि | [all] action | fr. कर्मन् *n. pl. acc.* (**3.22:**) (**7.20:**) |
| 5 | अशेषतः | completely | fr. अशेषतस् *in.* (**6.19:**) |
| 4 | त्यक्तुं | to renounce | fr. त्यक्तुम् *inf. of* √त्यज् *in.* (**2.81:**) |
| 3 | न शक्यम् | is not able | fr. न *in.*; शक्य *pot. ps. pt. of* √शक् *pt. n. sg. nom.* (**7.28:** *impersonal construction*) |

| | | | |
|---|---|---|---|
| 8 | यः तु | who [thus] indeed | fr. यद् *prn. m. sg. nom.*; तु *in.* |
| 10 | कर्म-फल- | the result of actions [i.e., a beginning कर्मयोगिन्] | |
| 9 | -त्यागी | renounces [at least] | fr. कर्म-फल-त्यागिन् *a. m. sg. nom.* (**3.15:**) |
| 7 | सः | [then] that one | fr. तद् *prn. m. sg. nom.* |
| 12 | त्यागी | a त्यागिन् (renunciate) | fr. त्यागिन् *a. m. sg. nom.* (**3.15:**) |
| 11 | इति अभिधीयते | is [also] called | fr. इति *in.*; अभि + √धा *ps. pr. 3rd sg.* (**5.37.1:**) |

**अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलम्। भवत्यत्यागिनां प्रेत्य न तु सन्न्यासिनां क्वचित्॥१२॥**

(अनिष्टम् इष्टं मिश्रं च, त्रिविधं कर्मणः फलम्। भवति अत्यागिनां प्रेत्य, न तु सन्न्यासिनां क्वचिद्॥)

अ-त्यागिनां प्रेत्य अन्-इष्टम् इष्टं मिश्रं च त्रि-विधं कर्मणः फलं भवति। सन्न्यासिनां तु क्व-चिद् न। (**18.12**)

Those who have not [completely] renounced [कर्मन्], upon passing away, have the threefold results of action—undesirable [hell, etc.], desirable [heaven, etc.], and [their] mixture [i.e., directly regaining the human condition]. But never for the सन्न्यासिन्-s (the complete renunciates).

| | | | |
|---|---|---|---|
| 1 | अ-त्यागिनां | those who have not [completely] renounced [कर्मन्] | fr. अत्यागिन् *a. m. pl. gen.* (**7.12.1.a:**) |
| 2 | प्रेत्य | upon passing away | fr. प्रेत्य *in. pt. of* प्र + √इ (**6.9:**) (**7.19:**) |
| 7 | अन्-इष्टम् | undesirable [hell, etc.] | fr. अनिष्ट *pp. of* √इष् *a. n. sg. nom.* (**2.88:**) |
| 8 | इष्टं | desirable [heaven, etc.] | fr. इष्ट *pp. of* √इष् *a. n. sg. nom.* (**2.88:**) |
| 9 | मिश्रं च | and [their] mixture [i.e., directly regaining the human condition] | fr. मिश्र *a. n. sg. nom.*; च *in.* |
| 4 | त्रि-विधं | the threefold | fr. त्रि-विध *a. n. sg. nom.* |
| 6 | कर्मणः | of action | fr. कर्मन् *n. sg. gen.* (**3.22:**) |
| 5 | फलं | results | fr. फल *n. sg. nom.* |
| 3 | भवति | has, have | fr. √भू *1.P. pr. 3rd sg.* (**7.12.1.a:**) |
| 11 | सन्न्यासिनां | for the सन्न्यासिन्-s (the complete renunciates) | fr. सन्न्यासिन् *m. pl. gen.* (**3.15:**) |
| 10 | तु क्व-चिद् न | but never | fr. तु *in.*; क्व-चिद् *in.* (**4.20:**); न *in.* |

**पञ्चैतानि महाबाहो कारणानि निबोध मे। साङ्ख्ये कृतान्ते प्रोक्तानि सिद्धये सर्वकर्मणाम्॥१३॥**

(पञ्च एतानि महाबाहो, कारणानि निबोध मे। साङ्ख्ये कृतान्ते प्रोक्तानि, सिद्धये सर्वकर्मणाम्॥)

महा-बाहो, साङ्ख्ये कृत-अन्ते प्रोक्तानि एतानि सर्व-कर्मणां सिद्धये पञ्च कारणानि मे निबोध। (**18.13**)

O अर्जुन, pay heed to Me [about] these [following] five causes [i.e., factors] for the accomplishment of all actions, which [factors] have been well told in the teaching that brings an end to action [i.e., in वेदान्त—and summarized in the second chapter onward].

| | | | |
|---|---|---|---|
| 1 | महा-बाहो | (अर्जुन) O Mighty Armed One | fr. महा-बाहु *m. sg. voc.* |
| 10 | साङ्ख्ये | in the teaching | fr. साङ्ख्य *m. sg. loc.* |
| 11 | कृत-अन्ते | that brings an end to action [i.e., in वेदान्त] | fr. कृत-अन्त *m. sg. loc.* |
| 9 | प्रोक्तानि | which [factors] have been well told | fr. प्रोक्त *pp. of* प्र + √वच् *a. n. pl. acc.* |
| 4 | एतानि | [about] these [following] | fr. एतद् *prn. n. pl. acc.* |
| 8 | सर्व-कर्मणां | of all actions | fr. सर्व-कर्मन् *n. pl. gen.* |
| 7 | सिद्धये | for the accomplishment | fr. सिद्धि *f. sg. dat.* |
| 5 | पञ्च | five | fr. पञ्चन् *num. a. n. pl. acc.* (**4.25:**) |
| 6 | कारणानि | causes [i.e., factors] | fr. कारण *n. pl. acc.* |
| 3 | मे | to Me | fr. अहम् *prn. sg. dat.* (**7.10.A.1:**) |
| 2 | निबोध | pay heed | fr. नि + √बुध् *1.P. impv. 2nd sg.* |

**अधिष्ठानं तथा कर्ता करणं च पृथग्विधम्। विविधाश्च पृथक्चेष्टा दैवं चैवात्र पञ्चमम्॥१४॥**

(अधिष्ठानं तथा कर्ता, करणं च पृथग्विधम्। विविधाः च पृथक् चेष्टाः, दैवं च एव अत्र पञ्चमम्॥)

अधिष्ठानं, तथा कर्ता, पृथग्-विधं च करणं, विविधाः च पृथक् चेष्टाः, अत्र पञ्चमं दैवं च एव। (**18.14**)

—The locus [i.e., physical body]; the agent [i.e., अहङ्कार/the doer and experiencer]; the various organs [of action and knowledge, including the mind]; the various kinds of motions [i.e., प्राण-s]; and, indeed, here, the fifth being [their] presiding deities.

| | | | |
|---|---|---|---|
| 1 | अधिष्ठानं | the locus [i.e., physical body] | fr. अधिष्ठान *n. sg. nom.* |
| 2 | तथा कर्ता | the agent [i.e., अहङ्कार/doer and experiencer] | fr. तथा *in.* (**6.19:**); कर्तृ *m. sg. nom.* (**3.38:**) |
| 3 | पृथग्-विधं च | (and) the various | fr. पृथक्-विध *a. n. sg. nom.* (**2.43:**); च *in.* |
| 4 | करणं | organ[s] [of action and knowledge, including the mind] | fr. करण *n. sg. nom.* |
| 5 | विविधाः च पृथक् | (and) the various kinds of | fr. विविध *a. f. pl. nom.*; च *in.*; पृथक् *in.* |
| 6 | चेष्टाः | motions [i.e., प्राण-s] | fr. चेष्टा *f. pl. nom.* |

| | | | |
|---|---|---|---|
| 8 | अत्र | here | fr. अत्र *in.* (**6.19:**) |
| 9 | पञ्चमं | the fifth | fr. पञ्चम *ordinal a. n. sg. nom.* (**4.26:**) |
| 10 | दैवं | being [their] presiding deity [i.e., deities] | fr. दैव *n. sg. nom.* |
| 7 | च एव | and indeed | fr. च *in.*; एव *in.* |

**शरीरवाङ्मनोभिर्यत्कर्म प्रारभते नरः। न्याय्यं वा विपरीतं वा पञ्चैते तस्य हेतवः॥१५॥**

(शरीरवाङ्मनोभिः यद्, कर्म प्रारभते नरः। न्याय्यं वा विपरीतं वा, पञ्च एते तस्य हेतवः॥)

नरः शरीर-वाङ्-मनोभिः यद् न्याय्यं वा विपरीतं वा कर्म प्रारभते, तस्य एते पञ्च हेतवः। (**18.15**)

Whatever action—proper [i.e., adaptive] or otherwise—a person undertakes with the body, speech, or mind [i.e., physical, verbal, or mental action], that [action] has these five [instrumental] factors.

| | | | |
|---|---|---|---|
| 5 | नरः | a person | fr. नर *m. sg. nom.* |
| 7 | शरीर- | with the body | |
| 8 | -वाङ्- | speech | |
| 9 | -मनोभिः | or mind [i.e., physical, verbal, or mental action] | fr. शरीर-वाच्-मनस् *n. pl. inst.* (**2.24:** & **.44:**) |
| 1 | यद् | whatever | fr. यद् *prn. n. sg. acc.* |
| 3 | न्याय्यं वा | proper [i.e., adaptive] | fr. न्याय्य *a. n. sg. acc.* ; वा *in.* |
| 4 | विपरीतं वा | or otherwise | fr. विपरीत *pp. of* वि + परि + √इ *a. n. sg. acc.*; वा *in.* |
| 2 | कर्म | action | fr. कर्मन् *n. sg. acc.* (**3.22:**) |
| 6 | प्रारभते | undertakes | fr. प्र + आ + √रभ् *1.Ā. pr. 3rd sg.* |
| 10 | तस्य | that [action] has | fr. तद् *prn. n. sg. gen.* |
| 11 | एते पञ्च | these five | fr. एतद् *prn. m. pl. nom.*; पञ्चन् *num. a. n. pl. nom.* (**4.25:**) |
| 12 | हेतवः | [instrumental] factors | fr. हेतु *m. pl. nom.* |

**तत्रैवं सति कर्तारमात्मानं केवलं तु यः। पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः॥१६॥**

(तत्र एवं सति कर्तारम्, आत्मानं केवलं तु यः। पश्यति अकृतबुद्धित्वात्, न सः पश्यति दुर्मतिः॥)

एवं तत्र सति अ-कृत-बुद्धित्वात् यः आत्मानं केवलं तु कर्तारं पश्यति, सः दुर्-मतिः न पश्यति। (**18.16**)

When that is so [i.e., that these five alone cause action], the one who, because of an unprepared mind [i.e., hasn't accepted or earned this teaching], sees the I—although pure [of action]—as an agent, that distorted thinker does not see [i.e., this fundamental mistake distorts everything else].

| | | | |
|---|---|---|---|
| 2 | एवं | [is] so [i.e., that these alone cause action] | fr. एवम् *in.* (**6.19:**) |
| 1 | तत्र सति | when that | fr. तत्र *in.* (**6.19:**); सत् *pr. pt. of* √अस् *n. sg. loc.* (**5.19.4:** & **3.12:**) (**7.14.1:**) |
| 4 | अ-कृत- | because of an unprepared | |
| 5 | -बुद्धित्वात् | mind [i.e., hasn't accepted or earned this teaching] | fr. अकृत-बुद्धित्व *n. sg. abl.* (**7.11.1:**) |
| 3 | यः | the one who | fr. यद् *prn. sg. nom.* |
| 7 | आत्मानं | the I | fr. आत्मन् *m. sg. acc.* (**3.22:**) |
| 8 | केवलं तु | although pure [of action] | fr. केवल *a. m. sg. acc.*; तु *in.* |
| 9 | कर्तारं | [as] an agent | fr. कर्तृ *m. sg. acc.* (**3.38:**) |
| 6 | पश्यति | sees | fr. √दृश् *1.P. pr. 3rd sg.* (**5.15.6:**) |
| 10 | सः | that | fr. तद् *prn. m. sg. nom.* |
| 11 | दुर्-मतिः | distorted thinker | fr. दुस्-मति *a. m. sg. nom.* (**2.24:** & **.29:**) |
| 12 | न पश्यति | does not see [i.e., this fundamental mistake distorts everything else] | fr. न *in.*; √दृश् *1.P. pr. 3rd sg.* (**5.15.6:**) |

**यस्य नाहङ्कृतो भावो बुद्धिर्यस्य न लिप्यते। हत्वापि स इमाल्ँलोकान्न हन्ति न निबध्यते॥१७॥**

(यस्य न अहङ्कृतः भावः, बुद्धिः यस्य न लिप्यते। हत्वा अपि सः इमान् लोकान्, न हन्ति न निबध्यते॥)

यस्य अहङ्-कृतः भावः न [अस्ति], यस्य बुद्धिः न लिप्यते, सः इमान् लोकान् हत्वा अपि न हन्ति न निबध्यते। (**18.17**)

One who has no notion that "I did [this]," whose mind is not affected [i.e., who has no guilt or hurt regarding action or inaction]—that one, though [having the duty of] killing these people, does not kill, nor is [that one] bound [by the act, just as a judge passing sentence has no guilt].

| | | | |
|---|---|---|---|
| 1 | यस्य | one who has | fr. यद् *prn. m. sg. gen.* (**7.12.1.a:**) |
| 4 | अहङ्-कृतः | [that] "I did [this]" | fr. अहम्-कृत *a. m. sg. nom.* (**2.55:**) |
| 3 | भावः | notion | fr. भाव *m. sg. nom.* |
| 2 | न [अस्ति] | no | fr. न *in.* |

| | | | |
|---|---|---|---|
| 5 | यस्य बुद्धिः | whose mind | fr. यद् *prn. m. sg. gen.*; बुद्धि *f. sg. nom.* |
| 6 | न लिप्यते | is not affected [i.e., who has no guilt or hurt regarding action or inaction] | fr. न *in.*; √लिप् *ps. pr. 3rd sg.* |
| 7 | सः | that one | fr. तद् *prn. m. sg. nom.* |
| 9 | इमान् लोकान् | these people | fr. इदम् *prn. m. pl. acc.*; लोक *m. pl. acc.* |
| 8 | हत्वा अपि | though [having the duty of] killing | fr. हत्वा *in. pt. of* √हन् (**6.9:** & **.6:**); अपि *in.* |
| 10 | न हन्ति | does not kill | fr. न *in.*; √हन् *2.P. pr. 3rd sg.* |
| 11 | न निबध्यते | nor is [that one] bound [by the act, like a judge passing sentence has no guilt] | fr. न *in.*; नि + √बन्ध् *ps. pr. 3rd sg.* (**5.37.5:**) |

**ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना। करणं कर्म कर्तेति त्रिविधः कर्मसङ्ग्रहः ॥ १८ ॥**

(ज्ञानं ज्ञेयं परिज्ञाता, त्रिविधा कर्मचोदना। करणं कर्म कर्ता इति, त्रिविधः कर्मसङ्ग्रहः ॥ )

ज्ञानं ज्ञेयं परिज्ञाता [इति] त्रि-विधा कर्म-चोदना। करणं कर्म कर्ता इति त्रि-विधः कर्म-सङ्ग्रहः। (**18.18**)

The knowing [of objects; i.e., the thought], the object known, and the knower are the threefold instigators of action. The instrument, the object [i.e., the desired result], and the doer are the threefold constituents of [i.e., factors/requirements for] action.

| | | | |
|---|---|---|---|
| 1 | ज्ञानं | the knowing [of objects; i.e., the thought] | fr. ज्ञान *n. sg. nom.* |
| 2 | ज्ञेयं | the object known | fr. ज्ञेय *pot. ps. pt. of* √ज्ञा *a. n. sg. nom.* (**6.8:**) |
| 3 | परिज्ञाता | and the knower | fr. परिज्ञातृ *a. m. sg. nom.* (**3.38:**) |
| 4 | [इति] त्रि-विधा | [together is] [are] the threefold | fr. त्रि-विधा *a. f. sg. nom.* |
| 5 | कर्म-चोदना | instigator[s] of action | fr. कर्म-चोदना *f. sg. nom.* |
| 6 | करणं | the instrument | fr. करण *n. sg. nom.* |
| 7 | कर्म | the object [i.e., the desired result] | fr. कर्मन् *n. sg. nom.* (**3.22:**) |
| 8 | कर्ता | and the doer | fr. कर्तृ *m. sg. nom.* (**3.38:**) |
| 9 | इति त्रि-विधः | [together is] [are] the threefold | fr. इति *in.*; त्रि-विध *a. m. sg. nom.* |
| 10 | कर्म-सङ्ग्रहः | constituent[s] of [i.e., factors/requirements for] action | fr. कर्म-सङ्ग्रह *m. sg. nom.* |

**ज्ञानं कर्म च कर्ता च त्रिधैव गुणभेदतः। प्रोच्यते गुणसङ्ख्याने यथावच्छृणु तान्यपि॥१९॥**

(ज्ञानं कर्म च कर्ता च, त्रिधा एव गुणभेदतः। प्रोच्यते गुणसङ्ख्याने, यथावत् शृणु तानि अपि॥)

गुण-सङ्ख्याने ज्ञानं कर्म च कर्ता च [इति] गुण-भेदतः त्रि-धा एव प्रोच्यते। तानि अपि यथावत् शृणु। (**18.19**)

In the teaching of the गुण-s, ज्ञान, कर्मन् and कर्तृ are said to be threefold according to the differences [in predominance] of गुण-s. Listen accordingly about them.

| | | | |
|---|---|---|---|
| 2 | गुण- | of the गुण-s | |
| 1 | -सङ्ख्याने | in the teaching | fr. गुण-सङ्ख्यान *n. sg. loc.* |
| 3 | ज्ञानं | ज्ञान | fr. ज्ञान *n. sg. nom.* |
| 4 | कर्म च | कर्मन् | fr. कर्मन् *n. sg. nom.* (**3.22:**); च *in.* |
| 5 | कर्ता च | and कर्तृ | fr. कर्तृ *m. sg. nom.* (**3.38:**); च *in.* |
| 8 | गुण-भेदतः | according to the differences [in predominance] of गुण-s | fr. गुण-भेदतस् *in.* (**6.19:**) |
| 7 | त्रि-धा एव | of three kinds, threefold | fr. त्रि-धा *in.* (**6.19: & 4.28:**); एव *in.* (**6.19:**) |
| 6 | प्रोच्यते | [each is] [are] said to be | fr. प्र + √वच् *ps. pr. 3rd sg.* (**5.37.6: & 2.3.a:**) |
| 11 | तानि अपि | about them [also] | fr. तद् *prn. n. pl. acc.* (**7.5.2.a:**); अपि *in.* |
| 10 | यथावत् | accordingly | fr. यथावत् *in.* (**6.19:**) |
| 9 | शृणु | listen | fr. √श्रु *5.P. impv. 2nd sg.* (**5.21.3:**) |

**सर्वभूतेषु येनैकं भावमव्ययमीक्षते। अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम्॥२०॥**

(सर्वभूतेषु येन एकं, भावम् अव्ययम् ईक्षते। अविभक्तं विभक्तेषु, तद् ज्ञानं विद्धि सात्त्विकम्॥)

येन विभक्तेषु सर्व-भूतेषु एकम् अ-व्ययम् अ-विभक्तं भावम् ईक्षते, तद् ज्ञानं सात्त्विकं विद्धि। (**18.20**)

By which one sees [i.e., knows] the one changeless, undivided existence (भाव) in all divided things—know that ज्ञान (knowledge) to be predominately सत्त्व [i.e., there is only one undivided existence, आत्मन्, not many; here भाव cannot mean प्रकृति, as प्रकृति is not changeless].

| | | | |
|---|---|---|---|
| 1 | येन | by which | fr. यद् *prn. n. sg. inst.* |
| 8 | विभक्तेषु | divided | fr. विभक्त *pp. of* वि + √भज् *a. n. pl. loc.* (**2.81:**) |
| 7 | सर्व-भूतेषु | in all things | fr. सर्व-भूत *n. pl. loc.* |
| 3 | एकम् | the one | fr. एक *prn. a. m. sg. acc.* (**4.16.2:**) |
| 4 | अ-व्ययम् | changeless | fr. अव्यय *a. m. sg. acc.* |
| 5 | अ-विभक्तं | undivided | fr. अविभक्त *pp. of* वि + √भज् *a. n. sg. acc.* (**2.81:**) |
| 6 | भावम् | existence (भाव) | fr. भाव *m. sg. acc.* |
| 2 | ईक्षते | one sees [i.e., knows] | fr. √ईक्ष् *1.Ā. pr. 3rd sg.* |

| | | | |
|---|---|---|---|
| 10 | तद् ज्ञानं | that ज्ञान (knowledge) | fr. तद् *prn. n. sg. acc.*; ज्ञान *n. sg. acc.* |
| 11 | सात्त्विकं | to be predominately सत्त्व [i.e., there is only one undivided existence, आत्मन्, not many; here भाव cannot mean प्रकृति, as प्रकृति, is not changeless] | fr. सात्त्विक *a. n. sg. acc.* |
| 9 | विद्धि | know | fr. √विद् *2.P. impv. 2nd sg.* (**5.6.a:**) |

**पृथक्त्वेन तु यज्ज्ञानं नानाभावान्पृथग्विधान्। वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम्॥ २१॥**

(पृथक्त्वेन तु यद् ज्ञानं, नानाभावान् पृथग्विधान्। वेत्ति सर्वेषु भूतेषु, तद् ज्ञानं विद्धि राजसम्॥)

यद् तु ज्ञानं सर्वेषु भूतेषु पृथग्-विधान् नाना-भावान् पृथक्त्वेन वेत्ति, तद् ज्ञानं राजसं विद्धि। (**18.21**)

—Whereas the knowledge [by] which one understands as separate [from each other] the many existences of different kinds, in all things—know that knowledge [i.e., all philosophies that hold that there are many आत्मन्-s, including the later-day साङ्ख्य philosophy] to be predominately रजस्.

| | | | |
|---|---|---|---|
| 1 | यद् तु ज्ञानं | whereas the knowledge [by] which | fr. यद् *prn. n. sg. nom.*; तु *in.*; ज्ञान *n. sg. nom.* |
| 6 | सर्वेषु | in all | fr. सर्व *prn. a. n. pl. loc.* (**4.16.2:**) |
| 7 | भूतेषु | things | fr. भूत *pp. of* √भू *n. pl. loc.* |
| 5 | पृथग्-विधान् | of different kinds | fr. पृथक्-विध *a. m. pl. acc.* (**2.43:**) |
| 4 | नाना-भावान् | the many existences | fr. नाना-भाव *m. pl. acc.* |
| 3 | पृथक्त्वेन | as separate [from each other] | fr. पृथक्त्वेन *in.* (**7.9.14:**) |
| 2 | वेत्ति | reveals, [one] understands | fr. √विद् *2.P. pr. 3rd sg.* (**5.3:** & **2.42:**) |
| 9 | तद् ज्ञानं | that knowledge | fr. तद् *prn. n. sg. acc.*; ज्ञान *n. sg. acc.* |
| 10 | राजसं | [to be] predominately रजस् [i.e., all philosophies that hold that there are many आत्मन्-s, including the later-day साङ्ख्य philosophy] | fr. राजस *a. n. sg. acc.* |
| 8 | विद्धि | know | fr. √विद् *2.P. impv. 2nd sg.* (**5.6.a:**) |

**यत्तु कृत्स्नवदेकस्मिन्कार्ये सक्तमहैतुकम्। अतत्त्वार्थवदल्पं च तत्तामसमुदाहृतम्॥ २२॥**

(यद् तु कृत्स्नवत् एकस्मिन्, कार्ये सक्तम् अहैतुकम्। अतत्त्वार्थवत् अल्पं च, तद् तामसम् उदाहृतम्॥)

यद् तु एकस्मिन् कार्ये कृत्स्नवत् सक्तं, [यद्] अ-हैतुकम् अ-तत्त्व-अर्थवत् अल्पं च, तद् [ज्ञानं] तामसम् उदाहृतम्। (**18.22**)

But the [knowledge] [by] which one is committed to one single effect [in the universe]—as if it is everything—[which knowledge is] without reason, without truth, and limited [i.e., the unfortunate position of history- and faith-based cults and pop cultures]—that is said to be predominately तमस्.

| | | | |
|---|---|---|---|
| 3 | यद् | [by] which | fr. यद् *prn. n. sg. nom.* |
| 1 | तु | but | fr. तु *in.* |
| 5 | एकस्मिन् | to one single | fr. एक *prn. a. n. sg. loc.* (**7.13.2.d:**) |

| | | | |
|---|---|---|---|
| 6 | कार्ये | effect [in the universe] | fr. कार्य *pot. ps. pt. of* √कृ *n. sg. loc.* (**6.8:**) |
| 7 | कृत्स्नवत् | as if [it] everything | fr. कृत्स्नवत् *in.* (**6.19:**) |
| 4 | सक्तं | [one] is committed | fr. सक्त *pp. of* √सञ्ज् *pt. n. sg. nom.* (**6.6:** & **2.81:**) |
| 8 | अ-हैतुकम् | [which knowledge is] without reason | fr. अहैतुक *a. n. sg. nom.* |
| 9 | अ-तत्त्व-अर्थवत् | without truth | fr. अ-तत्त्वार्थवत् *a. n. sg. nom.* (**3.13:**) |
| 10 | अल्पं च | and limited | fr. अल्प *prn. a. n. sg. nom.* (**4.16.5:**) |
| 11 | तद् | that | fr. तद् *n. sg. nom.* |
| 2 | [ज्ञानं] | [the knowledge] | |
| 13 | तामसम् | predominately तमस् [i.e., the unfortunate position of faith-based and history-based cults and pop cultures] | fr. तामस *a. n. sg. nom.* (**7.7.1:**) |
| 12 | उदाहृतम् | is said to be | fr. उदाहृत *pp. of* उद् + आ + √हृ *pt. n. sg. nom.* |

**नियतं सङ्गरहितमरागद्वेषतः कृतम्। अफलप्रेप्सुना कर्म यत्तत्सात्त्विकमुच्यते॥ २३॥**

(नियतं सङ्गरहितम्, अरागद्वेषतः कृतम्। अफलप्रेप्सुना कर्म, यद् तद् सात्त्विकम् उच्यते॥)

यद् नियतं कर्म सङ्ग-रहितम् अ-राग-द्वेषतः अ-फल-प्रेप्सुना कृतं, तद् सात्त्विकम् उच्यते। (**18.23**)

कर्मन् that is adaptive [i.e., in keeping with धर्म], that is done without identification [i.e., "I did this"], [is] free of attraction or repulsion, [and done] by one without a requirement to obtain [its] result [i.e., done by one whose mind is predominately सत्त्व]—that [कर्मन्] is said to be predominately सत्त्व.

| | | | |
|---|---|---|---|
| 2 | यद् | which, that | fr. यद् *prn. n. sg. nom.* |
| 3 | नियतं | [is] adaptive [i.e., in keeping with धर्म] | fr. नियत *pp. of* नि + √यम् *a. n. sg. nom.* (**6.6:**) |
| 1 | कर्म | कर्मन् | fr. कर्मन् *n. sg. nom.* (**3.22:**) |
| 4 | सङ्ग-रहितम् | without identification [i.e., "I did this"] | fr. सङ्ग-रहित *n. sg. nom.* |
| 5 | अ-राग-द्वेषतः | [is] free of attraction or repulsion | fr. अ-राग-द्वेषतस् *in.* (**6.19:**) |
| 7 | अ-फल-प्रेप्सुना | by one without a requirement to obtain [its] result | fr. अ-फल-प्रेप्सु *a. n. sg. nom.* (**3.30:**) |
| 6 | कृतं | [and] done | fr. कृत *pp. of* √कृ *pt. n. sg. nom.* |
| 8 | तद् | that [कर्मन्] | fr. तद् *prn. n. sg. nom.* |
| 10 | सात्त्विकम् | predominately सत्त्व | fr. सात्त्विक *a. n. sg. nom.* (**7.7.1:**) |
| 9 | उच्यते | is said to be | fr. √वच् *ps. pr.* 3rd *sg.* (**5.37.6:** & **2.3.a:**) |

**यत्तु कामेप्सुना कर्म साहङ्कारेण वा पुनः। क्रियते बहुलायासं तद्राजसमुदाहृतम्॥२४॥**

(यद् तु कामेप्सुना कर्म, साहङ्कारेण वा पुनः। क्रियते बहुलायासं, तद् राजसम् उदाहृतम्॥)

काम-ईप्सुना तु स-अहङ्-कारेण वा पुनः बहुलायासं यद् कर्म क्रियते, तद् राजसम् उदाहृतम्। (**18.24**)

—Whereas कर्मन् that is done with a requirement to attain an object of desire or, again, (done) as a huge effort with excessive pride is said to be predominately रजस् [i.e., it is not the action itself that is रजस्, but the mind that motivates the action that is predominately रजस्].

| | | | |
|---|---|---|---|
| 5 | काम- | an object of desire | |
| 4 | -ईप्सुना | with a requirement to attain | fr. काम-ईप्सु *a. n. sg. inst.* (**7.9.1:**) |
| 1 | तु | whereas | fr. तु *in.* |
| 8 | स-अहङ्-कारेण | with excessive pride | fr. स-अहम्-कार *a. n. sg. inst.* (**7.9.10:**) |
| 6 | वा पुनः | or again | fr. वा *in.*; पुनर् *in.* |
| 7 | बहुल-आयासं | as a huge effort | fr. बहुल-आयास *a. n. sg. nom.* |
| 2 | यद् कर्म | कर्मन् which/that | fr. यद् *prn. n. sg. nom.*; कर्मन् *n. sg. nom.* (**3.22:**) |
| 3 | क्रियते | is done | fr. √कृ *ps. pr. 3rd sg.* (**5.37.3:**) |
| 9 | तद् | [that] | fr. तद् *prn. n. sg. nom.* |
| 11 | राजसम् | predominately रजस् | fr. राजस *a. n. sg. nom.* (**7.7.1:**) |
| 10 | उदाहृतम् | is said to be | fr. उदाहृत *pp. of* उद् + आ + √हृ *pt. n. sg. nom.* |

**अनुबन्धं क्षयं हिंसामनपेक्ष्य च पौरुषम्। मोहादारभ्यते कर्म यत्तत्तामसमुच्यते॥२५॥**

(अनुबन्धं क्षयं हिंसाम्, अनपेक्ष्य च पौरुषम्। मोहात् आरभ्यते कर्म, यद् तद् तामसम् उच्यते॥)

अनुबन्धं क्षयं हिंसां पौरुषं च अन्-अपेक्ष्य मोहात् यद् कर्म आरभ्यते, तद् तामसम् उच्यते। (**18.25**)

कर्मन् that is undertaken out of delusion—without regard to [its] consequence, loss [to oneself or others], injury [to oneself or others], or one's personal capacity—that is said to be predominately तमस् [i.e., the mind that motivates the action is predominately तमस्].

| | | | |
|---|---|---|---|
| 5 | अनुबन्धं | [its] consequence | fr. अनुबन्ध *m. sg. acc.* |
| 6 | क्षयं | loss [to oneself or others] | fr. क्षय *m. sg. acc.* |
| 7 | हिंसां | injury [to oneself or others] | fr. हिंसा *f. sg. acc.* |
| 8 | पौरुषं च | and one's personal capacity | fr. पौरुष *n. sg. acc.*; च *in.* |
| 4 | अन्-अपेक्ष्य | without regard to | fr. अनपेक्ष्य *in. pt. of* अप + √ईक्ष् *a. m. sg. nom.* (**2.8:**) |
| 3 | मोहात् | out of delusion | fr. मोह *m. sg. abl.* (**7.11.1:**) |
| 1 | यद् कर्म | कर्मन् that | fr. यद् *prn. n. sg. nom.*; कर्मन् *n. sg. nom.* (**3.22:**) |

| | | |
|---|---|---|
| 2 आरभ्यते | is undertaken | fr. आ + √रभ् *ps. pr. 3rd sg.* |
| 9 तद् | that | fr. तद् *prn. n. sg. nom.* |
| 11 तामसम् | predominately तमस् | fr. तामस *a. n. sg. nom.* (**7.7.1:**) |
| <u>10</u> उच्यते | is said to be | fr. √वच् *ps. pr. 3rd sg.* (**5.37.6:** & **2.3.a:**) |

**मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः। सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्त्विक उच्यते॥ २६॥**

(मुक्तसङ्गः अनहंवादी, धृत्युत्साहसमन्वितः। सिद्ध्यसिद्ध्योः निर्विकारः, कर्ता सात्त्विकः उच्यते॥)

मुक्त-सङ्गः, अन्-अहं-वादी, धृति-उत्साह-समन्वितः, सिद्धि-अ-सिद्ध्योः निर्-विकारः [च] कर्ता सात्त्विकः उच्यते। (**18.26**)

The कर्तृ (doer—one with the notion of doership) [striving toward] being free from attachment [i.e., not requiring the result], not claiming "I [did this]," endowed with resolve and effort, and being without change in success or non-success—is said to be predominately सत्त्व.

| | | |
|---|---|---|
| 2 मुक्त-सङ्गः | [striving towards] being free from attachment [i.e., not requiring the result] | fr. मुक्त-सङ्ग *a. m. sg. nom.* |
| 3 अन्-अहं-वादी | not claiming "I [did this]" | fr. अन्-अहम्-वादिन् *a. m. sg. nom.* (**2.54:** & **3.15:**) |
| 5 धृति- | with resolve | |
| 6 -उत्साह- | and effort | |
| 4 -समन्वितः | endowed | fr. धृति-उत्साह-समन्वित *a. m. sg. nom.* |
| 8 सिद्धि- | in success | |
| 9 -अ-सिद्ध्योः | or non-success | fr. सिद्धि-असिद्धि *f. du. loc.* (**7.13.1.h:**) |
| 7 निर्-विकारः [च] | and being without change | fr. निस्-विकार *a. m. sg. nom.* (**2.24:** & **.29:**) |
| 1 कर्ता | the कर्तृ (doer—one with the notion of doership) | fr. कर्तृ *m. sg. nom.* (**3.38:**) |
| 11 सात्त्विकः | predominately सत्त्व | fr. सात्त्विक *a. m. sg. nom.* (**7.7.1:**) |
| <u>10</u> उच्यते | is said to be | fr. √वच् *ps. pr. 3rd sg.* (**5.37.6:** & **2.3.a:**) |

**रागी कर्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः। हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः॥ २७॥**

(रागी कर्मफलप्रेप्सुः, लुब्धः हिंसात्मकः अशुचिः। हर्षशोकान्वितः कर्ता, राजसः परिकीर्तितः॥)

रागी, कर्म-फल-प्रेप्सुः, लुब्धः, हिंसा-आत्मकः, अ-शुचिः, हर्ष-शोक-अन्वितः [च] कर्ता राजसः परिकीर्तितः। (**18.27**)

The कर्तृ who has attraction [toward things], who has a requirement to obtain the result of an action, [who] is miserly, whose nature is to hurt [another or oneself], [who] is unclean [physically/mentally] and subject to elation and sorrow—is said to be predominately रजस्.

| | | | |
|---|---|---|---|
| 2 | रागी | who has attraction [towards things] | fr. रागिन् *a. m. sg. nom.*(**3.15:**) |
| 4 | कर्म-फल- | the result of an action | |
| 3 | -प्रेप्सुः | who has a requirement to obtain | fr. कर्म-फल-प्रेप्सु *a. m. sg. nom.* |
| 5 | लुब्धः | [who] is miserly | fr. लुब्ध *pp. of* √लुभ् *a. m. sg. nom.* (**2.76:** & **.78:**) |
| 6 | हिंसा-आत्मकः | whose nature is to hurt [another or oneself] | fr. हिंसा-आत्मक *a. m. sg. nom.* |
| 7 | अ-शुचिः | [who] is unclean [physically/mentally] | fr. अशुचि *a. m. sg. nom.* |
| 9 | हर्ष-शोक- | elation and sorrow | |
| 8 | -अन्वितः [च] | [and] subject to | fr. हर्ष-शोक-अन्वित *a. m. sg. nom.* |
| 1 | कर्ता | the doer | fr. कर्तृ *m. sg. nom.* (**3.38:**) |
| 11 | राजसः | predominately रजस् | fr. राजस *a. m. sg. nom.* (**7.7.1:**) |
| 10 | परिकीर्तितः | is said to be | fr. परिकीर्तित *pp. of* परि + √कीर्त् *pt. m. sg. nom.* (**6.6:**) |

**अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोऽलसः। विषादी दीर्घसूत्री च कर्ता तामस उच्यते॥ २८॥**

(अयुक्तः प्राकृतः स्तब्धः, शठः नैष्कृतिकः अलसः। विषादी दीर्घसूत्री च, कर्ता तामसः उच्यते॥)

अ-युक्तः, प्राकृतः, स्तब्धः, शठः, नैष्कृतिकः, अ-लसः, विषादी, दीर्घ-सूत्री च कर्ता तामसः उच्यते। (**18.28**)

The कर्तृ who is disturbed, immature, unable to bow [i.e., show respect physically or mentally], [who is] deceptive, abusive, lazy, depressed, and procrastinating [about addressing any of these and other problems]—is said to be predominately तमस्.

| | | | |
|---|---|---|---|
| 2 | अ-युक्तः | who is disturbed, not composed | fr. अयुक्त *pp. of* √युज् *a. m. sg. nom.* (**2.81:**) |
| 3 | प्राकृतः | immature | fr. प्राकृत *a. m. sg. nom.* |
| 4 | स्तब्धः | unable to bow [i.e., show respect physically or mentally] | fr. स्तब्ध *pp. of* √स्तभ् *a. m. sg. nom.* (**2.76:** & **.78:**) |
| 5 | शठः | [who is] deceptive | fr. शठ *a. m. sg. nom.* |
| 6 | नैष्कृतिकः | abusive | fr. नैष्कृतिक *a. m. sg. nom.* |
| 7 | अ-लसः | lazy | fr. अलस *a. m. sg. nom.* |
| 8 | विषादी | depressed | fr. विषादिन् *a. m. sg. nom.* (**3.15:**) |
| 9 | दीर्घ-सूत्री च | and procrastinating [about addressing any of these and other problems] | fr. दीर्घ-सूत्रिन् *a. m. sg. nom.* (**3.15:**); च *in.* |
| 1 | कर्ता | the doer | fr. कर्तृ *m. sg. nom.* (**3.38:**) |
| 11 | तामसः | predominately तमस् | fr. तामस *a. m. sg. nom.* (**7.7.1:**) |
| 10 | उच्यते | is said to be | fr. √वच् *ps. pr.* $3^{rd}$ *sg.* (**5.37.6:** & **2.3.a:**) |

**बुद्धेर्भेदं धृतेश्चैव गुणतस्त्रिविधं शृणु। प्रोच्यमानमशेषेण पृथक्त्वेन धनञ्जय॥ २९॥**

(बुद्धेः भेदं धृतेः च एव, गुणतः त्रिविधं शृणु। प्रोच्यमानम् अशेषेण, पृथक्त्वेन धनञ्जय॥)

बुद्धेः धृतेः च एव गुणतः त्रि-विधं भेदं पृथक्त्वेन अ-शेषेण प्रोच्यमानं शृणु, धनञ्-जय। (**18.29**)

Listen to what is going to be told separately and completely about the threefold difference according to [predominance of] गुण-s of the mind and of resolve, O अर्जुन.

| | | | |
|---|---|---|---|
| 8 | बुद्धेः | of the mind | fr. बुद्धि *f. sg. gen.* |
| 9 | धृतेः च एव | and of resolve | fr. धृति *f. sg. gen.*; च *in.*; एव *in.* (**6.19:**) |
| 7 | गुणतः | according to [predominance of] गुण-s | fr. गुणतस् *in.* (**6.19:**) |
| 5 | त्रि-विधं | about the threefold | fr. त्रि-विध *a. m. sg. acc.* |
| 6 | भेदं | difference | fr. भेद *m. sg. acc.* |

| | | | |
|---|---|---|---|
| 3 | पृथक्त्वेन | separately | fr. पृथक्त्वेन *in.* (**7.9.14:**) |
| 4 | अ-शेषेण | and completely | fr. अशेषेण *in.* (**7.9.14:**) |
| 2 | प्रोच्यमानं | to what is going to be told | fr. प्रोच्यमान *pr. ps. pt. of* √वच् *a. m. sg. acc.* (**6.5:** & **5.37.6:**) |
| 1 | शृणु | listen | fr. √श्रु *5.P. impv. 2nd sg.* (**5.21.3:**) |
| 10 | धनञ्-जय | (अर्जुन) O Winner of Laurels | fr. धन-म्-जय *m. sg. voc.* (**2.55:**) |

**प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये। बन्धं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी॥३०॥**

(प्रवृत्तिं च निवृत्तिं च, कार्याकार्ये भयाभये। बन्धं मोक्षं च या वेत्ति, बुद्धि सा पार्थ सात्त्विकी॥)

पार्थ, या प्रवृत्तिं च निवृत्तिं च, कार्य-अ-कार्ये, भय-अ-भये, बन्धं मोक्षं च वेत्ति, सा बुद्धि सात्त्विकी। (**18.30**)

O अर्जुन, the mind that knows [the nature of] pursuit and renunciation, what is to be done and not to be done, what is dangerous and not dangerous, and what is bondage and complete freedom—that [mind] is predominately सत्त्व.

| | | | |
|---|---|---|---|
| 1 | पार्थ | (अर्जुन) O Son of पृथा | fr. पार्थ *m. sg. voc.* |
| 3 | या | which, that | fr. यद् *prn. f. sg. nom.* |
| 5 | प्रवृत्तिं च | pursuit [and] | fr. प्रवृत्ति *f. sg. acc.*; च *in.* |
| 6 | निवृत्तिं च | and renunciation | fr. निवृत्ति *f. sg. acc.*; च *in.* |
| 7 | कार्य- | what is to be done | |
| 8 | -अ-कार्ये | and not to be done | fr. कार्य-अकार्य *n. du. acc.* |
| 9 | भय- | what is dangerous | |
| 10 | -अ-भये | and not dangerous | fr. भय-अभय *n. du. acc.* |
| 11 | बन्धं | and what is bondage | fr. बन्ध *m. sg. acc.* |
| 12 | मोक्षं च | and complete freedom | fr. मोक्ष *m. sg. acc.*; च *in.* |
| 4 | वेत्ति | knows [the nature of] | fr. √विद् *2.P. pr. 3rd sg.* (**5.3:** & **2.42:**) |
| 13 | सा | that [mind] | fr. तद् *prn. f. sg. nom.* |
| 2 | बुद्धि | the mind | fr. बुद्धि *f. sg. nom.* |
| 14 | सात्त्विकी | [is] predominately सत्त्व | fr. सात्त्विकी *a. f. sg. nom.* |

**यया धर्ममधर्मं च कार्यं चाकार्यमेव च। अयथावत्प्रजानाति बुद्धिः सा पार्थ राजसी॥३१॥**

(यया धर्मम् अधर्मं च, कार्यं च अकार्यम् एव च। अयथावत् प्रजानाति, बुद्धिः सा पार्थ राजसी॥)

पार्थ, यया धर्मम् अ-धर्मं च, कार्यं च अ-कार्यं च एव अ-यथावत् प्रजानाति, सा बुद्धिः राजसी। (**18.31**)

O अर्जुन, the mind with which one wrongly knows what is धर्म and अधर्म and [also wrongly], indeed, what is to be done and not to be done—that [mind] is predominately रजस्.

| | | | |
|---|---|---|---|
| 1 | पार्थ | (अर्जुन) O Son of पृथा | fr. पार्थ *m. sg. voc.* |
| 3 | यया | with which | fr. यद् *prn. f. sg. inst.* |
| 6 | धर्मम् | what is धर्म | fr. धर्म *m. sg. acc.* |
| 7 | अ-धर्मं च | and अधर्म | fr. अधर्म *m. sg. acc.*; च *in.* |
| 9 | कार्यं च | (and) what is to be done | fr. कार्य *n. sg. acc.*; च *in.* |
| 10 | अ-कार्यं | not to be done | fr. अकार्य *n. sg. acc.* |
| 8 | च एव | and [also wrongly] indeed | fr. च *in.*; एव *in.* (**6.19:**) |
| 5 | अ-यथावत् | wrongly | fr.अयथावत् *in.* (**6.19:**) |
| 4 | प्रजानाति | one knows | fr. प्र + √ज्ञा *9.P. pr. 3rd sg.* (**5.23.2:** & **5.3:**) |
| 11 | सा | that [mind] | fr. तद् *prn. f. sg. nom.* |
| 2 | बुद्धिः | the mind | fr. बुद्धि *f. sg. nom.* |
| 12 | राजसी | [is] predominately रजस् | fr. राजसी *a. f. sg. nom.* |

**अधर्मं धर्ममिति या मन्यते तमसावृता। सर्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ तामसी॥३२॥**

(अधर्मं धर्मम् इति या, मन्यते तमसा आवृता। सर्वार्थान् विपरीतान् च, बुद्धिः सा पार्थ तामसी॥)

पार्थ, या तमसा आवृता अ-धर्मं धर्मम् इति, सर्व-अर्थान् च विपरीतान् मन्यते, सा बुद्धिः तामसी। (**18.32**)

O अर्जुन, the mind which, covered with ignorance, considers अधर्म to be धर्म and all things as contrary [to what they are]—that [mind] is predominately तमस्.

| | | | |
|---|---|---|---|
| 1 | पार्थ | (अर्जुन) O Son of पृथा | fr. पार्थ *m. sg. voc.* |
| 3 | या | which | fr. यद् *prn. f. sg. nom.* |
| 5 | तमसा | with ignorance | fr. तमस् *n. sg. inst.* (**3.6:**) |
| 4 | आवृता | covered | fr. आवृता *pp. of* आ + √वृ *a. f. sg. nom.* |

| | | | |
|---|---|---|---|
| 7 | अ-धर्मं | अधर्म | fr. अधर्म *m. sg. acc.* |
| 8 | धर्मम् इति | to be धर्म | fr. धर्म *m. sg. acc.* (**7.7.2:** *or may not be in nom.*); इति *in.* |
| 9 | सर्व-अर्थान् च | and all things | fr. सर्व-अर्थ *m. pl. acc.*; च *in.* |
| 10 | विपरीतान् | as contrary [to what they are] | fr. विपरीत *pp. of* वि + परि + √इ *a. m. pl. acc.* |
| 6 | मन्यते | considers | fr. √मन् *4.Ā. pr. 3rd sg.* |
| 11 | सा | that [mind] | fr. तद् *prn. f. sg. nom.* |
| 2 | बुद्धिः | the mind | fr. बुद्धि *f. sg. nom.* |
| 12 | तामसी | [is] predominately तमस् | fr. तामसी *a. f. sg. nom.* |

**धृत्या यया धारयते मनःप्राणेन्द्रियक्रियाः। योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्त्विकी॥३३॥**

(धृत्या यया धारयते, मनःप्राणेन्द्रियक्रियाः। योगेन अव्यभिचारिण्या, धृतिः सा पार्थ सात्त्विकी॥)

पार्थ, यया धृत्या अ-व्यभिचारिण्या योगेन मनः-प्राण-इन्द्रिय-क्रियाः धारयते, सा धृतिः सात्त्विकी। (**18.33**)

O अर्जुन, [the] unswerving resolve with which one sustains activities of the mind, the physiological functions, and the organs [of action and sensing]—through [unswerving] योग (a life of discipline)—that resolve is predominately सत्त्व.

| | | | |
|---|---|---|---|
| 1 | पार्थ | (अर्जुन) O Son of पृथा | fr. पार्थ *m. sg. voc.* |
| 4 | यया | with which | fr. यद् *prn. f. sg. inst.* |
| 3 | धृत्या | resolve | fr. धृति *f. sg. inst.* |
| 2 | अ-व्यभिचारिण्या | [the] unswerving | fr. अव्यभिचारिणी *a. f. sg. inst.* (**3.15:** & **3.9:** & **2.92:**) |
| 10 | योगेन | through [unswerving] योग (a life of discipline) | fr. योग *m. sg. inst.* |
| 7 | मनः- | of the mind | |
| 8 | -प्राण- | the physiological functions | |
| 9 | -इन्द्रिय- | and the organs [of action and sensing] | |
| 6 | -क्रियाः | activities | fr. मनस्-प्राण-इन्द्रिय-क्रिया *f. pl. acc.* (**2.24:**) |
| 5 | धारयते | one sustains | fr. √धृ *Ā. cs. pr. 3rd sg.* |
| 11 | सा धृतिः | that resolve | fr. तद् *prn. f. sg. nom.*; धृति *f. sg. nom.* |
| 12 | सात्त्विकी | [is] predominately सत्त्व | fr. सात्त्विकी *a. f. sg. nom.* |

**यया तु धर्मकामार्थान्धृत्या धारयतेऽर्जुन। प्रसङ्गेन फलाकाङ्क्षी धृतिः सा पार्थ राजसी॥३४॥**

(यया तु धर्मकामार्थान्, धृत्या धारयते अर्जुन। प्रसङ्गेन फलाकाङ्क्षी, धृतिः सा पार्थ राजसी॥)

अर्जुन पार्थ, यया तु धृत्या फल-आकाङ्क्षी प्रसङ्गेन धर्म-काम-अर्थान् धारयते, सा धृतिः राजसी। (**18.34**)

—Whereas, O अर्जुन, Son of पृथा, [the] resolve with which one, being desirous of results, sustains [activities for] religious merit, pleasure, and security [but not for मोक्ष]—according to [every] opportunity—that resolve is predominately रजस्.

| | | | |
|---|---|---|---|
| 2 | अर्जुन | O अर्जुन | fr. अर्जुन *m. sg. voc.* |
| 3 | पार्थ | (अर्जुन) O Son of पृथा | fr. पार्थ *m. sg. voc.* |
| 5 | यया | with which | fr. यद् *prn. f. sg. inst.* |
| 1 | तु | whereas | fr. तु *in.* |
| 4 | धृत्या | [the] resolve | fr. धृति *f. sg. inst.* |
| 6 | फल-आकाङ्क्षी | [one] being desirous of results | fr. फल-आकाङ्क्षिन् *a. m. sg. nom.* (**3.15:**) |
| 11 | प्रसङ्गेन | according to [every] opportunity | fr. प्रसङ्ग *in.* (**7.9.14:**) |
| 8 | धर्म- | religious merit | |
| 9 | -काम- | pleasure | |
| 10 | -अर्थान् | and security [but not for मोक्ष] | fr. धर्म-काम-अर्थ *m. pl. acc.* |
| 7 | धारयते | sustains [activities for] | fr. √धृ *Ā. cs. pr. 3rd sg.* |
| 12 | सा धृतिः | that resolve | fr. तद् *prn. f. sg. nom.*; धृति *f. sg. nom.* |
| 13 | राजसी | is predominately रजस् | fr. राजसी *a. f. sg. nom.* |

**यया स्वप्नं भयं शोकं विषादं मदमेव च। न विमुञ्चति दुर्मेधा धृतिः सा पार्थ तामसी॥३५॥**

(यया स्वप्नं भयं शोकं, विषादं मदम् एव च। न विमुञ्चति दुर्मेधाः, धृतिः सा पार्थ तामसी॥)

पार्थ, यया दुर्-मेधाः स्वप्नं भयं शोकं विषादं मदम् एव च न विमुञ्चति, सा धृतिः तामसी। (**18.35**)

O अर्जुन, the [resolve] by which one whose thinking is distorted does not give up sleep, fear, sorrow, depression, or intoxication—that resolve [to not change] is predominately तमस्.

| | | | |
|---|---|---|---|
| 1 | पार्थ | (अर्जुन) O Son of पृथा | fr. पार्थ *m. sg. voc.* |
| 2 | यया | [the resolve] with which | fr. यद् *prn. f. sg. inst.* |
| 3 | दुर्-मेधाः | the one whose thinking is distorted | fr. दुस्-मेधस् *n. sg. nom.* (**2.24:** & **2.29:** & **3.6.i:**) |

| | | | |
|---|---|---|---|
| 5 | स्वप्नं | sleep | fr. स्वप्न *m. sg. acc.* |
| 6 | भयं | fear | fr. भय *n. sg. acc.* |
| 7 | शोकं | sorrow | fr. शोक *m. sg. acc.* |
| 8 | विषादं | depression | fr. विषाद *m. sg. acc.* |
| 9 | मदम् एव च | or intoxication | fr. मद *m. sg. acc.*; एव *in.* (**6.19:**); च *in.* |
| 4 | न विमुञ्चति | does not give up | fr. न *in.*; वि + √मुच् *6.P. pr.* $3^{rd}$ *sg.* (**5.17.1:**) |
| 10 | सा धृतिः | that resolve [to not change] | fr. तद् *prn. f. sg. nom.*; धृति *f. sg. nom.* |
| <u>11</u> | तामसी | [is] predominately तमस् | fr. तामसी *a. f. sg. nom.* |

**सुखं त्विदानीं त्रिविधं शृणु मे भरतर्षभ। अभ्यासाद्रमते यत्र दुःखान्तं च निगच्छति।। ३६।।**
**यत्तदग्रे विषमिव परिणामेऽमृतोपमम्। तत्सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजम्।। ३७।।**

(सुखं तु इदानीं त्रिविधं, शृणु मे भरतर्षभ। अभ्यासात् रमते यत्र, दुःखान्तं च निगच्छति।।
यद् तद् अग्रे विषम् इव, परिणामे अमृतोपमम्। तद् सुखं सात्त्विकं प्रोक्तम्, आत्मबुद्धिप्रसादजम्।। )

भरत-ऋषभ, इदानीं तु त्रि-विधं सुखं मे शृणु। यत्र अभ्यासात् रमते, दुःख-अन्तं च निगच्छति, यद् तद् अग्रे विषम् इव परिणामे अ-मृत-उपमम् [भवति], आत्म-बुद्धि-प्रसाद-जम्, तद् सुखं सात्त्विकं प्रोक्तम्। (**18.36-37**)

But now, O अर्जुन, listen to Me about the threefold happiness. That in which one discovers happiness by [daily] repetition [of listening and contemplating the teaching] and gains the end of sorrow, that which in the beginning is like poison [as one is for the first time inquiring into the source of the guilt and hurt that for lifetimes have driven one to seek small gratifications in objects] [but], upon a change [in clarity of mind], is like immortal nectar, born of clarity of self-knowledge—that happiness is said to be predominately सत्त्व.

| | | | |
|---|---|---|---|
| 2 | भरत-ऋषभ | (अर्जुन) O Prominent Among the Descendants of भरत | fr. भरत-ऋषभ *m. sg. voc.* |
| 1 | इदानीं तु | but now | fr. इदानीम् *in.* (**6.19:**); तु *in.* |
| 5 | त्रि-विधं | about the threefold | fr. त्रि-विध *a. n. sg. acc.* |
| 6 | सुखं | happiness | fr. सुख *n. sg. acc.* |
| 4 | मे | to Me | fr. अहम् *prn. sg. dat.* (**7.10.A.1:**) |
| 3 | शृणु | listen | fr. √श्रु *5.P. impv.* $2^{nd}$ *sg.* (**5.21.3:**) |
| 7 | यत्र | [that] in which | fr. यत्र *in.* (**6.19:**) |
| 9 | अभ्यासात् | by [daily] repetition [of listening and contemplating of the teaching] | fr. अभ्यास *m. sg. abl.* |
| 8 | रमते | one discovers happiness | fr. √रम् *1.Ā. pr.* $3^{rd}$ *sg.* |
| 11 | दुःख-अन्तं | the end of sorrow | fr. दुःख-अन्त *m. sg. acc.* |
| 10 | च निगच्छति | and gains | fr. च *in.*; नि + √गम् *1.P. pr.* $3^{rd}$ *sg.* (**5.15.6:**) |

| | | | |
|---|---|---|---|
| 12 | यद् तद् | that which | fr. यद् *prn. n. sg. nom.*; तद् *prn. n. sg. nom.* |
| 13 | अग्रे | in the beginning | fr. अग्र *n. sg. loc.* |
| 14 | विषम् इव | [is] like poison | fr. विष *n. sg. nom.*; इव *in.* (**6.19:**) |
| 15 | परिणामे | [but] upon a change [in clarity of mind] | fr. परिणाम *m. sg. loc.* (**7.13.1.h:**) |
| 17 | अ-मृत- | immortal nectar | |
| 16 | -उपमम् | [is] like | fr. अमृत-उपम *a. n. sg. nom.* |
| 19 | आत्म-बुद्धि- | of self-knowledge | |
| 18 | -प्रसाद-जम् | born of clarity | fr. आत्म-बुद्धि-प्रसाद-ज *a. n. sg. nom.* (**6.24.3:**) |
| 20 | तद् सुखं | that happiness | fr. तद् *prn. n. sg. nom.*; सुख *n. sg. nom.* |
| 22 | सात्त्विकं | predominately सत्त्व | fr. सात्त्विक *a. n. sg. nom.* (**7.7.1:**) |
| 21 | प्रोक्तम् | is said to be | fr. प्रोक्त *pp. of* प्र + √वच् *pt. n. sg. nom.* (**6.6:** & **2.3.a:** & **2.80:**) |

**विषयेन्द्रियसंयोगाद्यत्तदग्रेऽमृतोपमम्। परिणामे विषमिव तत्सुखं राजसं स्मृतम्।। ३८।।**

(विषयेन्द्रियसंयोगात्, यद् तद् अग्रे अमृतोपमम्। परिणामे विषम् इव, तद् सुखं राजसं स्मृतम्।। )

यद् तद् विषय-इन्द्रिय-संयोगात्, अग्रे अ-मृत-उपमं परिणामे विषम् इव [भवति], तद् सुखं राजसं स्मृतम्। (**18.38**)

That which is [born] from the contact of the senses with [their] objects, which in the beginning seems like nectar [but], upon [any] change [in the object, the capacity to acquire, the senses, or the mind], becomes like poison—that happiness is said to be predominately रजस्.

| | | | |
|---|---|---|---|
| 1 | यद् तद् | that which [is] | fr. यद् *prn. n. sg. nom.*; तद् *prn. n. sg. nom.* |
| 4 | विषय- | with [their] objects | |
| 3 | -इन्द्रिय- | of the senses | |
| 2 | -संयोगात् | [born] from the contact | fr. विषय-इन्द्रिय-संयोग *m. sg. abl.* |
| 6 | अग्रे | in the beginning | fr. अग्र *n. sg. loc.* |
| 5 | अ-मृत-उपमं | which seems like nectar | fr. अमृत-उपम *a. n. sg. nom.* |
| 7 | परिणामे | [but] upon [any] change [in the object, capacity to acquire, senses, or mind] | fr. परिणाम *m. sg. loc.* (**7.13.1.h:**) |
| 8 | विषम् इव | [becomes] like poison | fr. विष *n. sg. nom.*; इव *in.* (**6.19:**) |

| | | | |
|---|---|---|---|
| 9 | तद् सुखं | that happiness | fr. तद् *prn. n. sg. nom.*; सुख *n. sg. nom.* |
| 11 | राजसं | predominately रजस् | fr. राजस *a. n. sg. nom.* (**7.7.1:**) |
| 10 | स्मृतम् | is cited, is said to be | fr. स्मृत *pp. of* √स्मृ *pt. n. sg. nom.* |

**यदग्रे चानुबन्धे च सुखं मोहनमात्मनः। निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतम्॥३९॥**

(यद् अग्रे च अनुबन्धे च, सुखं मोहनं आत्मनः। निद्रालस्यप्रमादोत्थं, तद् तामसम् उदाहृतम्॥)

यद् च सुखं निद्रा-आलस्य-प्रमाद-उत्थम् अग्रे अनुबन्धे च आत्मनः मोहनं, तद् तामसम् उदाहृतम्। (**18.39**)

Happiness [i.e., lack of pain or lack of trouble of effort] that arises from sleepiness, laziness, and carelessness, which in the beginning and in the end is self-deluding—that is said to be predominately तमस्.

| | | | |
|---|---|---|---|
| 1 | यद् च सुखं | (and) happiness [i.e., lack of pain or lack of trouble of effort] which/that | fr. यद् *prn. n. sg. nom.*; च *in.*; सुख *n. sg. nom.* |
| 3 | निद्रा- | from sleepiness | |
| 4 | -आलस्य- | laziness | |
| 5 | -प्रमाद- | and carelessness | |
| 2 | -उत्थम् | arises | fr. निद्रा-आलस्य-प्रमाद-उत्थ *a. n. sg. nom.* |
| 6 | अग्रे | [which] in the beginning | fr. अग्र *n. sg. loc.* |
| 7 | अनुबन्धे च | and in the end | fr. अनुबन्ध *n. sg. loc.*; च *in.* |
| 8 | आत्मनः मोहनं | [is] self-deluding | fr. आत्मन् *m. sg. gen.* (**3.22:**); मोहन *a. n. sg. nom.* |
| 9 | तद् | that | fr. तद् *prn. n. sg. nom.* |
| 11 | तामसम् | predominately तमस् | fr. तामस *a. n. sg. nom.* (**7.7.1:**) |
| 10 | उदाहृतम् | is said to be | fr. उदाहृत *pp. of* उद् + आ + √हृ *pt. n. sg. nom.* |

**न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः। सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः॥४०॥**

(न तद् अस्ति पृथिव्यां वा, दिवि देवेषु वा पुनः। सत्त्वं प्रकृतिजैः मुक्तं, यद् एभिः स्यात् त्रिभिः गुणैः॥)

पृथिव्यां दिवि वा देवेषु वा पुनः तद् सत्त्वं न अस्ति, यद् एभिः प्रकृति-जैः त्रिभिः गुणैः मुक्तं स्यात्। (**18.40**)

There is no existent thing on earth, in the sky, or even among the gods that can be free from these three गुण-s, born as प्रकृति (nature) [i.e., ब्रह्मन्/reality, the self, the eternal subject, the "I" of the Lord and of every being, is alone free of the गुण-s; all bodies and minds are not].

| | | | |
|---|---|---|---|
| 3 | पृथिव्यां | on earth | fr. पृथिवी *f. sg. loc.* |
| 4 | दिवि वा | in the sky | fr. द्यु *f. sg. loc.* (**3.35:**); वा *in.* |
| 5 | देवेषु वा पुनः | or even among the gods | fr. देव *m. pl. loc.*; वा *in.*; पुनर् *in.* |
| 2 | तद् सत्त्वं | an existent thing | fr. तद् *prn. n. sg. nom.* (**7.3.2:**); सत्त्व *n. sg. nom.* |
| 1 | न अस्ति | [there] is no | fr. न *in.*; √अस् *2.P. pr. 3rd sg.* |
| 6 | यद् | which, that | fr. यद् *prn. n. sg. nom.* |
| 9 | एभिः | from these | fr. एतद् *prn. m. pl. abl.* |
| 12 | प्रकृति-जैः | born as प्रकृति (nature) | fr. प्रकृति-ज *a. m. pl. abl.* (**6.24.3:**) |
| 10 | त्रिभिः | three | fr. त्रि *num. a. m. pl. abl.* (**4.25:**) |
| 11 | गुणैः | गुण-s | fr. गुण *m. pl. abl.* |
| 8 | मुक्तं | free | fr. मुक्त *pp. of* √मुच् *a. m. sg. nom.* (**2.80:**) |
| 7 | स्यात् | can be | fr. √अस् *2.P. pot. 3rd sg.* (**5.19.4:**) |

**ब्राह्मणक्षत्रियविशां शूद्राणां च परन्तप। कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः॥४१॥**

(ब्राह्मणक्षत्रियविशां, शूद्राणां च परन्तप। कर्माणि प्रविभक्तानि, स्वभावप्रभवैः गुणैः॥)

परन्-तप, ब्राह्मण-क्षत्रिय-विशां शूद्राणां च कर्माणि स्व-भाव-प्रभवैः गुणैः प्रविभक्तानि। (**18.41**)

O अर्जुन, the कर्मन्-s of ब्राह्मण-s, क्षत्रिय-s, वैश्य-s, and of शूद्र-s are divided by the [predominance of] गुण-s arising from their nature. [In India these titles also arise from birth, as those who completely accept कर्मन् understand that one's birth matches one's nature and needs].

| | | | |
|---|---|---|---|
| 1 | परन्-तप | (अर्जुन) O Vexer of Foes | fr. पर-म्-तप *m. sg. voc.* (**2.55:**) |
| 3 | ब्राह्मण- | of ब्राह्मण-s | |
| 4 | -क्षत्रिय- | क्षत्रिय-s | |
| 5 | -विशां | वैश्य-s | fr. ब्राह्मण-क्षत्रिय-विश् *f. pl. gen.* |
| 6 | शूद्राणां च | and of शूद्र-s | fr. शूद्र *m. pl. gen.*; च *in.* |
| 2 | कर्माणि | the कर्मन्-s | fr. कर्मन् *n. pl. nom.* (**3.22:**) |

| | | |
|---|---|---|
| 10 स्व-भाव- | from their nature | |
| 9 -प्रभवैः | arising | fr. स्व-भाव-प्रभव *a. m. pl. inst.* |
| 8 गुणैः | by the [predominance of] गुण-s | fr. गुण *m. pl. inst.* |
| 7 प्रविभक्तानि | are divided | fr. प्रविभक्त *pp. of* प्र + वि + √भज् *pt. m. pl. nom.* (**2.81:**) |

**शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च। ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम्॥ ४२॥**
(शमः दमः तपः शौचं, क्षान्तिः आर्जवम् एव च। ज्ञानं विज्ञानम् आस्तिक्यं, ब्रह्मकर्म स्वभावजम्॥)
शमः दमः तपः शौचं क्षान्तिः आर्जवं ज्ञानं विज्ञानम् आस्तिक्यम् एव च स्व-भाव-जं ब्रह्म-कर्म। (**18.42**)
The कर्मन् [i.e., the disposition showing through the activity] of ब्राह्मण-s—that is born of their nature—is composure, restraint, prayerful discipline, cleanliness, accommodation, straightforwardness, knowledge [and its] assimilation, and acceptance of the veracity of वेद.

| | | |
|---|---|---|
| 3 शमः | [is] composure | fr. शम *m. sg. nom.* |
| 4 दमः | restraint | fr. दम *m. sg. nom.* |
| 5 तपः | prayerful discipline | fr. तपस् *n. sg. nom.* (**3.6:**) |
| 6 शौचं | cleanliness | fr. शौच *n. sg. nom.* |
| 7 क्षान्तिः | accommodation | fr. क्षान्ति *f. sg. nom.* |
| 8 आर्जवं | straightforwardness | fr. आर्जव *n. sg. nom.* |
| 9 ज्ञानं | knowledge | fr. ज्ञान *n. sg. nom.* |
| 10 विज्ञानम् | [and its] assimilation | fr. विज्ञान *n. sg. nom.* |
| 11 आस्तिक्यम् एव च | and acceptance of the veracity of वेद | fr. आस्तिक्य *n. sg. nom.* |
| 2 स्व-भाव-जं | that is born of their nature | fr. स्व-भाव-ज *a. n. sg. nom.* (**6.24.3:**) |
| 1 ब्रह्म-कर्म | the कर्मन् [i.e., the disposition showing through their activity] of ब्राह्मण-s | fr. ब्रह्म-कर्मन् *n. sg. nom.* (**3.22:**) |

**शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम्। दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम्॥ ४३॥**

(शौर्यं तेजः धृतिः दाक्ष्यं, युद्धे च अपि अपलायनम्। दानम् ईश्वरभावः च, क्षात्रं कर्म स्वभावजम्॥ )

शौर्यं, तेजः, धृतिः, दाक्ष्यं, युद्धे च अपि अ-पलायनं, दानम्, ईश्वर-भावः च स्व-भाव-जं क्षात्रं कर्म। (**18.43**)

The कर्मन् [i.e., the disposition showing through the activity] of क्षत्रिय-s—that is born of their nature—is valor, self-confidence, resolve, adroitness [i.e., ability to act without confusion in sudden situations], not turning away in a conflict, charity, and leadership.

| | | | |
|---|---|---|---|
| 4 | शौर्यं | [is] valor | fr. शौर्य *n. sg. nom.* |
| 5 | तेजः | self-confidence | fr. तेजस् *n. sg. nom.* (**3.6:**) |
| 6 | धृतिः | resolve | fr. धृति *f. sg. nom.* |
| 7 | दाक्ष्यं | adroitness [i.e., ability to act without confusion in sudden situations] | fr. दाक्ष्य *n. sg. nom.* |
| 9 | युद्धे च अपि | in a conflict | fr. युद्ध *pp. of* √युध् *n. sg. loc.* (**2.76:** & **.78:**); च *in.*; अपि *in.* |
| 8 | अ-पलायनं | not turning away | fr. अपलायन *n. sg. nom.* |
| 10 | दानम् | charity | fr. दान *n. sg. nom.* |
| 11 | ईश्वर-भावः च | and leadership | fr. ईश्वर-भाव *m. sg. loc.*; च *in.* |
| 3 | स्व-भाव-जं | that is born of their nature | fr. स्व-भाव-ज *a. n. sg. nom.* (**6.24.3:**) |
| 2 | क्षात्रं | of क्षत्रिय-s | fr. क्षात्र *n. sg. nom.* |
| 1 | कर्म | the कर्मन् [i.e., the disposition showing through their activity] | fr. कर्मन् *n. sg. nom.* (**3.22:**) |

**कृषिगौरक्ष्यवाणिज्यं वैश्यकर्म स्वभावजम्। परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम्॥ ४४॥**

(कृषिगौरक्ष्यवाणिज्यं, वैश्यकर्म स्वभावजम्। परिचर्यात्मकं कर्म, शूद्रस्य अपि स्वभावजम्॥ )

कृषि-गौरक्ष्य-वाणिज्यं स्व-भाव-जं वैश्य-कर्म। परिचर्या-आत्मकम् अपि स्व-भाव-जं शूद्रस्य कर्म। (**18.44**)

The कर्मन् [i.e., the activity, not the disposition] of वैश्य-s—that is born of their nature—is agriculture, maintaining animals, or commerce. The कर्मन् of शूद्र-s—that is born of their nature—is in the form of service [to others, which is essential in all societies].

| | | | |
|---|---|---|---|
| 3 | कृषि- | [is] agriculture | |
| 4 | -गौरक्ष्य- | maintaining animals | |
| 5 | -वाणिज्यं | or commerce | fr. कृषि-गौरक्ष्य-वाणिज्य *n. sg. nom.* |
| 2 | स्व-भाव-जं | that is born of their nature | fr. स्व-भाव-ज *a. n. sg. nom.* (**6.24.3:**) |
| 1 | वैश्य-कर्म | the कर्मन् [i.e., the activity, not the disposition] of वैश्य-s | fr. वैश्य-कर्मन् *n. sg. nom.* (**3.22:**) |

| | | | |
|---|---|---|---|
| 11 | परिचर्या- | of service [to others, which essential in all societies] | |
| 10 | -आत्मकम् | [is] in the form | fr. परिचर्या-आत्मक *a. n. sg. nom.* |
| 6 | अपि | [and] | fr. अपि *in.* |
| 9 | स्व-भाव-जं | that is born of their nature | fr. स्व-भाव-ज *a. n. sg. nom.* (**6.24.3:**) |
| 8 | शूद्रस्य | of शूद्र-s | fr. शूद्र *m. sg. gen.* (**7.4.1:**) |
| 7 | कर्म | the कर्मन् [i.e., the activity, not the disposition] | fr. कर्मन् *n. sg. nom.* (**3.22:**) |

**स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः। स्वकर्मनिरतः सिद्धिं यथा विन्दति तच्छृणु॥ ४५॥**

(स्वे स्वे कर्मणि अभिरतः, संसिद्धिं लभते नरः। स्वकर्मनिरतः सिद्धिं, यथा विन्दति तद् शृणु॥ )

स्वे स्वे कर्मणि अभिरतः नरः संसिद्धिं लभते। यथा स्व-कर्म-निरतः सिद्धिं विन्दति, तद् शृणु। (**18.45**)

A person dedicated in his or her own कर्मन् (duty) attains success [i.e., a satisfaction of having done happily what is to be done and not requiring a change to become happier]. In which way, one gains success, being dedicated to one's duty—to this, please listen.

| | | | |
|---|---|---|---|
| 3 | स्वे स्वे | in one's own | fr. स्व *prn. a. m. sg. loc.* (**7.6.B.2.e:**) |
| 4 | कर्मणि | कर्मन् (duty) | fr. कर्मन् *n. sg. loc.* (**3.22:** & **2.92:**) |
| 2 | अभिरतः | dedicated | fr. अभिरत *pp. of* अभि + √रम् *a. m. sg. nom.* (**6.6:**) |
| 1 | नरः | a person | fr. नर *m. sg. nom.* |
| 6 | संसिद्धिं | success [i.e., a satisfaction of having done happily what is to be done and not requiring a change to become happier] | fr. संसिद्धि *f. sg. acc.* |
| 5 | लभते | attains | fr. √लभ् *1.Ā. pr. 3rd sg.* |
| 7 | यथा | in which way | fr. यथा *in.* (**6.19:**) |
| 11 | स्व-कर्म- | to one's duty | |
| 10 | -निरतः | being dedicated | fr. स्व-कर्म-निरत *a. m. sg. nom.* |
| 9 | सिद्धिं | success | fr. सिद्धि *f. sg. acc.* |
| 8 | विन्दति | one gains | fr. √विद् *6.P. pr. 3rd sg.* (**5.17.1:**) |
| 12 | तद् | to that, to this | fr. तद् *prn. n. sg. acc.* |
| 13 | शृणु | please listen | fr. √श्रु *5.P. impv. 2nd sg.* (**5.21.3:**) |

**यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम्। स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः॥ ४६॥**

(यतः प्रवृत्तिः भूतानां, येन सर्वम् इदं ततम्। स्वकर्मणा तम् अभ्यर्च्य, सिद्धिं विन्दति मानवः॥)

यतः भूतानां प्रवृत्तिः, येन इदं सर्वं ततं, तं स्व-कर्मणा अभ्यर्च्य, मानवः सिद्धिं विन्दति। (**18.46**)

From which is the origin of [all] beings and by which all this is pervaded—[by] invoking [i.e., showing as a worship] that [Lord] with one's duty [i.e., by converting duty into a worship through an appreciation of the Lord as the doer, the action, and the result], a person attains success.

| | | | |
|---|---|---|---|
| 1 | यतः | from which | fr. यतस् *in.* (**6.19:**) |
| 2 | भूतानां प्रवृत्तिः | [is] the origin of [all] beings | fr. भूत *pp. of* √भू *n. pl. gen.*; प्रवृत्ति *f. sg. nom.* |
| 3 | येन | [and] by which | fr. यद् *prn. m. sg. inst.* |
| 4 | इदं सर्वं | all this | fr. इदम् *prn. n. sg. nom.*; सर्व *prn. a. n. sg. nom.* (**4.16.2:**) |
| 5 | ततं | is pervaded | fr. तत *pp. of* √तन् *pt. n. sg. nom.* (**6.6:**) |
| 7 | तं | that [Lord] | fr. तद् *prn. m. sg. acc.* |
| 8 | स्व-कर्मणा | with one's duty [i.e., converting duty into a worship by an appreciation of the Lord as the doer, the action, and the result] | fr. स्व-कर्मन् *n. sg. inst.* (**3.22:** & **2.92:**) |
| 6 | अभ्यर्च्य | [by] invoking [i.e., showing as a worship] | fr. अभ्यर्च्य *in. pt. of* अभि + √अर्च् (**6.9:**) |
| 9 | मानवः | a person | fr. मानव *m. sg. nom.* |
| 11 | सिद्धिं | success | fr. सिद्धि *f. sg. acc.* |
| 10 | विन्दति | attains | fr. √विद् *6.P. pr. 3rd sg.* (**5.17.1:**) |

**श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्। स्वभावनियतं कर्म कुर्वन्नाप्नोति किल्बिषम्॥ ४७॥**

(श्रेयान् स्वधर्मः विगुणः, परधर्मात् स्वनुष्ठितात्। स्वभावनियतं कर्म, कुर्वन् न आप्नोति किल्बिषम्॥)

वि-गुणः स्व-धर्मः स्वनुष्ठितात् पर-धर्मात् श्रेयान्। स्व-भाव-नियतं कर्म कुर्वन्, किल्बिषं न आप्नोति। (**18.47**)

One's own duty—[even if] devoid of merit [i.e., even if it does not create पुण्य]—is better than a different duty [even if] well performed [because inner maturity, not social climbing, leads to श्रेयस्]. Doing duty enjoined according to one's disposition, one incurs no fault [e.g., conflict].

| | | | |
|---|---|---|---|
| 2 | वि-गुणः | [even if] devoid of merit [i.e., even if it does not create पुण्य] | fr. विगुण *a. m. sg. nom.* |
| 1 | स्व-धर्मः | one's own duty | fr. स्व-धर्म *m. sg. nom.* |
| 5 | स्वनुष्ठितात् | [even if] well performed | fr. स्वनुष्ठित *pp. of* अनु + √स्था *a. m. sg. abl.* (**2.11:** & **6.6:** & **2.101:**) |
| 4 | पर-धर्मात् | than a different duty | fr. पर-धर्म *m. sg. abl.* |
| 3 | श्रेयान् | [is] better | fr. श्रेयस् *cpv. a. m. sg. nom.* (**6.25:** & **3.14:**) |

| | | | |
|---|---|---|---|
| 9 | स्व-भाव- | according to one's disposition | |
| 8 | -नियतं | enjoined | fr. स्व-भाव-नियत *a. n. sg. acc.* |
| 7 | कर्म | duty | fr. कर्मन् *n. sg. acc.* (**3.22:**) |
| 6 | कुर्वन् | doing | fr. कुर्वत् *pr. pt. of* √कृ *pt. m. sg. nom.* (**5.22.1:** & **3.12:**) |
| 11 | किल्बिषं | fault [e.g., conflict] | fr. किल्बिष *n. sg. acc.* |
| 10 | न आप्नोति | one incurs no | fr. न *in.*; √आप् *5.P. pr. 3rd sg.* |

**सहजं कर्म कौन्तेय सदोषमपि न त्यजेत्। सर्वारम्भा हि दोषेण धूमेनाग्निरिवावृताः॥ ४८॥**

(सहजं कर्म कौन्तेय, सदोषम् अपि न त्यजेत्। सर्वारम्भाः हि दोषेण, धूमेन अग्निः इव आवृताः॥)

कौन्तेय, स-दोषम् अपि सह-जं कर्म न त्यजेत्, सर्व-आरम्भाः हि (=यस्मात्) दोषेण आवृताः धूमेन अग्निः इव। (**18.48**)

O अर्जुन, one should not give up [one's] natural duty—even though defective [i.e., even though it consists of the three गुण-s and, hence, is part of संसार; *cf.* 18.3–4]—because all [other] undertakings are covered with [the same] fault, like [all ritual] fire [is enveloped] by [irritating] smoke.

| | | | |
|---|---|---|---|
| 1 | कौन्तेय | (अर्जुन) O Son of कुन्ती | fr. कौन्तेय *m. sg. voc.* |
| 5 | स-दोषम् अपि | even though defective [i.e., even though it consists of the three गुण-s and, hence, is part of संसार] | fr. स-दोष *a. n. sg. acc.*; अपि *in.* |
| 3 | सह-जं | [one's] natural | fr. सह-ज *a. n. sg. acc.* (**6.24.3:**) |
| 4 | कर्म | duty | fr. कर्मन् *n. sg. acc.* (**3.22:**) |
| 2 | न त्यजेत् | one should not give up | fr. न *in.*; √त्यज् *1.P. pot. 3rd sg.* (**7.25.1.d:**) |
| 7 | सर्व-आरम्भाः | all [other] undertakings | fr. सर्व-आरम्भ *m. pl. nom.* |
| 6 | हि (=यस्मात्) | because | fr. हि *in.* |
| 9 | दोषेण | with [the same] fault | fr. दोष *m. sg. inst.* (**2.92:**) |
| 8 | आवृताः | are covered | fr. आवृत *pp. of* आ + √वृ *pt. m. pl. nom.* |
| 11 | धूमेन | [is enveloped] by [irritating] smoke | fr. धूम *m. sg. inst.* |
| 10 | अग्निः इव | like [all ritual] fire | fr. अग्नि *m. sg. nom.*; इव *in.* (**6.19:**) |

**असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः। नैष्कर्म्यसिद्धिं परमां सन्न्यासेनाधिगच्छति॥ ४९॥**

(असक्तबुद्धिः सर्वत्र, जितात्मा विगतस्पृहः। नैष्कर्म्यसिद्धिं परमां, सन्न्यासेन अधिगच्छति॥ )

सर्वत्र अ-सक्त-बुद्धिः जित-आत्मा विगत-स्पृहः सन्न्यासेन परमां नैष्कर्म्य-सिद्धिम् अधिगच्छति। (**18.49**)

One whose mind is not attached anywhere, [who] has mastery over the mind, and [is] free from yearning [all through कर्म-योग], [then]—by सन्न्यास (renunciation) [i.e., by knowledge of the self as actionless]—attains the exalted accomplishment that is actionlessness.

| | | | |
|---|---|---|---|
| 2 | सर्वत्र | anywhere | fr. सर्वत्र *in.* (**6.19:**) |
| 1 | अ-सक्त-बुद्धिः | one whose mind is not attached | fr. असक्त-बुद्धि *a. m. sg. nom.* |
| 3 | जित-आत्मा | [who] has mastery over the mind | fr. जित-आत्मन् *a. m. sg. nom.* (**3.22:**) |
| 4 | विगत-स्पृहः | [and] [is] free from yearning [all through कर्म-योग] | fr. विगत-स्पृह *a. m. sg. nom.* |
| 5 | सन्न्यासेन | [then] by सन्न्यास (renunciation) [i.e., by knowledge of the self as actionless] | fr. सन्न्यास *m. sg. inst.* |
| 7 | परमां | the exalted | fr. परमा *spv. a. f. sg. acc.* (**6.25:**) |
| 9 | नैष्कर्म्य- | that is actionlessness | |
| 8 | -सिद्धिम् | accomplishment | fr. नैष्कर्म्य-सिद्धि *f. sg. acc.* |
| 6 | अधिगच्छति | attains | fr. अधि + √गम् *1.P. pr. 3rd sg.* (**5.15.6:**) |

**सिद्धिं प्राप्तो यथा ब्रह्म तथाप्नोति निबोध मे। समासेनैव कौन्तेय निष्ठा ज्ञानस्य या परा॥ ५०॥**

(सिद्धिं प्राप्तः यथा ब्रह्म, तथा आप्नोति निबोध मे। समासेन एव कौन्तेय, निष्ठा ज्ञानस्य या परा॥ )

कौन्तेय, यथा सिद्धिं प्राप्तः ब्रह्म आप्नोति, या ज्ञानस्य परा निष्ठा, तथा समासेन एव मे निबोध। (**18.50**)

O अर्जुन, in the way one who has attained success [of कर्म-योग] attains ब्रह्मन्, which is the final conclusion of knowledge [i.e., unlike knowledge of everything else, which can have no final conclusion]—in that way, in brief, pay heed to Me.

| | | | |
|---|---|---|---|
| 1 | कौन्तेय | (अर्जुन) O Son of कुन्ती | fr. कौन्तेय *m. sg. voc.* |
| 2 | यथा | in which way | fr. यथा *in.* (**6.19:**) |
| 4 | सिद्धिं | the success [of कर्म-योग] | fr. सिद्धि *f. sg. acc.* |
| 3 | प्राप्तः | one who has attained | fr. प्राप्त *pp. of* प्र + √आप् *a. m. sg. nom.* |
| 6 | ब्रह्म | ब्रह्मन् | fr. ब्रह्मन् *n. sg. acc.* (**3.22:**) |
| 5 | आप्नोति | attains | fr. √आप् *5.P. pr. 3rd sg.* |

| | | | |
|---|---|---|---|
| 7 | या | which [is] | fr. यद् *prn. f. sg. nom.* |
| 10 | ज्ञानस्य | of knowledge | fr. ज्ञान *n. sg. gen.* |
| 8 | परा | the final | fr. परा *prn. a. f. sg. nom.* (**4.16.3:**) |
| 9 | निष्ठा | conclusion | fr. निष्ठा *f. sg. nom.* |
| 11 | तथा | in that way | fr. तथा *in.* (**6.19:**) |
| 12 | समासेन एव | in brief | fr. समासेन *in.* (**7.9.14:**); एव *in.* (**6.19:**) |
| 14 | मे | to Me | fr. अहम् *prn. sg. dat.* (**7.10.A.1:**) |
| 13 | निबोध | pay heed | fr. नि + √बुध् *1.P. impv. 2nd sg.* |

**बुद्ध्या विशुद्धया युक्तो धृत्यात्मानं नियम्य च। शब्दादीन्विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च॥५१॥**
**विविक्तसेवी लघ्वाशी यतवाक्कायमानसः। ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः॥५२॥**
**अहङ्कारं बलं दर्पं कामं क्रोधं परिग्रहम्। विमुच्य निर्ममः शान्तो ब्रह्मभूयाय कल्पते॥५३॥**

(बुद्ध्या विशुद्धया युक्तः, धृत्या आत्मानं नियम्य च। शब्दादीन् विषयान् त्यक्त्वा, रागद्वेषौ व्युदस्य च॥
विविक्तसेवी लघ्वाशी, यतवाक्कायमानसः। ध्यानयोगपरः नित्यं, वैराग्यं समुपाश्रितः॥
अहङ्कारं बलं दर्पं, कामं क्रोधं परिग्रहं। विमुच्य निर्ममः शान्तः, ब्रह्मभूयाय कल्पते॥)

विशुद्धया बुद्ध्या युक्तः, धृत्या आत्मानं नियम्य च, शब्द-आदीन् विषयान् त्यक्त्वा, राग-द्वेषौ व्युदस्य च, विविक्त-सेवी, लघु-आशी, यत-वाक्-काय-मानसः, नित्यं ध्यान-योग-परः, वैराग्यं समुपाश्रितः, अहङ्-कारं बलं दर्पं कामं क्रोधं परिग्रहं [च] विमुच्य, निर्-ममः, शान्तः — ब्रह्म-भूयाय कल्पते। (**18.51-53**)

[That one] endowed with a clear mind and, by resolve, gaining mastery over the body-mind complex [so it is not wasted chasing fancies]; giving up the [requiring of] sense objects beginning with sound, etc., and giving up [i.e., being free from the hold of] attraction and repulsion; having the disposition to repair to a quiet place; having the habit of eating lightly [to stay bright in this quiet lifestyle]; whose speech, body, and mind are mastered; [who is] always keeping contemplation and dedication [i.e., focuses only on oneself] as the ultimate; [who is] completely committed to objectivity; [who is] free from a notional "I," power, arrogance, desire, anger, and possession(s); [who is] free from the judgment "[this] is mine" and is clear—that one is fit for being ब्रह्मन् (reality) [i.e., for simply being oneself, without mistaken notions of reality].

| | | | |
|---|---|---|---|
| 2 | विशुद्धया | with a clear | fr. विशुद्धा *pp. of* वि + √शुध् *a. f. sg. inst.* (**2.76: & .78:**) |
| 3 | बुद्ध्या | mind | fr. बुद्धि *f. sg. inst.* |
| 1 | युक्तः | [that one] endowed | fr. युक्त *pp. of* √युज् *a. m. sg. nom.* (**2.81:**) |
| 4 | धृत्या | [and] by resolve | fr. धृति *f. sg. inst.* |

| | | | |
|---|---|---|---|
| 6 | आत्मानं | the body-mind complex | fr. आत्मन् *m. sg. acc.* (**3.22:**) |
| 5 | नियम्य च | [and] gaining mastery over | fr. नियम्य *in. pt. of* नि + √यम् (**6.9:**); च *in.* |
| 9 | शब्द-आदीन् | beginning with sound, etc. | fr. शब्द-आदि *a. m. pl. acc.* (**6.39:**) |
| 8 | विषयान् | the [requiring of] sense objects | fr. विषय *m. pl. acc.* |
| 7 | त्यक्त्वा | [and] giving up | fr. त्यक्त्वा *in. pt. of* √त्यज् (**2.81:**) |
| 11 | राग-द्वेषौ | attraction and repulsion | fr. राग-द्वेष *m. du. acc.* |
| 10 | व्युदस्य च | and giving up [i.e., being free from the hold of] | fr. व्युदस्य *in. pt. of* वि + उद् + √अस् |
| 12 | विविक्त-सेवी | having the disposition to repair to a quiet place | fr. विविक्त-सेविन् *a. m. sg. nom.* (**3.15:**) |
| 13 | लघु-आशी | having the habit of eating lightly [to stay bright in this quiet lifestyle] | fr. लघु-आशीन् *a. m. sg. nom.* (**3.15:**) |
| 17 | यत- | are mastered | |
| 14 | -वाक्- | whose speech | |
| 15 | -काय- | body | |
| 16 | -मानसः | and mind | fr. यत-वाच्-काय-मानस *a. m. sg. nom.* (**2.24:**) |
| 18 | नित्यं | [who is] always | fr. नित्यम् *in.* (**7.8.8:**) |
| 19 | ध्यान-योग-परः | keeping contemplation and dedication [i.e., focuses only on oneself] as the ultimate | fr. ध्यान-योग-पर *a. m. sg. nom.* |
| 21 | वैराग्यं | to objectivity | fr. वैराग्य *n. sg. acc.* (**7.8.5:**) |
| 20 | समुपाश्रितः | [who is] completely committed | fr. समुपाश्रित *pp. of* सम् + उप + आ + √श्रि *a. m. sg. nom.* |
| 23 | अहङ्-कारं | a notional "I" | fr. अहम्-कार *m. sg. acc.* (**2.55:**) (**7.19:**) |
| 24 | बलं | power | fr. बल *n. sg. acc.* |
| 25 | दर्पं | arrogance | fr. दर्प *m. sg. acc.* |
| 26 | कामं | desire | fr. काम *m. sg. acc.* |
| 27 | क्रोधं | anger | fr. क्रोध *m. sg. acc.* |
| 28 | परिग्रहं [च] | and possession(s) | fr. परिग्रह *m. sg. acc.* |
| 22 | विमुच्य | [who is] free from | fr. विमुच्य *in. pt. of* वि + √मुच् (**7.19.2:**) |
| 29 | निर्-ममः | [who is] free from the judgment "[this] is mine" | fr. निस्-मम *a. m. sg. nom.* (**2.24: & .29:**) |
| 30 | शान्तः | [and] is clear | fr. शान्त *pp. of* √शम् *a. m. sg. nom.* (**6.6:** *irreg.* & **2.55:**) |
| 32 | ब्रह्म-भूयाय | for being ब्रह्मन् (reality) [i.e., for simply being oneself, without mistaken notions of reality] | fr. ब्रह्म-भूय *n. sg. dat.* (**7.10.B.1:**) |
| 31 | कल्पते | that one is fit | fr. √क्लृप् *1.Ā. pr.* $3^{rd}$ *sg.* (**5.3:** & **2.3:**) |

**ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति। समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम्॥५४॥**

(ब्रह्मभूतः प्रसन्नात्मा, न शोचति न काङ्क्षति। समः सर्वेषु भूतेषु, मद्भक्तिं लभते पराम्॥)

ब्रह्म-भूतः प्रसन्न-आत्मा न शोचति न काङ्क्षति, सर्वेषु भूतेषु समः परां मद्-भक्तिं लभते। (**18.54**)

Attaining ब्रह्मन् [by the knowledge that the limitless ब्रह्मन् is, I am, all this, including oneself] [and thus] with a cheerful mind, one neither grieves nor requires [anything]. [Thus] being the same (सम) toward all beings, [one] attains the ultimate भक्ति (devotion) to Me.

| | | | |
|---|---|---|---|
| 1 | ब्रह्म-भूतः | attaining ब्रह्मन् [by the knowledge that the limitless ब्रह्मन् is, I am, all this, including oneself] | fr. ब्रह्म-भूत *a. m. sg. nom.* |
| 2 | प्रसन्न-आत्मा | [and thus] with a cheerful mind | fr. प्रसन्न-आत्मन् *a. m. sg. nom.* (**3.22:**) |
| 3 | न शोचति | one neither grieves | fr. न *in.*; √शुच् *1.P. pr. 3rd sg.* |
| 4 | न काङ्क्षति | nor requires [anything] | fr. न *in.*; √काङ्क्ष् *1.P. pr. 3rd sg.* |
| 6 | सर्वेषु | towards all | fr. सर्व *prn. a. n. pl. loc.* (**4.16.2:**) |
| 7 | भूतेषु | beings | fr. भूत *pp. of* √भू *n. pl. loc.* (**6.6:** *irreg.* & **2.55:**) (**7.13.2.b:**) |
| 5 | समः | [thus] being the same (सम) | fr. सम *a. m. sg. nom.* |
| 9 | परां | the ultimate | fr. परा *prn. a. f. sg. acc.* (**4.16.3:**) |
| 10 | मद्-भक्तिं | भक्ति (devotion) to Me | fr. मद्-भक्ति *f. sg. acc.* (**2.24:** & **.43:**) |
| 8 | लभते | [one] attains | fr. √लभ् *1.Ā. pr. 3rd sg.* |

**भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः। ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्॥५५॥**

(भक्त्या माम् अभिजानाति, यावान् यः च अस्मि तत्त्वतः। ततः मां तत्त्वतः ज्ञात्वा, विशते तदनन्तरम्॥)

[तया] भक्त्या माम् अभिजानाति, यावान् तत्त्वतः च यः अस्मि। ततः मां तत्त्वतः ज्ञात्वा, तद्-अन्-अन्तरं विशते। (**18.55**)

By [that] भक्ति, one knows Me—who I am in extent [as everything] and in reality [as the only thing, the only reality]. Therefore, knowing Me in reality, that one [as though] enters [Me] immediately after that [i.e., by knowledge alone one attains Me even while living].

| | | | |
|---|---|---|---|
| 1 | [तया] भक्त्या | by [that] भक्ति | fr. भक्ति *f. sg. inst.* |
| 3 | माम् | Me | fr. अहम् *prn. sg. acc.* |
